Reply: When a property that has a permanent substratum produces a peculiarity in its subtratum, a practice or repitition which would be of the nature of such a property would, gradually, reach the highest limit of excellence; as for instance when gold is repeatedly heated and treated by the method of '*puṭapaka*,' its purity gradually reaches the highest limit in acquiring the character of the *raktasāra* (?). As for the *heating of water*, it has got no permanent substratum, wherein reptetion could bring it up to the highest limit; this absence of the permanent substratum is proved by the fact of the water entirely disappearing on the application of great heat. Then as for the practice of *jumping*, it is not productive of any peculiarity in its substratum; because the first jumping having been totally destroyed, leaving no traces behind, the second and subsequent jumpings might be the effects of other forces and efforts, like an altogether new jumping (and hence any susequent excellence of jumping need not necessarily be attributed to the previous jumping). It is for this reason that we find that when the man is tired by three or four jumps, his limit of jumping begins to decline, on account of the decrease of strength (and this could not be if practice brought about gradual improvement). As for *buddhi* on the other hand, it has a permanent substratum, and brings about peculiar characters in its substratum; as we find that though something may not be comprehended at first, it becomes duly comprehended, when the *buddhi* is repeatedly applied to it. And thus the previous repitition always producing a higher peculiarity in it at each step of the practice, when the practice is kept up continuously and with great care for a long time, the *buddhi*, having obtained fresh force due to *dharma* born of *yoga*, must reach its highest limit; and there is nothing unreasonable or improbable in this.

Then again it has been argued that, 'yogis cannot perceive supersensuous things,—because they are living beings—like ourselves'; and if this has been argued with regard to all men, then it becomes superfluous (as we too do not admit it of all men); and as for any particular kind of men, our opponent does not admit of any such (as they do not admit of men acquiring any powers by *yoga*); if he should know of any such man, then his argument would become contrary to the means of knowledge whereby such a person (who would form the subject of his conclusion) would be known (as the argument is meant to deny the existence of any such person with peculiar powers &c.).

Objection: "Your argument is an instance of '*prasangasādhana*' (the proving of an undesirable contingency); and such an argument is rightly brought forward, never for the establishing of one's own position, but for the showing of an undesirable element in the opponent's view of the case. But this undesirable element also can be rightly brought home to the opponent only when proved by means of such *dharma* &c. as are admitted by him; and it is not necessary that the person putting forward those should know and believe them to be true himself. For the opponent can never come forward with the assertion—'these *dharma* &c. are not admitted by you; and I cannot understand them even though they are admitted by me'."

Reply: Is this '*prasangasādhana*' an Inference or something else? If it is something other than Inference, then it should be shown to which 'means of knowledge' above described it belongs; or a distinct definition of it should be given. If, however, it is only an Inference, then it can operate only as based upon a previous cognition of the person bringing it forward; as a '*parārtha anumāna*' (inference for the sake of others) is always put forward with a view to produce in the mind of the other person a firm conviction similar to that in the mind of the speaker himself. If it were not so, then it would be possible to admit the evidential authority of such inferential arguments as—'the sky-lotus is sweet-smelling, because it is a lotus, like the lotus

in the tank;'—even though it has a subject whose existence is not admitted by the propounder of the argument.*

Then as for the fact of yogis being 'living beings' (which has been brought forward by the opponent as a reason for denying their supersensuous vision), and such other facts, these are cases of doubtful concomitance. If the great man under consideration were to have the character of a 'living being' he might also have omniscience,—what inherent inprobability could there be in this? Certainly no inconsistency has ever been found between 'omniscience' and the character of 'living being.' But omniscience being cognisable by other means of knowledge, its concomitance with the character of 'living being' would always be doubtful; as it cannot be definitely ascertained whether our want of omniscience is due to our character of living beings, or to the absence of the *dharma* born of *yoga*, which is recognised as the cause of the knowledge of all things. Consequently the 'character of living beings', having its concomitance doubtful, cannot prove the inferential conclusion (that the yogi can have no supersensuous cognition).

Objection: "It is not yet proved that *dharma* born of *yoga* is the cause of superseusuous cognition; and under the circumstances, how can our want of omniscience be suspected of being due to the absence of that *dharma*?"

Reply: To us the fact is well-known and fully established; hence it is that we suspect it. Thus then, the invariable concomitance (of 'the character of living beings' and 'want of supersensuous knowledge' is not one that is accepted by both parties; how then could there be any right inference based upon it?

Page 198.] Having described the sensuous perception of yogis in ecstacy, the author proceeds to describe that of those out of the ecstatic condition. Persons who have accumulated a store of *dharma* by yoga, even when not in the state of *samādhi*

* The reading '*bhyupagatasiddhī*' does not give good sense, hence the translation has adopted the reading given in the footnote.

स्फायः स्फी निष्ठायाम् ॥ ६ । १ । २२ ॥

स्फीतः । कथं स्फीतिकामः । स्फीतमाचष्टे इति ण्यन्ता-द्दच इः ॥

स्त्यः प्रपूर्वस्य ॥ ६ । १ । २३ ॥

सम्प्रसारणं स्यान्निष्ठायाम् ॥ प्रस्त्योऽन्यतरस्यामिति पक्षे मकारः । प्रस्तीमः । प्रस्तीतः । संप्रसारणे कृते यण्वत्ताविरहान्नत्वं न । प्रपूर्वस्य किम् । संस्त्यानः । प्रस्त्य इत्येव सिद्धे पूर्वग्रहणमि-हापि यथा स्यात् । प्रसंस्तीतः । व्यधिकरणषष्ठ्यौ प्रपूर्वसमुदायस्य यः स्त्या तस्येत्यर्थात् । मत्वं तु न प्रस्त्य इत्युक्तेः । अत्र स्त्यै ष्ट्यै इत्युभयोरपि ग्रहणम् ।

द्रवमूर्तिस्पर्शयोः श्यः ॥ ६ । १ । २४ ॥

स्पर्शोऽत्र गुणो न तु रोगः । अन्यथा प्रतिपूर्वस्य रोगवा-चिताया एव सत्वेन प्रतेश्चेति व्यर्थं स्यात् । तद्विषये नत्वं च न स्यात् । द्रवस्य मूर्तौ काठिन्ये स्पर्शे चार्थे श्यैङः सम्प्रसारणं स्यान्निष्ठायाम् ॥ शीनं घृतम् । काठिन्यं प्राप्तमित्यर्थः । श्योऽस्पर्शे इति निष्ठानत्वम् । स्पर्शे । शीतं वर्तते । जलं च शीतम् । गुणे तद्वति च प्रवृत्तिरस्य । द्रवमूर्तिस्पर्शयोः किम् । संश्यानो वृश्चिकः । शीता-त्सङ्कुचित इत्यर्थः ।

प्रतेश्च ॥ ६ । १ । २५ ॥

प्रतेः परस्य श्यः संप्रसारणं स्यान्निष्ठायाम् । प्रतिशीनः ॥

विभाषा ऽभ्यवपूर्वस्य ॥ ६ । १ । २६ ॥

श्यः संप्रसारणं स्यान्निष्ठायाम् ॥ अभिश्यानं घृतम् । अभि-शीनम् । अभिश्यानम् । अभिशीतं जलम् । अवश्यानोऽवशीनो

वृश्चिकः । उभयत्र विभाषेयम् । सा च व्यवस्थितविभाषा । तेनेह न । समवश्यानः । पूर्वग्रहणादिहापि । अभिसंशीनः ॥

शृतं पाके ॥ ६ । १ । २७ ॥

श्रातिश्रपयत्योः क्ते विभाषा शृभावो निपात्यते पाके ॥ व्यवस्थितविभाषा चेयम् । तेनेह नित्यम् । शृतं क्षीरं हविर्वा । स्वयमेव विक्लिन्नं पक्कं वा देवदत्तेनेत्यर्थः । नैवान्यत्र । श्राणा श्रपिता वा यवागूः । पाकश्चेह विक्लित्तिर्विक्लेदना च । न तु पाचयितृनिष्ठः पाचनालक्षणः । तेनेह न । श्रपितं क्षीरं देवदत्तेन यज्ञदत्तेन ॥

प्यायः पी ॥ ६ । १ । २८ ॥

वा स्यान्निष्ठायाम् ॥ व्यवस्थितविभाषेयम् । तेन स्वाङ्गे नित्यम् । पीनं मुखम् । अन्यत्र प्यानः पीनः स्वेदः ॥ सोपसर्गस्य न ॥ * ॥ प्रप्यानश्चन्द्रमाः ॥ आङ्पूर्वस्यान्धूधसोः स्यादेव । आपीनोऽन्धुः । आपीनमूधः ॥

लिड्यङोश्च ॥ ६ । १ । २९ ॥

लिटि यङि च प्यायः पीभावः स्यात् ॥ पुनः प्रसङ्गविज्ञानात्पीशब्दस्य द्वित्वम् । एरनेकाच इति यण् । पिप्ये । पेपीयते ॥

विभाषा श्वेः ॥ ६ । १ । ३० ॥

श्वयतेः संप्रसारणं वा स्याल्लिटि यङि च ॥ शुशाव । नित्यत्वात्संप्रसारणेऽन्तरङ्गत्वात्पूर्वरूपे वृद्ध्यावौ । शुशुवतुः ॥ श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधः ॥ * ॥ तेन लिट्यभ्यासस्येति संप्रसारणं न । शिश्वाय । शिश्वियतुः । यङि । शोशूयते । शेश्वीयते । उभयत्र विभाषेयम् ॥

णौ च संश्चङोः ॥ ६ । १ । ३१ ॥

सन्परे चङ्परे च णौ श्वयतेः संप्रसारणं वा स्यात् ॥ शुशावयिषति । शिश्वाययिषति । चङि । अशूशवत् । अशिश्वयत् । संप्रसारणं तदाश्रयञ्च कार्यं बलवदिति वचनाद् वृद्ध्यायादेशाभ्यां परत्वेन द्वित्वाच्च पूर्वं संप्रसारणम् । पूर्वत्वं च । ततो णौ द्वित्वात्प्रागच आदेशो नेत्युक्तत्वाद्द्वित्वे वृद्ध्यादयः । एतच्च णौ च संश्चङोरिति विषयसप्तमीं सिद्धम् । नत्वियं परिभाषा । शूशुवः । शुशुवतुः । शुशुवतुरित्यत्र एम्भावाल्लोपेयङ्यणाम् निवर्त्यमानतया तत्फलानामन्यथासाधनेन तस्या भाष्ये प्रत्याख्यानात् ।

ह्वः सम्प्रसारणम् ॥ ६ । १ । ३२ ॥

सन्परे चङ्परे च णौ ह्वः संप्रसारणं स्यात् ॥ जुहावयिषति । अजूहवत् । कारयादित्वाद्वा ह्रस्वः । अजुहावत् । इह पूर्वसूत्रोक्तरीत्या शाच्छ सेति युक्तं प्रागेव नं । पुनः संप्रसारणमिति विकल्पनिवृत्त्यर्थम् ॥

अभ्यस्तस्य च ॥ ६ । १ । ३३ ॥

अभ्यस्तस्य यो ह्वयतिस्तस्याभ्यस्तप्रकृतेर्ह्वेञः संप्रसारणं स्यात् ॥ जोहूयते । जुहूषति । जुहाव । जुहुवतुः । ह्वा अतुसित्यत्राल्लोपापेक्षयाऽनैमित्तिकत्वेनान्तरङ्गत्वात्संप्रसारणे वार्णपरिभाषाया अनित्यत्वाश्रयणेनान्तरङ्गत्वात्पूर्वरूपे ततो द्वित्वे उवङ् । उवङि पूर्वरूपस्य न स्थानिवत्त्वम् । उवर्णान्तधातोरुवङ्विधानेनाकारात्पूर्ववृत्तिधर्मावच्छिन्नोद्देश्यकत्वाभावात् । आकारैकादेशस्याकारात्परभूतनिमित्तकत्वाभावाच्च । प्रत्यासत्त्याऽचः परस्मिन्नित्यत्रादेशस्य स्थान्यपेक्षया परत्ववन्निमित्तकस्यैव ग्रहणात् । एतेन

शुशुवतुरिति व्याख्यातम् । इयङो नित्यत्वात्संप्रसारणम् । यणोऽन्तरङ्गत्वात्पूर्वत्वमिति तु विशेषः । योगविभागो ज्ञापकोऽभ्यस्तत्तन्निमित्तयोर्व्यवधाने संप्रसारणाभावस्य । तेनेह न । जिह्वायकीयिषति ॥

बहुलं छन्दसि ॥ ६ । १ । ३४ ॥

ह्वः संप्रसारणं स्यात् । इन्द्रमाहुव ऊतये । लटि तङुत्तमैकवचने बहुलं छन्दसीति शपो लुकि संप्रसारणमुवङादेशः । न च भवति । ह्वयामि मरुतः शिवान् ॥

चायः की ॥ ६ । १ । ३५ ॥

स्याद्बहुलं छन्दसि । न्या अन्यं चिक्युर्न निचिक्युरन्यम् । लिट्युसि रूपम् । न च भवति । अग्निर्ज्योतिर्निचाय्यम् ॥

अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताःश्रितमाशीराशीर्ताः ॥ ६ । १ । ३६ ॥

एते छन्दसि निपात्यन्ते ॥ इन्द्रश्च विष्णो यदपस्पृधेथाम् । स्पर्धेर्लङ्याथामि द्वित्वं रः संप्रसारणमल्लोपश्च निपातनात् । लोके त्वस्पर्धेथाम् । यदित्वपपूर्वात्संप्रसारणमल्लोपस्तदाऽपास्पर्धेथाम् । अर्कमानृचुः । वसून्यानृहुः । अर्चेरर्हश्च लिट्युसि । चिच्युषे । च्युङो लिटि थासि । अभ्यासस्य संप्रसारणमनिट्त्वं च । यस्तित्याज । त्यजेर्णलि । श्रातास्त इन्द्र सोमाः । श्रिता नो ग्रहाः । श्रीञ् पाके निष्ठायाम् । श्राभावश्रिभावौ । नाशिरं दुह्रे । मध्यत आशीर्तः । आङ्पूर्वस्य श्रीञ एव क्विपि निष्ठायां च शिरादेशः । निष्ठायाश्च नत्वाभावो निपातनात् । सूत्रे आशीरिति वेरिति दीर्घः ।

न संप्रसारणे संप्रसारणम् ॥ ६ । १ । ३७ ॥

संप्रसारणे परतः पूर्वस्य यणः संप्रसारणं न स्यात् ॥ अत एव

ज्ञापकादन्त्यस्य यणः पूर्वं संप्रसारणं पूर्वस्य तु तन्निमित्तः प्रतिषेधः ॥ विद्धः । विचितः । पुनः संप्रसारणग्रहणं विदेशस्थस्यापि निषेधार्थम् । विव्यथे । यूनः । न च स्थानिवत्त्वेनोकारव्यवधानात्कथं निषेध इति वाच्यम् । व्यथ इत्यत्र यग्रहणेनैव सिद्धा संप्रसारणग्रहणस्य श्वयुवेति निषेधेनैव चारितार्थ्यस्य सत्त्वेन व्यवहितेऽपि प्रवृत्तेः । यूनस्तिरिति निर्देशाच्च । नन्वनन्त्यविकारेऽन्त्यसदेशस्येति परिभाषया सिद्धे किमनेन सूत्रेणेति चेत् । फलाभावान्न कर्तव्यमेवेत्येतत्सूत्रस्थभाष्यस्वरसः ॥ ऋचि त्रेरुत्तरपदादिलोपश्छन्दसि ॥ * ॥ ऋक्शब्दे परे त्रेः संप्रसारणमुत्तरपदादेर्लोपश्चेति वक्तव्यम् । तृचं सूक्तम् । छन्दसि किम् । त्र्यृचानि ॥ रयेर्मतौ बहुलम् ॥ * ॥ आरेवा नेतु नो विशः । न च भवति । रयिमान्पुष्टिवर्धनः ।

लिटि वयो यः ॥ ६ । १ । ३८ ॥

वयो यस्य संप्रसारणं न स्याल्लिटि ॥ उवाय । ऊयतुः । ऊयुः । लिड्ग्रहणमुत्तरार्थम् ॥

वश्चास्यान्यतरस्यां किति । ६ । ३९ ॥

वयो यस्य वो वा स्यात्किति लिटि ॥ ऊवतुः ऊवुः । उश्चास्येत्येव सिद्धे वादेशविधानसामर्थ्याद्वकारे कृते तस्य सम्प्रसारणं न । ऊयतुः । ऊयुः । किति किम् । उवाय । उवयिथ ॥

वेञः । ६ । १ । ४० ॥

सम्प्रसारणं न स्याल्लिटि ॥ ववौ । ववतुः । ववे । ववाते । लिटि किम् । ऊयते । अत्र अन्यतरस्यां क्ङिति वेञ इति सूत्रं कर्तव्यम् । तत्र लिटीत्यनुवर्तनात्किति लिटि वेञः संप्रसारणं वा न भवतीत्यर्थात् संप्रसारणाभावे ववतुरिति । संप्रसारणे च

द्विर्वचनेऽचीत्युवङादेशात् पूर्वं द्वित्वे ततो वार्णादाङ्गमिति सवर्ण-दीर्घात् पूर्वमुवङादेशे ततः सवर्णदीर्घे ऊवतुरिति । वयेरपि नित्यं यकारस्य संप्रसारणनिषेधादूयतुरिति किति लिटि रूपत्रयं सिद्धम् । ल्यपि चेति चकारेण लिटोऽनुकर्षणादकिति लिटि ववौ । वविथेत्यपि सिद्धमिति । वश्चास्य ग्रहणं न कर्तव्यम् ॥

ल्यपि च । ६ । १ । ४१ ॥

वेञो ल्यपि संप्रसारणं न स्यात् । प्रवाय ॥

ज्यश्च । ६ । १ । ४२ ॥

ल्यपीत्येव ॥ प्रज्याय ।

व्यश्च । ६ । १ । ४३ ॥

ल्यपीत्येव ॥ उपव्याय । योगविभाग उत्तरार्थः ॥

विभाषा परेः । ६ । १ । ४४ ॥

परेर्व्येञो वा संप्रसारणं स्याल् ल्यपि ॥ तुकं बाधित्वा पर-त्वाद्धल इति दीर्घः । परिवीय । परिव्याय ॥

आदेच उपदेशेऽशिति । ६ । १ । ४५ ॥

लिटि धातोरित्यतो धातोरिति वर्तते । शितीति च कर्मधारयात्सप्तमी । पूर्वोत्तरसूत्राणां प्रत्ययेष्वेव प्रवृत्तेस्तत्साहचर्यादत्र शितीति शिति प्रत्यये इत्येतद्वाक्यैकदेशः । एवञ्चोपदेशे एजन्तस्य धातोरात्वं स्यान्नत्वित्संज्ञकशकारादौ प्रत्यये इत्यर्थः । ग्लाता । ग्लातुम् । ग्लातव्यम् । एचः किम् । कर्ता । धातोः किम् । चक्रे । गोभ्याम् । अस्ति ह्यत्रापि गमेर्डो इत्युपदेश एव एच् । उपदेशे किम् । चेता । लाक्षणिकत्वादेवात्र न भविष्यतीति चेत् । एवं तर्हि वर्णग्रहणे लक्षणप्रतिपदोक्तपरिभाषा नाश्रीयत इति ज्ञापनार्थमिदम् । तेन

ज्ञापयतीत्यादौ कृतात्वानां पुक् सिध्यति । अशितीति किम् । ग्लायति । एश आदिशित्वाभावात्तस्मिन्भवत्यात्वम् । जग्ले । अनैमित्तिकमात्वं शिति तु प्रतिषेध इति सुग्लः सुग्ला सुग्लान इत्याकारान्तलक्षणाः काङ्युचः । जग्ले इत्यभ्यासाकारश्च । ननूदीचां माङ इत्यात्वानुपपत्तिः । अनुबन्धलोपोत्तरं तद्विनिर्मुक्तस्यैव धातुताया न धातुलोपसूत्रभाष्ये उक्तत्वेन ङकारसत्वे धातुत्वाभावात् । तथा च नानुबन्धकृतमनेजन्तत्वमित्यर्थज्ञापकता तस्य भज्येतेति चेत् । अत्र केचित् । धातोरिति निवृत्तम् । गोभ्यामित्युणादीनामव्युत्पन्नत्वात्प्रातिपदिकानामुपदेशाभावाच्च सिद्धम् । एवञ्च वर्णग्रहणे लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तिज्ञापकताऽपि उपदेश इत्यस्य चिन्त्या । एवं सति उपदेशे य एच् तस्यात्वमित्यर्थे ढौकितेत्यतिप्रसङ्गस्तु कर्मव्युत्पन्नोपदेश इति षष्ठ्यर्थसप्तम्या एजन्तस्योपदिश्यमानस्येत्यर्थात्परिहर्तव्यः । चक्रे इति तु शिति नेत्युक्त्या शित्प्रत्ययपरत्वयोग्यस्यैवेजन्तस्य ग्रहणात्सिद्धम् । एवं च ङकारसत्वे एजन्तत्वाभावादात्वाप्राप्तेस्तदसङ्गतौ तदर्थज्ञापकता तस्य सुस्थेत्याहुस्तन्मन्दम् । तस्यामवस्थायां धातुत्वाभावेऽपि तद्योग्यतायाः सत्वात् । न च योग्यताग्रहणे गमकाभावो निर्देशस्यैव गमकत्वात् । तस्मादेतादृशसरलरीत्या सर्वेऽष्टसिद्धौ कर्मव्युत्पन्नोपदेशशब्दाद्याश्रयणादिरूपानेकाक्लृप्तक्लिष्टकल्पनाप्रयासो विफलः । शित्प्रत्ययपरत्वयोग्यस्यैव ग्रहणमिति स्वोक्त्या सह विरुद्धश्च । तद्योग्यस्यैव ग्रहणे ढौकितेत्यतिप्रसङ्गस्यैवास्थितत्वात् ॥

न व्यो लिटि । ६ । १ । ४६ ॥

व्येञ आत्वं न स्याल्लिटि । विव्याय ।

स्फुरतिस्फुलत्योर्घञि । ६ । १ । ४७ ॥

एच आत्स्यात् ॥ स्फारः । स्फालः ॥

क्रीङ्जीनां णौ । ६ । १ । ४८ ॥

एषामेच आत्वं स्याण्णौ । क्रापयति । अध्यापयति । जापयति ॥ आत्वं णौ लीयतेरुपसंख्यानं प्रलम्भनशालीनीकरणयोः ॥ * ॥ विभाषा लीयतेरिति विकल्पे प्राप्ते नित्यार्थमिदम् । बालमुल्लापयते । वञ्चयत इत्यर्थः । यत्तु वञ्चयतीत्यर्थ इति तन्न । गृधिवञ्च्योः प्रलम्भन इत्यात्मनेपदस्य दुर्वारत्वात् । श्येनो वर्तिकामुल्लापयते । अभिभव-तीत्यर्थः । संमानने तु विकल्प एव भवति । अन्ये त्वाहुः । प्रलम्भ-नशालीनीकरणग्रहणमात्मनपदविषयोपलक्षणार्थमिति सम्मानने ऽपि नित्यं भवति । तथा च पठन्ति ॥ प्रलम्भनाभिभवपूजासु लियो नित्यमात्वमणिति वाच्यम् ॥ * ॥ उदाहरन्ति च । जटाभिर्लापयते । पूजामधिगच्छतीत्यर्थः । अचाणितीति प्रकरणाल्लब्धम् । अणिच्चाच णिरेव क्रीङ्जीनामित्यत्र पाठात् । भाष्ये णावित्युक्तेश्च ॥

सिध्यतेरपारलौकिके । ६ । १ । ४९ ॥

एहलौकिकेऽर्थे विद्यमानस्य सिध्यतेरेच आत्वं स्याण्णौ ॥ अन्नं साधयति । निष्पादयतीत्यर्थः । अपारलौकिके किम् । तापसः सिध्यति । तत्वं निश्चिनोति । तं प्रेरयति सेधयति तापसं तपः । सिध्यतेरिति श्यना निर्देशः षिध गत्यामित्यादेर्निवृत्त्यर्थ इति वृत्तिः ॥

मीनातिमिनोतिदीङां ल्यपि च । ६ । १ । ५० ॥

एषामात्वं स्याल्ल्यपि चकारादेज्विषये ॥ यत्वचाणितीत्य-नुवर्तयन्ति । तन्न । फलाभावात् । प्रमाय । प्रमाता । निमाय । निमाता ।

उपदाय। उपदाता। दातुमिच्छति दित्सत इत्यत्र तु एज्विषयत्वाभावान्मीनातिमिनोतीत्यात्वं न। अत एव सनि मीमेतिसूत्रे माधातोः पृथङ् मीग्रहणं कृतम्। प्रत्ययोत्पत्तेः प्रागेवात्वविधानादेरज् न भवति किन्तु घञेव। अवदायः। आदन्तलक्षणो णयुचो च। अवदायः। ईषदवदानम्। निमिमीलियां खलचोरात्वं नेति वाच्यम्॥ *॥ पचाद्यच एरचश्च सामान्यग्रहणम्। ईषन्निमयः। निमयः। ईषत्प्रमयः। प्रमयः। ईषद्विलयः। विलयः।

विभाषा लीयतेः। ६। १। ५१॥

लीयतेरिति यका निर्देशो न तु श्यना। तेन ली श्लेषणे इति क्र्यादेः लीङ् श्लेषणे इति दिवादेश्च ग्रहणम्। ली द्रवीकरणे इत्याधृषीयस्य तु न ग्रहणम्। लिनातिलीयत्योर्यका निर्देश इति भाष्यात्। लीलीङोरात्वं वा स्यादेज्विषये ल्यपि च विलाता। विलेता। विलाय। विलीय॥

खिदेश्छन्दसि। ६। १५२॥

खिद दैन्ये। अस्यैच आद्वा स्यात्। चिखाद। चिखेद। छन्दसि किम्। खेदयति।

अपगुरो णमुलि। ६। १। ५३॥

अस्यैच आद्वा स्याण्णमुलि॥ अस्यपगारं युध्यन्ते। अस्यपगोरम्॥

चिस्फुरोर्णौ। ६। १ ५४॥

अनयोरेच आद्वा स्याण्णौ। चुरादिषु ज्ञपादिश्चिञ्। तस्य मित्वात् ह्रस्वः। चपयति। चययति। चिनोतेस्तु चापयति।

चाययति । स्फारयति । स्फोरयति । णौ द्वित्वात्प्रागेव आदेशो नेत्युक्तत्वादुकारस्य द्वित्वम् । पुस्फारयिषति । पुस्फोरयिषति । अपुस्फरत् । अपुस्फुरत् ।

प्रजने वीयतेः ६ । १ । ५५ ॥

प्रजनं गर्भग्रहणम् । वी गतिव्याप्तिप्रजनकान्त्यसनखादनेष्वित्यस्य आद्वा स्याण्णौ ॥ वापयति वाययति वा गाः पुरोवातः । गर्भं ग्राहयतीत्यर्थः ॥

बिभेतेर्हेतुभये । ६ । १ । ५६ ॥

आद्वा स्याण्णौ प्रयोजकाद्भयं चेत् । मुण्डो भापयते भीषयते । हेतुभये किम् । कुञ्चिकयैनं भाययति ।

नित्यं स्मयतेः । ६ । १ । ५७ ॥

आत्वं स्याण्णौ हेतुभये । भय इति धात्वर्थोपलक्षणम् । जटिलो विस्मापयते । हेतुभये किम् । कुञ्चिकयैनं विस्माययति । कथं तर्हि विस्मापयन्विस्मितमात्मवृत्ताविति । मनुष्यवाचेति करणादेव हि तत्र स्मयः । अन्यथा भीस्म्योर्हेतुभये इति शानजपि स्यात् । सत्यम् । विस्मापयन्नित्येव पाठ इति साम्प्रदायिकाः । यद्वा मनुष्यवाक् प्रयोज्यकर्त्री विस्मापयते तया सिंहो विस्मापयन्निति ण्यन्ताण्णौ शतेति व्याख्येयम् ॥

सृजिदृशोर्झल्यमकिति । ६ । १ । ५८ ॥

अनयोरमागमः स्यात् झलादावकिति ॥ लघूपधगुणापवादः । स्रष्टा । द्रष्टा । असाक्षीत् । अद्राक्षीत् । सिचि वृद्धिरमि कृते भवति । पूर्वन्तु प्रतिपदोक्तत्वाद्बाध्यते । झलि किम् । सर्जनम् । दर्शनम् ।

अक्ङिति किम् । स्रष्टुः । द्रष्टुः । धातोः स्वरूपग्रहणा इतीह न । रज्जु-सृड्भ्याम् । देवदृग्भ्याम् ॥

अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् । ६ । १ । ५९ ॥

उपदेशेऽनुदात्तो य ऋदुपधस्तस्याम् वा स्यात् झलादावक्ङिति ॥ त्रप्ता । तर्प्ता । अनुदात्तस्य किम् । बढा । बृहू उद्यमने । उदात्तोपदेशः । ऊदित्वाद्वेट् । उपदेशे किम् । त्रप्तुम् । नित्स्वरेण सम्प्रत्युदात्तः । ऋदुपधस्य किम् । भेत्ता । झलि किम् । तर्पणम् । क्ङिति किम् । तृप्तः ॥

शीर्षश्छन्दसि । ६ । १ । ६० ॥

शिरःशब्दस्य शीर्षन्स्यात् ॥ शीर्ष्णो जगतः । छन्दसि सर्वविधीनां वैकल्पित्वाच्छिरो मे शीर्षते मुखे । छन्दसि किम् । शिरः ।

ये च तद्धिते । ६ । १ । ६१ ॥

यादौ तद्धिते शिरसः शीर्षन्नादेशः स्यात् ॥ शीर्षण्यः । तद्धिते किम् । शिर इच्छति शिरस्यति ॥ वा केशेषु ॥ * ॥ शीर्षण्याः शिरस्याः केशाः ॥

अचि शीर्षः । ६ । १ । ६२ ॥

अजादौ तद्धिते शिरसः शीर्षादेशः ॥ स्थूलशिरस इदं स्थौलशीर्षम् । इह हास्तिशीर्ष्येति शिरसो ग्रहणेन ग्रहणात् शीर्षन्प्राप्नोति । सन्निपातपरिभाषया न भवति । शीर्षादेशसन्नियोगेन जातस्य ष्यञ-स्तद्विघातकत्वात् ॥ छन्दस्यतद्धितेऽप्यजादौ शिरसः शीर्षभावो वक्तव्यः ॥ * ॥ द्वे शीर्षे सप्त हस्तासः ॥

पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु । ६ । १ । ६३ ॥

अथ शस्प्रभृतयो निमित्ततयोपात्ताः । ते च पदाद्यादेशानुरूपान् प्रकृतिविशेषानाक्षिपन्ति । पाद,दन्त,नासिका,मास,हृदय, निशा,असृज्,यूष,दोष,यकृत्, शकृत्, उदक, आस्य एषां पदादय आदेशाः स्युः शसादौ वा । ये तु आसनशब्दस्यासन्नादेश इति काशिकायामुक्तं तत्प्रामादिकम् । पदः । पादान् । दतः । दन्तान् । नसः । नासिकाः । मासः । मासान् । रुत्वे यत्वे च कृते यलोपः । माभ्याम् । हृन्दि । हृदयानि । निशः । निशाः । निड्भ्याम् । व्रश्चेति षस्य जश्त्वेन डः । सुपि डः सीति पक्षे धुट् चर्त्वम् । तस्यासिद्धत्वाच्चयो द्वितीया इति टतयोष्ठथौ न । न पदान्ताट्टोरिति ष्टुत्वं न । निट्त्सु । षढोः कः सीति तु न । जश्त्वं प्रत्यसिद्धत्वात् । केचित्तु व्रश्चसूत्रे दादेर्धातोरिति सूत्राद्धातोरित्यनुवर्त्तयन्ति । तन्मते शस्य जश्त्वेन जकारे कृते निज्भ्याम् । श्चुत्वम् । निच्शु । चोः कुरिति कुत्वं तु न । जश्त्वस्यासिद्धत्वात् । असानि । असृञ्जि । असभ्याम् । असृग्भ्याम् । सृजेः क्विनो विधानादसृजः पदान्ते क्विन्प्रत्ययस्येत्यस्यासिद्धत्वाद् व्रश्चेति षत्वे कुत्वम् । षत्वन्तु सृष्टमित्यादौ सावकाशम् । वश्वसृड् देवेड् इत्यादौ तु न । सृजिदृशोरिति सूत्रे रज्जुसृड्भ्यामिति भाष्यप्रयोगेणानव्ययपूर्वपदे कुत्वाभावबोधनात् । काम्यच्सूत्रे उपयट्काम्यतीति च भाष्ये प्रयोगात् । यद्वा व्रश्चादिसूत्रे सृजियज्योः पदान्ते षत्वं कुत्वापवादः । तयोः पूर्वोत्तरसाहचर्येण पदान्तेऽपि विधिच्य षत्वबोधनेन तत्सामर्थ्यादत्रापि तावेव । भाष्यप्रयोगो मानम् । ऋगृत्विक्शब्दयोस्तु निपातनादेवापवादाप्रवृत्तिमात्रबोधनेन पदान्ते कुत्वम् । असृक्शब्दस्तु अस्यतेरौणादिके ऋच् प्रत्यय एव बोध्यः । यूष्णः । यूषान् । दोष्णः । दोषः । दमेर्डोस् । डित्वसामर्थ्य-

दभस्यापि टेर्लोपः । यक्नानि । यकृन्ति । शक्नानि । शकृन्ति । उदानि । उदकानि । आसानि । आस्यानि ॥ मांसपृतनासानूनां मांसपृत्स्नवो वाच्याः शसादौ वा ॥ * ॥ मांसि । मांसानि । पृतः । पृतनाः । स्नूनि । सानूनि । स्नुः प्रस्थः सानुरस्त्रियामित्युभयलिङ्गः सानुशब्दः ॥ नस् नासिकाया यत्तस्क्षुद्रेषु ॥ * ॥ नस्यम् । नस्तः । अपादाने चाहियेति तसिः । नःक्षुद्रः । नासिकया क्षुद्र इति सुप्सुपेति समासः । वस्तुतस्तु प्रभृतिग्रहणं प्रकारार्थम् । तथा चोक्तः श्यामपि दोषन्नादेशो भाष्ये ककुद्दोषणी इति मांस्पचन्या उखाया इति चोदाहृतम् । अयस्मयादित्वेन भत्वात्संयोगान्तलोपो न । तेन पदङ्घ्रिश्चरणोऽस्त्रियाम् । स्वान्तं हृन्मानसं मन इत्यादि सङ्गच्छते ॥ आसन्यं प्राणमूचुरिति च । आस्ये भव आसन्यः । दोष्शब्दस्य नपुंसकत्वमप्यत एव भाष्यात् । तेन दक्षिणं दोर्निशाचर इति सङ्गच्छते । भुज बाहू प्रवेष्टो दोरिति साहचर्यात्पुंस्त्वम् । दोषं तस्य तथाविधस्य भजत इति । अत्र छन्दसीत्यनुवर्तितं वृत्तौ । तथापि अपो भीत्यत्र मासश्छन्दसीति वार्तिके छन्दोग्रहणसामर्थ्याल्लोकेऽपि क्वचिदिति कैयटोक्तरीत्या प्रयोगमनुसृत्य पदादयः प्रयोक्तव्या इति बोध्यम् ॥

धात्वादेः षः सः । ६ । १ । ६४ ॥

धातोरादेः षस्य सः स्यात् ॥ सिञ्चति । धातुग्रहणं किम् । षोडन् । षडिकः । आदिग्रहणं किम् । प्रनिलषति । आदेशप्रत्यययोरिति षत्वव्यवस्थार्थं षादयो धातवः केचिदुपदिष्टाः । के पुनस्ते ये तथा पठ्यन्ते । अथवा लक्षणं क्रियते ।

सेक्सृप्सृस्तृसृज्स्तृस्त्यान्ये दन्त्याजन्तषादयः ।
सकाचः षोपदेशाः ष्वक्स्विद्स्वद्स्वञ्ज्स्वप्स्मिङः ॥

दन्त्यः केवलदन्त्यो न तु दन्त्योष्ठजोऽपि । ष्वष्कादीनां पृथग्ग्रहणात् । तेन स्वाद आस्वादने इत्यस्यासिस्वददिति सिद्धम् । सुब्धातुष्ठिवुष्वष्कतीनां सत्वप्रतिषेधो वक्तव्यः ॥ * ॥ षण्डीयति । ष्ठीवति । अस्य द्वितीयस्थकारष्ठकारो वेति वृत्तिः । तेन तिष्ठेव टिष्ठेवेति भवति । ष्वष्कते ॥

णो नः ॥ ६ । १ । ६५ ॥

धातोरादेर्णस्य नः स्यात् ॥ नमति । धात्वादेः किम् । प्रणिति । उपसर्गादसमासेऽपीति णत्वव्यवस्थार्थं णादयो धातवः केचिदुपदिष्टाः । के पुनस्ते । ये तथा पठ्यन्ते । अथवा लक्षणं क्रियते ॥

णोपदेशास्त्वनर्दनाटिनाथ्नाध्नन्दनक्कनॄनृतः ॥

नाटेर्दीर्घाद्दस्य पर्युदासात् घटादिर्णोपदश एव । तवर्गचतुर्थान्तनाधतेर्नृ नन्द्योश्च केचिण्णोपदेशनामाहुः ॥

लोपो व्योर्वलि ॥ ६ । १ । ६६ ॥

वकारयकारयोर्लोपः स्याद्वलि ॥ क्नूनम् । युवजानिः । जीवेरदानुक् । जीरदानुः । स्रिवेर्मनिन् । आस्रेमाणम् । उणादयो बहुलमिति वचनादिह नेट् । व्रश्चादिषूपदेशसामर्थ्यान्न लोपः । न च वृश्चतीत्यवकाशो बहिरङ्गत्वात्संप्रसारणस्य । सखीयतेः क्विपि सखीरित्यत्र वेरपृक्तलोपाद्वलिलोपः पूर्वविप्रतिषेधेन ॥

वेरपृक्तस्य ॥ ६ । १ । ६७ ॥

अपृक्तस्य वस्य लोपः स्यात् ॥ ऋत्विक् । अपृक्तस्य किम् । दर्विः । जागृविः । वृदृभ्यां विन् । वृशृस्तृजागृभ्यः क्विन् ॥

हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ॥ ६ । १ । ६८ ॥

हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल्लुप्यते ॥ राजा। उखास्रत्। अबिभर्भवान्। अभिनोऽत्र। गौरी। कस्य स्त्री की। कीशब्दादिभ्य आचारक्विबन्तेभ्यो यङ्लुकि लङि अचेकेदित्यादौ तिस्योर्ङ्यन्तादपि गङ्गीयतेः क्विप् गङ्गीरित्यादौ सोश्चाबन्तादपि यथा नलोपस्तथा जराया इति सूत्रे स्फुटी भविष्यति। रमा। मालेवाचरदमालादित्यादौ आबन्तात्तिस्योर्न लोपः। ङीसाहचर्यादापोऽपि सोरेव लोपविधानात्। हल्ङ्याब्भ्यः किम्। ग्रामणीः। दीर्घात्किम्। निष्कौशाम्बिः। अतिखट्वः। सुतिसीति किम्। अभैत्सीत्। तिपा सहचरितस्य सिपो ग्रहणात्सिचो ग्रहणं नास्ति। अपृक्तमिति किम्। बिभर्ति। हल् किम्। बिभेद। प्रथमहल् किम्। राजेत्यादौ नलोपादयो न स्युः संयोगान्तलोपस्यासिद्धत्वात् ॥

एङ्ह्रस्वात्सम्बुद्धेः ॥ ६। १। ६९ ॥

एङन्तात् ह्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धिश्चेत्। हे हरे। हे विष्णो। हे राम। हे गौरि। संबुद्ध्याक्षिप्तस्याङ्गस्यैङ्ह्रस्वाभ्यां विशेषणान्नेह। हे कतरत् कुलेति। एङ्ग्रहणं किम्। हरे विष्णो इत्यादौ परत्वान्नित्यत्वाच्च संबुद्धिगुणे कृते ह्रस्वात्परत्वं नास्ति ॥

शेश्छन्दसि बहुलम् ॥ ६। १। ७० ॥

लोपः स्यात्। अग्ने ची ते वाजिना ॥ त्री षधस्था। ता ता पिण्डानाम् ॥

ह्रस्वस्य पिति कृति तुक् ॥ ६। १। ७१ ॥

अग्निचित्। प्रकृत्य। ह्रस्वस्य किम्। प्रलूय। ग्रामणीः। पिति किम्। कृतम्। कृति किम्। पटुतरः। ग्रामणि कुलमिति ह्रस्वस्य बहिरङ्गत्वात्तुङ्न भवति ॥

संहितायाम् ॥ ६ । १ । ७२ ॥

अधिकारोऽयम् । अनुदात्तं पदमेकवर्जमित्यतः प्राक् । इत उत्तरं यद्वक्ष्यामः संहितायामित्येवं तद्वेदितव्यम् । वक्ष्यति इको यणचि । दध्यत्र । संहितायां किम् । दधि अत्र ॥

छे च ॥ ६ । १ । ७३ ॥

ह्रस्वस्य छे परे तुगागमः स्यात् संहितायां विषये ॥ श्चुत्वम् । इच्छति । पदान्ते तु श्चुत्वस्यासिद्धत्वाज्जश्त्वेन दः । ततश्चर्त्वस्यासिद्धत्वात्पूर्वं श्चुत्वेन जः । तस्य चर्त्वेन चः । श्चुत्वस्यासिद्धत्वाच्चोः कुरिति कुत्वं न । स्वच्छाया । शिवच्छाया ॥

आङ्माङोश्च ॥ ६ । १ । ७४ ॥

एतयोश्छे तुक् स्यात् ॥ पदान्ताद्वेति विकल्पापवादः । आच्छादयति । मा च्छिदत् ॥

दीर्घात् ॥ ६ । १ । ७५ ॥

दीर्घाच्छे परे तुक् स्यात् ॥ दीर्घस्यायं तुक् न तु छस्य । सेनासुराच्छायेति ज्ञापकात् । ह्रीच्छति । चेच्छिद्यते । हलादिःशेषस्तु न । तुकोऽभ्यासानवयवत्वात् । प्रनिदारयतीतिवत् ॥

पदान्ताद्वा ॥ ६ । १ । ७६ ॥

दीर्घात्पदान्ताच्छे परे तुग्वा स्यात् ॥ लक्ष्मीच्छाया । लक्ष्मीछाया । अन्तग्रहणं पदान्तविधिरयं न पदविधिरिति बोधनद्वारा समर्थपरिभाषाया अप्रवृत्त्या तिष्ठतु कुमारी च्छत्रं हर देवदत्तेत्यत्र तुग्विकल्पार्थम् ॥ विश्वजनादीनां छन्दस्युपसंख्यानम् ॥ * ॥ विश्वजनच्छत्रम् । विश्वजनछत्रम् ॥

XLI.

विश्वामित्रवचः श्रुत्वा कथान्ते रघुनन्दनः ।
उवाच परमप्रीतो मुनिं दीप्तमिवानलम् ॥ १ ॥
[1]श्रोतुमिच्छामि भगवन् विस्तरेण कथामिमाम् ।
[2]पूर्वकाले यथा यज्ञं सगरः स समाप्तवान् ॥ २ ॥
[3]विश्वामित्रस्ततो राममुवाच प्रहसन्निव ।
श्रूयतां विस्तरो राम सगरस्य कथां प्रति ॥ ३ ॥
[4]शङ्करश्वशुरः श्रीमान् हिमवानचलोत्तमः ।
विन्ध्यपर्वतस्पर्धयान्योन्यं यत्र देशे[5]निरैक्षत ॥ ४ ॥
[6]तस्मिन् देशे स यज्ञोऽभूत्सगरस्य महात्मनः ।
सहि देशोमहान् पुण्यः ख्यातः पुण्यजनाश्रितः ॥५॥
[7]तस्य चानुचरो राम दृढधन्वा महारथः ।
अंशुमानभवद्वीरः सगरस्य तदाज्ञया ॥ ६ ॥
[8]यजतस्तस्य तं यज्ञमुत्थाय धरणीतलात् ।
तमश्वं यज्ञियं नागो जहारानन्तरूपवान् ॥ ७ ॥

1. For this Sl. B. XXXIX. 2. श्रोतुमिच्छामि भद्रं ते विस्तरेण कथामिमां । पूर्वजो मे कथं ब्रह्मन् यज्ञं वै समुपाहरत् ॥ 2 For this line G. 2. पूर्वको मे यथा यज्ञं सगरः समवाप्तवान् ॥ 3. For this Sl. B. 3-4. तस्य तद्वचनं श्रुत्वा कौतूहलसमन्वितः । विश्वामित्रस्तु काकुत्स्थमुवाच प्रहसन्निव ॥ श्रूयतां विस्तरो राम सगरस्य महात्मनः । 4. For this Sl. B. 4-5. शंकरश्वशुरो नाम्ना हिमवानिति विश्रुतः ॥ विंध्यपर्वतमासाद्यनिरीक्षेते परस्परं । 5. G. 4. निरीक्षतः but P. has निरैक्षत । 6. For this Sl. B. 5-6. तयोर्मध्ये (a) समभवद् यज्ञः स पुरुषोत्तम ॥ सहि देशो नरव्याघ्र प्रशस्तो यज्ञकर्मणि । (a) V. प्रवृत्तोऽभूद् etc. 7. For this Sl. B. 6-7. तस्याश्वचर्यां काकुत्स्थ दृढधन्वा महारथः ॥ अंशुमानकरोत्तात सगरस्य मते स्थितः । 8. For this Sl. B. 7-8. तस्य पर्वणि तं यज्ञं यजमानस्य वासवः ।

[1]हृतेऽश्वे यज्ञिये तस्मिन् सर्वते रघुनन्दन ।
याजकाः समुपागम्य यजमानं तदाब्रुवन् ॥ ८ ॥
[2]केनापि नागरूपेण हृतस्तेऽश्वः स यज्ञियः ।
हत्वा तमश्वहर्तारं तदेवाश्वं त्वमानय ॥ ९ ॥
[3]यज्ञच्छिद्रं महद्ध्येतत् सर्वेषामशिवाय नः ।
तत्तथा क्रियतां राजन् यथाच्छिद्रः क्रतुर्भवेत् ॥१०॥
[4]उपाध्यायवचः श्रुत्वा तस्मिन् सदसि पार्थिवः ।
षष्टिं पुत्र सहस्राणि समाहूयेदमब्रवीत् ॥ ११ ॥
[5]अनागतिं राक्षसानां पश्यामीह महाक्रतौ ।
नागानां चापि यज्ञोऽयं रक्ष्यते हि महर्षिभिः ॥१३॥
केनापि[6]हि च देवेन हृतोऽश्वो नागरूपिणा ।
[7]अमर्षिणा च्छिद्रमेतद्दृष्ट्वा दीक्षामुपागतम् ॥ १४ ॥

राक्षसीं तनुमास्थाय यज्ञियाश्वमपाहरत् । 1. For this Sl. B. 8-9. ह्रियमाणे तु काकुत्स्थ (a) तस्मिन्नश्वे महात्मनः । उपाध्यायगणाः सर्वे यजमानमथाब्रुवन् ॥ (a) V. तस्मिन्यज्ञे etc. Before this Sl. of our text, P. reads the line—राक्षसीं तनुमास्थाय तेनाप्यश्वस्तदाहृतः । 2. For this Sl. B. 9-10. अयं पर्वणि वेगेन (a) यज्ञियाश्वोऽपनीयते ॥ हर्त्तारं जहि काकुत्स्थ हयश्चैवोपनीयतां । (a) V. यागीयाश्वो etc. 3. For this Sl. B 10-11. यज्ञच्छिद्रं भवत्येतत् सर्वेषामशिवाय नः ॥ तत्तथा क्रियतां राजन् यज्ञोऽच्छिद्रकृतो भवेत् ॥ 4. For this Sl. B. 11-12. सोपाध्यायवचः श्रुत्वा तस्मिन् सदसि पार्थिवः ॥ षष्टिं पुत्रसहस्राणि वाक्यमेतदुवाच ह । 5. For this, and the following 5 Slokas, B. 12-15. गतिं पुत्रा न पश्यामि रक्षसां पुरुषर्षभाः ॥ मंत्रपूतैर्महाभागैरास्थितोऽपि महाक्रतुः । तद्गच्छथ विचिन्वध्वं पुत्रका भद्रमस्तु वः । समुद्रमालिनीं सर्वां पृथिवीमनुगच्छथ । एकैकं योजनं पुत्रा विस्तार(a)मभिगच्छत ॥ यावत्तुरग संदर्शस्तावत्खनत मेदिनीं । तमेव हयहर्त्तारं मार्गमाणा ममाज्ञया ॥ (a) V. मधिगच्छथ. 6. G. 13. तु स देवेन etc. 7. G. 13. अमर्षता etc.

योऽसौ रसातलगतो यदि वान्तर्जले स्थितः ।
तं हत्वा नयताश्वं मे पुत्रका भद्रमस्तु वः ॥ १४ ॥
समुद्रमालिनीं कृत्स्नां पृथिवीमनु[1]गच्छत ।
प्रोत्खनन्तः प्रयत्नेन यावत्तुरगदर्शनम् ॥ १५ ॥
[2]एकैको योजनं भूमे[3]र्निर्भिन्दन्ननुगच्छत ।
अस्माकमश्वहर्तारं मार्गमाणा ममाज्ञया ॥ १६ ॥
दीक्षितः पौत्र सहितः सोपध्यायगणस्त्वहम् ।
इह स्थास्यामि भद्रं वो यावत्तुरगदर्शनम् ॥ १७ ॥
[4]असमाप्तक्रतुस्तावद्भविष्यामीह पुत्रकाः ।
युष्माभिर्यावदश्वो मे न प्रत्याह्रियते पुनः ॥ १८ ॥
[5]इत्युक्ता हृष्टमनसः पित्राथ सगरेण ते ।
बिभिदुर्वसुधां राम पितुर्वचनकारिणः ॥ १९ ॥
योजनायामविस्तारमेकैको धरणीतलम् ।
[6]बिभिदुः पुरुषव्याघ्रा [7]वज्रसारभुजैर्बलात् ॥ २० ॥
[8]कुद्दालैः परिघैः शूलैर्मुषलैः शक्तिभिस्तदा ।
भिद्यमाना वसुमती ननाद सा ॥ २१ ॥

1. G. 15. मार्गत but P. has गच्छत. 2. G. 16. एकैकं etc., but P. has एकैको etc. 3. G. 16. निर्भिन्दन्तोऽनुगच्छत, but P. has निर्भिन्दन्ननु etc. 4. This Sl. is wanting in B. 5. For this Sl. B. 17. (a) तेसर्वे हृष्टमनसा राजपुत्रा महाबलाः । जग्मुर्महीतलं राम पितुर्वचनयन्त्रिताः ॥ (a) After this Sl. V. and S. read the additional line : गत्वा तु पृथिवीं सर्वामदृष्ट्वाश्वं महाबलाः । 6. P. विभेद पुरुषव्याघ्र etc. 7. B. 18. वज्रस्पर्शसमैर्भुजैः 8. For this Sl. B. 19. शूलैरशनिकल्पैश्च हलैश्चापि सुदारुणैः । भिद्यमाना वसुमती ननाद

[1]नागानां बध्यमानानां सर्पाणां च महौजसाम् ।
रक्षसामसुराणां च बभूवार्त[2]स्वरो महान् ॥ २२ ॥
[3]षष्टिं हि योजनानां ते सहस्राणि महौजसः ।
[4]धरण्या बिभिदुः क्रुद्धाः सर्वे यावद्रसातलम् ॥ २३ ॥
[5]एवं पर्वतसम्बाधं जम्बुद्वीपं नृपात्मज ।
खनन्तस्ते नृपसुताः सर्वतः परिबभ्रमुः ॥ २४ ॥
[6]ततो देवाः सगन्धर्वाः महोरगगणास्तथा ॥
सम्भ्रान्तमनसः सर्वे पितामहमुपाद्रवन् ॥ २५ ।
[7]तेऽभिवाद्य महात्मानं सम्भ्रान्तमनसः सुराः ।
अब्रुवन् परमत्रस्ताः पितामहमिदं वचः ॥ २६ ॥
भगवन् पृथिवी सर्वा खन्यते सगरात्मजैः ॥
[8]खनद्भिश्चैव तैर्ब्रह्मन् [9]महान् सत्ववधः कृतः ॥२७॥

रघुनंदन ॥ 1. For this Sl. B. 20. नागानां (a) बध्यमानानामसुराणां च राघव ॥ राक्षसानां (b) दुराधर्षं सत्वानां निनदोऽभवत् ॥ (a) V. बाध्य etc. (b) V. दुराधर्ष etc.; S. च दुर्धर्ष etc. 2. G. 22. स्वनो etc., but P. has स्वरो etc. 3. For this Sl. B. 21. योजनानां सहस्राणि षष्टिं तु रघुनंदन । बिभिदुर्धरणीं राम रसातलमनुत्तमम् ॥ 4. G. 23. धरणीं etc., but P. has धरण्या etc. 5. For this Sl. B. 22. एवं पर्वतसंबाधं जम्बूद्वीपं नृपात्मजाः । खनंतो नृपशार्दूल सर्वतः परिचक्रमुः ॥ 6. For this Sl. B. 23. ततो देवाः सगन्धर्वाः सासुराः सहपन्नगाः । सम्भ्रांतमनसः सर्वे पितामहमुपागमन् ॥ 7. For this Sl. B. 25. ते प्रसाद्य महात्मानं विषण्णवदनास्तदा । ऊचुः परमसंत्रस्ताः पितामहमिदं वचः ॥ 8. B. 24. बहवश्च महात्मानो बध्यन्ते जलचारिणः ॥ 9. G. 27. महा etc., but P. has महान् etc

[1]अयं स [2]यज्ञहा ब्रह्मन्ननेनाश्वोऽपवाहितः ॥
इति ते सर्वभूतानि निघ्नन्ति सगरात्मजाः ॥ २८ ॥ *
आदिकाण्डे पृथिवीदारणम् ॥

XLII.

[3]इति तेषां वचः श्रुत्वा देवानां प्रपितामहः ।
प्रत्युवाच भयोद्विग्नान् [4]सर्वान्देवानिदं वचः ॥ १ ॥
[5]बिभर्ति यो जगत् कृत्स्नं [6]यस्योत्पत्तिं न विद्महे ।
तेनाश्वो वासुदेवेन कपिलेनापवाहितः ॥ २ ॥
[7]पृथिव्याश्चैव भेदोऽयं दृष्टस्तेनेति मे मतिः ।
सगरस्य च पुत्राणां विनाशोऽमिततेजसाम् ॥ ३ ॥
[8]पितामहवचः श्रुत्वा [9]ततस्ते त्रिदिवालयाः ।

---

1. For this Sl. B. 26. अयं (a) यज्ञहरोऽस्माकमनेनाश्वोपनीयतं । इति ते सर्वभूतानि हिंसंति सगरात्मजाः ॥ (a) V. and S. यज्ञहनो etc. 2. G. 28. यज्ञहास्माकमनेनाश्वोऽपहारितः । etc., but P. agrees with our text. * After this G. (29) reads the additional Sl. "एतच्छ्रुत्वा महावीर्य समाधिं कर्तुमर्हसि । यावत् त्वत्प्राणिनः सर्वांश्चहिंसंत्यश्वसारिणः ॥" which however is wanting in P. 3. For this Sl. B. XL 1. देवतानां वचः श्रुत्वा भगवान् वै पितामहः । प्रत्युवाच सुसंत्रस्तान् कृतांतबलमोहितान् ॥ 4. G. 1. सर्वदेवान् etc., but P. has सर्वान् देवान् etc. 5. For this Sl. B. 2 and 3. यस्येयं वसुधा कृत्स्ना वासुदेवस्य धीमतः । महिषी माधवस्यैषा स एव भगवान् प्रभुः ॥ कापिलं रूपमास्थाय धारयत्यनिशं धरां । तस्य कोपाग्निना दग्धा भविष्यन्ति नृपात्मजाः ॥ 6. G. 2. यस्योत्पत्तिर्नविद्यते but P. has यस्योत्पत्तिं न विद्महे । 7. For this Sl. B. 4. पृथिव्याश्चापि निर्भेदो दृष्ट एव सनातनः । सगरस्य च पुत्राणां विनाशो(a)दीर्घदर्शिना ॥ (a) V दीर्घजीविना. 8. For this Sl. B. 5. पितामहवचः श्रुत्वा त्रयस्त्रिंशदरिंदमाः । देवाः परमसंहृष्टाः पुनर्जग्मुर्यथागतं ॥ 9. P. सर्वेते etc.

देवर्षिपितृगन्धर्वाः प्रतिजग्मुर्यथागतम् ॥ ४ ॥
[1]सगरस्य च पुत्राणां प्रादुरासीन्महौजसाम् ।
खनतां पृथिवीं शब्दो वज्राशनिसमस्वनः ॥ ५ ॥
[2]ते भित्त्वा पृथिवीं सर्वां कृत्वा चापि प्रदक्षिणम् ।
[3]उपेत्य सागराः सर्वे पितरं वाक्यमब्रुवन् ॥ ६ ॥
[4]परिभ्रान्ता मही सर्वा महद्भिश्शसनं कृतम् ।
यादोगणमहाग्राहदैत्यदानवरक्षसां ॥ ७ ॥
[5]न चापश्याम तं राजन् यज्ञविघ्नकरन्तव ।
किं कुर्महे पुनस्तात विनिश्चित्य प्रशाधि नः ॥ ८ ॥
[6]तेषामेतद्वचः श्रुत्वा पुत्राणां सगरस्तदा ।
निश्चित्योवाच सर्वांस्तान् पुनः पुत्रानिदं वचः ॥९॥
[7]भूयो मृगयताश्वं [8]तं विभिद्येदं रसातलम् ।
अश्वहर्त्तारमासाद्य कृतार्था संनिवर्तत ॥ १० ॥

---

1. For this Sl. B. 6. सगरस्य च पुत्राणां प्रादुरासीन्महास्वनः । पृथिव्यां भिद्यमानायां निर्घातसमनिस्वनः ॥ 2. B. 7. ततो भित्त्वा महीं etc. 3. B. 7. सहिताः सागराः etc. 4. For this Sl. B. 8, परिक्रांता मही सर्वा सत्ववंतश्च सूदिताः । देवदानवरक्षांसि पिशाचोरगपंनगाः ॥ G. 7. परिक्रांता etc. 5. For this Sl. B. 9. न च पश्याम हे(a)ऽश्वंते अश्वहर्तारमेवच । किं करिष्यामि भद्रंते बुद्धिरत्रविचार्यतां ॥ (a) V. चाश्वमश्वहर्त्ता etc. 6. For this Sl. B. 10. तेषां तद्वचनं श्रुत्वा पुत्राणां राजसत्तमः । समन्युरब्रवीद्वाक्यंसगरो रघुनंदन । 7. For this Sl. B. 11. भूयः खनत भद्रं वो (a) विभेद्य वसुधातलं । अश्वहर्त्तारमासाद्य कृतार्थाश्च (b) निवर्त्तत ॥ (a) V. and S. निर्भिद्य etc. (b) S निवर्त्तथ: 8. G. 10. मे etc. but P. has तं etc.

[1]पितुरेतद्वचः श्रुत्वा सगरस्यात्मसम्भवाः ।
सर्वतः षष्टिसाहस्रा रसातलमुपाद्रवन् ॥ ११ ॥
[2]पुनः खनन्तस्ते तत्र ददृशुः पर्वतोपमम् ॥
दिशागजं विरूपाक्षं धारयन्तमिमां महीम् ॥ १२ ॥
[3]शिरसा नरशार्दूल सशैलवनकाननाम् ।
नानाजनपदाकीर्णां ननापत्तनशोभिताम् ॥ १३ ॥
[4]यदा च पर्वणि गजः खेदाच्चालयते शिरः ।
सपर्वतवना राम तदेयं चलति क्षमा ॥ १४ ॥
[5]तन्ते प्रदक्षिणं कृत्वा दिशा गजमरिन्दम ।
मन्यमाना दिशां पालं[6] दक्षिणां बिभिदुर्दिशम् ॥१५॥
[7]दक्षिणस्यामपि पुनर्ददृशुस्ते गजोत्तमम् ।
महात्मानं महापद्मं [8]भिन्दन्तं मन्दरोपमम् ॥१६॥

---

1. For this Sl. B. 12. पितुर्वचनमासाद्य सगरस्य महात्मनः । षष्टिः पुत्रसहस्राणि रसातचमभिद्रवन् 2. For this Sl. B. 13. खन्यमाने ततस्तस्मिन् ददृशुः पर्वतोपमं । (a) दिशा गजं विरूपाक्षं धारयंतं महीतलं ॥ (a) S. दिशां etc. 3 For this Sl B. 14 सपर्वतवनां कृत्स्नां पृथिवीं रघुनंदन । धारयामास शिरसा विरूपाक्षो महागजः ॥ 4 For this Sl. B. 15. यदापर्वणि काकुत्स्थ (a) विश्रमार्थं महागजः । खेदाच्चालयते शीर्षं भूमिकम्पस्तदा भवेत् ॥ (a) V. विश्रामार्थं etc. 5. For this Sl. B. 16 (a) ते तं प्रदक्षिणं कृत्वा (b) दिशापालं महागजं । मानयंतो हि ते राम जग्मुर्भित्वा रसातलं ॥ (a) V. and S. तंते etc. (b) S. दिशां etc. 6. P. जग्मुर्भित्वा वसुंधरां । 7. For this Sl. and the following line, B. 17. and 18. ततः पूर्वदिशं भित्त्वा दक्षिणां बिभिदुः पुनः । दक्षिणस्यामपि दिशि ददृशुस्ते महागजं ॥ महापद्मंमहात्मनं सुमहत्पर्वतोपमं । शिरसाधारयंतं गां विस्मयं जग्मुस्तदा ॥ 8. G. 16 तिष्ठंतं etc. (a better reading).

[1]तं च दृष्ट्वा महाकायं विस्मयं परमं ययुः ॥
[2]कृत्वा तमपि नागेन्द्रं प्रदक्षिण[3]मरिन्दम ॥ १७ ॥
सगरस्यात्मजा राम पश्चिमां बिभिदुर्दिशम् ।
[4]पश्चिमायामपि दिशि कैलासशिखरोपमम् ॥ १८ ॥
आशागजं सौमनसं ददृशुस्ते महाबलम् ।
[5]तं ते प्रदक्षिणं कृत्वा पृष्ट्वा चानामयं ततः ॥ १९ ॥
प्रोत्खनन्तो ययुर्वीरा दिशं हैमवतीमपि ।
[6]उत्तरस्यामपि[7]च ते ददृशुर्हिमपाण्डुरम् ॥ २० ॥
भद्रं भद्रेण वपुषा धारयन्तमिमां महीम् ।
[8]तमप्यालभ्य ते सर्वे कृत्वा चाभिप्रदक्षिणम् ॥ २१ ॥
सहिताः पुनरेवेदं बिभिदुर्धरणीतलम् ।
[9]प्रागुत्तरां दिशं गत्वा ततस्ते सगरात्मजाः ॥ २२ ॥
अमर्षवशमापन्नाश्चखनुरेव धरामिमाम् ।

---

1. G. 17. तंदृष्ट्वा तु &c. but. P. has तं च दृष्ट्वा &c. 2. For this, and the following line, B. 19. (a) ते तंप्रदक्षिणं कृत्वा सगरस्य महात्मनः । षष्टिः पुत्रसहस्राणि पश्चिमां बिभिदुर्दिशं ॥ (a) V. ततः प्रदक्षिणं &c. 3. P. मरिन्दमाः. 4. For this, and the following line, B. 20. पश्चिमायामपिदिशि महांतमचलोपमं । (a) दिशागजं सौमनसं ददृशुस्ते महाबलाः ॥ (a) S. दिशांगजं etc. 5. For this, and the following line, B. 21. (a) तेतंप्रदक्षिणं कृत्वा पृष्ट्वा चापि निरामयं । खनंतः समुपाक्रांता दिशं सौमवतीं तदा ॥ (a) S. तंते etc. 6. For this, and the following line, B. 22. उत्तरस्यां रघुश्रेष्ठ ददृशुर्हिमपाण्डुरं । भद्रं भद्रेणवपुषा धारयंतं महीमिमां ॥ 7. G. 20. तुते etc., P. तद etc. 8. For this, and the following line, B. 23. समालभ्य ततः सर्वा कृत्वा चैनं प्रदक्षिणं । षष्टिः पुत्रसहस्राणि बिभिदुर्वसुधातलं ॥ 9. For this, and

[1]तत्राथ प्रोत्खनन्तस्ते क्षोणीमपि समन्ततः ॥२३॥
ददृशुः कपिलं[2]राम देवं नारायणं प्रभुम् ।
[3]हयं च तस्य देवस्य[4]चरन्तमविदूरतः ॥ २४ ॥
[5]ते तं यज्ञहरं मत्वा क्रोधपर्याकुलेक्षणाः ।
अभ्यधावन् सुसंक्रुद्धास्तिष्ठतिष्ठेति चाब्रुवन् ॥ २५ ॥
[6]ततस्तेनाप्रमेयेण[7]तेजोध्माता महात्मना ।
भस्मराशीकृताः सर्वे समेताः सगरात्मजाः ॥ २६ ॥

आदिकाण्डे बालचरिते कपिलदर्शनम् ॥

XLIII.

पुत्रां श्चिरगतान्[8]श्रुत्वा सगरो रघुनन्दन ।
नप्तारमब्रवी[9]द्वाक्यं दीप्यमानं स्वतेजसा ॥ १ ॥

---

the following line B. 24. ततः प्रागुत्तरांगत्वा सागराः प्रथितांदिशं । रोषादभ्यखनन् सर्वे पृथिवीं सगरात्मजाः ॥ 1. For this, and the following line, B. 25. तेतु सर्वे महात्मानो भीमवेगा महाबलाः । ददृशुः कपिलं तत्र वासुदेवं सनातनं ॥ 2. G. 24- नाम etc. 3. For this line, B. 26 हयंच etc. प्रहर्षमतुलं प्राप्ताः सर्वे ते रघुनंदन ॥ 4. G. 24. विचरंतमदूरतः but P. has चरंतमविदूरतः 5. For this Sl. B. 27-30 ते तं(a)यज्ञहनं ज्ञात्वा क्रोधपर्याकुलेक्षणाः । खनित्रलांगलधरा नाना वृक्षशिलाधराः ॥ अभ्यधावंत संक्रुद्धास्तिष्ठतिष्ठेति चाब्रुवन् । अस्माकं त्वंहि तुरगं यज्ञियं हृतवानसि ॥ दुर्मेधस्त्वं हि संप्राप्तान् विद्धि नः सगरात्मजान् । श्रुत्वा तद्वचनं तेषां कपिलो रघुनंदन ॥ रोषेण महताविष्टो हुंकारमकरोत्तदा । (a) V. यज्ञहरं etc. G. 25. तेतं हयहरं etc., P. तंतं यज्ञहनं etc. 6. For this Sl. B. 30. ततस्तेनाप्रमेयेण कपिलेन महात्मना ॥ भस्मराशीकृताः सर्वे काकुत्स्थ सगरात्मजाः ॥ 7. G. 26. तेऽपध्माता etc., P. has तेन ध्याता &c. 8. B. XLI. 1. ज्ञात्वा etc. G. 1. मत्वा etc. 9. B. 1 राजा etc., S. राम

[1]पितॄन् गच्छ त्वमन्वेष्टुं येन चाश्वोऽपवाहितः ।
अन्तर्भूमिनिवासीनि सन्ति सत्वान्यनेकशः ॥ २ ॥
तेषां प्रतिविधानार्थं गृहीत्वा व्रज कार्मुकम् ।
तानासाद्य पितॄंस्तात हत्वा विघ्नकरं च मे ॥ ३ ॥
कृतार्थः सन्निवर्तेथा यज्ञादुत्तारयस्व माम् ।
शूरोऽसि कृतविद्यश्च पूर्वैस्तुल्यपराक्रमः ॥ ४ ॥
[2]एवमुक्तोंऽशुमान् राम सगरेण महात्मना ।
धनुरादाय खड्गं च ययौ त्वरितविक्रमः ॥ ५ ॥
[3]तमेव पितृभिर्यातं [4]पन्थानमनुसञ्चरन् ।
ययौ वेगेन महता पितॄनन्वेष्टुमञ्जसा ॥ ६ ॥
[5]वीक्षमाणो विशसनं तैः कृतं यक्षरक्षसाम् ।
सोऽवैक्षत विरूपाक्षमाशागजमवस्थितम् ॥ ७ ॥
[6]स तं प्रदक्षिणं कृत्वा पृष्ट्वा चानामयं ततः ।
पितॄंस्तान् परिपप्रच्छ हयहर्तारमेव च ॥ ८ ॥

etc. 1. For this, and the following 2 Slokas, B. 2–4 शूरश्च कृतविद्यश्च पूर्वैस्तुल्योऽसि तेजसा । पितॄणां गतिमन्विच्छ येन चाश्वोऽप(a)वाहितः ॥ अंतर्भौमानि सत्त्वानि वीर्यवंति महांति च । तेषांतु प्रतिघातार्थं(b)मासिं गृह्णीष्व कार्मुकं ॥ अभिवाद्याभिवाद्यां(c)स्त्वं हत्वा विघ्नकरानपि । सिद्धार्थः संनिवर्तस्व मम यज्ञस्य पारगः । (a) V. हारितः (b) V. सासि etc. (c) S. स्तु etc. 2. For this Sl. B. 5. एवमुक्तोंऽशुमान् सम्यक् सगरेण महात्मना । धनुरादाय खड्गं च जगाम लघुविक्रमः ॥ 3 For this Sl. B. 6. स खातं पितृभिर्मार्गमंतर्भौमं महात्मभिः । प्रापद्यत नरश्रेष्ठ तेन राज्ञाभिचोदितः ॥ 4. P. प्रस्थान etc. 5. For this Sl. B. 7. दैवदानवरक्षोभिः पिशाचपतगोरगैः । (a)पूज्यमानं महातेजा दिशागजमपश्यत ॥ (a) V. पूज्यमाना etc. 6. For this Sl. B. 8. स तं प्रदक्षिणं कृत्वा पृष्ट्वा चैव निरामयं । पितॄन् स परिपप्रच्छ वाजिहर्तारमेव च ॥

[1]आशागजोऽपि तच्छ्रुत्वा पृच्छतोंऽशुमतो वचः ।
तमुवाच कृतार्थस्त्वमेष्यसीत्यभितः स्थितम् ॥ ९ ॥
[2]इति तस्य वचः श्रुत्वा सर्वानेव हि दिग्गजान् ।
यथाक्रमं यथान्यायं प्रष्टुं समुपचक्रमे ॥ १० ॥
[3]एतदेव च तैरुक्तो [4]जगामाशुपराक्रमः ।
पूजितः सहयश्चैव गन्तासीत्यंशुमानपि ॥ ११ ॥
तेषां[5]स वचनं श्रुत्वा जगाम लघुविक्रमः ।
भस्मराशीकृता यत्र पितरस्तस्य सागराः ॥ १२ ॥
[6]स दुःखवशमापन्नः सुतोऽथह्यसमञ्जसः ।
चुक्रोशार्तस्वरं दृष्ट्वा भस्मराशीकृतान् पितॄन् ॥१३॥
[7]अपश्यत्तुरगं तं च चरन्तमविदूरतः ।
तदा पर्वणि नागेन हृतं वेलावने'स्थितम् ॥ १४ ॥

---

1. For this Sl. B. 9.(a)दिशागजस्तु तच्छ्रुत्वा प्रत्युवाच महामतिः । आसज-कृतार्थस्त्वं सहाश्वःशीघ्रमेष्यसि ॥ (a) S. दिशांगज etc. 2. For this Sl. B 10. तस्य तद्वचनं श्रुत्वा सर्वानेव दिशागजान् । यथाक्रमं यथान्यायं प्रष्टुं समुपचक्रमे ॥ (a) S. दिशां etc. 3. For this Sl. B. 11. तैश्च सर्वै(a) दिशापालैर्वाक्यज्ञैर्वा-क्यकोविदैः । पूजितः सहय(b)श्चैवागंतासीत्यभिचोदितः ॥ (a) S. दिशां etc. (b) V. & S. --श्चैव etc. 4. G. 11. गजेराशु etc. but P. has जगामाशु etc. 5. B. 12. तद्वचनं etc., G. 12. तु तद्वचः etc., but P. has स वचनं etc. 6. For this Sl. B. 13. सदुःखवशमापन्नस्त्वसमंजसुतस्तदा । चुक्रोशपरमार्तस्तु वधात्तेषां सुदुःखितः ॥ 7. For this Sl. B. 14. (a) यज्ञियंच हयंतत्र चरंतम-विदूरतः । ददर्श पुरुषव्याघ्रो दुःखशोकसमन्वितः ॥ (a) V. यज्ञोयं etc.

स तेषां राजपुत्राणां कर्तुकामो जलक्रियाम् ।
[1]सलिलार्थी महातेजा नापश्यत्सलिलं क्वचित् ॥१५॥
[2]पातयंश्चाभितो दृष्टिं ततस्तत्र ददर्श ह ।
पितॄणां मातुलं राम सुपर्णं पतगोत्तमम् ॥ १६ ॥
स चैनमब्रवीद्वाक्यं वैनतेयो महाबलः ।
मा शुचः पुरुषव्याघ्र वधोऽयं लोकसम्मतः ॥ १७ ॥
[3]कपिलेनाप्रमेयेण दग्धा ह्येते महाबलाः ॥
नार्हसे सलिलं वीर [4]दातुमेभ्यो नरोत्तम ॥ १८ ॥
[5]गङ्गा हिमवतो ज्येष्ठा दुहिता सरितांवरा ।
भस्मराशीकृतानेतान् प्लावयेल्लोकपावनी ॥ १९ ॥
यावत्क्लिन्नमिदं भस्म गङ्गया लोककान्तया ।
यदैषां भविता तात स्वर्गमेष्यन्ति वै तदा ॥ २० ॥
गङ्गामानय भद्रन्ते देवलोकान्महीतलम् ।
क्रियतां यदि शक्नोषि गङ्गाया अवतारणम् ॥ २१ ॥

1. For this line, B. 15 स जलार्थी महातेजा नचापश्यज्जलाशय ।

2. For this Sl. B. 16. (a)विमार्गनिपुणां दृष्टिं ततोऽपश्यत् खगाधिपं । पितॄणां मातुलं राम सुपर्णं (b)मनिलोपमं ॥ (a) V. विस्तार्य etc. (b) V. मचलोपमं ॥

3. For this Sl. B. 18. कपिलेनाप्रमेयेण दग्धाह्यमे महाबलाः । सलिलं नार्हसे प्राज्ञ दातुमेषां हि लौकिकं ॥ 4. G. 18. दातुमेभ्यस्त्वमन्यतः ; P has दातुमेषां त्वमन्यतः, and दातुमेभ्यो नरोत्तम as alteruatives. 5. For this and the following 3 Slokas, B. 19-21. गंगा हिमवतो ज्येष्ठा दुहिता पुरुषर्षभ । तस्यां कुरु महाबाहो पितॄणां सलिलक्रियां । भस्मराशीकृतानेतान् प्लावयेल्लोकपावनी । तया क्लिन्नमिदं भस्म गंगया लोककांतया ॥(a) षष्टिं पुत्रसहस्राणिस्वर्गलोकं(b)गमिष्यति ॥ (c)निर्गच्छाश्वं महाभाग संगृह्य पुरुषर्षभ । यज्ञं पैतामहं वीर निर्वर्तयितुमर्हसि ॥

गच्छाश्वं[1] त्वं समादाय पुनरेव यथागतम् ।
यज्ञं पैतामहं वीर निर्वर्त्तयितुमर्हसि ॥ २२ ॥
[2]सुपर्णवचनं श्रुत्वा वीर्यवानंशुमानथ ।
त्वरितो हयमादाय यज्ञमायान्महायशाः ॥ २३ ॥
[3]स राजानं [4]समादाय दीक्षितं रघुनन्दन ।
तस्मै निवेदयामास सुपर्णवचनं तदा ॥ २४ ॥
[5]तच्छ्रुत्वा व्यथितो राजा घोरमंशुमतो वचः ।
यज्ञं समापयामास नातिहृष्टमना इव ॥ २५ ॥
[6]स्वपुरं च ययौ धीमानिष्टयज्ञो महीपतिः ।
गङ्गायाश्चागमे राजा नाध्यगच्छत् स निश्चयम् ॥२६॥
[7]अगत्वानिश्चयंचापि युयुजे कालधर्मणा ।

(a) V. and S. यष्टिः etc. (b) V. नयिष्यति (c) V.गंगामानय भद्रंते देवलोका-न्महीतलं । क्रियतां यदि शक्तोऽसि गंगायास्त्ववतारणं ॥ गच्छचाश्वंमहाभाग संगृह्य· पुरुषर्षभ । यज्ञंपैतामहंवीर संवर्त्तयितुमर्हसि ॥ S. agrees with V. in reading the additional Sl. गंगामानय···स्त्ववतारणं, reading शक्नोषि for शक्तोऽसि, it then differs from V. and agrees with B. in reading निर्गच्छाश्वं etc. 1. G. 22. एतमादाय etc. 2. For this Sl. B. 22. सुपर्णवचनं श्रुत्वा सोऽंशुमानतिवीर्यवान् । त्वरितंहयमादाय पुनरायान्महातपाः ॥ 3. For this Sl. B. 23. ततो राजान मासाद्यदीक्षितं रघुनंदन । न्यवेदयद्यथावृत्तं सुपर्णवचनं(a)तथा ॥ (a) V. यथा 4. G 24. समासाद्य etc. (a better reading.). 5. For this Sl. B. 24. तच्छ्रुत्वा घोरसंकाशं वाक्यमंशुमतो नृपः । यज्ञं निर्वर्तयामास यथाकल्पं यथाविधि ॥ 6. For this Sl. B. 25. स्वपुरंत्वगमच्छ्रीमानिष्टयज्ञो मही-पतिः । गंगायाश्चागमे राजा निश्चयं नाध्यगच्छत ॥ 7. For this Sl. B. 26 अगत्वा निश्चयं राजा कालेन महता महान् । त्रिंशद्वर्षसहस्राणि राज्यंकृत्वा दिवं

[1]त्रिंशद्वर्षसहस्राणि पालयित्वा महीमिमाम् ॥ ३० ॥
आदौ सगरयज्ञः समाप्तः ॥

XLIV

[2]ततः प्रकृतयो राम सगरे स्वर्गते नृपे ।
धार्मिकंरोचयामासुरंशुमन्तं नराधिपम् ॥ १ ॥
[3]स राजा सुमहानासीदंशुमान् रघुनन्दन ।
[4]तस्य पुत्रः समभवद्दिलीप इति विश्रुतः ॥ २ ॥
[5]तस्मिन् राज्यं समावेश्य दिलीपेऽथांशुमानपि ।
हिमवच्छिखरे राम तपस्तेपे महायशाः ॥ ३ ॥
[6]गङ्गावतरणं पुण्यं चिकीर्षु[7]रमितद्युतिः ।
अनवाप्यैव तं कामं सवै नृपतिसत्तमः ॥ ४ ॥
[8]द्वात्रिंशतं सहस्राणि वर्षाणा[9]ममरद्युतिः ।
तपस्तप्त्वा महाघोरं स्वर्गं लेभे महामनाः ॥ ५ ॥
[10]दिलीपोऽपिमहातेजा यज्ञैर्बहुभिरीजिवान् ।
विंशतिं वै सहस्राणि वर्षाणां गामपालयत् ॥ ६ ॥

यतः ॥ 1. after this P. reads the additional line :—जगाम त्रिदिवं राजा [वि]जितं स्वेनैव कर्मणा ॥ 2. For this Sl. B. XLII. 1. कालधर्मं गते राम सगरे प्रकृतिजनाः । राजानंरोचयामासुरंशुमंतं सुधार्मिकं 3. P. राजा च सुमहान् etc 4. B. 3. तस्यपुत्रो महानासीद्दिलीप etc. 5. For this Sl. B. 3.(a)तस्मै राज्यं समादिश्य दिलीपे रघुनन्दन । हिमवच्छिखरे रम्ये तपस्तेपे सुदारुणं ॥ (a) S. तस्मिन etc. 6. For this, and the following Sl. B. 4: द्वात्रिंशच्छतसाहस्रं वर्षाणिसुमहायशाः ॥ तपोवनगतो राजा स्वर्गं लेभे तपोधनः ॥ 7. G. 4. …रमरद्युतिः । 8. P, द्वाविंशति etc. 8. G- 9…ममितद्युतिः, but P. has…ममरद्युतिः । 10. For this, and

निश्चयं चाप्यगत्वैव गङ्गावतरणे ततः ।
व्याधिना [1]नरशार्दूल कालस्य वशमीयिवान् ॥ ७ ॥
[2]इन्द्रलोकं गतो राजा [3]सोऽर्जितं पुण्यकर्मणा ।
राज्यं भगीरथे पुत्रे निक्षिप्य पुरुषर्षभः ॥ ८ ॥
[4]भगीरथोऽथराजाभूद्धार्मिको रघुनन्दन ।
अनपत्यः सदा काङ्क्षन् सदृशीमात्मनः प्रजाम् ॥९॥
[5]सत्तपो महदातस्थे गोकर्णेऽनुपमद्युतिः ।
ऊर्ध्वबाहुः पञ्चतपा ग्रीष्मे भूत्वा यतव्रतः ॥ १० ॥
जलशायी च हेमन्ते वर्षास्वभ्रावकाशिकः ।
शीर्णपर्णकृताहारो यतात्मा यतमैथुनः ॥ ११ ॥

---

the following Sl. B. 5-9 दिलीपस्तु महातेजाः शुत्वापैतामहंवधं । दुःखोपहतया वुद्ध्या निश्चयं नाध्यगच्छत ॥ कथं गंगावतरणं कथं तेषां जलक्रिया । तारयेयं कथं चैतानिति चिन्तापरोऽभवत् ॥ तस्यचिन्तयतोनित्यं धर्मेण विदितात्मनः । पुत्रो भगीरथो नाम जज्ञेपरमधार्म्मिकः ॥ दिलीपस्तु महातेजा यज्ञैर्बहुभिरिष्टवान् । त्रिंशद्वर्ष सहस्राणि राजा राज्यमकारयत् ॥ अगत्वानिश्चयं राजा तेषामुद्धरणं प्रति । (a)व्याधिना नरशार्दूल कालधर्म्ममुपेयिवान् ॥ (a) V. आधिना etc. Before Sl. 6. of our text P. reads the lines: दिलीपोऽपि महातेजा शुत्वा पैतामहं वचः । दुःखोपहतया बुद्ध्या नाध्यगच्छत् सनिश्चयं । कथं गंगावतरणं कथं तेषां जलक्रिया । तारयेयं कथं बन्धूनितिचिन्तापरोऽभवत् ॥ तस्यचिन्तयतो नित्यं धर्मेण विदितात्मनः । पुत्रो भगीरथो राम जज्ञेपरमधार्म्मिकः ॥ 1. P. नरशार्दूलः etc. 2. For this Sl. B. 10. इंद्रलोकंगतो राजा स्वार्जितेनैव कर्म्मणा । राज्ये भगीरथंपुत्रमभिषिच्यनरर्षभः । 3. P. स्वार्जितं etc. 4. For this Sl. B. 11. भगीरथस्तुराजर्षिर्धार्म्मिको रघुनन्दन । अनपत्यो महाराजः प्रजाकामः सचाप्रजः ॥ 5. For this, and the following 2 Slokas, B. 12-14. मंत्रिष्वाधाय तद्राज्यं गंगावतरणे रतः । तपोदीर्घसमातिष्ठद्गोकर्णे रघुनंदन ॥ उर्ध्वबाहुः पंचतपा मासाहारो जितेंद्रियः । तस्य वर्षसहस्राणि घोरे तपसि तिष्ठतः॥

तस्य वर्षसहस्रान्ते तपसोग्रेणतोषितः ।
आजगामाश्रमं ब्रह्मा प्रजानां प्रभुरीश्वरः ॥ १२ ॥
[1]वृतः सुरगणैः श्रीमान् विमानवरमास्थितः ।
स एनमाभाष्य तदा तप्यमानं ततोऽब्रवीत् ॥ १३ ॥
[2]भगीरथ महाभाग प्रीतस्तेऽहं नरेश्वर ।
[3]गृहाण वरमस्मत्तः काङ्क्षितं पृथिवीपते ॥ १४ ॥
[4]तमुवाच ततो दृष्ट्वा ब्रह्माणं स्वयमागतम् ।
भगीरथो महातेजाः कृताञ्जलिरिदं वचः ॥ १५ ॥
यदिमे [5]भगवान् प्रीतो यद्यस्ति [6]तपसः फलम् ।
[7]ततः सगरपुत्रास्ते मत्तः सलिलमाप्नुयुः ॥ १६ ॥
[8]गङ्गाजलप्लुते तस्मिन् देहभस्मनि पाविताः ।
गच्छेयुरमलाः स्वर्गं सर्वे नः प्रपितामहाः ॥ १७ ॥
[9]इयञ्च सन्ततिर्देव [10]नच्छिद्येत कथञ्चन ।
इक्ष्वाकूणां कुले गच्छेदेषमे[11]ऽस्तु वरोवर ॥ १८ ॥

अवीतानि महाबाहो तस्यराज्ञामहात्मनः । सुप्रीतो भगवान् ब्रह्मा प्रजानांप्रभुरीश्वरः॥ 1. For this SL. B. 15. ततः सुरंगणैः सार्द्धमुपागम्य पितामहः । भगीरथं महात्मानं तप्यमानमथाब्रवीत् ॥ 2. For this Sl. B. 16. भगीरथ महाराज प्रीतस्तेऽहं जनाधिप । तपसा च सुतप्तेन वरंवरय सुव्रत ॥ 3, G. 14. मद्दाणात्त्वंवरंमत्तः etc. but P. agrees with our text. 4. For this Sl. B, 17...तमुवाच महातेजाः सर्वलोकपितामहं । भगीरथो महाबाहुः कृताञ्जलिपुटःस्थितः ॥ 5. V. & S. भगवन् etc. 6. G. 16. तपसोबलं. 7. B. 18. सगरस्यात्मजाः सर्वे(a)मत्तःसलिलमाप्नुयुः ॥ (a) V. गंगासलिल etc. 8. For this Sl. B. 19 गंगायाः सलिलक्लिन्ने भस्मन्येषां महात्मनां । स्वर्गं गच्छेयुरत्यन्तं सर्वे (a) च प्रपितामहाः ॥ (a) V. ते &c. 9. For this Sl. B. 20. (a) देव याचेह संतत्यै नावसीदेत् कुलं च नः । इक्ष्वाकूणां कुलेदेव एष मेऽस्तुवरः परः ॥ (a) V, यया च संततिर्देव &c, 10 G. 18. नावसीदे &c. P नावसीदेत् etc, 11. G. 18. प्रवरोवरः, P ..स्तु परोवरः ।

णमित्युक्त ऽपि साधकतममिति गम्यते तदेतत् तमग्रहणं ज्ञापकमन्यत्र तमग्रहणेन विना प्रकर्षो न लभ्यते । तेनाधारोऽधिकरण इत्यनेन मुख्यामुख्ययोरधिकरणत्वं सिद्धम् । तिलेषु तैलम् । गङ्गायां घोषः । साधकतमस्याविवक्षायां स्वातन्त्र्याद्धनुर्विध्यतीति भवति । पुंल्लिङ्गनिर्देशः किमर्थः । परिक्रयणमित्यनवकाशया सम्प्रदानसञ्ज्ञया बाधा मा भूत् । शतेन परिक्रीतः । वचनात् साऽपि भवति । शताय परिक्रीतः । दिवः कर्म इत्यत्र च समावेशो यथा स्यात् । अक्षैर्दीव्यति ॥

दिवः कर्म ॥ ११४ ॥

दिवेः साधकतमं कारकं कर्मसञ्ज्ञं भवति । अक्षान् दीव्यति । शलाकां दीव्यति । नपा निर्देशात् करणत्वमपि ॥

आधारोऽधिकरणः ॥ ११५ ॥

आध्रियते ऽस्मिन् क्रियेत्याधारः । इदमेव निपातनमधिकरणे घञः । आधारो यस्तत् कारकमधिकरणसञ्ज्ञं भवति । यद्येवं कर्तृकर्मणोरधिकरणसंज्ञा प्राप्ता तदाश्रितत्वात् क्रियायाः । एवं तर्हि कर्तृकर्मणोः क्रियाश्रययोर्धारणादाधारोऽभिप्रेतः । पूर्वं तमग्रहणेन ज्ञापितं गौणस्याप्याधारस्याधिकरणत्वम् । कर्तृकर्मणोः सत्यपि क्रियाधारत्वेऽनवकाशत्वात् कर्तृकर्मसञ्ज्ञे भविष्यतः । भेदविवक्षायामधिकरणत्वमपि । अशनक्रिया देवदत्ते वर्तते । विक्लेदनं तण्डुलेषु । औपश्लेषिको वैषयिकोऽभिव्यापक इत्याधारस्त्रिविधः प्रोक्तः । कटाकाशतिलेषु च । औपश्लेषिकः । कटे आस्ते । स्थाल्यां पचति । वैषयिकः । आकाशे

शकुनयः । गङ्गायां घोषः । गुरौ वसति । यदधीना यस्य स्थितिः स तस्याधारोऽभिव्यापको विभागाप्रतीतेः । तिलेषु तैलम् । दधनि सर्पिः । अधिकरणप्रदेशा ईबधिकरण इत्येवमादयः ॥

कर्मैवाधिशीङ्स्थासः ॥ ११६ ॥

अधिपूर्वाणां शीङ् स्था आस् इत्येषामाधारो यस्तत् कारकं कर्मसञ्ज्ञमेव भवति । ग्राममधिशेते । पर्वतमधितिष्ठति । प्रासादमध्यास्ते । एवकारः पुंल्लिङ्गाधिकरणसञ्ज्ञासमावेशनिवृत्त्यर्थः । कर्मप्रदेशाः कर्मणीबित्येवमादयः ॥

वसोऽनूपाध्याङः ॥ ११७ ॥

अनु उप अधि आङ् इत्येवम्पूर्वस्य वसतेराधारो यस्तत् कारकं कर्मसंज्ञं भवति । ग्राममनुवसति । गिरिमुपवसति । गृहमधिवसति । वनमावसति । इह कथं ग्रामे उपवसति । भोजननिवृत्तिं करोतीत्यर्थः । अत्रापि त्रिरात्रादेराधारस्य कर्मत्वं प्रतीयते ॥

अभिनिविशश्च ॥ ११८ ॥

अभिनि इत्येवंपूर्वस्य विशतेराधारो यस्तत् कारकं कर्मसंज्ञं भवति । ग्राममभिनिविशते । गेहमभिनिविशते । चकारात् क्वचिदधिकरणसंज्ञाऽपि भवति । या या संज्ञा यस्मिन्नभिनिविशते । अर्थेष्वभिनिविष्टः । कल्याणेऽभिनिवेशः ॥

कर्त्राप्यम् ॥ ११९ ॥

कर्त्रा क्रियया यदाप्यं तत् कारकं कर्मसंज्ञं भवति ।

कर्तृग्रहणादाप्यग्रहणसामर्थ्याद्वा क्रिया लभते । तत्र कर्म ॥

प्राप्यं विषयभूतञ्च निर्वर्त्यं विक्रियात्मकम् ।
कर्तुश्च क्रियया व्याप्यमीप्सितानीप्सितेतरत् ॥

आप्यत्वसामान्यं सर्वत्र विद्यते । प्राप्यम् । ग्रामं गच्छति । आदित्यं पश्यति । विषयभूतम् । जैनेन्द्रमधीते । हिमवन्तं शृणोति । निर्वर्त्यम् । घटं करोति । ओदनं पचति । विक्रियात्मकम् । काष्ठानि दहति । घटं भिनत्ति । ईप्सितम् । गुडं भक्षयति । ओदनं भुङ्क्ते । अनीप्सितम् । ग्रामं गच्छन् व्याघ्रं पश्यति । कटकान्मृद्गाति । अनुभयम् । ग्रामं गच्छन् वृक्षमूलान्युपसर्पति । कर्त्रेति किम् । माषेष्वश्वं बध्नाति । अश्वेन कर्मणा भक्षणक्रियया माषाणामाप्यानां कर्मसंज्ञा मा भूत् । अथ सर्वाणि कारकाणि कर्त्राप्यन्त इति कर्मसंज्ञा प्राप्नोति । नैष दोषः । सर्वेषु कारकेष्वाप्येषु आप्यग्रहणसामर्थ्यादाप्यतमे संप्रत्ययः । तेन करणादिषु न भवति । पयसा ओदनं भुङ्क्ते । इह कथं कर्मत्वं गेहं प्रविशतीति । आधारस्याविवक्षया ॥

अकथितञ्च ॥ १२० ॥

अकथितमसङ्कीर्तितम् । अपादानादिभिर्विशेषकारकादिभिरकथितञ्च यत् कारकं तत् कर्मसंज्ञं भवति । अकथितमप्रधानमिति गृह्यमाणे इह देवदत्तात् गां याचत इत्यप्रधानतयाऽपादानसंज्ञा कर्मसंज्ञया बाध्येत ।

दुहियाचिरुधिप्रच्छिभिक्षिचित्रामुपयोगनिमित्तमपूर्वविधौ ॥

ब्रुविशासिगुणेन च यत् सचते तदकीर्तितमाचरितं कविना ।

दुहि । गां दोग्धि पयः । गौः कारकमपादानत्वेना-सङ्कीर्तितमपायस्याविवक्षितत्वात् । गोरप्याप्यत्वेन सि-द्धं कर्मत्वमिति चेत् परिगणनार्थमिदं वक्तव्यम् । इह मा भूत् । नटस्य शृणोति श्लोकम् । याचि । माणवकं गां याचते । याचनमात्रेणापायस्याविवक्षितत्वात् । रुधि । गामवरुणद्धि व्रजम् । सतोऽप्याधारस्याविवक्षा । अनुदरा कन्येति यथा । प्रच्छि । आचार्यं धर्मं पृच्छति । प्रश्नमात्रे-णापायस्याविवक्षा । भिक्षि । देवदत्तं गां भिक्षते । चिञ् । वृक्षमवचिनोति फलानि । उपयोगनिमित्तं प्रयोगनिमि-त्तम् । अथवा उपयोगो दुग्धादि तन्निमित्तं गवादि । इहापि तर्हि स्यात् । पाणिना कांशपात्र्यां दोग्धि । पाण्या-दिकमप्युपयोगनिमित्तमित्याह । अपूर्वविधौ । यस्य पूर्वो विधिर्नोक्तः । इह तु पूर्वमेव करणसञ्ज्ञा अधिकरणसञ्ज्ञा च विहिता । ब्रुविशास्योर्गुणेन च क्रियया कर्मणा वा यत् सचते सम्बध्यते तदकीर्तितमित्युक्तमाचार्येण । ब्रुवि । माणवकं धर्मं ब्रूते । शासि । माणवकं धर्ममनुशास्ति । माणवकस्य सम्प्रदानत्वेनाविवक्षा । अकथितमिति किम् । देवदत्तात् गां याचते । चकारोऽनुक्तसमुच्चयार्थः । तेन कालभावाध्वगन्तव्यः कर्मसंज्ञा ह्यकर्मणामिति लब्धम् । काले । मासमास्ते । संवत्सरं वसति । भावे । गोदोहं स्वपिति । अध्वा च स गन्तव्यश्चेति इच्छया विशेषण-त्वम् । क्रोशमास्ते । क्रोशं स्वपिति । देशोऽपि कर्मसंज्ञा इति केचित् । कुरूनास्ते । कुरून् स्वपिति । अथ नीवहि-

हरतिकृषजयत्यादयो द्विकर्मका उपलभ्यन्ते । तेषां कथं द्विकर्मकत्वं प्रधानाप्रधानकर्मणोः सामान्येनाप्यत्वात् । अजां नयति ग्रामम् । भारं वहति ग्रामम् । भारं हरति ग्रामम् । शाखां कर्षति ग्रामम् । देवदत्तो जिनदत्तं शतं जयति । देवदत्तो ग्रामं शतं दण्डयति । अयं तु विशेषः ।

प्रधानकर्मण्यभिधेये लादीनाहुर्द्विकर्मणाम् ।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः ॥

नीयते अजा ग्रामम् । उह्यते भारो ग्रामम् । ह्रियते भारो ग्रामम् । कृष्यते शाखा ग्रामम् । जीयते जिनदत्तः शतम् । दण्ड्यते जिनदत्तः शतम् । अप्रधाने कर्मणि दुहादीनाम् । दुह्यते गौः पयः । याच्यते माणवको गाम् । अवरुध्यते गां व्रजः । पृच्छ्यते आचार्यो धर्मम् । भिक्ष्यते देवदत्तो गाम् । अवचीयते वृक्षः फलानि । उच्यते माणवको धर्मम् । शिष्यते माणवको धर्मम् । ण्यन्ते कर्तुश्च कर्मण इति उत्तरसूत्रेणाण्यन्तावस्थायां यः कर्ता ण्यन्तावस्थायां कर्मतामापन्नः प्रयोज्यस्तस्याभिधाने लादीनाहुः । बोध्यते माणवकः शास्त्रम् । गम्यते माणवको ग्रामम् । भोज्यते माणवक ओदनम् । आस्यते माणवको मासम् । अध्याप्यते माणवकौ जैनेन्द्रम् । ननु ण्यन्तेषु धुषु ण्यन्तवाच्यया क्रियया प्रेषणाध्येषणलक्षणया यदाप्यते तत् प्रधानं कर्म । अवयवक्रियया यदाप्यतेऽप्रधानम् । एवं च सति प्रधानकर्मण्यभिधेये लादीनाहुरित्यनेनैव सिद्धत्वादनर्थकमिदं ण्यन्ते कर्तुश्च कर्मण इति । नानर्थकं समुच्चयार्थमेतत् प्रधाने कर्मणि लादयो भवन्त्यप्रधाने च । तेन बोध्यते माणवकं धर्मः । भोज्यते माणवकमोदनः । अध्याप्यते माणवकं

जैनेन्द्रः । अकर्मणां गत्यर्थानां च प्रधान एव कर्मणि लादयः । आस्यते माणवको मासम् । आस्यते माणवको गोदोहम् । गम्यते माणवको ग्रामम् । प्राप्यते माणवको ग्रामम् ॥

ज्ञागम्यद्यर्थधेरणि कर्ता णौ ॥ १२१ ॥

ज्ञार्थानां गम्यर्थानामद्यर्थानां धीनाञ्च धूनामण्यन्तानां यः कर्ता स णौ सति कर्मसंज्ञो भवति । ज्ञार्थानाम् । जानाति माणवको धर्मम् । ज्ञापयति माणवकं धर्मम् । बुध्यते माणवको धर्मम् । बोधयति माणवकं धर्मम् । पश्यति माणवको ग्रामम् । दर्शयति माणवकं ग्रामम् । गम्यर्थानाम् । गच्छति माणवको ग्रामम् । गमयति माणवकं ग्रामम् । याति माणवको ग्रामम् । यापयति माणवकं ग्रामम् । अद्यर्थानाम् । भुङ्क्ते ओदनं माणवकः । भोजयति माणकमोदनम् । अश्नाति माणवक ओदनम् । आशयति माणवकमोदनम् । धीनाम् । आस्ते माणवकः । आसयति माणवकम् । शेते माणवकः । शाययति माणवकम् । अत्रापि पूर्ववण्णिजन्तवाच्यया क्रियया प्रेषणाध्येषणलक्षणया आप्यत्वात् कर्मसंज्ञा सिद्धा । यद्यपि स्वातंत्र्यमाप्यत्वञ्चास्ति तथापि कर्मैवेत्यवधारणात् कर्तृसंज्ञा न भवतीति । एवं सिद्धे नियमार्थमिदं तेषामेवाणौ कर्ता ण्यन्ते कर्मसंज्ञो भवति नान्येषाम् । पचत्योदनं देवदत्तः । पाचयत्योदनं देवदत्तेन । अणि कर्तेति किम् । गमयति देवदत्तो जिनदत्तम् । तमन्यः प्रयुङ्क्ते । गमयति देवदत्तेन जिनदत्तम् । नयत्यादयः प्रापणार्था न गत्यर्थास्तेनेह कर्मसंज्ञा न भवति । अजां नयति देवदत्तः । नाय-

यति देवदत्तेन । भारं वहति वाहीकः । वाहयति वाहीकेन । यदा गत्यर्थतासंभवस्तदा भवति कर्मसंज्ञा । वहन्ति बलीवर्दा यवान् । वाहयन्ति बलीवर्दान् यवान् । प्रवहत्युदकं देवदत्तः । प्रवाहयत्युदकं देवदत्तम् ॥ अद्यर्थेषु अदिखाद्योः प्रतिषेधो वक्तव्यः ॥ * ॥ अत्ति देवदत्तः । आदयति देवदत्तेन । खादयति देवदत्तः । खादयति देवदत्तेन ॥ अथवा सर्वमद्यर्थकार्यमदर्ल भवति इति वक्तव्यमधिकरणे तद्विधिं मुक्त्वा ॥ * ॥ आदयते माणवकेन । बल्यद्यर्थादिति ममापि न भवति । भक्षिरहिंसार्थः कर्मसंज्ञो न भवति इति वक्तव्यम् । भक्षयति पिण्डीं देवदत्तः । भक्षयति पिण्डीं देवदत्तेन । अहिंसार्थस्येति किम् । भक्षयति बलीवर्दो यवम् । भक्षयति बलीवर्दं यवम् । अत्र हिंसाऽस्ति । वनस्पतिकायानां प्राणित्वात् । प्रकृतेन कर्मणा अकर्मका इह गृह्यन्ते तेन विग्रहेण कालादिकर्मणः कर्ता कर्मसंज्ञो भवति । आस्ते मासं देवदत्तः । आसयति मासं देवदत्तम् । आस्ते गोदोहं देवदत्तः । आसयति गोदोहं देवदत्तम् । आस्ते क्रोशं देवदत्तः । आसयति क्रोशं देवदत्तम् ॥

शब्दे च ॥ १२२ ॥

शब्दे कर्मभावेन क्रियाभावेन च यो धुर्वर्तते तस्याणयन्तस्य कर्ता णौ कर्मसंज्ञो भवति । शब्दकर्मणः । शृणोति देवदत्तः शब्दम् । श्रावयति देवदत्तं शब्दम् । उपलभते देवदत्तः शब्दम् । उपलम्भयति देवदत्तं शब्दम् । अधीते माणवकस्तर्कम् । अध्यापयति माणवकं तर्कम् । शब्दक्रियस्य । जल्पति देवदत्तः । जल्पति देवदत्तम् । विलपति

देवदत्तः । विलापयति देवदत्तम् । चशब्दोऽनुक्तसमुच्चयार्थः । तेन ह्वयत्यादिषु न भवति । ह्वयति देवदत्तः । ह्वापयति देवदत्तेन । क्रन्दति देवदत्तः । क्रन्दयति देवदत्तेन ।

हृक्रोर्न वा ॥ १२३ ॥

हृ कृ इत्येतयोरण्यन्तयोर्यः कर्ता स ण्यन्तयोर्न वा कर्मसंज्ञो भवति । नवेति निर्देशात् प्राप्ते चाप्राप्ते च विकल्पः । प्राप्ते । अभ्यवहरति देवदत्तः । अभ्यवहारयति देवदत्तं देवदत्तेनेति वा । विहरति देवदत्तः । विहारयति देवदत्तं देवदत्तेनेति वा । विकुर्वते सैन्धवाः । विकारयन्ति सैन्धवान् सैन्धवैरिति वा । अभ्यर्थगम्यर्थे धिसंज्ञायां पूर्वेण प्राप्तिः । अप्राप्ते । हरति माणवको भारम् । हारयति माणवकं माणवकेन वा । करोति कटं देवदत्तः । कारयति कटं देवदत्तं देवदत्तेन वा । चकारोऽनुक्तसमुच्चयार्थोऽनुवर्तते । तेन अभिवदिदृश्योर्दयिषये विकल्पः । अभिवदति गुरुं देवदत्तः । अभिवादयते गुरुं देवदत्तं देवदत्तेन वा । पश्यन्ति भृत्या राजानम् । दर्शयते भृत्यान् भृत्यैरिति वा । णिच इति दविधिः ।

स्वतन्त्रः कर्ता ॥ १२४ ॥

स्वतन्त्र आत्मप्रधानः । क्रियासिद्धौ स्वतन्त्रो योऽर्थस्तत् कारकं कर्तृसंज्ञो भवति । देवदत्तः पचति । देवदत्तेन कृतम् । प्रेषितः करोतीत्यत्रापि स्वातन्त्र्यं गम्यते । अनिच्छायामकरणात् । इह स्थाली पचतीति स्वातन्त्र्यं विवक्षितम् ॥

तत्प्रयोजको हेतुः ॥ १२५ ॥

योजकः प्रेरकस्तस्य स्वतन्त्रस्य योजको योऽर्थस्तत्कारकं हेतुसंज्ञं भवति । पुल्लिङ्गकर्तृसंज्ञासमावेशात् कर्तृसंज्ञं च । कारयति । भोजयति । हेतुत्वाद्धेतुमतीति णिच् । कर्तृत्वाल्लकारवाच्यता । गौणस्यापि योजकस्य हेतुत्वम् । भिक्षा वासयति । कारीषोऽग्निरध्यापयति । तद्योजक इति वचनं ज्ञापकं तृजकाभ्यां कर्तरीत्यस्य तासप्रतिषेधस्यानित्यत्वम् ॥

नि: ॥ १२६ ॥

अधिकारोऽयम् । प्राग्धोस्ते इत्यतः प्राक् । यानित ऊर्ध्वमनुक्रमिष्यामो निसंज्ञास्ते वेदितव्याः । वक्ष्यति चादिरसत्वे । च वा ह अह एव । निरिति पुल्लिङ्गनिर्देशः किमर्थः गितिसंज्ञाभ्यां समावेशो यथा स्यात् । निप्रदेशा निरेकाजनाङित्येवमादयः ॥

चादिरसत्वे ॥ १२७ ॥

सीदत अस्मिंल्लिङ्गसंख्ये इति सत्वम् । लिङ्गसंख्यावद्द्रव्यमित्यर्थः । चादयो निसंज्ञका भवन्ति न चेत् सत्वे वर्तन्ते । च वा हा अह एव एवम नूनम् शश्वत् सूपत् कूपत् कुवित् नेत् चेत् चण् क्वचित् यत्र नह हन्त माकिम् नकिम् माङ् । ङकारो माङि लुङीति विशेषणार्थः । अङिति माशब्दे मा ऽभवत् मा भविष्यति । न नञ् । ञकारो नञिति विशेषणार्थः । नहि वात्वाक ननु चस्वेच तु द्वै न्वै नुवै रूवै रेवै श्रौषट् वौषट् स्वाहा स्वधा ओम् तथाहि खलु किल अथ अवस् स्म अस्मि आ इ उ ऊ ऋ ऌ ए ऐ ओ औ उञ् सुञ् आदह आतङ्क वेलायाम् मात्रायाम् यावत् यथा किम् यत् तत् यदि पुरा धिक् हे है पाट प्याट उताहो

आहो अथो अधो मानो मनु नाना मन्ये असि ब्रूहि हिनु तु इति इव वत धवत एवं आ आं शं हिकम् हिरुक् शुभम् सुकम् शुकम् तुकम् नहि कम् ऋतम् सत्यम् अद्धा नो हि मुधा न चेत् जातु कथम् ऋते कुत्र अपि आदक आवहानोश्चित् वाह्यस् वत् दिष्ट्या पशु युगपत फट् सह अनुषक् ताजक् नाजक अङ्ग पुत्र अये अरे अवे वट् वेट वाट् उं श्वक्तिवत् मर्या ईप कीम् सीम् गिविभक्तीस्वरप्रतिरूपकाश्च । गिप्रतिरूपका अवदत्तमित्यादौ । दुर्नीतन्दुर्नय इति णत्वं न भवति । असत्व इति किम् । अस्यापत्यमिरिति ॥

प्रादिः ॥ १२८ ॥

प्रादयो निसंज्ञा भवन्त्यसत्वे । प्रपरापसमनिर्दुर्व्याङ्न्यधयोऽप्यतिसूद्भयश्च । प्रतिना सह लक्षयितव्याः पर्युपयोरपि लक्षणमत्र । असत्व इत्येव । विप्रातीति विप्रः । परा जयति सेना । पृथक्करणमुत्तरार्थम् । प्रादीनामेव गिसंज्ञा यथा स्याचादीनां मा भूत् । उत्तरत्र प्रादिग्रहणे क्रियमाणे अक्रियायोगे निसंज्ञा न स्यात् । आ एवं नु मन्यसे । आ एवं किल तत् ॥

क्रियायोगे गि ॥ १२९ ॥

क्रियायोगे प्रादयो गिसंज्ञा भवन्ति । प्रणमति । परिणायकः । गेरसेऽपि विकृतेरिति णत्वं सिद्धम् । क्रियायोग इति किम् । प्रगता नायका अस्माद्देशात् प्रनायको देशः । नन्वत्रापि क्रिया ऽस्ति । योगग्रहणसामर्थ्यात् यद्क्रियायुक्तास्तं प्रति गितिसंज्ञा भवति । गमिक्रियया चात्र योगः । मरुच्छन्दस्योपसंख्यानम् । मरुत्तः । गिस्तोऽच इति अनजन्तत्वेऽप्युपसंख्यानसामर्थ्यात्तादेशः । प्रज्ञाश्र-

डाचौरुत्तिभ्यो ण इति निर्देशादद्विषये अतो गित्वम् । तिरोऽन्तर्द्धाविति निर्देशादन्तःशब्दस्यापि क्यादिविषये ॥

ति ॥ १३० ॥

तिसंज्ञाश्च प्रादयो भवन्ति क्रियायोगे । प्रकृत्य । प्रस्तुत्य । तिसंज्ञायां तिकुप्रादय इति षसः । ष्यस्तिवाक्से त्क इति ष्यादेशः । पुंल्लिङ्गा गिसंज्ञा समाविशति । अभिषिच्य । प्रणम्य । षत्वणत्वे सिद्धे । योगविभागः किमर्थः । उत्तरत्र तिसंज्ञैव यथा स्यात् गिसंज्ञा मा भूत् । इह ऊरीस्यादिति । गिप्रादुर्भ्यां यच्यस्तेरिति षत्वं स्यात् ॥

च्विडाजूर्यादिः ॥ १३१ ॥

च्व्यन्तो डाजन्तमूरीप्रभृतयश्च शब्दाः क्रियायोगे तिसंज्ञा भवन्ति । अशुक्लं शुक्लं कृत्वा शुक्लीकृत्य । डाच् । अपटत् पटत् कृत्वा पटपटाकृत्य । कृभ्वस्तियोगे च्विडाचौ विहितौ तत्साहचर्यादूर्यादीनामपि कृभ्वस्तिभिरेव योगे तिसंज्ञा भवति । ऊर्यादिषु च्व्यर्थो न संभवति । ऊरीकृत्य । उररीकृत्य । ऊरीभूय । उररीभूय । ऊरीउररीशब्दावङ्गीकरणे विस्तारे च । पांपीशब्दो विध्वंसे माधुर्य्ये सकरुणविलापे । चंतालीआंतालीशब्दौ वर्णे । वेताली वैरूप्ये । धूसीशब्दः कान्तौ वाञ्छायाञ्च । सकलासंमकलाध्वंसकलाभ्रंसकला एते हिंसायाम् । गुलुगुधाशब्दौ पीडायाम् । सजः सहार्थे । फलू फली विक्ली अक्ली एते विकारे । आलंवी आलोष्ठी केवासी केवाली वर्षाली मस्ससा मस्मसा एते हिंसायाम् । श्रौषट् वौषट् वषट् स्वाहा स्वधा एते दानार्थाः । चादिषु च पाठादक्रियायोगे

ऽपि निसंज्ञा। प्रादुस् अत् आविस । प्रादुःकृत्य । प्रादुर्भूय
अद्भाय । आविर्भूय । आविःशब्दः साक्षादादौ च पठ्यते
तस्य वा कृञीति करोतियोगे तिसंज्ञाविकल्पः । आवि
ष्कृत्य । आविष्कृत्वा ॥

अनितावनुकरणम् ॥ १३२ ॥

अव्यक्तो व्यक्तो वा शब्दोऽनुक्रियते तेनेत्यनुकरणम् ।
अनितिपरमनुकरणं क्रियायोगे तिसंज्ञं भवति। खाट्कृत्य ।
पटत्कृत्य । अनिताविति किम् । खाडिति कृत्वा निर-
ष्ठीवत् । खाट्छब्दस्य धेः प्राक् प्रयोगः सविधिश्च प्रस-
ज्येत । ध्वादेः षः स इत्यत्र सुब्धुष्ठीवतिष्वष्कतिष्व्यायती
नां प्रतिषेध उक्तः ॥

सदादरानादरयोः ॥ १३३ ॥

आदरः सम्भ्रमः । अवज्ञानमौदासीन्यं वा ऽनादरः ।
सच्छब्द आदरानादर इत्येतयोरर्थयोस्तिसंज्ञो भवति ॥
आदरे । सत्कृत्य । अनादरे । असत्कृत्य । अनादर इत्य-
र्थनिर्देशात् सच्छब्दस्य तदन्तविधिरिष्टः । तेनेहापि
भवति । परमसत्कृत्य । तिसंज्ञायां निसंज्ञासमावेशः ।
निसंज्ञस्यासंख्यत्वाज्ज्ञसज्ज्ञा । आदरानादरयोरिति
किम् । सत्कृत्वा काण्डं गतः । विद्यमानं कृत्वेत्यर्थः ।

भूषापरिग्रहे ऽलमन्तः ॥ १३४ ॥

अलमन्तरित्येतौ शब्दौ भूषायामपरिग्रहे चार्थे
यथासंख्यं तिसंज्ञौ भवतः । अलङ्कृत्य । भूषयित्वेत्यर्थः ।
अन्तर्हत्य । मध्ये हत्वेत्यर्थः । भूषापरिग्रह इति किम्
अलं कृत्वा । अन्तर्हत्वा मूषिका गताः । पर्याप्तं कृत्वेत्यर्थः

परिगृह्येत्यर्थः। तिरोन्तर्द्धाविति ज्ञापकादन्तःशब्दस्य गिसंज्ञाऽपि । अङ्किविधिणत्वेषु प्रयोगदर्शनात् । अन्तर्द्धा । अन्तर्द्धिः । अन्तर्णयः ॥

कणेमनः श्रद्धाघाते ॥ १३५ ॥

श्रद्धाघातोऽभिलाषनिवृत्तिः। कणेमनःशब्दौ श्रद्धाघातेऽर्थे तिसंज्ञौ भवतः । कणेशब्द ईबन्तप्रतिरूपको निसंज्ञोऽभिलाषातिशये वर्तते । मनःशब्दोऽपि तत्साहचर्यादिह तादृशः। कणेहत्य भुङ्क्ते। मनोहत्य भुङ्क्ते। श्रद्धाघात इति किम् । तन्दुलावयवे कणे हत्वा गतः । मनो हत्वा गतः । चेतो हत्वेत्यर्थः ॥

पुरोऽस्तं झिः ॥ १३६ ॥

पुरस् अस्तमित्येतौ झिसंज्ञौ क्रियायोगे तिसंज्ञौ भवतः । पुरःशब्दः पूर्वाधरावराणां पुरधवोसीत्यत्र साधितः । अस्तंशब्दोऽनुपलब्धौ वर्तते । पुरस्कृत्य गतः । अस्तङ्गत्य पुनरुदेति । नमःपुरसोस्त्योरिति सत्वम् । झिरिति किम् । पूः पुरौ पुरः कृत्वा गतः । अस्तं कृत्वा काण्डं गतः ॥

गत्यर्थवदेऽच्छः ॥ १३७ ॥

झिरिति वर्तते। अच्छशब्दो झिसंज्ञः गत्यर्थे वदतौ च तिसंज्ञो भवति । अच्छगत्य । अच्छगम्य । ल्यपे वा म इति वा मस्य खम् ।अच्छोद्य। अच्छशब्दो दृढार्थे आभिमुख्ये च वर्तते । झिरित्येव । उदकमच्छं गत्वा ॥

अनुपदेशो ऽदः ॥ १३८ ॥

अवचनात्मिका प्रतिपत्तिरनुपदेशः । अदःशब्दोऽनुपदेशे तिसंज्ञो भवति । अदःकृत्य । अनुपदेश इति किम् । अदः कृत्वा गतः । एतत् कृत्वा गत इति परस्य कथयति ॥

तिरोऽन्तर्द्धौ ॥ १३९ ॥

तिरःशब्दोऽन्तर्द्धाने तिसंज्ञो भवति । तिरोभूय । अन्तर्द्धाविति किम् । तिरो भूत्वा स्थितः । तिर्यग्भूत्वा स्थित इत्यर्थः ॥

वा कृञि ॥ १४० ॥

तिरःशब्दोऽन्तर्द्धौ कृञि वा तिसंज्ञो भवति । प्राप्ते विकल्पः । तिरस्कृत्य । तिरः कृत्वा । तिरसो वेति सत्वम् । अन्तर्द्धावित्येव । तिरः कृत्वा काष्ठं गतः ॥

उपाजेऽन्वाजे ॥ १४१ ॥

उपाजे अन्वाजे ईबन्तप्रतिरूपकावेतौ कृञि वा तिसंज्ञौ भवतः । उपाजेकृत्य । उपाजे कृत्वा । अन्वाजेकृत्य । अन्वाजे कृत्वा । दुर्बलस्य भग्नस्य वा बलाधानं कृत्वेत्यर्थः ॥

साक्षादादिः ॥ १४२ ॥

वेति वर्तते । साक्षात्प्रभृतीनि शब्दरूपाणि कृञि वा तिसंज्ञानि भवन्ति । च्विडाजूर्यादिरित्यतो मण्डूकप्लुत्या च्विग्रहणमर्थपरमनुवर्तते । तेन च्व्यर्थे तिसंज्ञाविकल्पोऽयम् । साक्षात्कृत्य । साक्षात्कृत्वा । मिथ्याकृत्य । मिथ्याकृत्वा । यदा च्विरुत्पद्यते तदा च्विडाजूर्यादिरित्यनेन नित्यं तिसंज्ञा भवति । साक्षात् । मिथ्या । चिन्ता ।

भद्रा । रोचना । लोचना । अभ्रा । आस्था । श्रद्धा । आस्रा । प्राजर्या । प्राजरुहा । बीजर्या । बीजरुहा । संसर्या । अर्थे । लवणम् । उष्णम् । शीतम् । उदकम् । आर्द्रम् । तिसन्नियोगे लवणादीनां मकारान्तत्वं निपात्यते । अग्नौ । वसे । विकल्पने । विहसने । अग्नौप्रभृतय ईबन्तप्रतिरूपका निपातनं वा । वेति व्यवस्थितविभाषानुवर्तनाल्लवणादीनां च्व्यन्तानां मकारौकारनिपातनं न भवति । लवणीकृत्य । वशीकृत्य । नमस् । प्रादुराविःशब्दौ ऊर्यादिष्वपि पठ्येते । तयोः कृञि विकल्पार्थं इह पाठः ॥

मनस्युरस्यनत्याधाने ॥ १४३ ॥

मनसिउरसिशब्दौ ईबन्तप्रतिरूपकौ निपातनं च । अत्याधानमुपश्लेषः । मनसि उरसि इत्येतौ अनत्याधानेऽर्थे कृञि वा तिसंज्ञौ भवतः । उरसिकृत्य । उरसि कृत्वा । मनसिकृत्य । मनसि कृत्वा । निश्चित्येत्यर्थः । अनत्याधान इति किम् । उरसि कृत्वा पाणिं शेते ॥

मध्ये पदे निवचने ॥ १४४ ॥

अनत्याधान इति वर्तते । मध्ये पदे निवचने इत्येते शब्दाः कृञि वा तिसंज्ञा भवन्ति अनत्याधाने । एकारान्तता पूर्ववद्वेदितव्या । मध्येकृत्य । मध्ये कृत्वा । पदेकृत्य । पदे कृत्वा । निवचने इति वचनाभावे वर्तते । निवचनेकृत्य । निवचने कृत्वा । अनत्याधान इत्येव । हस्तिनः पदे कृत्वा हस्तमास्ते ॥

हस्ते पाणौ स्वीकृतौ तिः ॥ १४५ ॥

हस्ते पाणौ इत्येतौ स्वीकृतावर्थे कृञि तिसंज्ञौ भवतः । हस्तेकृत्य । पाणौकृत्य । भार्यां कृत्वेत्यर्थः ।

स्वीकृताविति किम् । हस्ते कृत्वा कार्षापणं गतः । नात्र दारस्वीकारः । पुनस्तिग्रहणं नित्यार्थम् ॥

प्राध्वं बन्धे ॥ १४६ ॥

प्राध्वमिति मकारान्तो ञिसंज्ञः शब्द आनुलोम्ये वर्तते । प्राध्वंशब्दः कृञि तिसंज्ञो भवति बन्धो निमित्तं चेत् । प्राध्वङ्कृत्य । बन्धनिमित्तमानुलोम्यमिह प्राध्वं-करणम् । बन्ध इति किम् । प्रगतमध्वानं प्राध्वं कृत्वा शकटं गतः । तिकुप्रादय इति षसः । गेरध्वन इति सान्तो-ऽकारः । प्रतिपदोक्तपरिभाषानाश्रयणे प्रत्युदाहरणमि-दम् ॥

जीविकोपनिषदाविवे ॥ १४७ ॥

उपनिषद्रहस्यम् । जीविका उपनिषदित्येतौ शब्दा-विवशब्दस्यार्थे कृञि तिसंज्ञौ भवतः । जीविकाकृत्य । उपनिषत्कृत्य । जीविकामिव उपनिषदमिव कृत्वेत्यर्थः । इवार्थ इति किम् । जीविकां कृत्वा गतः ॥

प्राग्धोस्ते ॥ १४८ ॥

प्रयोगनियमोऽयम् । ते गितिसंज्ञा धोः प्रागेव प्रयोक्तव्याः । तथा चैवोदाहृतम् । ते इति वचनं किम-र्थम् । अनन्तराणां तीनां गीनां च ग्रहणार्थम् ॥

लो मम् ॥ १४९ ॥

नवानां लकाराणामनुबन्धापाये ल इति सामान्येन निर्देशः । लादेशो मसंज्ञो भवति । मिप् वस् मस् सिप् थस् थ तिप् तस झि शतृ । नपा निर्देशः पुंल्लिङ्ग्या दसंज्ञया बाधा यथा स्यात् । समावेशे हि आक्रमत

तत्राह । न चाविद्येति । तत्र वक्तव्यम् । किमविद्यानिवर्तकं यन्मनः संयोगाश्रयत्वमिन्द्रियत्वमुताविद्यानिवर्तको यो मनःसंयोगस्तदाश्रयत्वं वा । नाद्यः आत्मनोपीन्द्रियत्वप्रसङ्गात् । द्वितीये मनःसंयोगस्य किं चक्षुर्मनःसंयोगत्वादिरूपेण कारणत्वमिन्द्रियमनःसंयोगत्वेन वा । आद्ये कारणतावच्छेदकाननुगमदोषः । द्वितीये इन्द्रियत्वे ज्ञाते तत्संयोगत्वेन जनकज्ञानं, तस्मिन् ज्ञाते च तदाश्रयत्वलक्षणेन्द्रियत्वज्ञानमिति परस्पराश्रयः स्यादित्यभिप्रेत्याह । तेन रूपेणेति । इन्द्रियार्थसन्निकर्षेष्वपि संयोगादिसाधारणं जातिरुपाधिर्वानुगतं सम्भवतीत्याह । तत्सम्प्रयोगस्येति ॥

ननु मन एवाविद्यानिवृत्तिमात्रे ऽनुगतं कारणं रूपाद्यविद्यानिवृत्तौ च चक्षुरादिकमपि विशेषकारणमिति चेन्न । व्यासङ्गे मनसश्चक्षुरादेश्च सत्त्वे ऽपि कार्यादर्शनात् । ननु तदा मनसश्चक्षुरादिसंयोगाभावात् कार्याभाव इति चेन्न । तस्यातीन्द्रियस्य व्यतिरेकग्रहायोगात् । कार्याभावानुपपत्त्या कारणाभावकल्पनायां प्रत्यक्षतया झटित्युपस्थितानित्यज्ञानाभाव एव कल्प्यतामित्यभिप्रेत्योपसंहरति । तस्मादिति ॥

(उपसंहारमुद्रयान्तःकरणवृत्तिनिरूपणम्) तस्माद्व्यासङ्गे यद्विरहादज्ञाननिवृत्तिविरहो यत्रेन्द्रियाणामन्वयव्यतिरेकौ सान्तःकरणवृत्तिरेषितव्या । अन्यथा परमते विज्ञानसाधनादेव व्यवहारोपपत्तौ किं विज्ञानेन । किञ्च युगपदनेकेषु पठत्सु युगपदनेकशब्दावच्छे-

देन श्रोत्रमनःसंयोगे सत्यपि यच्छब्दविषयिणी जिज्ञासा तस्यैवाज्ञानं निवर्त्तते नान्यस्येत्यनुभवसिद्धम्। इच्छा च स्वगोचर एव हेतुः स्वापेक्षया गमनादर्शनात्। न चाविद्यानिवृत्तिविशिष्टमेव चैतन्यं जिज्ञासागोचरः। अविद्यानिवृत्तय एनं ज्ञातुमिच्छामीति जिज्ञासायास्तदगोचरत्वात्। अस्या अविद्यानिवर्त्तकज्ञानगोचरत्वात्। परोक्षजिज्ञासानुपपत्तेश्च। तथाच शब्दान्तरे यद्विरहादज्ञानं न निवर्त्तते तदेवागन्तुकं ज्ञानम् जिज्ञासाजन्यान्वयव्यतिरेकाभ्यां वृत्तिरप्यविद्यानिवृत्तौ साक्षात्कारणं तन्निवर्तते तदेवागन्तुकं ज्ञानं जिज्ञासाजन्यं वृत्तिरित्यन्वयव्यतिरेकाभ्यां वृत्तिरेकयोश्चेदंत्वविषययोरिवावच्छेदकविषयत्वेनाप्युपपत्तेः ॥

तद्धेतोरेवास्त्विति नायस्य नात्र प्रसङ्गो जन्यज्ञानासिद्धौ तद्धेतोरेवासिद्धेरित्यभिप्रेत्याङ्गीकृत्यापि परमतेपीदं दूषणं समानमित्याह। अन्यथेति। ननु परमते अनुभूयमानत्वान्न तदपन्हव इति चेत्तर्ह्यस्मन्मतेप्यनित्यविषयत्वाहङ्कारधर्मत्वादिरूपेणानुभवान्नापन्हव इति तुल्यम्। किञ्च समनस्केन्द्रियसन्निकर्षे सत्यपि वृत्तिविरहादेवाविद्यानिवृत्तिविरहो दृश्यत इत्याह। किञ्च युगपदिति। ननु तादृश-

स्थले जिज्ञासाया अपि विशेषकारणत्वादन्यत्र तदभावा-देवाविद्यानिवृत्तिविरहो न तु वृत्तिविरहादित्यत आह । इच्छा चेति। इष्यमाणजनकत्वाज्ज्ञानस्यैवेष्यमाणत्वाच्चा-ज्ञाननिवृत्तौ कारणतेत्यर्थः । तर्ह्यविद्यानिवृत्तेरपीष्यमाण-तया तत्साध्यत्वमित्याशङ्क्य तद्धेतोरेवाऽगन्तुकस्येष्य-माणत्वमनुभूयत इत्याह। न चाविद्येति। परोक्षविषयेऽपि जिज्ञासादर्शनात्तत्राविद्यानिवृत्तेरसम्भवाज्जन्यज्ञानाभावे तदनुपपत्तिरित्याह । परोक्षेति । जिज्ञासाया अविद्या-निवृत्त्यहेतुत्वसाधनफलमाह । तथा चेति । निवर्तकचैत-न्यावच्छेदकत्वेन वृत्तेरुपयोग इति मतान्तरमाह । तन्नि-वर्त्तकेति । तर्हि तन्निरूपितवृत्त्यन्वयव्यतिरेकविरोध इत्यत आह । अन्वयेति ॥

वृत्तेर्हेतुत्वावच्छेदकत्वं मतद्वयेऽप्यावश्यकत्वमित्युप-संहरति । सर्वथेति ।

(वृत्तेरविद्यानिवर्तकत्वोपसंहारः प्रकाशनिवर्त्यत्वं च)

सर्वथाप्युपयुज्यतेऽविद्यानिवृत्तौ वृत्तिः । एतेन तस्याः प्रकाशनिवर्त्यत्वाद्वृत्तेश्चाप्रकाशत्वादिति निर-स्तम् । अविद्यायाः वृत्तिनिवर्त्यत्वेऽपि चैतन्य-निवर्त्यत्वेन प्रकाशनिवर्त्यत्वानपायात् । प्रका-शमात्रजन्यत्वस्य प्रतियोगिजन्याविद्यानिवृत्ता-वसम्भवात् । अपि च न प्रकाशत्वेन ज्ञान-मज्ञाननिवर्त्तकं, न चावृत्तित्वेन वृत्तिः । परोक्ष-वृत्तौ तदभिव्यक्तप्रमांशे च भावरूपाज्ञाननि-

वृत्त्यदर्शनात् । किं त्वपरोक्षप्रमाणज्ञानत्वेन । तच्च वृत्त्युपसर्जनचैतन्यस्य चैतन्यवृत्त्योर्वाविद्यानिवर्त्तकत्त्वे ऽविशिष्टम् । एतेन न जानामीति ज्ञानविरोधित्वमज्ञानस्यानुभूयते न वृत्तिविरोधित्वं, ज्ञानं च स्वरूपमेवेति प्रत्युक्तम् । वृत्तिशबलचैतन्यं वृत्त्युपहितं वा ज्ञानपदार्थ इति सिद्धान्तद्वये ऽप्यविद्यानिवृत्तौ वृत्तेरपेक्षितत्वात् । नञर्थस्य विरोधित्वस्य तत्सम्बन्धिपदार्थप्रतियोगित्वनियमात् ॥

किञ्च तरति शोकमात्मवित् ज्ञानेन तु तदज्ञानं येषां नाशित मात्मन इत्यादिश्रुतिस्मृतिष्वात्मविषयज्ञानादेवाविद्यानिवृतिश्रवणात्स्वरूपज्ञानस्य वस्तुविषयत्वाभावात्तदतिरिक्तवृत्तिरभ्युपेयेति भावः । चैतन्यस्याप्यविद्यानिवर्तकत्वाङ्गीकारात्पूर्वोक्तचोद्यं निरस्तमित्याह । एतेनेति । किमविद्यायाः प्रकाशनिवर्त्त्यत्वमात्रमभिप्रेतमुत प्रकाशमात्रनिवर्त्त्यत्वमाद्यं न विरोध इत्याह । अविद्याया इति । अविद्यानिवृत्तावविद्याया अपि कारणत्वात् द्वितीयमसम्भवीत्याह । प्रकाशमात्रेति । नन्वविद्यानिवृत्तिःप्रतियोग्यतिरिक्तप्रकाशजन्या न भवति तमोवृत्तित्वादन्धकारनिवृत्तिवदित्याशङ्क्यान्धकारस्यापि मन्दप्रकाशेन सहानुवृत्तिदर्शनात् प्रौढप्रकाशेनैव तन्निवृत्तिर्वक्तव्या । तथा चैतन्यप्रकाशस्यापि परोक्षस्थले ऽविद्यया सहैवावस्थाना-

दपरोक्षवृत्त्यभिव्यक्तप्रकाशस्यैव तन्निवर्तकत्वमित्याह । अपि चेति । न वावृत्तित्वेनेति दृष्टान्तार्थमुक्तम् । नन्वेवं सत्यज्ञानस्य न जानामीति ज्ञानसामान्यविरोधित्वानुभव-विरोध इति चेन्न । यथा वस्तुतः शास्त्रादिसम्पन्नसुरविनाश्या अपि दैतेया असुरा इति सुरसामान्यविरोधितया प्रतीयन्ते एवमज्ञानमिति ज्ञानमिति ज्ञानसामान्यविरोधितया प्रतीयमानस्यापि वस्तुतो वृत्तिविशेषाभिव्यक्तचैतन्येनैव निवृत्तिरिति भावः । वक्ष्यमाणयुक्तितोऽपि वृत्ति-निवर्त्यत्वपक्षोक्तदूषणमयुक्तमित्याह । एतेनेति । न जानामीति हि ज्ञानपदवाच्येनाज्ञानस्य विरोधः प्रतीयते । तद्वाच्यं च वृत्तिविशिष्टं वृत्त्युपहितं वा चैतन्यमित्युभयथापि वृत्तिविरोधित्वमविद्यायाः प्रतीयत इत्याह । वृत्ति-शबलमिति । तत्रहेतुमाह । नञर्थस्येति । न जानामीत्यत्र नञर्थस्याज्ञानधर्मिकविरोधित्वस्य सम्बन्धिज्ञानपदस्य योऽर्थो वाच्यो वृत्तिकवलीकृतचैतन्यं तन्निरूप्यत्वनियमादित्यर्थः ॥

वृत्तिविरोधित्वे ऽपि चैतन्यविरोधित्वानपायादन्यदपि चोद्यं निरस्तमित्याह । एतेनेति ।

(चैतन्याविरोधितया ज्ञानस्य चोद्यान्तरपरिहारः) एतेन चैतन्याज्ञानयोरविरोधित्वे कथन्तयोः प्रकाशत्वाप्रकाशत्वे ज्ञानत्वाज्ञानत्वे च स्यातामिति निरस्तम् । वृत्तिसहकृतचैतन्यस्याज्ञानविरोधित्वाभ्युपगमात् । अत एवेदमपि परास्तम्, अनुमेयादि-

गोचरपरोक्षवृत्तौ सत्यामपि नानुमेयादौ भावरूपाज्ञाननिवृत्तिः, इच्छादौ च वृत्तिमन्तरेणापि स्फुरणमात्रेणाज्ञाननिवृत्तिरित्यन्वयव्यतिरेकव्यभिचाराद्वृत्तिर्नाज्ञाननिवृत्तौ हेतुरित्यपरोक्षवृत्तेरेवाज्ञाननिवृत्तिहेतुतया परोक्षवृत्तेरन्वयव्यभिचारस्यादूषणत्वात् वन्ह्यनुमानिकाद्विशेषदर्शनादपरोक्षभ्रमो न निवर्त्तत इति नापरोक्षमपि विशेषदर्शनंतत्र हेतुः । इच्छादेश्चानावृतसाक्ष्यंशाध्यासादेवाज्ञानविरहात्स्फुरणमात्रादज्ञाननिवृत्तौनोदाहरणम्।यच्चोक्तंवृत्तिर्यद्यर्थप्रकाशत्वरूपं विहाय जातिविशेषेणाविद्यातत्कार्यं निवर्त्तयेत्तदा रागनिवर्त्यद्वेषवृत्तयोः सत्यत्वे ऽपि तदुपपत्तिः। अथार्थप्रकाशत्वेन तदा स्वरूपचैतन्यस्यापि तथात्वात्ततोप्यविद्यानिवृत्तिः स्यादिति । तन्मन्दमन्वयव्यतिरेकाभ्यामपरोक्षप्रमाणज्ञानत्वेन तन्निवर्त्यस्यैव मिथ्यात्वात् । केवलसाक्षिणो ऽविद्यासाधनत्वाच्च नाविद्यानिवर्त्तकत्वम् ।

अत एवेदमिति । स्पष्टोऽर्थः । अपरोक्षप्रमाणहेतोरेवनिवर्त्तकत्वाभिधानात्तत्र नान्वयव्यभिचार इत्याह।अपरो-

त्तेति । परोक्षवृत्तेरविद्यानिवृत्तौ व्यभिचारेऽपि नापरोक्षवृत्तेर्व्यभिचार इत्यत्रोदाहरणमाह। न हीति।पीतः शङ्ख इति। भ्रमस्यानुमानिकश्वैत्यज्ञानेनानिवृत्तावपि तदपरोक्षज्ञानस्य तन्निवृत्तौ हेतुत्वदर्शनादित्यर्थः । व्यतिरेकव्यभिचारश्च नास्तीत्याह। इच्छादेरिति। वृत्त्यभावेऽपि यद्यज्ञाननिवृत्तिस्यात्तर्हि व्यतिरेकव्यभिचारः स्यान्नैतदस्ति इच्छाद्यवच्छिन्नचैतन्यावरकाविद्याभावेन तन्निवृत्तिरपि नेत्यर्थः। वृत्तेः किं जातिविशेषप्रयुक्तमविद्यानिवर्तकत्वमुतार्थप्रकाशत्वप्रयुक्तमाद्ये तन्निवर्त्यस्य रागनिवर्त्यद्वेषवन्मिथ्यात्वं न सिद्ध्येत्। द्वितीये वृत्त्यभावेऽपि चैतन्यप्रकाशादेवाज्ञानं निवर्तेत । कारणतावच्छेदकावच्छिन्ने सति वृत्तिव्यतिरिक्तापेक्षस्य कार्यं स्यादिति वाच्यम् । शुक्तिरजतादावेतादृशज्ञाननिवर्त्यस्य मिथ्यात्वनियमादिति दूषयति । तन्मन्दमिति । ज्ञानस्य स्वविषयाव्युदासकत्वादपि न केवलेति ॥

तर्हि कदापि तस्य न निवर्तकत्वमित्याशङ्क्य सहकारिसमवधाने निवर्तकत्वं तस्यैवेति सदृष्टान्तमाह न चैवमिति ।

(वृत्तिसहकृता ज्ञानादविद्यानिवृत्तिः) न चैवं वृत्तिसहकृतादपि तस्मात्कथं तन्निवृत्तिरिति वाच्यम् । साधकस्यापीश्वरज्ञानस्येव सहकारिविशेषान्निवर्तकत्वोपपत्तेः। तस्माद्यथा परमते संशयस्य स्थाणुत्वादिवैशिष्ट्यविषयत्वेऽपि न संशयविरो-

धित्वम् । संशयधाराविलोपप्रसङ्गात् । किं तु निश्चयस्यैव । तथैवान्वयव्यतिरेकदर्शनात् । तत्रापि प्रमेयमिति ज्ञाने सर्वावभासे ऽपि घटत्वादिप्रकारकसंशयदर्शनेन संशयस्य स्वसमानप्रकारकनिश्चयविरोधित्वमास्थितम् । तत्राप्यानुमानिकविशेषदर्शने सत्यपि प्रत्यक्षभ्रमदर्शनादपरोक्षरूपमेव विशेषदर्शनं तन्निवर्त्तकमित्यन्वयव्यतिरेकाभ्यां स्वीक्रियते । एवमस्मन्मते ऽपि स्वप्रकाशसाक्षिणा स्वपरप्रकाशे ऽपि तद्गोचराविद्यानिवृत्तौ चक्षुरादिजन्यज्ञानान्वयव्यतिरेकदर्शनात् वेदान्तविज्ञानसुनिश्चितार्था इत्यादिशास्त्राच्चान्तःकरणवृत्तिरविद्यानिवृत्तौ हेतुरिति। प्रयोगश्च इन्द्रियसंयोगे सत्यप्यजायमानाऽविद्यानिवृत्तिः कादाचित्कहेतुजन्या, कार्यत्वात्, घटवत्, अन्यथा व्यासङ्गदशायामप्यविद्यानिवृत्तिप्रसङ्गात्। तच्च कादाचित्कं कारणं परिशेषादन्तःकरणवृत्तिरिति ॥

ईश्वरज्ञानस्येत्युपलक्षणम् । अस्मदादिघटज्ञानस्यापि मुद्गरादिसहकारिणि सति स्वविषयनिवर्तकत्वदर्शनादित्यर्थः। यत्त्वत्रार्वाचीनेनोक्तं ब्रह्मणः स्वप्रकाशत्वेनाज्ञात-

त्वमेव नास्ति कुतस्तन्निवृत्तौ वृत्तेरुपयोग इति तन्न । किं स्वप्रकाशत्वमज्ञातत्वाभावे प्रयोजकमुत प्रकाशमानत्वम् । नाद्यः आत्मनोऽन्यत्र तद्व्याप्तिस्थलाभावात् । द्वितीये यदि प्रकाशमानत्वं प्रकाशरूपत्वं तदा पूर्वोक्त एव दोषः । यदि प्रकाशप्रयुक्तताज्ञानाद्यगोचरत्वं तदा प्रयोज्यप्रयोजकयोरभेदः । अथ प्रकाशविषयत्वं प्रकाशमानत्वम् । तदपि न । ब्रह्मणः स्वपरप्रकाशाविषयत्वात् । अङ्गीकृत्यापि विषयत्वं तन्मात्रेणाज्ञातत्वाद्यभावः किं तु वृत्तिविशेषे सत्येवेति सदृष्टान्तमुपसंहारव्याजेनाह । तस्माद्यथेति । वेदान्तजन्य ज्ञानस्यानर्थनिवर्तकत्वश्रवणाच्चाविद्यानिवृत्तौ तदुपयोग इत्याह । तरति शोकमिति । तर्कितेऽर्थे ऽनुमानमाह । प्रयोगश्चेति । अविद्यानिवृत्तिरित्युक्ते चाविद्यानिवर्तकेन्द्रियसंयोगमादायार्थान्तरता स्यात्तन्निवृत्त्यर्थमिन्द्रियसंयोगेत्यादिविशेषणम् । कादाचित्केति । आदिमत्प्रयोज्येत्यर्थः । तथा च नाविद्ययार्थान्तरता, न वा वृत्त्यवच्छिन्नचैतन्यस्यैवाविद्यानिवर्तकत्वपक्षे बाधः । तन्मते ऽपि वृत्तिप्रयोज्यत्वात् । विपक्षे दण्डं पातयति । अन्यथा व्यासङ्गेति । मनःसंयोगस्य हेतुत्वनिरासात्तस्मिन् सत्यप्यनेकशब्दसमवाये शब्दान्तराविद्यानिवृत्त्यदर्शनाच्चेति भावः ॥

पूर्वं विषयतया अनुभूयमानं ज्ञानमविषयचैतन्यादेवेत्युक्तमिदानीं स्फुरणस्य विषयसम्बन्धित्वेनानुभवाज् ज्ञानस्य च प्रमातृसम्बन्धित्वेनानुभवात्तदन्यज्ज्ञानमित्याह । किञ्चेति ।

(ज्ञानं स्फुरणादन्यत्) किञ्च स्वरूपज्ञानातिरिक्तावृत्तिःस्वीक-

र्त्तव्या । देवदत्तो जानाति घटः स्फुरतीति तयोर्भेदेनानुभवात् । ननु न वृत्तिस्फुरणयोर्भेदः, बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इत्यनर्थान्तरमित्यक्षपादोक्तेरिति चेत्, देवदत्तो जानाति घटः स्फुरतीति तयोर्भिन्नाश्रयत्वेनानुभूयमानयोरेकत्वायोगात् । नहि प्रमातृधर्मस्य ज्ञानस्य प्रमेयतादात्म्यं सङ्गच्छते । अभेदे वा देवदत्तो घटं जानातीति वद्देवदत्तो घटं स्फुरतीति, घटः स्फुरतीति वत् घटो जानातीति च प्रत्ययप्रयोगयोरापत्तेः । ननु जानातीति ज्ञानाश्रयत्वमनुभूयते घटः स्फुरतीति च ज्ञानविषयत्वम्, अतो न स्फुरणज्ञानयोर्भेदो, न वा प्रतीतिवैपरीत्यमिति चेन्न । घटमहं जानामीत्यनुभूयमानज्ञानात्पृथगेव स मे घटः स्फुरतीति स्फुरणस्यानुभूयमानत्वात् । ननु घटं जानामीत्यर्थविशेषणं ज्ञानमात्मन्यनुभूयते, घटः स्फुरति ज्ञानविषयो भवतीति ज्ञानोपसर्जनोऽर्थः प्रतीयत इति विशेषणविशेष्यभाव एव परं भिद्यते न त्वनुभवयोर्विषयभेद इति चेन्न । स्फुरतीति स्फुरणानुभवस्य तदुपसर्जनतया शब्दवद्व्याख्यानानर्हत्वात् ॥

ननु स्फुरणं नामोपलब्धिः बुद्ध्याद्यभेदस्याक्षपादैरेवोक्तत्वान्न तयोर्भेद इति चोदयति । ननु न वृत्तीति । प्रमातृप्रमेययोर्भिन्नत्वात्तत्तादात्म्येन प्रतीयमानयोरभेदायोगान्मूलप्रमाणानपेक्षमक्षपादवचनमनुपादेयमित्यभिप्रेत्याह । न देवदत्त इति । अयोगमेवोपपादयति । न हीति । सुखादौ तददर्शनादित्यर्थः । ननु द्वित्वादिवदुभयसम्बन्धित्वमुपपद्यतेत्याशङ्क्य तर्ह्युभयत्रोभयसम्बन्धप्रतीतिः स्यादित्याह । अभेदे वेति । ननु घटः स्फुरतीति न स्फुरणतादात्म्यं प्रतीयते किं तु प्रमातृधर्मस्फुरणविषयत्वं घटस्य, तथा च नोक्तदोष इति चोदयति । ननु जानातीति । सकर्मत्वाकर्मकत्वलक्षणविरुद्धधर्मवत्तयानुभूयमानत्वान्नतयोरभेद इत्याह । न घटमहमिति । ननु घटः स्फुरतीति सकर्मकज्ञानस्यैवानुभूयमानत्वान्नोक्तवैधर्म्यमिति चोदयति । ननु घटं जानामीति । घटश्चलतीति वत् घटः स्फुरतीति तत्तादात्म्यप्रतीतेर्नेदं व्याख्यानमुचितं शब्दस्यैव लक्षणादिवृत्त्यार्थान्तरस्य सम्भवादिति दूषयति । न स्फुरतीति ॥

व्यवसायतद्भिन्नज्ञानविषयो भवतीति व्याख्याने ऽपि यज्ज्ञानं प्रति विषयो घटस्तेनैव घटे स्वविषयत्वं गृह्यते किं वा ज्ञानान्तरेणेति विकल्प्य क्रमेण दूषयति । किञ्चेति ।

(स्वोपसर्जनमर्थं स्वस्य ज्ञानान्तरस्य वा विषयमिति विकल्प्य दोषयोजनम्)

किञ्च स्वोपसर्जनमर्थं स्वयं विषयो करोति ज्ञानान्तरोपसर्जनं वा । नाद्यः वेद्यज्ञानवादे स्वस्य स्वविषयत्वानुपपत्तेः । न द्वितीयः व्यवसा-

यानुपनीतस्य तद्विषयत्वस्यानुव्यवसाये भानायोगात् । स्वसम्वेद्यज्ञानवादे ऽपि किमुपसर्जनं ज्ञानं ज्ञेयेन सहैव स्वात्मनं विषयीकरोति, किं वा प्रथमं स्वात्मानं विषयीकृत्य ज्ञेयं विषयीकरोति । नाद्यः विशेषणज्ञानतत्सन्निकर्षयोः प्रथमं वक्तव्यत्वात् । विशेषणभूतज्ञानस्यैव विशिष्टज्ञानत्वे तस्य तज्ज्ञानतत्सन्निकर्षजन्यत्वायोगात् । अत एव न द्वितीयः बुद्धेर्विरम्यव्यापारानुपपत्तेश्च । सकर्मकाकर्मकयोर्ज्ञानस्फुरणयोरभेदासम्भवात् । ज्ञानेन स्फुरतीति भेदानुभवाच्च । नन्वेवमतीतादावपि स्फुरतीत्यनुभवात्तत्रापि स्फुरणापत्तिस्तत्र चाश्रयाभावेन स्फुरणाभावात् । ज्ञानेनैव तद्व्यवहारे प्रकृतेऽपि तथा किं न स्यादिति चेन्न । अतीतादावपि स्फुरणस्य सत्त्वात् । अन्यथा तद्व्यवहारानुपपत्तेः । व्यवहारस्यार्थप्रकाशजन्यत्वात्, वृत्तिमात्रस्याप्रकाशत्वात् । न चासत्याश्रये कथं स्फुरणं स्यादिति वाच्यम् । आश्रयाभावे कार्यमेव व्यावर्तते नत्वकार्यमपि । अन्यथा तव मते ऽपि प्रलये जातिविरहप्रसङ्गात् ॥

व्यवसायानुपनीतस्येति । व्यवसायतद्गतधर्मव्यतिरिक्तस्य व्यवसायविषयकत्वस्यैवानुव्यवसायत्वाद्व्यवसायविषयकत्वस्य च व्यवसायाविषयत्वान्न तस्यानुव्यवसायविषयतेत्यर्थः । अस्तु तर्हि स्वप्रकाशवादिमते स्वविषयत्वस्य स्वेनैव ग्रहणमित्याशङ्क्य नागृहीतविशेषणान्यायेन स्वेन स्वस्यापि ग्रहणं वक्तव्यम्, तथा च तस्यापि ग्रहणविकल्पासहत्वमित्याह । स्वसम्बन्धेति । विशेषणज्ञानतत्सन्निकर्षयोरिति मतभेदेनोक्तम् । अस्तु तर्हि स्वस्मात् पूर्वं विशेषणज्ञानादिकमित्याशङ्क्य स्वस्यैव विशेषणज्ञानत्वाद्विशिष्टज्ञानत्वाच्च न पूर्वं तत्सम्भव इत्याह । विशेषणेति । विशेषणज्ञानविशिष्टज्ञानयोरेकत्वादेव पूर्वं विशेषणज्ञानाभावात् क्रमपक्षोऽप्यनुपपन्न इत्याह । अत एवेति । शब्दबुद्ध्यादीनां जन्मातिरिक्तव्यापाराभावेन क्रमेण विषयसम्बन्धश्च न सम्भवतीत्याह । बुद्धिरिति । भवन्मतेऽपि ज्ञानस्फुरणयोरत्यन्तभेद एवेत्याह । सकर्मकेति । विषयागतस्फुरणाभावेऽपि स्फुरतीत्यनुभवान्न तस्य विषयत्वमिति चोदयति । नन्विति । इष्टापत्तिमाशङ्क्याह । तत्र चेति । तर्हि ज्ञानविषयत्वमेव तत्र स्फुरतीति व्यवह्रियत इत्यत आह । ज्ञानेनैवेति । गूढाभिसन्धिरुत्तरमाह । न, अतीतादाविति । स्वमते स्फुरणस्य नित्यत्वादित्यभिसन्धिः । अभिसन्धिमजानानस्य चोद्यमुद्भाव्य तत्प्रकटनेन निराकरोति । न चासतीति । जातिविरहेति पटत्वादिजातिविरामप्रसङ्गादित्यर्थः ।

आश्रितत्वमङ्गीकृत्येदमुक्तम, वस्तुतस्त्वनाश्रितमेव स्फुरणमित्याह । अस्माकमिति ।

(अनाश्रितमेव स्फुरणम्) अस्माकं च स्फुरणं नित्यात्मरूपमेवेति वक्ष्यते, तथापि विषयावच्छिन्नचैतन्यमभिव्यक्तं सत्स्फुरणमित्युच्यते। घटः स्फुरतीत्यनुभवात्। अतीतादौ च विषयाभावेन कथं तत्स्फुरणं स्यादिति चेन्न । विषयस्यावच्छेदकत्वं हि तादात्म्येन स्वरूपसम्बन्धेन वा । तत्र प्रत्यक्षे विषयस्य तादात्म्येनावच्छेदकत्वं स्फुरणस्यान्योन्याध्यासेन विषयाभिन्नत्वात् । परोक्षे तु विषयस्य स्वरूपसम्बन्धेनैवावच्छेदकत्वं, तत्क्वचिदविद्यमानस्यापि विषयस्य ज्ञान इव स्फुरणे ऽपि न विरुद्ध्यते। नन्वेवमनुमेयस्यापि फलव्याप्यत्वापत्तिरिति चेन्न। कर्माश्रयस्यैव फलत्वात्। अनुमितौ त्वान्तरमेव चैतन्यं तदाकारवृत्त्या व्यज्यत इति न तत्फलमिति गीयते। किञ्चानुमितिगोचरे ऽपि परमाण्वादौ स्फुरणशून्ये कृतिः, तन्त्वादौ तु स्फुरणाश्रये कृतिरित्यन्वयव्यतिरेकाभ्यां विषयगतं स्फुरणं कृतिहेतुः। न च तत्र विषयस्यातीन्द्रियत्वादेव न कृतिरिति वाच्यम्। तन्त्वादावप्यनुमितिदशायां तदभावात् ॥

स्फुरणस्य नित्यत्वेपीदानीमतीतादिविषयावच्छेदकाभावात्कथं तत्स्फुरणं भवेदिति चोदयति । तथापीति । अपरोक्षविषयस्यैव तादात्म्येन स्फुरणावच्छेदकत्वमिति मुख्यसम्बन्धे स्वरूपसम्बधासम्भवात्परोक्षस्य तु नियमेन तदभावात्स्वरूपसम्बन्धेनैव परमते जन्यज्ञानवत्स्फुरणावच्छेदकत्वम् । तथाचातीतादिस्फुरणमिति न विरुध्यत इति परिहरति । न विषयस्येति । अविद्यमानस्यापीत्यपिशब्देन वस्तुत आमोक्षमतीतादिसूक्ष्मरूपेण वर्तत इति द्योतयति । परोक्षविषयस्यापि स्फुरणरूपफलावच्छेदकत्वेऽपसिद्धान्तः स्यादिति चोदयति । नन्वेवमिति । विषयाधिष्ठानचैतन्यस्यैव वृत्त्यभिव्यक्तस्य फलत्वादनुमेयादौ वृत्तिनिर्गमनाभावेन तस्यानभिव्यक्तत्वान्न फलावच्छेदकत्वमित्याह । न कर्मेति । किञ्चाहमर्थधर्मज्ञानस्य कृतिकारणत्वायोगात्तत्कारणं विषयतादात्म्यापन्नं स्फुरणमावश्यकम् । तथाच तयोर्भेदसिद्धिरित्यभिप्रेत्याह । किञ्चानुमितीति । परमाण्वादेः प्रत्यक्षायोग्यत्वादेव कृतिविरहो न स्फुरणविरहादित्याशङ्क्य प्रत्यक्षयोग्येऽपि स्फुरणाभावे कृतिविरहो दृष्ट इत्याह । न च तत्रेति ॥

अस्तु तर्ह्यपरोक्षवृत्तिरेवाव्यभिचारिणी कृतिहेतुः, तद्व्यभिचारे स्फुरणस्यापि व्यभिचारात्तदभिव्यक्ताधिष्ठानचैतन्यस्यैव स्फुरणत्वादिति चोदयति । नन्विति ।

ननु प्रत्यक्षज्ञानमेव स्वविषयकृतिहेतुःन तु स्फुरणं तद्विरहात् । प्रत्यक्षाभावे स्फुरणस्याप्यभावादिति । उच्यते अन्वयव्यतिरेकसहकृतकृतिनिरूपितकारणताग्राहकेणानुभवेन, देवदत्तकृति-

र्देवदत्तज्ञानजन्या, देवदत्तनिष्ठप्रत्यक्षकार्यत्वा-त्तदिच्छावदित्यनुमानेन वा लाघवोपोद्बलितेन स्फुरणमेव कृतिकारणं विषयीक्रियते न तु प्रत्यक्षज्ञानानि तेषामनन्ततया गौरवेण तद-गोचरत्वात् । न च त्वत्पक्ष एव गौरवं ज्ञानाति-रिक्तस्फुरणाङ्गीकारादिति वाच्यम् । सर्वसम्प्रति-पन्नात्मन एव स्वयंप्रकाशस्फुरणतया ऽस्माभिः स्वीकारात् । नन्वेवमपि वृत्त्यभिव्यक्तस्फुरणमेव कृतिहेतुरस्तु किं विषयगतेनेति चेन्न । तस्या-नुमित्यादिसाधारणत्वात् । ननु विषयावच्छिन्न-चैतन्यस्यापि सर्वदा सत्त्वाज्ज्ञानमन्तरेणापि तद्विषयिणी कृतिः स्यादिति चेन्न । अभिव्य-क्तचैतन्यस्यैव स्फुरणपदार्थत्वात् । अभिव्यक्तेश्च वृत्तिज्ञानाधीनत्वात् । ज्ञानगतमपरोक्षत्वमपि न विषयस्फुरणं विना निर्वहति । अपरोक्षविष-यत्वं हि ज्ञानस्य परोक्षत्वं विषयस्यापरोक्षत्वं प्रमात्रव्यवहितत्वेन । तच्च तदुभयस्फुरणैकं विना न निर्वहतीति शब्दापरोक्षे वक्ष्यामः ॥

लाघवतर्कोपोद्बलितप्रत्यक्षानुमानाभ्यामेकस्यैव स्फुरणस्य कृतिमात्रकारणत्वसिद्धेर्नानन्तापरोक्षवृत्तीनां कारणतोचितेति दूषयति । उच्यत इति । यज्ञदत्तकृतै

भहितत्वेन प्रायश्चित्तापवादस्याग्निनिर्वापणार्थं कृतप्रयत्नविषयत्वात्। तत्रैवाकृतप्रयत्नविषयं प्राश्चित्तमिति न विरोधः।

किञ्च।

ग्रामघाते शरौघेण वेश्मभङ्गान्निपातने।
अतिवृष्टिहतानां च प्रायश्चित्तं न विद्यते॥ ४२॥

शत्रुभिः परग्रामे हन्यमाने विमुक्तैः शरैः ग्रामान्तःस्थितानां गवां निपातने तथा स्तम्भादिशैथिल्येन गृहभङ्गाद्वा गोमरणे बुधशुक्रसामीप्यादिना प्रवृत्तायामतिवृष्टौ शीतवातादिभिर्मृतानां गवां च स्वामिनस्तदापन्निवृत्तये यथाशक्तिप्रवृत्तौ न प्रायश्चित्तं भवति।

किञ्च।

संग्रामे प्रहतानां च ये दग्धा वेश्मकेषु च।
दावाग्निग्रामघातेषु प्रायश्चित्तं न विद्यते॥ ४३॥

शत्रुसैन्ययोरन्योन्ययुद्धे शत्रुभिर्दुष्प्राप्या गावो हतास्तासां तथा अल्पानि वेश्मानि वेश्मकानि ग्रामाद्बहिर्गोनिवासार्थं कृतास्तृणकुट्य इति यावत्, तेषु शत्रुभिर्दह्यमानेषु ये दग्धा तथा ग्रामदुर्गताये परितः कृते वने शत्रुभिर्दह्यमाने तेनैवाग्निना यदा ग्रामोऽपि दह्यते स्वभावतो वा सन्निहितवनाग्निना यदा ग्रामो दह्यते। तत्र सर्वत्र स्वामिनो यथाशक्तितन्निवारणप्रवृत्तौ प्रायश्चित्तं न भवति।

किञ्च।

यन्त्रिता गौश्चिकित्सार्थं गूढगर्भविमोचने।
यत्ने कृते विपद्येत प्रायश्चित्तं न विद्यते॥ ४४॥

रोगादिचिकित्सार्थं दाहच्छेदशिराभेदादिप्रयोगे यन्त्रिता रज्ज्वादिना बद्धा गौर्यदि विपद्येत म्रियेत तथा गूढस्यान्तर्मृतस्य गर्भस्य स्वतो निःसरणशक्त्यभावात्तद्विमोचने हस्तप्रवेशेन निष्कासने क्रियमाणे यदि गौर्म्रियेत तदा तद्धितार्थं यत्नस्य कृतत्वात्स्वामिनोऽन्यस्यवा कर्तुर्न प्रायश्चित्तं भवति।

तदाह संवर्त्तः ।

यन्त्रणे गोः चिकित्सार्थे गूढगर्भविमोचने ।
यदि तत्र विपत्तिः स्यान्न स पापेन लिप्यते ॥
औषधं स्नेहमाहारं दद्याद्गोब्राह्मणेषु च ।
दीयमाने विपत्तिश्चेन्न स पापेन लिप्यते ॥
दाहच्छेदशिराभेदप्रयोगैरुपकुर्वताम् ।
द्विजानां गोहितार्थञ्च प्रायश्चित्तं न विद्यते इति ॥

यन्त्रणस्य सर्वप्रायश्चित्तापवादशेषत्वेन उपेक्षया यन्त्रणे प्रायश्चित्तं भवत्येव ।

तथा च वक्ष्यति सर्वेषां पातकम्भवेदिति ।
प्रायश्चित्तं त्वत्र दहनात्तु विपद्येतेत्यादिनोक्तं पादकृच्छ्रमेव ।
यत्तु व्यासेन जलौघपल्वले मग्ना मेघविद्युद्धतापिवा ।
श्वभ्रे वा पतिता ऽकस्मात् श्वापदेनापि भक्षिता ॥
शीतवातहता वाऽप्यादुद्बन्धनमृता पिवा ।
शून्यागार उपेतायां प्राजापत्यं विनिर्दिशेत् ।

इति प्राजापत्यमुक्तम् । तच्चिमासादिहनने प्रायश्चित्तवादिमन्वादिमते सङ्गतं न पराशरमते तत्र हननप्रायश्चित्तस्यैव प्राजापत्यरूपत्वात् । नच हननोपेक्षयोस्तुल्यं प्रायश्चित्तं संभवति । एतेन पल्वलौघमृगव्याघ्रश्वापदादिनिपातनेश्वभ्रप्रपा तसर्पाद्यैर्मृते कृच्छ्रार्द्धमाचरेत् । अयालत्वात्तु कृच्छ्रं स्याच्छून्यागार उपप्लव इति विष्णुवचनमपि व्यवस्थापितमेवेत्यलम् ।

इदानीमेकप्रयत्नविष्यचानेकगोवधे प्रायश्चित्तमाह ।

व्यापन्नानां बहूनान्तु रोधने बन्धनेऽपि वा ।
भिषङ्मिथ्याप्रचारे च प्रायश्चित्तं विनिर्दिशेत् ॥४५॥

यदि सङ्कल्पते पूर्वोक्तलक्षणे रोधने बन्धने वाशब्दाद्योक्ते घाते वा बह्वीनां गवां व्यापत्तिर्भवति तदा तत्कर्तुः भिषजो वैद्यस्य मिथ्या अयथाशास्त्रं प्रचारे चिकित्सायां च न प्रतिनिमित्तं नैमित्तिकावृत्तिर्नापि तन्त्रेण किन्तु वचनबलाद् द्विगुणमेव प्रायश्चित्तं विनिर्दिशेत् ।

तथाचापस्तम्बः ।

विपन्नानां बहूनां तु रोधने बन्धनेऽपिवा ।

भिषङ्मिथ्याप्रयोक्ता च द्विगुणं गोव्रतं चरेदिति ।

यदुक्तं यत्ने कृते विपत्तिश्चेत्प्रायश्चित्तं न विद्यते इति तस्य प्रत्युदाहरणमाह ।

गोवृषाणां विपत्तौ च यावन्तः प्रेक्षका जनाः ।
अनिवारयतां तेषां सर्वेषां पातकं भवेत् ॥ ४६ ॥

गावश्च वृषाश्च गोवृषास्तेषां विपत्तौ पूर्वोक्तायां कूपादिपातरूपायां यावन्तो जना औदासीन्येन प्रेक्षका भवन्ति तेषां गवां विपत्तिमनिवारयतां सर्वेषां पातकं भवति । तत्र च पूर्वोक्तपादकृच्छ्रमेव प्रायश्चित्तं कार्यं तस्याकृतप्रयत्नविषयत्वात् । इदमपि शक्तौ सत्यामौदासीन्ये द्रष्टव्यम् ।

अत एव पैठीनसिः ।

उपेक्षकः शक्तिमांश्चेद्दोषवक्तानुमोदकः ।
अकार्यकारिणस्तेषां प्रायश्चित्तं प्रकल्पयेद् ॥

इत्याह ।

नन्वेकप्रयत्ननिष्पन्नानेकगोवधे प्रायश्चित्तमुक्तम् । अनेकप्रयत्ननिष्पन्नैकगोवधे तु कथमित्यत आह ।

एको हतो यैर्बहुभिः समेतै-
र्न ज्ञायते यस्य हतोऽभिघातात् ।
दिव्येन तेषामुपलभ्य हन्ता
निवर्तनीयो नृपसन्नियुक्तैः ॥ ४७ ॥

यत्रैको गौर्बहुभिः समेतैर्मिलितैर्हतस्ताडितस्तस्यान्यस्याभिघातानन्तरमेव मृतः स चेन्न ज्ञायते तदा तं दिव्येन तुलाभ्यादिना उपलभ्य हन्तृत्वेन निश्चित्यानन्तरमसौ नृपसन्नियुक्तैः पुरुषैः निवर्त्तनीयो ऽयमसौ

गोहन्तेति व्याख्याय ज्ञातिव्यवहाराद्बहिः कर्तव्यः । यद्यपि सर्वेषामपि प्रहाराणां वेदनाहेतुत्वं समानमेव तथापि यद्व्यतिरेकेण जीवनं यस्मिन्सत्यविलम्बेन च मरणं स एव तद्धेतुरिति तत्कर्तुरेव हन्तृत्वं सिध्यति हन्तृत्वनिश्चयश्च हननिमित्तप्रायश्चित्तप्राप्त्यर्थः ।

तर्हि एतेषां किं न प्रत्यवाय इत्यत आह ।

एका चेद्बहुभिः काचिद्दैवाद्व्यापादिता क्वचित् ।
पादं पादं तु हत्यायाश्चरेयुस्ते पृथक् पृथक् ॥ ४८ ॥

यद्येका काचित्सगुणा निर्गुणा वा गौर्बहुभिर्मिलित्वा दैवादज्ञानात् क्वचिद्व्यापादिता तदा ते सर्वे यादृग् विधगोहत्यायां यद्व्रतमुपदिष्टं तस्यैकैकं पादं चतुर्थांशं पादकृच्छ्रादि पृथक् पृथगेकैकशश्चरेयुः । एकाचेदित्युपलक्षणं तेन बहुभिर्द्वयोर्बहूनाञ्च व्यापादने प्रतिपुरुषं पादद्वयं पादत्रयं च कल्पनीयम् । कामतस्तु प्रत्येकं सर्वेषामपि निषेधातिक्रमस्य तुल्यत्वेन कृत्स्नदोषसम्बन्धात्कृत्स्नव्रतसम्बन्धो युक्तः सत्रिणामिव प्रतिपुरुषं कृत्स्नव्यापारसमवायात् ।

एकं घ्नताम्बहूनाञ्च यथोक्ताद् द्विगुणो दम इति प्रत्येकं दण्डद्वैगुण्यदर्शनाञ्च । यद्यप्येतदकामकारेपि तुल्यं तथापि वचनादेव तत्र पादप्रायश्चित्तविधानमिति न विरोधः । नन्वनेकानि गोमरणनिमित्तान्युक्तानि तेषां सन्देहे कथं निर्णय इत्यत आह ।

हते तु रुधिरं दृश्यं व्याधिग्रस्तः कृशो भवेत् ।
लाला भवति दष्टेषु एवमन्वेषणं भवेत् ॥ ४९ ॥

रुधिरेण प्रहारः कार्श्येन व्याधिः लालया च सर्पदंश इत्येवमाद्यभियुक्तप्रसिध्यान्वेषणं कार्यम् ।

ननु बाह्यलिङ्गाभावे अन्तरावयवभङ्गः कथं निश्चेयः इत्यत आह ।

ग्रासार्थं चोदितो वापि अध्वानं नैव गच्छति ।

योभीष्टग्रासार्थमपि न गच्छति नोपसर्पति यो वा चोदितः

प्रेरितोऽप्यध्वानं वा न गच्छति सोऽन्तः पीडावानिति ज्ञेयम्। एवमव्यभिचारिभिरभियुक्तप्रसिद्धैरन्यैरपि लिङ्गैरन्विष्य तत्र तत्रोचितं प्रायश्चित्तं करणीयम्।

ननूक्तेषु निमित्तविशेषेषूक्ता व्रतविशेषा भवन्तु अनुक्तेषु तु निमित्तेषु किं व्रतमित्यत आह।

मनुना चैवमेकेन सर्वशास्त्राणि जानता।
प्रायश्चित्तं तु तेनोक्तं गोघ्नश्चान्द्रायणं चरेत्॥५०॥

येषु गोवधनिमित्तविशेषेषु प्रायश्चित्तविशेषा मयाभिहितास्तेषु त एवानुष्ठेया येषु पुनर्मया प्रायश्चित्तविशेषो नोक्तस्तेषु सर्वशास्त्रतत्त्वज्ञेनैकेन सकलमुनिमुख्येन तेन प्रसिद्धेन मनुनैवोक्तं चान्द्रायणप्रायश्चित्तम् एवं मदुक्तेतिकर्तव्यतया गोघ्नश्चरेत्।

अयमभिसन्धिः। यथा अनुक्तविशेषेषूपपातकेषु चान्द्रायणमुपदिष्टं मनुना तद्वेवानुक्तविशेषे गोवधेऽप्युपपातकत्वाविशेषात्कर्तव्यं नतु स्मृत्यन्तरोक्तं विशेषप्रायश्चित्तमपीत्येतदेव दृढीकर्तुम् ऋष्यन्तरेभ्यो मनोर्वैशिष्ट्यप्रतिपादनायानेकविशेषणोपादानमिति। तथा च गोवधप्रायश्चित्तमभिधायाह मनुः।

एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः।
अवकीर्णिवर्ज्यं शुद्ध्यर्थं चान्द्रायणमथापि वेति।

यदुक्तं सशिखं वपनं कृत्वा पादेङ्गरोमवपनमित्यादि तस्य कथंचिदसम्भवे कथमित्यत आह।

केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत्।
द्विगुणे व्रत आदिष्टे दक्षिणा द्विगुणा भवेत्॥५१॥

यस्तु लावण्यादिहानिभिया केशवापनं न चिकीर्षति स केशरक्षणार्थं यस्मिंश्चिमित्ते यद्व्रतमुपदिष्टं तद्द्विगुणमाचरेत्। परन्तु महापातकगोवधावकीर्णनव्यतिरिक्तनिमित्तेषु तत्र द्विगुणव्रताचरणेऽपि केशरक्षणं न भवत्येव।

विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवपनम् ।
ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः ॥
इतिविशेषस्मरणात् ।
द्विगुणव्रताचरणेन केशरक्षणस्य सर्वत्र प्राप्तौ नियममाह ।

राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः ।
अकृत्वा वपनं तेषां प्रायश्चित्तं विनिर्दिशेत् ॥ ५२ ॥

राजाऽभिषिक्तः क्षत्रियः राजपुत्रो राज्यार्हकुमारः बहुश्रुतो ब्राह्मणो गौतमोक्तः ।

यथा स एष बहुश्रुतो भवति लोकवेदवेदाङ्गविद्वाकोवाक्येतिहासपुराणकुशलस्तदपेक्षस्तद्वृत्तिरष्टाचत्वारिंशता संस्कारैः संस्कृतस्त्रिषु कर्मस्वभिरतः षट्सु वा सामयाचारिकेष्वभिविनीत इति । एतेषां वपनमकृत्वा अकारयित्वा प्रायश्चित्तमुपदिशेत् । अत्र चैतेषामेवेत्येव नयमो न त्वकृत्वैवेति ।

तेषामपि हारीतेन ।
राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः ।
केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेदितिवपनस्मरणात् ।

अतएवापस्तम्बोप्येतेषामेव वपनाभावे व्रतद्वैगुण्यं तदुभयाभावेच पापतादवस्थ्यमाह ।

राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः ।
यस्तु नो वपनं कुर्यात्प्रायश्चित्तं कथं भवेत् ॥
केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत् ।
द्विगुणे तु व्रते चीर्णे दक्षिणा द्विगुणा भवेत् ॥
यस्य न द्विगुणं दानं केशांश्च परिरक्षतः ।
तत्पापं तस्य तिष्ठेत वक्ता च नरकं व्रजेत् ॥
यत्किञ्चित्क्रियते पापं सर्वं केशेषु तिष्ठति ।
तस्मात्सर्वप्रयत्नेन सशिखं कारयेद्द्विज इति ॥

ननु विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनमिति स्त्रिया अपि वपननिषेधात्कथं नात्र परिगणनमित्यत आह ।

सर्वान्केशान्समुध्दृत्य छेदयेदङ्गुलद्वयम् ।
एवं नारीकुमारीणां शिरसो मुण्डनं स्मृतम् ॥ ९३॥

सर्वं केशराशमेकीकृतमूर्ध्वं धृत्वाऽग्रतोऽङ्गुलद्वयं छेदयेदेवं विधं नारीणामविधवानां कुमारीणामविवाहितानाञ्च शिरसो मुण्डनं स्मृतमाचार्यैः । नारीग्रहणेन सिद्धेऽपि कुमारीग्रहणे पुनरुपादानं तासामप्येवं विधमुण्डनप्राप्त्यर्थम् ।

यतः स्मृत्यन्तरे

सधवानां तु नारीणामलङ्कारायं सर्वदा ।
केशसन्धारणं प्रोक्तं प्रायश्चित्ते द्विजोत्तमैः ॥

इति सधवानामेव केशधारणं नियमितं नान्यासा । एवं च परिशेषा द्विधवानां सर्ववपनमेवाभ्यनुज्ञातं भवति ।

न च ।

विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनम् ।
ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः ॥

इति पर्युदासान्महापतकादिषु स्त्रीणामपि समूलमेव केशवपनं सिध्यतीति शङ्कनीयम् ।

केशानां नास्ति नारीणां वपनं व्रतयज्ञयोः ।
गोवधादिषु सर्वेषु छेदयेदङ्गुलद्वयम् ॥

इति विशेषस्मरणेन तत्राप्यग्रच्छेदस्यैव विधानात् ।

नचैवं स्त्रीणां नेष्यते केशवापनमिति निषेधानुपपत्तिः । तस्य वापनशब्दशक्त्यैव समूलकेशवापनपरत्वात् । यद्यप्येतत्प्रायश्चित्तप्रकरणेऽभिहितं तथापि वाक्यबलाद्यत्र यत्र नारीकुमारीणां सामान्यवाक्येन तीर्थादौ मुण्डनप्राप्तिस्तत्र सर्वत्राप्येवं विधमेव मुण्डनमिति गमयति अन्यथा गोवधप्रायश्चित्तप्रकरणनियमितत्वेन प्रायश्चितान्तरेऽपि न स्यात् ।

अत एव दिवोदासीये ।
सर्वान्केशान्समुद्धृत्य च्छेदयेदङ्गुलद्वयम् ।

तीर्थादिषु सभर्तृणां स्यादेवं केशवापनम् ॥

इति साक्षादेव वचनमभिहितम् ।

किञ्च ।

क्षौरकर्म न शस्तं स्याद्योषितां तु वरानने ।
सभर्तृकाणां तत्रैव विधिं तासां शृणुष्वमे ।
सर्वान्केशान्समुद्धृत्य च्छेदयेदङ्गुलद्वयम् ॥

इति प्रभासाखण्डीयसभर्तृकस्त्रीवपनपरिभाषायाः सर्वत्राप्यप्रतिहतत्वेन न क्वचित्समूलं वपनम् । नचेदमपि प्रभासतीर्थपरमेव प्रकरणादिति वाच्यम् । परिभाषायाः प्रकरणेनानियमात् । पित्र्ये तु द्विगुणा दर्भा इतिवत् । परिभाषात्वञ्चास्य सभर्तृकस्त्रीवपनमात्रविधिप्रतिपादकत्वात्

यदपि

केशमूलान्युपाश्रित्य सर्वपापानि देहिनाम् ।
तिष्ठन्ति तीर्थस्नानेन तस्मात्तांस्तत्र वापयेत्

इति वचनबलेन केशमूलवपनविधानमिति तदपि न पापानां केशमूलाश्रयणस्य वपनविध्यर्थवादतया स्वार्थविधिपरत्वाभावात् । तेन ह्यवच्छिद्यत इत्यत्रावकरणत्वस्येव । तस्मात्स्त्रीणां न क्वचित्समूलं केशवपनमिति स्थितम् ।

पूर्वोक्तानामङ्गानां साधारण्यप्राप्तौ अकर्तव्ये केषां चिदपवादमाह ।

न स्त्रियाः केशवपनं न दूरे शयनासनम् ।
नच गोष्ठे वसेद्रात्रौ नदिवा गामनुव्रजेत् ॥ ५४ ॥
न नदीसङ्गमे चैव अरण्येषु विशेषतः ।
न स्त्रीणामजिनं वासो व्रतमेवं समाचरेत् ॥ ५६ ॥

यदुक्तं सशिखं वपनं कृत्वेत्यादि तत्स्त्रिया न किन्तु द्व्यङ्गुलच्छेद एव । यच्चोक्तं संविशन्तीषु संविशेदिति तच्छयनासनं दूरे ग्रामाद्गृहाद्वा स्त्रिया न कार्यम् । यत्पुनर्गवां मध्ये वसेद्रात्रौ दिवा गाश्चाप्यनुव्रजेदित्युक्तं

तदप्युभयं न स्त्रिया कार्यम् । अनुव्रजनविधिनैव नदीसंगमारण्येष्वटनं प्राप्तं तदप्यपोह्यते । अनुव्रजनापवादे सिद्धे पुनर्वचनं कथञ्चिद्ग्रामान्तरमनुव्रजनेपि नद्यादौ विशेषतो निषेधार्थम् । यदपि गोचर्मणा प्रावृत इत्युपसंहारप्राप्तमजिनवासस्त्वं तदपि स्त्रीणां न भवति तर्हि किं कार्यमित्यत आह व्रतमेव यथोक्तं प्राजापत्यादिकमेव कुर्यात् । एवकारो यथोक्ताङ्गनिवृत्तेर्द्योतनायम् ।

एवकारेण त्रिषवणस्नानादेरप्यपवादप्राप्तावाह ।

त्रिसन्ध्यं स्नानमित्युक्तं सुराणामर्चनं तथा ।
बन्धुमध्ये व्रतं तासां कृच्छ्रचान्द्रायणादिकम् ॥५६॥

यदुक्तं त्रिसन्ध्यमवगाहनमिति तत्स्त्रीणामभ्यनुज्ञायते तथा सुराणामर्चनमधिकं विधीयते । तथा तासामुक्तं कृच्छ्रचान्द्रायणादिव्रतं बन्धुमध्य एव करणीयं नान्यत्रेति ।

व्रताचरणकालेस्थितिस्थानमाह ।

गृहेषु सततं तिष्ठेच्छुचिर्नियममाचरेत् ॥ ५७ ॥

व्रताचरणकालेपि गृहेषु गृहान्तिकेषु तिष्ठेत् वासोगृहान्तिके देय इति योगीन्द्रस्मरणात् । शुचिः पापान्तरमकुर्वती नियमं संप्राप्तं प्रायश्चित्तमाचरेदिति ।

उक्तप्रायश्चित्तस्याकरणे बाधकमाह ।

इह यो गोवधं कृत्वा प्रच्छादयितुमिच्छति ।
स याति नरकं घोरं कालसूत्रमसंशयम् ॥ ५८ ॥
विमुक्तो नरकात्तस्मान्मर्त्यलोके प्रजायते ।
क्लीबो दुःखी च कुष्ठी च सप्तजन्मनि वै नरः ॥५९॥

यो गोवधं कृत्वा इह कलौ प्रच्छादयितुं रहस्यप्रायश्चित्तेनापाकर्तुमिच्छति सकालसूत्रसंज्ञं घोरं नरकमसंशयं निश्चितं प्राप्नोति । तादृशनरकभोगानन्तरं मनुष्यलोके उत्पन्नो नरो भूत्वा क्लीबो नपुंसको दुःखी रोगादिना कुष्ठी च सप्तजन्मनि प्रकर्षेण जायते इति ।

ननु रहस्य प्रायश्चित्तं कथमत्र न भवेत् तस्यापि रहस्ये रहस्य प्रकाशे प्रकाशमिति हारीतादिविधानादिति चेत् ।

सत्यम् । बृहन्नारदीयविष्णुपुराणादिषु
छादयन्ति प्रयत्नेन स्वदोषं पापकर्मिणः ।
रहस्यामेव कुर्वन्ति प्रायश्चित्तक्रियां कलौ ।
मनः शुद्धिविहीनानां निष्कृतिर्न ततो भवेत् ॥

इत्यादि ।

तत्र तत्र कलिनिन्दाप्रक्रमे रहस्यप्रायश्चित्तनिन्दाश्रवणात् तस्माद्रहस्यप्रायश्चित्तेन कलौ न शुद्धिरिति गम्यते । उपपादितं चैतदधस्तात्

नन्वेवमपि क्लीवत्वादीनां पापान्तरफलत्वेन श्रवणाद्गोवधफलत्वाभिधानं विरुद्धम् । तथाहि । राजमहिषीगामी नपुंसक इति गौतमः । सर्वदा दुःखचित्तः स्यात्परचित्तविनाशक इति शातातपः । ब्रह्महा कुष्ठीति शङ्ख इति तेषां सप्तजन्मानुवृत्त्यभिधानमपि विरुद्धं गोवधस्योपपातकत्वेन तत्फलस्य पञ्चजन्मानुवृत्तेः ।

महापातकजं चिन्हं सप्तजन्मनि जायते ।
उपपापोद्भवं पञ्च त्रीणि पापसमुद्भवम् ॥

इति शातातपस्मरणादिति चेत् सत्यम् । क्लैब्यदुःखकुष्ठानामवान्तरजातिभेदात्तृणारणिन्यायेन गोवधस्यापि तत्र कारणत्वे बाधकाभावात् । सप्तजन्मनिवृत्तिस्तु गर्भिण्यादिगोवधफलविषयिणीस्त्री गर्भिणी गोगर्भिणीबालवृद्धवधेषु भ्रूणहा भवतीति प्रचेतसा तत्र महापातकत्वातिदेशात् । तेन तस्य कुष्ठफलकत्वमप्युपपन्नम् ।

कुष्ठं च राजयक्ष्मा च प्रमेहो ग्रहणी तथा ।
इत्येवमादयो रोगा महापापोद्भवाः स्मृताः ॥

इति शातातपस्मरणादिति सर्वमनवद्यम् ।

उक्तार्थस्य सर्वविषयतां स्पष्टयितुं सामान्येनोपसंहरति ।

तस्मात्प्रकाशयेत्पापं स्वधर्मं सततं चरेत् ॥
स्त्रीबालभृत्यगोविप्रेष्वतिकोपं विवर्जयेत् ॥ ६० ॥

यस्मात्पापप्रच्छादने ऐहिकामुष्मिकनरकभोगः प्राप्नोति तस्मात्पूर्वोक्तपर्षदि स्वीयं कामकृतमकामकृतं वा पापं प्रकाशयेदनन्तरम्पर्षन्निर्दिष्टं धर्मं यथोक्तं प्रायश्चित्तं सततमविच्छेदेन चरेत् । तदनन्तरमपि पापान्तरानुत्पत्तये स्त्रीबालभृत्यगोविप्रेष्वतिशयितमनर्थहेतुभूतं कोपं विशेषतो वर्जयेदिति ।

सुधोपधिबुधोपगग्रहमणेरिवाधोगते
विधोरुपनिदर्शनाद्बहुविधोपाश्रयात् ।
भजे भुवनधारणैः सवसुधोपभोगोद्यतेः
वधोद्यतमदं मृधोद्धतमधोः सदाधोक्षजम् ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दुश्रीरामपण्डितसुतेन विनायकेन ॥
शास्त्रे पराशरकृते विहिता व्यवस्थाध्यायेऽत्रमे नवमे विहितव्रतानाम् ॥ २

इतिश्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनामधेयविनायकपण्डितकृतौ परशरस्मृतिविवृत्तौ विद्वन्मनोहरायां नवमोऽध्यायः ॥

श्रीगणेशायनमः ॥

प्रल्हादाल्हादहेतुः सकलसुरगणानन्दकेतुः श्रुतीनां
सेतुर्दैवारिनेतुः खरनखरगणा यस्य जेतुर्निपेतुः ।
वक्षःपीठे विनेतुर्द्विजभजनकृतामंहसां धूमकेतुः
संसाराम्भोधिसेतुः स जयति भगवान् श्रीनृसिंहो नृकेतुः ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दुश्रीरामपण्डितसुतेन विनायकेन ॥
शास्त्रे पराशरकृते क्रियते ह्यगम्यागन्तुर्विशुद्धिवचने दशमे विचारः ॥ २ ॥

एवमध्यायद्वयेन कामाकामकृतगोवधोपपातके प्रायश्चित्तमभिहितमिदानीमगम्यागमनोपपातके प्रायश्चित्तं वक्तुं दशमाध्यायमारभते । तत्राध्यायार्थप्रतिज्ञापूर्वकं सामान्यप्रायश्चित्तमाह ।

चातुर्वर्ण्येषु सर्वेषु हितां वक्ष्यामि निष्कृतिम् ॥
अगम्यागमने चैव शुद्धौ चान्द्रायणं चरेत् ॥ १ ॥

चत्वारो वर्णाश्चातुर्वर्ण्यं तेषु चतुर्षु वर्णेषु सर्वेषु अनुलोमप्रतिलोमजेषु च हितामेव स्वल्पत्वेऽप्यनर्थफलनिवारिकामेव निष्कृतिं निष्क्रियते निस्सार्यते पापमनयेति निष्कृतिः प्रायश्चित्तिमगम्यागमने वक्ष्यामि तामेवाह । ऋतौ भार्यामुपेयादित्यादिशास्त्राद्गम्या स्वभार्या तदितरा सर्वाप्यगम्या तस्यां गमने सति शुद्ध्यर्थं चान्द्रायणं वक्ष्यमाणलक्षणं चरेत् । अयमर्थः । येषु निमित्तेषु प्रायश्चित्तविशेषा वक्तव्यास्तेषु त एवानुष्ठेयायेषु पुनः प्रायश्चित्तविशेषो नाम्नातस्तत्रेदं चान्द्रायणं कर्तव्यमिति ।

चान्द्रायणस्यानेकविधत्वात् स्वाभिप्रेतस्य लक्षणमाह ।

एकैकं ह्रासयेद्ग्रासं कृष्णे शुक्ले च वर्द्धयेत् ॥
अमावास्यां न भुञ्जीत ह्येष चान्द्रायणे विधिः ॥ २ ॥

चन्द्रस्यायनं गतिं क्षयवृद्धिभ्यामुपलक्षणं यस्मिन्कर्मणि तच्चान्द्रायणं तस्मिंश्चान्द्रायणे एष विधिर्यथा पौर्णमास्यां केशश्मश्रुलोमनखानि

शेशत्त्यभावात्कथं तद्भासत इत्याह । कथमिति तर्हि आख्यातस्य यत्नवाचकत्वे । संसर्गेति । इदमावयोः समानमिति भावः । अथ ज्ञानाद्यनुकूलयत्नस्य बाधात्तदनुकूलात्ममनोयोगरूपव्यापारस्यात्मनि सत्त्वाद्व्यापारे शक्तिरुच्यतामिति शङ्कते । कथमिति । आश्रयतेति । जानातीत्यादौ ज्ञानानुकूलयत्नस्य बाधादाख्यतस्याश्रयत्वे लक्षणा । आख्यातेन वर्त्तमानत्वादिकन्धात्वर्थ एव बोध्यते । सविषयार्थकधातुयोगे वर्त्तमानत्वादीनां धात्वर्थ एवान्वयः ॥ धात्वर्थश्चाश्रयत्वे तच्च चैत्रे । तथा च चैत्रो घटं जानातीत्यत्र घटविषयकवर्त्तमानज्ञानाश्रयश्चैत्र इति बोधः । एतेनाख्यातस्य न यत्ने न वा व्यापारे शक्तिः किं तु भावनापरपर्यायोत्पादनायां । तथा च चेतनाचेतनयोः साधारण्यात्सर्वत्राख्यातार्थो धात्वर्थोत्पादकतेति । तेन पचति रथो गच्छतीत्यादौ सर्वत्र मुख्य एव प्रयोगः पचतीत्यादौ पाकमुत्पादयतीति विवरणात् । रथो गच्छति गमनमुत्पादयति । जनातीत्यत्र ज्ञानमुत्पादयति यतते फलमुत्पादयतीत्यर्थात् ॥ कृञर्थश्चोत्पादकतैव । एवं पचति पाकमुत्पादयतीत्युत्पादकतार्थककरोतिना सर्वाख्यातविवरणात्किं करोतीति सामान्येनोत्पादनाप्रश्ने पचति पाकमुत्पादयतीत्युत्पादनाविशेषेणोत्तरमप्यत एव सङ्गच्छते । नचोत्पत्तेरुत्पत्त्यभावाच्चैत्र उत्पादयतीत्यत्र का गतिरिति वाच्यम् तत्रोत्पत्त्याश्रयत्वबोधकत्वात् ॥ उत्पादनार्थधातूत्तरवर्त्तिन आख्यातस्योत्पादनाश्रयार्थः । अनन्यलभ्यत्वात् । न च वह्निः पचतीति प्रयोगापत्तिरिति वाच्यम् । पाकादिधात्वर्थेनाक्षेपलभ्ययत्नस्याभावादिति रत्नकोशकारमतमप्यपास्तम् । चैत्रः पचतीत्यादौ यत्नस्यावश्यकतया प्रतीतेर्यत्न एवार्थोऽस्तु । यत्नत्वस्य जातित्वेन तस्यैव शक्यतावच्छेदकत्वं । लाघवाच्चोत्पादकत्वस्योपाधितया गौरवात् । इन्द्रियादीनामपि ज्ञानाद्युत्पादकत्वेन तेषामपि जानातीत्यादिप्रयोगापत्तेः चैत्रः पचतीत्यादावाक्षेपादिना वर्त्तमानयत्नस्यालाभाच्च । अस्मन्मते यत्नस्याख्यातार्थत्वे पचति पक्ष्यत्यपाक्षीदित्यत्र वर्त्तमानानागतातीतयत्नप्रत्ययादिति संक्षेपः ।

चिन्तामणिकृतस्तु जानातीत्यादौ धात्वर्थ एव चैत्रादौ साक्षादन्वेति आख्यातप्रतिपाद्यश्च कालः संख्या वा न तु यत्नोऽपि अयोग्यत्वादित्याहुस्तच्चिन्त्यम् । नामार्थधात्वर्थयोः साक्षाद्भेदान्वयबोधस्याव्युत्पत्तेः अन्यथा ओदनः पचतीत्यत्रोदनपाकयोः कर्मतासंसर्गेणान्वयः स्यात् ।

अथ चैत्रो घटं जानातीत्यादौ धात्वर्थप्रकारकबोधे पदजन्यपदार्थोपस्थितित्वेनैव हेतुत्वं न तु विभक्त्यर्थोपस्थितित्वेन तथा च ज्ञानस्य साक्षादेव चैत्रेऽन्वय इति मणिकारमतमाह चिन्तामणिकृतस्त्विति । धात्वर्थ एवेति । एवकारेण संख्याव्यवच्छेदः । भावनाविशेष्ये संख्यान्वयात्तैत्रस्य भावनाविशेष्यत्वाभावाच्च चैत्रे संख्यान्वय इत्यर्थः । तर्हि आख्यातप्रतिपाद्यं किमत आहाख्यातेति काल इति । कालो वर्त्तमानत्वादिः संख्याचैकत्वादिस्तत्र वर्त्तमानत्वं धात्वर्थ एवान्वेतीत्यर्थः । अयोग्यत्वादिति । ज्ञानाद्यननुकूलयत्नस्यायोग्यत्वादित्यर्थः । तण्डुलं पचतीत्यादौ पाके कर्मत्वं प्रकारः कर्मत्वे तण्डुल इति परम्परासम्बन्धेन पाके तण्डुलस्यान्वयः पाकस्य कृतौ कृतेश्चैत्रे इति साक्षादित्युक्तं । स्तोकं पचतीत्यादावभेदेनान्वयाद्भेदेनेत्युक्तं । अन्यथा साक्षाद्धात्वर्थनामार्थयोरन्वयस्याव्युत्पन्नत्वाभावे ओदन इति । कर्मता संसर्गेणोदनप्रकारकपाकविशेष्यकान्वयःस्यादित्यर्थः । इदमुपलक्षणं चैत्रः पच्यते तण्डुल इत्यत्र कर्त्तृतासंसर्गेण चैत्रप्रकारकपाकविशेष्यकबोधः स्यादित्यपि बोध्यम् ।

वस्तुतो जानातीत्यादावाख्यातार्थानवभासे आख्यातार्थसंख्यान्वयो न स्यात्तस्या आख्यातार्थविशेष्यगामित्वनियमात् । विभक्त्यर्थाविशेषणीभूतो ना-

मार्थ आख्यातार्थविशेष्यः तेन चैत्र ओदनं पचतीत्यत्र तथाविधश्चैत्र आख्यातार्थविशेष्यो नत्वोदनः। द्वितीयार्थविशेषणत्वात् पच्यत इत्यत्र कर्म न कर्त्ता तृतीयार्थावरुद्धत्वात् स्थीयत इत्यत्र स्थित्यनुकूला कृतिरिति बोधात् आख्यातार्थे कस्यापि न विशेष्यत्वमिति संख्यानन्वितैव अत एवात्रौत्सर्गिकमेकवचनमेवेत्यूचुः। धात्वर्थविशेष्यकोऽत्रान्वयबोधः। नचैवं धात्वर्थस्य द्वित्वादिविवक्षायां द्विवचनाद्यापत्तिः असाधुत्वादित्यपि कश्चित्। स्यादेतत् आख्यातार्थः कालः कुत्रार्थेऽन्वेतीति चेत् एकपदोपात्तत्वप्रत्यासत्त्या कृतावित्यवेहि धात्वर्थ इत्यपरे कथमन्यथा जानातीत्यादौ ज्ञाने वर्तमानत्वादि प्रतीयत इति।

ननु विशेष्यतासम्बन्धेनाभेदातिरिक्तसंसर्गकप्रातिपदिकार्थप्रकारकबोधं प्रति विशेष्यतासम्बन्धेन निपातकृत्तद्धितान्यतरजन्योपस्थितेर्हेतुत्वकल्पनयैवोदनः पचतीत्यादिवारणेऽपि जानातीत्यादौ धात्वर्थप्रकारकबोधे किं बाधकमत आह वस्तुत इति। तस्याः संख्यायाः। आख्यातार्थेति। एवं चाख्यातार्थसंख्यान्वयबोधत्वावच्छिन्नं प्रति विभक्त्यर्थाविशेषणीभूतनामार्थोपस्थितेः कारणत्वमित्यर्थः। तेन जयेतेत्यादौ कृतिसाध्यत्वरूपाख्यातार्थविशेष्ये यागादौ संख्यानन्वयः। यागादेर्नामार्थत्वाभावात्। नन्वाख्यातार्थविशेष्यं किमित्यत आह विभक्त्यर्थेति। तण्डुलं पचतीत्यादौ कर्मत्वविशेषणत्वेनोपस्थिते तण्डुले भावनाविशेष्यत्वं स्यादतो भूतान्तमुक्तं नामार्थ इति। विशेष्यतासम्बन्धेन समवायादिसंसर्गकाख्यातार्थभावनाप्रकारकशाब्दबोधत्वावच्छिन्नं प्रतीतरार्विशेषणीभूतप्रथमान्तना-

मजन्योपस्थितिः कारणं । चन्द्र इव मुखमस्तीत्यादौ प्रथमान्तनामजन्योपस्थिते चन्द्रे तादृशशाब्दबोधः स्यादत उक्तमितराविशेषणीभूतेति । चन्द्रस्येवार्थविशेषणत्वेनेतराविशेषणीभूतत्वेनोपस्थित्यभावान्न दोषः । यद्वा आत्मनं जानातीत्यत्र द्वितीयार्थविशेषणभूतात्मनि विशेष्यतासम्बन्धेन भावनाप्रकारकः शाब्दबोधो न स्यादितीतरविशेषणत्वेन तात्पर्याविषयत्वार्थकमूलान्त । एवं च तण्डुलं पचतीत्यत्र तण्डुले तादृशभावनाप्रकारकान्वयबोधवारणाय नामार्थ इति प्रथमान्तनामार्थपरमिति । उदाहरणेनाख्यातार्थविशेष्यत्वं दृढयति । तेनेति । तेन निरुक्तनामार्थस्याख्यातार्थविशेष्यत्वनिर्वचनेन । तथाविधः विभक्त्यर्थाविशेषणीभूतनामार्थः विभक्त्यर्थाविशेषणीभूतस्येत्यस्य कृत्यमाह न त्विति । न त्वोदनरूपोर्थ आख्यातार्थविशेष्य इत्यर्थः । चैत्र ओदनं पचतीत्यत्र द्वितीयार्थः कर्मत्वं विक्लित्तिरूपं तच्च पाके विशेषणतया ओदनं कर्मत्वविशेषणतया चेति तथा चोदनकर्मकप कानुकूलकृतिमांश्चैत्र इति बोध इत्यभिप्रायवानाह द्वितीयार्थ इति । प्राचीनमते चैत्रेण पच्यते तण्डुल इत्यत्र तृतीयार्थो वृत्तिः सा कृतौ प्रकारः कृतिर्विषयतासम्बन्धेन तण्डुले तथा च चैत्रवृत्तिपाकानुकूलकृतिविषयतण्डुल इत्यर्थः । नव्यमते यथा तण्डुलं पचतीत्यत्र विक्लित्तिरूपफलप्रकारको बोधस्तथा पच्यते तण्डुल इत्यत्रापि फलप्रकारकबोधस्यानुभवसिद्धत्वात्फलमात्मने पदार्थः । तथाच चैत्रेण पच्यते तण्डुल इत्यत्र तृतीयार्थः कृतिः सा जन्यत्वसम्बन्धेन पाके स च पाको जन्यत्वसम्बन्धेन फले चैत्रस्तृतीयार्थे इति । एवं च चैत्रीयकृतिजन्यो यः पाकस्तज्जन्यफलशाली तण्डुल इति बोधस्तत्र मतद्वयेपि न चैत्रो भावनाविशेष्यः किं तु तण्डुल इत्यभिसन्धायाह पच्यत इति कर्मेति कर्म कर्मीभूतस्तुण्डुलः । आख्यातर्थविशेष्य इत्यर्थः । न कर्त्ता न चैत्रः अवरुद्धत्वात् । विशेषणत्वात् । स्थीयत इत्यत्र स्थित्यनुकूलकृतिरिति बोधस्तत्र विभक्त्यर्थाविशेषणीभूतनामार्थाभावात्संख्यानन्वितैवेत्याह स्थीयत

इति अत्र स्थित्यनुकूलाकृतिरित्याख्यातार्थेन कस्यापि विशेष्यत्वमिति पाठः क्वचित् स्थित्यनुकूलाकृतिरिति न कस्याप्याख्यातार्थ इति पाठः । उभयत्र कृतिरित्यस्याख्यातार्थेऽन्वयः । संख्यानन्वये कथमेकवचनमित्यत आहात एवेति । अत एव संख्याया अनन्वयादेव प्रथमोपस्थितत्वादेकवचनमेव-साध्विति भावः । अथ गगने न स्थीयत इत्यात्र गगनवृत्तिस्थित्यनुकूलायाः कृतेर्बोधात् धात्वर्थविशेष्यकत्वात्सर्वत्र भावप्रत्ययस्थले चैत्रेण सुप्यते गगने न स्थीयत इत्यादौ चैत्रवृत्तिः स्वापो वर्त्तमानो गगनवृत्तिः स्थितिर्वर्त्तमानेति धात्वर्थविशेष्यक एव बोधः स्वीक्रियत इत्यभिप्रायवतां नव्यानां मतमाह धात्वर्थविशेष्यक इति । अत्र गगने न स्थीयत इत्यादौ । एवं धात्वर्थविशेष्यकबोधस्वीकारे द्वित्वादीनि । यथा विशेष्यस्य चैत्रादेर्द्वित्वादिविवक्षायां गच्छत इति द्विवचनं तथा स्थितेर्द्वित्व-विवक्षयां स्थितुतरं भावप्रत्ययोत्तरमाख्यातस्यापि द्विवचनं स्यादित्यर्थः कालः वर्त्तमानत्वादिः । एकपदोपात्तत्वप्रत्या सत्त्या स्वोपस्थापकाख्यातपदोपस्थाप्यत्वसम्बन्धेन । न च संख्याया अप्येकपदोपात्तत्वप्रत्या सत्त्या कृतावेवान्वयोऽस्त्विति वाच्यम् संख्यायाः कृतिविशेष्यान्वयित्वस्य-व्युत्पत्तिसिद्धत्वात् । चैत्रो घटं जानातीत्यादौ वर्त्तमानज्ञानाश्रयश्चैत्र इति बोधस्तत्र वर्त्तमानत्वस्य धात्वर्थे ज्ञानेऽन्वयात् सर्वत्र धात्वर्थ एव कालान्वयोऽस्तु इति कस्यचिन्मतमाह धात्वर्थ इति ।

स्यादेतत् । भविष्यता अतीतत्वेप्याख्यातविशेषवाच्ये भविष्यत्वं च विद्यमानप्रागभावप्रतियोगित्वं विद्यमानध्वंसप्रतियोगित्वमतीतत्वमिति पचति चैत्रे भाविकृतिप्रागभावमादाय पक्ष्यति आद्यकृतिध्वंसमादायापाक्षीदिति स्यात् । न स्यात् आद्यकृतिप्रागभावस्यैव भविष्यत्प्रत्ययेन चरमकृतिध्वंसस्यैवातीतप्रत्ययेनाभिधानात् । अथौदनं पचतीत्य-

त्यौदननिष्टविक्लित्तिजनकव्यापारविशेषकर्तृत्वं प्रतीयते तत्र विक्लित्तिस्तदनुकूलव्यापारश्च कस्यार्थः । उच्यते विक्लित्तिः फलम् तद्धि द्वितीयाया अर्थः तदनुकूलो विलक्षणव्यापारो धात्वर्थः अनुकूलता च संसर्गः ।

ननु यदि वर्त्तमानत्वस्य कृतावेवान्वयस्तदा भविष्यत्वातीतत्वयोः कालविशेषयोर्भाविकृतिप्रागभावमादायाद्यकृतिध्वंसमादाय च प्रारब्धपाकचैत्रकृतावपि सत्त्वेन पचतीति चैत्रेऽपि भाविकृतिप्रागभावमादाय भविष्यत्कृतिगोचरः पक्ष्यतीति आद्यकृतिध्वंसमादायातीतकृतिगोचरोऽपाक्षीदिति प्रयोगः स्यादित्याह स्यादेतदित्यादिना । समाधत्ते न स्यादाद्यकृतीत्यादिना । क्वचित्स्यादिति चेन्न इत्यपि पाठः । ओदननिष्ठेति ओदननिष्ठा या विक्लित्तिरवयवशैथिल्यं तज्जनकव्यापारस्तदनुकूलविलक्षणक्रियारूपव्यापारविशेषः कर्तृत्वं तदनुकूलकृतिमत्त्वं तदनुकूलव्यापारो विक्लित्त्यनुकूलो व्यापारः तद्धि फलं हि । तदनुकूलः फलानुकूलः । तथा सत्योदननिष्ठविक्लित्त्यनुकूलव्यापारानुकूलकृतिमांश्चैत्र इति बोध इति ।

ननु कर्मत्वं द्वितीयाया वाच्यं तच्च क्रियाजन्यफलशालित्वं न तु फलमात्रमिति चेन्न क्रियाया धातुवाच्यत्वात् । जन्यत्वाश्रयत्वयोश्च संसर्गमर्यादया लाभात् फलमात्र एव शक्तिकल्पनाद् अनन्यलभ्यो हि शब्दार्थः ।

अथ फलं द्वितीयार्थ इत्यत्र शङ्कते नन्विति । शालित्वमाश्रयत्वं शक्तिकल्पनाद् द्वितीयायाः शक्तिकल्पनात् । ननु क्रियाया धात्वर्थत्वे जन्यत्वाश्रयत्वयोश्च संसर्गत्वे कथं क्रियाजन्यफलशालित्वं कर्मत्वमिति प्राचीनप्रवाद इत्यत आहानन्यलभ्य इति । तथा च धात्वर्थमर्यादया लभ्यस्य संसर्गमर्यादयालभ्यस्य च न द्वितीयापदार्थत्वं प्राचीनप्रवादस्तु निर्युक्तिकत्वाच्च श्रद्धेय इति

ननु फलमपि धातुलभ्यमेव फलानुकूलो व्यापारो हि धात्वर्थ इति चेन्न फलानुकूलत्वोपलक्षितो विलक्षणव्यापारो हि धात्वर्थो न तु फलानुकूलत्वमपि गौरवात्। नन्वेवं त्यजिगम्योः पर्यायता स्यात् तथा हि संयोगानुकूलं कर्म गमेरर्थः विभागानुकूलं कर्म त्यजेरर्थः तत्र यदि फलानुकूलत्वमुपलक्षणं तदा कर्ममात्रं शक्यं तत्र वाच्यं तथा च कुतो न पर्यायता। आस्तां पर्यायता को दोष इति चेन्न ग्रामं गच्छतीति वक्तव्ये ग्रामं त्यजतीति प्रतीत्यापत्तेः।

अथ क्रियाया धात्वर्थत्वे फलमपि धात्वर्थ एव भविष्यतीत्यत आह नन्विति। तत्कथमित्यत आह फलेति। ननु क्रियाजन्यफलशालित्वं कर्मत्वं। तत्र क्रिया फलविशेषणं। यदि च फलानुकूला क्रिया धात्वर्थस्तत्र फलं क्रियायां विशेषणं तथा च फलप्रकारकक्रियाविशेष्यकक्रियाशक्तिग्रहे कथं क्रियाप्रकारकफलविशेष्यककर्मत्वग्रहः। न हि घटपदस्य घटत्वप्रकारकघटविशेष्यकशक्तिग्रहे कदापि घटप्रकारकघटत्वविशेष्यकशाब्दबोध इति फलस्य धात्वर्थविशेषणत्वे यद्यपि समाधातुं शक्यं तथापि लाघवमनुसृत्य तस्योपलक्षणत्वेन समाधत्ते फलानुकूलत्वमिति। वस्तुगत्या फलानुकूल्यं क्रियायामपेक्षितं न तु फलानुकूलत्वं शक्यतावच्छेदकमिति भावः॥ एवं फलानुकूलत्वस्योपलक्षणत्वेन संयोगानुकूलत्वविभागानुकूलत्वयोः सम्बन्धमात्रत्वं फलविशेषावच्छिन्नव्यापारस्य धात्वर्थत्वाभावे त्यजिगम्योः कर्ममात्रमर्थो वाच्यः तथा च यथा घटकलशपदयोरेकार्थत्वेन पर्यायत्वं तथा त्यागगमनपदयोः शक्यविशेषात्पर्यायत्वं स्यादिति भावः। तत्र उभयत्र। ननु फलानुकूलव्यापारस्य

धात्वर्थत्वे गम्यते ग्राम इत्यादौ संयोगादिरूपतत्तत्फललाभः कथं स्यादात्मनेपदस्य फलसामान्यबोधकत्वात् । अथ यथेष्टसाधनत्ववाचकाद्विधेः सामान्यत इष्टसाधनत्वबोधेऽपि स्वर्गादिपदसमभिव्याहारात्स्वर्गादिसाधनत्वं प्रतीयते संयोगानुकूल क्रियावाचकधातुसमभिव्याहृतात्मनेपदादिना संयोगरूपं फलं बोध्यते सर्वत्रावच्छेदकीभूत यत्र यत्फलं तत्र तदेव फलमात्मनेपदादिना बोध्यते । तादृशधातुसमभिव्याहारस्य तथैव कार्यकारणभावकल्पनादिति चेत्तर्हि प्रकृतेपि दीयतां दृष्टिः ॥

मैवं गच्छतीत्यादिसमभिव्याहृतद्वितीयायाः संयोगरूपफलबोधकत्वव्युत्पत्तेः । त्यजतीत्यादिसमभिव्याहृतद्वितीयायाश्च विभागरूपफलबोधकत्वव्युत्पत्तेरेव यथोक्तातिप्रसङ्गनिरासात् । न्यायभास्करकृतस्तु फलमवच्छेदकमेव द्वितीयार्थस्त्वाश्रयता नचैवम्भूमौ पततीत्यत्र भूमिपदाद्द्वितीयापत्तिः । स्वसमभिव्याहृतधात्वर्थतावच्छेदकफलाश्रयताबोधकत्वव्युत्पत्तेः । अत एव धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमिति लक्षणं ध्रुवं न हि क्रियाजन्यफलाश्रयत्वं तत् । वृक्षाद्भूमौ पततीत्यत्र वृक्षभूम्योः कर्मजन्यविभागसंयोगाश्रयतया कर्मत्वापत्तेः । ननु तथाप्यधः संयोगानुकूलव्यापारस्य पतत्यर्थतया कर्मत्वं भूमेर्दुस्त्यजमिति चेन्न पतत्यर्थे फलस्यावच्छेदकत्वानङ्गीकारात्

गच्छतीत्यादिसमभिव्याहृतद्वितीयायाः संयोगरूपफलबोधकत्वेन-त्यजतीत्यादिसमभिव्याहृतद्वितीयाया विभागरूपफलविशेषबोधकत्वेनेत्यभिप्रायवान् समाधत्ते मैवमित्यादिना । उत्तरदेशसंयोगरूपफलबोधकत्वा

वच्छिन्नं प्रति गच्छतीति समभिव्याहृतद्वितीयाया ज्ञानत्वेन कारणत्वं। तथा चैत्रो ग्रामं गच्छतीत्यत्र ग्रामकर्मत्वीभूतसंयोगानुकूलव्यापारानुकूलयत्नवांश्चैत्र इति बोधः। एवं ग्रामं त्यजतीत्यत्र ग्रामकर्मत्वीभूतविभागानुकूलक्रियानुकूलयत्नवानिति बोध इति। अथफलावच्छिन्नो व्यापारो धात्वर्थः। तत्र फलमवच्छेदकं। आश्रयत्वं द्वितीयार्थस्तथा च ग्रामं गच्छति त्यजतीत्यादौ ग्रामनिष्ठोत्तरदेशसंयोगपूर्वदेशविभागानुकूलक्रियानुकूलयत्नवांश्चैत्र इति बोधः। तत्संयोगावच्छिन्नक्रियायाः गम्यर्थतया विभागावच्छिन्नक्रियायास्त्यजत्यर्थतया त्यजिगम्योर्न पर्यायतापत्तिरित्यभिप्रायवतां मतमाह न्यायभास्करकृत इति। ननु फलाश्रयत्वस्य द्वितीयार्थत्वेऽधोदेशसंयोगाश्रयत्वरूपफलाश्रयत्वस्य भूमावपि सत्त्वेन भूमौ पर्णं पततीत्यादौ भूमिपदोत्तरं द्वितीया स्यादित्याह। न चैवमिति। एवं फलाश्रयत्वस्य द्वितीयार्थत्वविवक्षणे स्वसमभिव्याहृतेति स्वं सकर्मकधातुः। तथा चात्र पतधातोरकर्मकत्वेनाधोदेशसंयोगाश्रयत्वस्य धात्वर्थतावच्छेदकफलाश्रयत्वाभावान्न तस्य द्वितीयार्थत्वं सकर्मकधातुसमभिव्याहाराभावात्। नचाश्रयत्वस्य क्रियाजन्यत्वाभावेन कथं क्रियाजन्यफलशालित्वं कर्मत्वमिति लक्षणसङ्गतिरित्यत आह अत एवेति। अत एव क्रियाजन्यफलाश्रयत्वस्य दोषदुष्टत्वादेव। कर्मजन्येति। वृक्षाद्विभागः। भूमौ संयोगः तदाश्रयत्वस्योभयत्र सत्त्वादित्यर्थः। यद्वा द्वितीयार्थस्याश्रयतामात्रत्वे सप्तम्यर्थाभेदापत्त्या सप्तमीस्थाने द्वितीया स्यादिति शङ्कते न चैवमिति। एवं द्वितीयार्थस्य सप्तम्यर्थाभिन्नत्वे। स्वसमभिव्याहृतेति तथा च सकर्मकधातुसमभिव्याहारे धात्वर्थतावच्छेदकफलाश्रयत्वबोधः। अन्यत्र सप्तमीसमभीव्याहारे चाधिकरणत्वबोध इति न दोषः। तत्रापि फलस्यावच्छेदकत्ववादिनोपि। कर्मत्वमिति। तादृशव्यापारावच्छेदकीभूताधः संयोगस्य भूमावपि सत्त्वाद्भूमौ कर्मत्वं दुस्त्याज्यमित्यर्थः। पतत्यर्थ इति। पतत्यर्थफलस्यावच्छेदकत्वाभावे व्यापारमात्रं पतधात्वर्थ इति न भूमौ कर्मत्वं तादृशफलाश्रयत्वाभावस्य भूमौ सत्त्वा-

आदित्यः । सङ्गस्यत इत्यत्र क्रमो मे दीत्वं गमेरिएमे इति इट् प्रसज्येत । शतरि मसंज्ञा सावकाशेति मिङ्क्षु वक्ष्यमाणाभिरस्मदादिभिः संज्ञाभिर्बाध्यत्वं नाशङ्कनीयम् । सावैस्म इति वचनं ज्ञापकं मिङां मसंज्ञाऽपि भवतीति ॥

इङानं दः ॥ १५० ॥

इङिति प्रत्याहार इडित्यतः प्रभृति आ झङो ङकारेण । इङ च आनश्च दसंज्ञौ भवतः । इट् वहि महि थास् आथाम् ध्वम् त आताम् झङ् । आन इति शानो गृह्यते ॥

मिङस्त्रिशोऽस्मद्युष्मदन्याः ॥ १५१ ॥

मिङो मसंज्ञानि दसंज्ञानि च त्रीणि त्रीणि वचनानि अस्मद्युष्मदन्य इति एवंसंज्ञानि भवन्ति । मिप् वस् मसित्यस्मद् । सिप् थस् थेति युष्मद् । तिप् तस् झीत्यन्यः । दानामपि । इट् वहि महि इत्यस्मद् । थास् आथां ध्वमिति युष्मद् । त आतां झङित्यन्यः । मिङ इति किम् । अनुत्तरस्य दस्य मस्य च ग्रहणार्थम् । त्रिश इति संख्यैकाद्वीप्सायामिति शस् ॥

साधने स्वार्थे ॥ १५२ ॥

अस्मदादयोऽन्वर्थसंज्ञा अनुवर्तन्ते । लस्येत्यधिकृत्याविशेषेण मिङादयो विहितास्तन्नियमोऽयम् । स्वस्यार्थः स्वोऽर्थो वा स्वार्थस्तस्मिन् स्वार्थे साधने ऽस्मदादयो वेदितव्याः । अस्मत्पदस्यार्थे साधने ऽस्मत्त्रिकं युष्मत्पदस्यार्थे साधने युष्मत्त्रिकमाभ्यामन्यस्यार्थे साधने ऽन्यत्रिकं भवति । अस्मदाद्यर्थानां साधनत्वे सति नियमो

ऽयम् । ततोऽस्मदादिपदानामनुप्रयोगे सत्यसति चास्मदादयो भवन्ति । अहं पचामि । आवां पचावः । वयं पचामः । पचामि । पचावः । पचामः । त्वं पचसि । युवां पचथः । यूयं पचथ । पचसि । पचथः । पचथ । स पचति । तौ पचतः । ते पचन्ति । पचति । पचतः । पचन्ति । एवं द्विविधावपि योज्यम् । भावे ऽस्मद्युष्मदर्थयोरभावात् भावस्य चाभ्यामन्यत्वादेकत्वाच्च तस्मिन् साधने ऽन्य एव भवति । आस्यते भवता । ग्लायते भवता । यत्रास्मदाद्यर्था युगपत् साधनं तत्र क इष्यते । पूर्वनिर्णयेन यः पूर्वः । अत्र किमस्मदर्थ एव साधने ऽस्मद् भवति इत्यवध्रियते आहोस्विदस्मदर्थे साधने ऽस्मदेव भवतीति । उभयथाऽप्यदोषः सर्वेषां नियतत्वात् । ननु द्वितीये पक्षे त्वया कुर्वाणेनेत्यत्र दोषः । नैवम् । त्रिकापेक्षया नियमो न साधनापेक्षया ॥

प्रहासे मन्यवाचि युष्मन्मन्यतेरस्मदेकवच्च ॥१५३॥

मन्य इति मन्यतेरेकदेशः । ब्रूते इति वाक् । मन्यो वाक् यस्य प्रहासस्य तस्मिन् मन्यवाचि प्रहासे गम्यमाने युष्मद्भवति मन्यतेश्चास्मद्भवति एकवच्च । अस्मद्युष्मदोर्व्यत्ययार्थोऽयमारम्भः। एहि मन्ये रथेन यास्यसि न हि यास्यसि यातस्ते पिता । एहि मन्यसे रथेन यास्यामीति प्राप्तम् । एवमेहि मन्ये ओदनं भोक्ष्यसे न हि भोक्ष्यसे भुक्तः सोऽतिथिभिः । द्वित्वबहुत्वविवक्षायामपि मन्यतेरेकवद्भावो भवति । एवं मन्ये रथेन यास्यथ न यास्यथेति । प्रहास इति किम् । एहि मन्यसे ओदनं भोक्ष्य इति सुष्ठु मन्यसे साधु मन्यसे ॥

एकद्विबहवश्चैकशः ॥ १५४ ॥

यान्यस्मद्युष्मदन्यसञ्ज्ञानां संज्ञित्वेनोपात्तानि षट् त्रिकाणि तान्येकश एक द्वि बहु इत्येवंसंज्ञानि भवन्ति । मिबित्येकः । वसिति द्विः । मसिति बहुः । एवं शेषेषु त्रिकेषु योज्यम् । अस्मदादिसञ्ज्ञाः पुंल्लिङ्गा एकादिभिः सह समाविशन्ति ॥

सुपश्च ॥ १५५ ॥

त्रिश इति वर्तते । सुपश्च त्रिकाणि एकद्विबहु-संज्ञानि भवन्त्येकशः । सु इत्येकः । औ इति द्विः । जसिति बहुः । एवं शेषेषु त्रिकेषु नेयम् । उभयत्र चशब्दः साधने स्वार्थे इत्यस्यानुकर्षणार्थः । एकार्थे साधने एको मिप् भवति । द्व्यर्थे द्विर्वस् । बह्वर्थे बहुर्मस् । एवं मिङ्क्षु सुप्सु च योज्यम् । ननु च साधने स्वार्थे इत्येतन्मिङ उपपद्यते यतः साधनं कारकं क्रियाया निर्वर्तकं क्रिया च ध्वर्थः । धोश्च मिङो विहिता इति साधनवाचित्वोपपत्तेः । सुपस्त्वक्रियावाचिनो ङ्याम्मृदो विधीयन्त इति तत्र साधने स्वार्थे इत्येतन्न घटते । नैष दोषः । अक्रियावाचिनोऽपि विधीयमानाः सुपः क्रियावाचिपदान्तरमाकाङ्क्षन्ति । पदान्तरवाच्यायाः क्रियायाः साधनभावोपपत्तेः सुप्स्वपि साधने स्वार्थे इत्ययं व्यवहारो युज्यते । देवदत्तः पचति । देवदत्तौ पचतः । देवदत्ताः पचन्ति । यत्रापि क्रियापदं न प्रयुज्यते वृक्षः प्लक्ष इति तत्राप्यस्ति भवतीति परः सन्निहितस्तदपेक्षया व्यवहारः । मिङः सामान्येन धुमात्राद्विधीयन्ते सुपश्च मृन्मात्रात्तेषां सङ्करेण प्राप्तौ

नियमोऽयम् । त्यनियमोऽर्थनियमो वा । एकार्थ एव साधने एको भवति द्व्यर्थ एव साधने द्विर्भवति बह्वर्थ एव बहुर्भवतीति त्यनियमः । एकार्थे साधने एक एव भवति द्व्यर्थे द्विरेव भवति बह्वर्थे बहुरेव भवतीत्यर्थनियमः । त्यनियमपक्षे सुपो झेरिति वचनं ज्ञापकमेकत्वादीनामभावेऽप्युत्पद्यन्ते झेः सुप इति । अर्थनियमपक्षे एकत्वादयो नियता त्यान्न व्यभिचरन्ति त्याः पुनरनियता एकत्वादीनामभावे व्यतिकरणेन झिसञ्ज्ञकेभ्यो भवन्ति । तत्र सुपो झेरित्युपि कृते सुबन्तं पदं भवति ॥

विभक्ती ॥ १५६ ॥

सुप इत्यनुवर्तते त्रिश इति च । सुपां त्रीणि त्रीणि वचनानि विभक्तीसंज्ञानि भवन्ति । सु औ जसिति त्रिको वर्गस्तस्य विभक्ती इति संज्ञा । त्रिकसमुदाये संज्ञा विहिता अवयवे ऽप्युपचर्यते । एवं सर्वत्र सुपां त्रिकेषु योज्यम् । मिङां विभक्तीसंज्ञायां न गुणो नापि दोषः । विभक्तीशब्दस्य कथं सिद्धिः । विपूर्वाद्भजेः क्तिच्कृतौ खाविति क्तिच् तस्मात् कृदिकारादक्तेरिति ङीविधिः । महासंज्ञाकरणमुत्तरार्थम् ॥

तासामापपरास्तद्धलचः ॥ १५७ ॥

तस्य विभक्तीशब्दस्य हलोऽचश्च आकारपकारपरास्तासां विभक्तीनां यथासंख्यं संज्ञा भवति । वा इप् भा अप् का ता ईप् इति एताः संज्ञाः । सुपस्त्रिश इति चानुवर्तते । सु औ जसिति वा । अम् औट् शसिति इप् । टा भ्यां भिसिति भा । ङे भ्यां भ्यसिति अप् । ङसि

भ्यां भ्यसिति का । ङस् ओस् आमिति ता । ङि ओस् सुप् इति इप् । तासां ग्रहणं सुब्विभक्त्युपादानार्थम् । सपूर्वायावाया इत्येवमादयो निर्देशाः सौत्राः ॥

इत्यभयनन्दिविरचितायां जैनेन्द्रव्याकरणमहावृत्तौ प्रथमस्याध्यायस्य द्वितीयः पादः समाप्तः ॥ २ ॥

समर्थः पदविधिः ॥ १ ॥

परिभाषेयम् । समर्थपदाश्रयत्वात् समर्थः । पदसम्बन्धी विधिः पदविधिः । सर्वः पदविधिः समर्थो वेदितव्यः । समर्थानां पदानां विधिर्वेदितव्य इत्यर्थः । द्विविधं सामर्थ्यमेकार्थीभावः परस्परव्यपेक्षा च । तत्र सविधिनामधुट्द्विधिषु स्वभावत एकार्थीभावः सामर्थ्यमन्यत्र व्यपेक्षा । एकार्थीभावे सङ्गतार्थः संसृष्टार्थो वा समर्थः । व्यपेक्षायां सम्बद्धार्थः सम्प्रेक्षितार्थो वा समर्थः । वक्ष्यति इप् तच्छ्रितातीतपतितगतात्यस्तैः । धर्मं श्रितो धर्मश्रितः । समर्थग्रहणं किम् । व्याचष्टे मुनिर्धर्मं श्रितः शिष्यो गुरुकुलम् । अत्र व्यपेक्षा नास्ति । भा गुणोक्तयार्थेनोनैः । मदेन पटुर्मदपटुः । समर्थग्रहणं किम् । दन्ती भ्रमति मदेन पटुः शास्त्रेण । अप्तदर्थार्थबलिहितसुखरक्षितैः । रथाय दारु रथदारु । समर्थग्रहणं किम् । गच्छ त्वं रथाय दारु देवदत्तस्य गेहे । का भीभिः । संसाराद्भयं संसारभयम् । समर्थग्रहणं किम् । ध्यानी निःक्रामति संसाराद्भयमरण्ये । ता । मोक्षस्य मार्गो मोक्षमार्गः । समर्थ ग्रहणं किम् । अनन्तसुखं मोक्षस्य मार्गः स्वर्गस्य व्रतम् । ईप्शौण्डैः । अक्षेषु शौण्डो ऽक्षशौण्डः । समर्थग्रहणं किम् । मूढः शक्तोऽक्षेषु शौण्डः पिबति पानागारे । पदग्रहणं किम् ।

तिष्ठतु दध्यशान त्वं शाकेन । तिष्ठतु कुमारी च्छत्रं हर देवदत्तात् । वर्णविधौ समर्थपरिभाषा नावतरतीत्यानन्तर्यमात्रेण यणादेशस्तुग्विधिश्च भवति । वा पदस्येत्यत्र पदग्रहणं द्विमात्रस्य विशेषणमिति पदविधिरयं न भवतीति विकल्पेन तुक् ॥

सः ॥ २ ॥

स इत्ययमधिकारो वेदितव्य आ पादपरिसमाप्तेः । समुदायवाक्यपरिसमाप्तिश्चाश्रीयते तेन पदसमुदाये ससंज्ञा न प्रत्येकमिति । वक्ष्यति यावद्यथावधृत्यसादृश्ये । यथावृद्धमतिथीन् भोजय । नित्यत्वात् सविधेरस्वपदविग्रहेणार्थः प्रदर्श्यते ये ये वृद्धा इति । वीप्सायां यथाशब्दः । स इति पुंलिङ्गनिर्देशः किमर्थः । हादिभिर्विशेषसंज्ञाभिः समावेशो यथा स्यात् ॥

सुप् सुपा ॥ ३ ॥

सुबन्तं सुबन्तेन सह सो भवतीत्येतदधिकृतं वेदितव्यमा पादपरिसमाप्तेः । वक्ष्यति ङसच्छ्रितेत्यादि । धर्मश्रितः । लक्षणश्चेदं सुबन्तं सुबन्तेन सह सो भवति । यदृच्छया ऽतर्कितोपस्थिते चित्रीकरणे वा ऽयमिष्यते । तेन काकतालीयादयः सिद्धाः । तथाहि यदृच्छया तालस्य पतनं सन्निहितं काकश्चातर्कित उपस्थितः स काकस्तेन तालेन पतता हतः । अस्मिन्नर्थे ऽनयोः सामान्येन सः । काकश्च तालञ्च काकतालं तदिव काकतालीयम् । इवे प्रतिकृतावित्यधिकृत्य कुशाग्राच्छ इति चानुवर्तमाने साद्विषयादिति च्छो भवति । एवमजाकृपाणीयमन्धकवर्तकीयम् ॥

हः ॥ ४ ॥

अधिकारोऽयम् । यानित ऊर्ध्वमनुक्रमिष्यामो हसंज्ञास्ते वेदितव्याः षमित्यतः प्राक् । वक्ष्यति स्तोके प्रतिना । सूपप्रति । शाकप्रति । अस्वपदेन विग्रहः । अस्त्यत्र किञ्चित् सूपस्य मात्रा स्तोकमिति वा । अत्रान्ये मन्यन्ते अनव्ययस्याव्ययभवनमव्ययीभाव इत्यन्वर्थसंज्ञा कर्तव्या । एतच्चायुक्तम् । असंख्यस्य झिसंज्ञा युज्यते । अस्य च संख्या विद्यते । उपकुम्भेन । उपकुम्भाभ्याम् । उपकुम्भैः । दोषः खल्वपि झिसंज्ञायां झिसर्वनाम्नोऽक् प्राटेरिति यथेहाग्भवति । उच्चकैः । नीचकैरिति । एवमिहापि प्राप्नोति उपाग्निकं प्रत्यग्निकमिति । तथा खित्यझेर्मुमच इति झेः प्रतिषेध उच्यते दोषामन्यमहः दिवामन्या रात्रिः । स इहापि प्राप्नोति । उपकुम्भंमन्यः। उपमणिकांमन्यः । इह च अस्य च्वाविति झेः प्रतिषेधो वक्ष्यति दोषाभूतमहः दिवाभूता रात्रिरिति । स इहापि प्राप्नोति उपकुम्भीभूतः । उपमणिकीभूतः । तस्माल्लघीयसी ह इति संज्ञा युक्ता । यद्येवं कृकमिकंसकुम्भकुशाकर्णीपात्रेऽतो झेरित्यनेन सत्वस्य प्रतिषेधो न प्राप्नोति उपपयःकार इति । अद्युस्थस्येति तत्र वर्तते । हसे च द्युस्थो भवतीति प्रतिषेधः सिद्धः । पूर्वपदप्राधान्यञ्च सहस्याभिधानवशाज्ज्ञेयम् । हप्रदेशा हादित्येवमादयः ।

झि विभक्त्यभ्याससृद्ध्यर्थाभावातीत्यसंप्रतिव्यृद्धि-शब्दप्रभवपश्चाद्यथानुपूर्व्ययौगपद्य-संपत्साकल्यान्तोक्तौ ॥ ५ ॥

विभक्ति-अभ्यास-ऋद्धि-अर्थाभाव-अतीति-असंप्रति-व्यृद्धि-शब्दप्रभव-पश्चात्-यथा-आनुपूर्व्य-यौगपद्य-सम्पत्-साकल्य-अन्तोक्ति इत्येतेष्वर्थेषु यत् झिसंज्ञं वर्तते तत् सुबन्तेन समर्थेन सह हसंज्ञकः सो भवति । विभक्त्यर्थः कारकमधिकरणादि । स्त्रीषु कथा वर्तते । अधिस्त्रि । अधिकुमारि । ईबन्तेन वृत्तिः । हश्चेति नपुंसकलिङ्गातिदेशः । प्रो नपीति प्रादेशः । हादिति सुप उप् । अभ्यासः समीपम् । उपकुम्भम् । उपगुरु । कुम्भस्याभ्यास इत्यर्थप्रदर्शनं तान्तेन वृत्तिरिति केचित् । तदयुक्तम् । उपशब्दोऽयं द्योतकः स उत्तरपदार्थव्यतिरेकं न जनयति अभ्यासादीनान्तु शब्दानां वाचकानां सन्निधाने व्यतिरेकः प्रतीयते यथा धवश्च खदिरश्चेत्यस्यार्थे समुच्चयो धवखदिरस्य तस्माद्वान्तेन वृत्तिः । विभूतेराधिक्यं ऋद्धिः । मद्राणां ऋद्धिः सुमद्रं सुमगधं वर्तते । पूर्वपदार्थस्य प्राधान्ये हसः । यदा तु मद्रा ऋद्ध्या विशिष्यन्ते तदा शोभना मद्राः सुमद्रा इति तिकुप्रादय इति षसः । अर्थाभाव उत्तरपदार्थप्रध्वंसः । अभावो मक्षिकाणाममक्षिकम् । विमक्षिकम् । निर्मक्षिकम् । अर्थग्रहणं किम् । धर्माभावे इतरेतराभावे च मा भूत् । न भवति ब्राह्मणो गौरश्वो न भवतीति । अतीतिरतीतत्वम् । स्वत एवातिक्रान्तत्वमित्यर्थः । अतीतानि तृणानि अतृणम् । नितृणम् । एवं निशीतं निवातं वर्तते । न सम्प्रति असम्प्रति नेदानीमित्यर्थः । न सम्प्रति तैसृकमतितैसृकम् । नायं तैसृकस्याच्छादनस्योपभोगकाल इत्यर्थः । तिसृका नाम ग्रामस्तत आगतं तैसृकम् । विगम ऋद्धेर्व्यृद्धिः । गब्दिकानामृद्धेर्विगमो

दुर्गन्दिकम् । दुर्यवनम् । शब्दप्रभवः शब्दस्य प्रकाशमानता । श्रीदत्तस्य शब्दप्रभव इतिश्रीदत्तम् । तच्छ्रीदत्तमहो श्रीदत्तम् । श्रीदत्तशब्दो लोके प्रकाशत इत्यर्थः । पश्चात् । रथानां पश्चादनुरथं पादातम् । यथार्थो योग्यता । अनुरूपं सुरूपो वहति । सादृश्यमपि यथार्थः । उत्तरत्रासादृश्य इति प्रतिषेधाज्ज्ञायते । सदृशं व्रतस्य सव्रतम् । सशीलम् । हे काल इति सहस्य सादेशः । पूर्वं पूर्वमनुपूर्वं तस्य भाव आनुपूर्व्यम् । अनुज्येष्ठं प्रविशन्तु भवन्तः । ज्येष्ठानुक्रमेणेत्यर्थः । आनुपूर्व्यं विन्यासविशेष इति यथार्थात् पृथगुक्तम् । यौगपद्यसम्पत्साकल्यान्तोक्तिषु सहशब्दो वर्तते । यौगपद्यमेककालता । सचक्रं धेहि । युगपच्चक्रे धेहीत्यर्थः । सधुरं प्राज । युगपद्धुरौ प्राजेत्यर्थः । सम्पत् सिद्धिः । आत्मभावनिष्पत्तिरित्यर्थः । वृत्तस्य सम्पत् क्षत्रस्य सम्पत् सवृत्तं साधूनाम् । सक्षत्रं शालङ्कायनानाम् । साकल्य । सतृणमभ्यवहरति । सर्वेण सहाभ्यवहरतीत्यर्थः । अन्तः समाप्तिः । प्राभृतपर्यन्तमधीते । एवं सबन्धं सटीकम् । अत्र परिसमाप्तिरसाकल्येऽप्यध्ययने प्रतीयत इति साकल्ये नान्तर्भावः । इह आचण्डालं प्रयच्छतीति अन्तोक्तिरभिविधिरप्यस्ति । परत्वात् पर्यपाङ्बहिरञ्चवः कयेति विभाषा भवति । आचण्डालमाचण्डालेभ्य इति । वीप्सायां वा हसो वक्तव्यः । प्रत्यर्थम् । प्रतिपर्यायम् । अर्थमर्थं प्रति । पर्यायं पर्यायं प्रति ॥

यावद्यथावधृत्यसादृश्ये ॥ ६ ॥

प्रसक्तस्य परिमाणमवधृतिः । सादृश्यं तुल्यता । यावत्

यथा इत्येतौ शब्दाववधृति असादृश्य इत्येतयोरर्थयोः सुपा सह यथासंख्यं हसो भवति । यावदमत्रं यावदवकाशमतिथीन् भोजय । यावन्त्यमत्राणि तावतो भोजयेत्यवधार्यते। यथावृद्धं साधूनर्चय। यथापटु। यथाध्यापकम्। वृद्धानतिक्रमेणेत्यर्थः।उत्तरपदार्थानतिवृत्तिर्यथाशब्दस्यार्थो वीप्सा सादृश्यञ्च। अवधृत्यसादृश्य इति किम्। यावद् दत्तं तावद्भुक्तम्। यथा देवदत्तस्तथेन्द्रदत्तः। पूर्वेणैव यथार्थे हसे सिद्धे सादृश्ये प्रतिषेधार्थमिह यथाशब्दोपादानम्। गुणक्रियाछायासादृश्ये हसो वक्तव्यः॥ गुणः। यथाशक्ति। यथाबलम्। क्रिया। यथोपदेशम्। छाया। यथासुखम्। न वक्तव्यम्। अत्राप्युत्तरपदार्थानतिवृत्तिर्गम्यते॥

स्तोके प्रतिना ॥ ७ ॥

भीति निवृत्तम्। स्तोकं मात्रा। स्तोकेऽर्थे प्रतिना सह सुबन्तं हसो भवति। सूपस्य मात्रा सूपप्रति। शाकप्रति। स्तोक इति किम्। वृक्षं प्रति विद्योतते विद्युत्। लक्षणेऽत्र प्रतिशब्दो वर्तते॥

परिणाऽक्षशलाकासंख्याः ॥ ८ ॥

अक्षशब्दः शलाकाशब्दः संख्या च परिणा सह हसो भवति। परिणाक्षशलाकासंख्यमिति सिद्धे बहुवचननिर्देशादिष्टसंग्रहो लब्धो वेतिसिंहावलोकनाद्वा। अक्षादयो यदा भान्ता एकत्वञ्चाक्षशलाकयोः पूर्वोक्तस्यान्यथावृत्तौ परिशब्दो यदा वर्तते कितवव्यवहारविषये तदा वृत्तिरिष्यते। तथाहि पञ्चिका नाम द्यूतं यत्र पञ्चाक्षाः

शलाका वा पात्यन्ते पञ्चस्वेकरूपासु पातयिता जयत्यन्यथा पाते जीयते । अक्षेणेदं न तथा वृत्तं यथा पूर्वं जये अक्षपरि । शलाकापरि । संख्या । एकपरि । द्विपरि । त्रिपरि । चतुःपरि । परिणेति किम् । सुबन्तमात्रे मा भूत् । अक्षादय इति किम् । पाशकेनेदं न तथा वृत्तम् । एकत्वेऽक्षशलाकयोरिति किम् । अक्षाभ्यां न तथा वृत्तम् । कितवव्यवहार इति किम् । अक्षेणेदं न तथावृत्तं शकटे ॥

वा ॥ ९ ॥

वेत्ययमधिकारः । यदित ऊर्ध्वमनुक्रमिष्यामस्तद्वा भवतीति वेदितव्यः । इत उत्तरः सविधिर्वा भवति पक्षे वाक्यमपि साधु भवति । पूर्वस्तु सविधिर्नित्यः । तेनास्वपदेन तत्र विग्रहो ज्ञेयः ॥

पर्यपाङ्बहिरञ्चवः कथा ॥ १० ॥

परि अप आङ बहिस् अञ्चु इत्येते सुबन्ताः कान्तेन सह वा हसो भवति । परित्रिगर्तं वृष्टो देवः । वाक्यपक्षे परेर्वर्ज्जने वा वचनमिति वा द्वित्वम् । परि परि त्रिगर्त्तेभ्यः । परि त्रिगर्त्तेभ्यः । अप त्रिगर्त्तेभ्यः । वर्जनेऽपपरिभ्यामिति का । आपाटलिपुत्रं वृष्टो देवः । आ पाटलिपुत्रात् । आकुमारं यशः समन्तभद्रस्य । आ कुमारेभ्यः । काङमर्यादावचन इति मर्यादाभिविध्योः का । बहिर्ग्रामम् । बहिर्ग्रामात् । इदमेव ज्ञापकं बहिःशब्दयोगे का भवति । अञ्चु । प्राग्ग्रामात् । प्राची दिग् रमणीया इति वगृह्य दिक्छब्देभ्यो वा केभ्योऽस्ताद्दिग्देशयोः काल इति अस्तात् । तस्याञ्चेरुबित्युप । सुपो झेरिति सुप उप् ।

पदत्वात् कुत्वम् । तेन योगे ता प्राप्ता तां बाधित्वा दिक्छब्दत्वात् का प्राप्ता तां बाधित्वा तातसर्थत्येनेति तायां प्राप्तायां अञ्चुप्र इति का भवति । कयेति किम् । परिगतः । अपगतः । वर्जनार्थाभावात् का नास्तीति कुतिप्रादय इति नित्यं षसो भवति ।

लक्षणेनाभिमुख्ये ऽभिप्रती ॥ ११ ॥

लक्ष्यतेऽनेनेति लक्षणम् । तद्वाचिना सुबन्तेन सह अभिप्रतिशब्दावाभिमुख्ये वर्तमानौ वा हसो भवति । अभ्यग्नि शलभाः पतन्ति । प्रत्यग्नि शलभाः पतन्ति । अग्निमभि पतन्ति । अग्निं प्रति पतन्तीति वाक्यम् । अत्राग्निना चिह्नेन शलभपातो लक्ष्यते । वीप्सेत्थम्भूतलक्षणेऽभिनेप् । भागे चानुप्रतिपरिणेति चेप् । लक्षणेनेति किम् । स्रुघ्नं प्रति गतः । दिङ्मोहात्तत्रैव पुनरागत इत्यर्थः । आभिमुख्य इति किम् । अभ्यङ्का गावः । अभिनवः प्रतिनवोऽङ्को यासामिति । यद्यपि पूर्वपदार्थप्रधानो हसस्तथापीहार्थविशेषाभावेऽन्यपदार्थेऽपि स्यात् । अभिप्रती इति किम् । येनाग्निस्तेन गतः । येनेत्यस्याग्निना सह हसो न भवति ॥

यत्समया ऽनुः ॥ १२ ॥

समयावाची अनुशब्द उपचारात् समया । यस्य समया यत्समया । मुख्येन समयाशब्देन योगाभावादिम्न भवति । अत एव नञ्भितेत्यादिनाऽपि न तासप्रतिषेधः । अनुर्यत्समयावाची तेन लक्षणभूतेन सह वा हसो भवति । अनुवनं गतोऽशनिः । वनमनुगत इति वाक्यम् । भागे

चानुप्रतिपरिणेति लक्षणेप । वनेन समीपस्थमशनिगमनं लक्ष्यते । भ्रिविभक्त्यभ्यास इत्येवं सिद्धे विकल्पार्थं वचनम् । यत्समयेति किम् । वृक्षमनु विद्योतते ॥

आयामिना ॥ १३ ॥

अनुरिति वर्तते । लक्षणेनेति च । अनुनायामिना लक्षणभूतेन सह वा हसो भवति द्वयोः प्रकृष्टहीनयोर्दीर्घयोर्योगे ऽनुः प्रयुज्यमान उभयोर्दीर्घत्वमाह । तत्र प्रसिद्धायामेन लक्षणेनातिशयेन दीर्घेण वा हसवृत्तिर्भवति । अनुगङ्गं वाराणसी । अनुसीनं पाटलिपुत्त्रम् । वाक्यमपि साधु भवति । गङ्गामन्वायता वाराणसी । नद्यायामेन पत्तनायामो लक्ष्यते । लक्षणे इप । अथवा हेतावनुना भार्थइतीप् । गङ्गया सहायतेत्यर्थः ॥

तिष्ठग्वादीनिच ॥ १४ ॥

तिष्ठद्गु इत्येवमादीनि च शब्दरूपाणि हसंज्ञानि भवन्ति । समुदाया एते हसंज्ञाः कार्यार्थं पाठादेवं निपात्यन्त इत्यर्थः। तिष्ठद्गु कालविशेषे ऽन्यपदार्थे तिष्ठन्ति गावो यस्मिन् काले दोहाय तिष्ठद्गु । त्यद्योरिति लटः शत्रादेशो निपातनाद्वा । स्त्रीगोर्नीच इति प्रादेशः । वहन्ति गावो यस्मिन् काले वहद्गु । आयतीगवम् । पूर्वपदस्य निपातनात् पुंवद्भावाभाव अकारश्च सान्तो निपात्यते । खलेबुसम् । निपातनादीपोऽलुप् । लूनयवम् । लूयमानयवम् । लूयन्ते यवा यस्मिन् काले त्यध्वोरिति लटः शानादेशः । पूतयवम् । पूयमानयवम् । संहृतयवम् । संह्रियमाणयवम् । संहृतबुसम् । संह्रियमाणबुसम् । एते कालविशेषेऽन्यपदार्थे उक्ताः । समभूमिसमपदातिशब्दौ पूर्वपदार्थप्रधानौ

समत्वं भूमेः समत्वं पदातेरिति । उत्तरपदार्थप्रधाने तु समा भूमिः समभूमिरिति षस एव। हसे पूर्वपदस्य केचिन्मकारान्तत्वमपीच्छन्ति । समम्भूमि । समम्पदाति । सुषमम् । विषमम् । निःषमम् । दुःषमम् । अवरसमम् । समशब्देन पूर्वपदार्थप्राधान्ये हसः । अत्र शोभनत्वं समस्येत्येवमादिवाक्यमप्यूह्यम् । उत्तरपदार्थप्राधान्ये तु षसः । समाशब्दः संवत्सरवाचि । तेन वक्ष्यमाणो हसः । आयतीसमा । आयतीसमम् । पापसमम । पुण्यसमम् । केचित्तु समशब्देनैव भासमिच्छन्ति । आयत्या सममायतीसमम् । प्रगतमन्हः प्रान्हम् । उत्तरपदार्थप्राधान्ये षसः । प्रान्हे कल्याणनामानावुदितौ तिष्यपुनर्वसू । प्ररथम् । प्रमृगम् । प्रदक्षिणम् । अपदक्षिणम् । सम्प्रति । असम्प्रति । इच् । दण्डादण्डि । मुसलामुसलि । जइजिति इच् सान्तः । अन्यस्यापीति पूर्वपदस्य दीत्वम् । चशब्दोऽवधारणार्थः । तिष्ठद्ग्वादीन्येव नान्यैः सह वृत्तिं लभन्ते । परमं तिष्ठद्गु । सन्महत्परमेत्यादिना षसो न भवति ।

पारे मध्ये तया वा ॥ १५ ॥

पारेमध्येशब्दौ तान्तेन सह हसो भवति वावचनात्तासोऽपि । प्रकृतेन वाग्रहणेन वाक्यस्य साधुत्वमभ्यनुज्ञायते । हसन्नियोगेन वानयोरेकारान्तता निपात्यते । पारं गङ्गायाः । मध्यं गङ्गायाः । पारेगङ्गम् । मध्येगङ्गम् । तासपक्षे गङ्गापारम् । गङ्गामध्यम् ॥

संख्या वंश्येन ॥ १६ ॥

विद्याजन्मादिकृतः सन्तानो वंशः । तत्र भवो

वंश्यः । संख्या वंश्यवाचिना सह हसो भवति । द्विमुनी व्याकरणस्य वंश्यौ । द्विमुनि व्याकरणस्य । अत्र सम्बन्धे ता । यदा व्याकरणस्याचार्ययोरभेदविवक्षा यावेतौ द्वौ मुनी तावेव व्याकरणमिति द्वौ मुनी वंश्यौ द्विमुनि व्याकरणमिति तदा सामानाधिकरण्यं भवति । एवं सप्तकाशि त्रिकोशलम् । एकाश्रयस्य वसस्य चापवादोऽयम् ॥

नदीभिश्च ॥ १७ ॥

बहुवचननिर्देशादर्थस्येदं ग्रहणम् । नदीवाचिभिः शब्दैः सह संख्या हसो भवति । सप्त सिन्धवः समाहृताः सप्तसिन्धु । सप्तगङ्गम । द्वियमुनम् । तिस्रो गोदावर्यः समाहृताः। त्रिगोदावरम्। कृष्णोदक्पाण्डुपूर्वाया भूमेरः सान्त इष्यते । गोदावर्याश्च नद्या श्च संख्याया उत्तरे यदा इति अस्त्यः सान्तो भवति । नदीशब्दोऽपि नदीवचन इति तेनापि वृत्तिः। प नदम् । अत्राऽप्यः सान्तः । चकारः किमर्थः समाहारे यथा स्यादिह मा भूत् । वीरावतीको देशः । एका नदी एकनदी ॥

खावन्यपदार्थे ॥ १८ ॥

संख्येति निवृत्तम् । नदीभिरिति वर्तते । अन्यपदार्थे खुविषये नदोभिः सह सुबन्तं हसो भवति । उन्मत्तगङ्गं देशः । लोहितगङ्गम् । शनैर्गङ्गम् । तूष्णीगङ्गम् । अत्र वृत्ति-पदेन संज्ञा गम्यत इति सामर्थ्यान्नित्यः सविधिः । उन्मत्ता गङ्गा यस्मिन् देशे इति सादृश्यमात्रेणार्थकथनं यथा गौरित्यस्यार्थे गच्छतोति । खाविति किम् । शीघ्रा गङ्गा यस्मिन् देशे स शीघ्रगङ्गो देशः । अन्यपदार्थ इति किम् । कृष्णावेण्णा । कृष्णा नाम नदीविशेषलक्षणः ॥

षम् ॥ १९ ॥

अधिकारोऽयं प्राग् वसात् । यदित ऊर्ध्वमनुक्रमिष्यामः षसंज्ञः सो भवति इत्येवं वेदितव्यम् । वक्ष्यति इप्तच्छ्रितातीतपतितगतात्यस्तैः । धर्मं श्रितो धर्मश्रितः । नपा निर्देशः किमर्थः । इह वीरपुरुषको ग्राम इति पूर्वापरप्रथमादिसूत्रेण प्राप्तः स्वपदार्थविषयत्वादन्तरङ्गः षसो बहिरङ्गेन वसेन बाध्यो यथा स्यात् । उत्तरपदार्थप्रधानत्वं षसस्याभिधानवशात् ॥

इपा च प्राप्तापन्ने ॥ २० ॥

इबन्तेन सह प्राप्तापन्ने शब्दरूपे षसो भवति । प्राप्तो जीविकां प्राप्तजीविकः । आपन्नो जीविकामापन्नजीविकः । स्त्रीगोर्नीच इति प्रादेशः । चकारः किमर्थः । आकारादेशसमुच्चयार्थः । प्राप्ता जीविकां प्राप्ताजीविका । आपन्नो जीविकामापन्नाजीविका । प्रपञ्चार्थमिदं सूत्रम् । वसेनाप्येतत् सिध्यति । यदा कर्मणि क्तस्तदा प्राप्ता जीविका येनेति विग्रहो यदा कर्तरि तदा प्राप्ता जीविका यं पुरुषमिति ॥

इप्तच्छ्रितातीतपतितगतात्यस्तैः ॥ २१ ॥

तच्छब्देन प्राप्तापन्नयोर्ग्रहणम् । इबन्तं श्रित अतीत पतित गत अत्यस्त इत्येतैश्च सह षसो भवति । जीविकां प्राप्तो जीविकाप्राप्तः । सुखापन्नः । धर्मश्रितः । संसारमतीतः । संसारातीतः । नरकं पतितो नरकपतितः । मोक्षं गतो मोक्षगतः । तुहिनमत्यस्तस्तुहिनात्यस्तः । इबितिपदं सूत्रे वानिर्दिष्टे चोक्तं न्यगिति न्यक्संज्ञं

॥ श्रीः ॥

ॐ नमः परमात्मने ।

श्रीचक्रपाणिदत्तकृतस्य

प्रौढमनोरमाखण्डनग्रन्थस्य

प्रस्तावः ।

महर्षिपाणिनिकृतसूत्रपाठाध्याय्यास्तथा तद्व्याख्यानस्य महर्षिपतञ्जलिकृतमहाभाष्यस्य एवं कौणिन्यवृत्तेः काशिकावृत्तेः भोजराजकृतसरस्वतीकण्ठाभरणाभिधवृत्तेरपि क्रममनादृत्य कैयटहरदत्ताद्याचार्याणां मतं च क्वचिद्विखण्ड्य सिद्धान्तकौमुदीं तद्व्याख्यां च श्रीभट्टोजिदीक्षिताः प्रणीतवन्त इति नैव तिरोहितमस्ति विदुषाम्। किन्तु

"अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृतः ।
तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः"(१) ॥

इति किंवदन्ती दुर्गसिंहोक्तामवलम्ब्य श्रीचक्रपाणिदत्तेन प्रौढमनोरमाग्रन्थस्य खण्डनं कृतम्। एवं पण्डितसम्राड्जगन्नाथेनापि प्रौढमनोरमाकुचमर्दनाख्यं खण्डनं कृतमित्युभयोरन्वेषणे कृते मयैकं चक्रपाणिदत्तकृतप्रौढमनोरमाखण्डनपुस्तकं वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालये वर्तमानं विक्रमीय१८५९संवत्सरे लिखितमन-

(१) तिमिङ्गिलो मत्स्यभेद इति अमरकोशे। राघवो मत्स्यभेदेऽपीति कोशः।

लिखुइं समधिगतं मुद्रणद्वारा तत्प्रकाशने प्रवृत्तम्। अस्य ग्रन्थस्य स-मालोचने कृते भट्टोजिदीक्षितपौत्रेण कृते शब्दरत्नग्रन्थे तद्व्याख्याने बालभट्टापरनामधेयवैद्यनाथभट्टपायगुण्डेकृते भावप्रकाशे च "इति खण्डनकारोक्तमपास्त"मित्यादि(१)दर्शनान्माननीयत्वेनास्मिन् ग्रन्थे महासमादरः सञ्जात इति काशीविद्यासुधानिधिनामके ऽस्मिन् मासिकपत्रे प्रकाशितः सन्नचिरेणैव सर्वेषां सुलभो भवेदित्येतदर्थाय मुद्रयितुमारब्धोऽधिकं तु समाप्ते मुद्रणे निरूपयिष्यामीति शिवम् ॥

---

(१) दीर्घेत्युपलक्षणं यणोऽपि प्रत्यासत्त्या ऋन्निमित्तकार्यमात्रस्य तेन वारणात्। अत एवाह गुणेति। ऋतो ङीस्यनेनेति भावः। यत्तु गुणे तस्य स्थानिवत्त्वेन दीर्घो न यणिति जगन्नाथादिस्तन्न तथा सति बाधकस्य जागरूकत्वात् पूर्वस्यैव स्थानिवत्त्वाच्च। एतेन गुणोत्तरमपीत्यादिखण्डनकृदादुक्तिरपास्ता। वार्तिकस्य साधारणत्वादाह। भाष्ये चेति। सर्वत्रेत्युक्त्या तस्य प्रकृतिभावपरत्वेनावङ्परत्वमिति खण्डनकृदुक्तिः परास्ता। खण्डनकारोक्तिं खण्डयितुमाह। तस्येति। चाक्रवर्मणस्येत्यर्थः। अनुसर्तव्यत्वादितीति। एतेन नलोपं प्रति नुटोऽसिद्धत्वान्नुट् स्यादिति मूलोक्तं चिन्त्यमिति खण्डनकारोक्तमपास्तम्। यत्तु प्रत्ययान्तपर्युदासे कार्ये सुब्लोपनिमित्तप्रत्ययलक्षणं नेत्यत्रेदं मानं विशेषापेक्षत्वात् एवंचाहनित्यत्र तिङ्लोपनिमित्तप्रत्ययलक्षणस्य तत्र कार्ये दुर्वारत्वेनाधातुरिति न कार्यमिति खण्डनकृत्। तत् खण्डयति। नचेति। ज्ञापकमिति ॥

बनारस
गवर्नमेण्टसंस्कृतकालेज
पुस्तकालये
१७ फरवरी १९११ ई०। } विन्ध्येश्वरीप्रसादद्विवेदी

ॐ नमः परमात्मने ।

भट्टोजिदीक्षितकृत—

सिद्धान्तकौमुद्या व्याख्यानस्य प्रौढमनोरमाग्रन्थस्य खण्डनम् ।

श्रीचक्रपाणिदत्तविरचितम् ।

विरोधिनां तिरोभावभव्यो यद्भारतीभरः ।
वटेश्वरं गुरुं शेषवंशोत्तंसं भजामि तम् ॥ १ ॥
दारितरिपुवचोजं सच्चक्रपाणिर्नरहरिं नत्वा ।
विद्वन्मण्डलहृद्यं तत्परमतखण्डनं तनुते ॥ २ ॥

हयवरट् ।

हद्वयोपदेशोऽडिणोः शल्वलोश्च हकारग्रहणार्थः । यत्तु हयवरट्सूत्रे हकारोपदेशप्रयोजनमडादौ तद्ग्रहणमित्युक्त्वा हल्सूत्रमुपादाय एतत्सूत्रप्रयोजनं शलादौ ग्रहणम् । तेनाधुक्षदित्यादि सिध्यतीत्युक्तम् । तत्र प्रथमं हकारोपदेशप्रयोजनमुत्तरत्र सूत्रप्रयोजनमिति भेदेन ग्रहणे किं बीजम् । न तावदाद्ये हका-

रानुपादानेऽपि यादिग्रहणाय सूत्रमावश्यकमिति ह-कारोक्तिः। अन्त्ये तु हकारानुपादाने वलादयः प्रत्याहारा रेफेणैव ग्राह्या इति लकारोऽपि नोपादेय इति सूत्रोपादानमिति। तथा सति रेफात् पूर्वं होपदेशे रेफेण च वलादिग्रहणे रुदिहीत्यादिसिद्धौ लकारोपादानप्रयोजनानुक्तेर्न्यूनतेति चिन्त्यम्। किन्तर्हि चरमलकारोपादाने प्रयोजनमिति चेत्। हरिर्ह्हरिरित्यत्र खरवसानयोरिति विसर्जनीयस्य तस्य वा शरीति विसर्गविकल्पादेश्चाप्रवृत्तिः। एवं वाग्हरिरित्यादावपि चर्त्वाप्रवृत्तिः। रेफात् पूर्वं होपादाने तस्य खर्शरोर्ग्रहणादिति॥

हलन्त्यम्।

अत्र हल्प्रत्याहारसिद्धावनेन लस्येत्सञ्ज्ञा तत्सिद्धौ च हल्प्रत्याहारसिद्धिरित्यन्योन्याश्रय इति हलित्यावर्तत इत्याकरः। अत्र केचित्। स्यादेतत्। हलित्येकदेशस्य तन्त्रावृत्त्येकशेषान्यतममस्तु हस्य ल इति च व्याख्यास्यते। सामीप्यं षष्ठ्यर्थः। यद्वा। मास्तु तन्त्रादि अस्तु समाहारद्वन्द्वः। हल् च ल् चेति। लकारस्य संयोगान्तलोप इति चेन्मैवम्। आद्ये समासस्य क्लिष्टत्वात्। न हि ब्राह्मणकम्बल इत्यादौ ब्राह्मणस-

मीपवर्त्यन्यदीयः कम्बलः प्रतीयते । न वा चित्रगुश-
ब्दाच्चित्रगवीनां समीपवर्ती इत्यादिः प्रतीयते । अत
एवानन्तरादिषु न समासोऽनभिधानादिति स्पष्टमा-
कारे । किम्बहुना ब्राह्मणस्य कम्बलश्चित्रा गौर्यस्येति
व्यस्तप्रयोगोऽपि तत्रानिष्टः । द्वितीयेऽपि संयोगान्त-
लोपो दुर्लभः । यणः प्रतिषेधारम्भात् । तत्प्रत्याख्या-
नपक्षेऽपि झलो झलीति झल्ग्रहणमपकृष्य झलः
संयोगान्तलोपविधानाच्च । किञ्च पदार्थबोधं विना
वाक्यार्थबोधासम्भवेन हल्प्रत्याहारसिद्धेः प्रागेतत्सूत्रा-
र्थाबोधे प्रसक्ते तदुद्धारार्थोऽयं यत्नः । अस्यां चावस्थायां
हल्शब्दार्थाप्रसिद्धौ द्वन्द्व एव दुर्लभः । सहविवक्षाया
ऽसम्भवात् । तस्मात्सूत्राद्वृत्तिरेव न्याय्येत्याहुः । तत्र सा-
मीप्यस्य षष्ठ्यर्थत्वे षष्ठीति च समासविधायके सति कः
क्लेश इति तावच्चिन्तनीयम् । न च सामीप्यस्य षष्ठ्याऽबो-
धात्तत्र षष्ठ्यभावः क्लेशः । गङ्गायास्तीरमित्यादौ षष्ठ्या
सामीप्यप्रतीतेः । समर्थसूत्रे च देवदत्तस्य गुरुपुत्त्र इत्यत्र
सापेक्षत्वात्समासाभावमाशङ्क्य प्रधानस्य पुत्त्रस्य देवद-
त्तसम्बन्धसापेक्षत्वं न तु गुरोरित्युत्तरिते बाधकत्वेनोप-
न्यस्तस्य तथा सति गुरुपुत्त्रो देवदत्तस्य किञ्चिदिति
बुध्येतेति भाष्यस्य कैयटेन सामीप्यादेरपि प्रतिपत्तिप्र-
सङ्ग इति व्याख्यानात् । षष्ठी स्थानेयोगेति सूत्रे ऽस्तेर्भूरस्तेः

स्यात्। ऽनन्तरे समीपे इति सामीप्यस्यापि षष्ठ्यर्थत्वेन भाष्योदाहरणाच्च । एतेन व्यस्तप्रयोगस्यानिष्टत्वं प्रत्युक्तम् । कथं तर्हि ब्राह्मणस्य कम्बल इत्यादौ न ब्राह्मणसमीपवर्त्यन्यदीयकम्बलप्रतीतिः । तत्र तात्पर्यज्ञानाभावात् । सति च तस्मिन्निष्टापत्तेः । न च सामीप्यषष्ठ्या समासाभावोऽनन्तरादिषु समासाभावस्याकरसिद्धत्वादिति क्लेश इति वाच्यम् । अनन्तरादिषु बहुव्रीहेरेवानभिधानेनाभावात् । एतच्चतस्य लोप इति सूत्रे कैयटे मतुप्सूत्रे च भाष्ये स्पष्टम् । अत एव गङ्गातीरमिति षष्ठीसमासप्रयोगः सर्वजनसिद्धः । यच्च संयोगान्तलोपो दुर्लभ इति । तन्न यणः प्रतिषेधारम्भात् । न वा झलो लोपात् । बहिरङ्गलक्षणत्वादिति लाघवोपष्टम्भस्य बहिरङ्गपक्षस्य च परमुपन्यासेन प्राबल्यानुमानात् । प्रकृते च बहिरङ्गत्वाभावात् संयोगान्तलोपे बाधकाभावात् । अत एवात्र सूत्रे लकारश्चेति वक्तव्यमिति न विभक्तौ सूत्रस्थं च लुप्तनिर्दिष्टो यकार इति भाष्यं कैयटेन संयोगान्तलोपपरत्वेन व्याख्यातम् । अत एव उरण्सूत्रे अणग्रहणप्रयोजनकथनावसरे आनङोऽपि रपरत्वं स्यादित्यर्थकं होतापोतारावितिभाष्यमुपादाय रेफस्य संयोगान्तलोपे कृते तस्यासिद्धत्वान्नलोपो न स्यादिति कैयटः सङ्गच्छते । अत एव कर्मवत्सूत्रे व्यत्ययो बहुलं

लिङ्याशिष्यङिति अकारेखपञ्च द्वितीयलकारं प्रश्लिष्य तस्य संयोगान्तलोप इत्युक्तं सङ्गच्छते। यदपि द्वन्द्वो दुर्लभः सहविवक्षाया असम्भवादिति। तत्रेदमालोचनीयम्। पाणिनिना स्वसङ्केतितानामणादिशब्दानां सङ्केतलघुनोपायेन बोद्धारः प्रतिपद्यन्तामित्यादिरन्त्येनेति सूत्रं प्रणीतम्। तत्रानेन सूत्रेण लस्येत्संज्ञायां हल्पदसङ्केतग्रहस्तस्मिंश्च सति अनेनेत्संज्ञाग्रह इति बोद्धॄन् प्रति अन्योन्याश्रयो न वक्तारं प्रति विवक्षा च वक्तुः सा चास्मात् पदादमुमर्थमयं जानात्वितीच्छा तथा चादिरन्त्येनेति सूत्रव्यापारात् प्रागपि हल्पदसङ्केतविषयानर्थान् पाणिनिर्जानात्येवेति कथं सह विवक्षाया असम्भवः। न चैवमपि द्वन्द्वघटकहल्पदार्थज्ञानाभावाद् द्वन्द्वार्थज्ञानाभावे द्वन्द्वार्थशाब्दबोधोऽपि कथं बोद्धॄणामिति वाच्यम्। तथापि सहविवक्षासम्भवस्यानुपपादनात्। द्वन्द्वघटकहल्पदार्थज्ञानात् पूर्वं लकारेत्संज्ञाने हल्पदार्थप्रसिद्धौ क्रमेण द्वन्द्वार्थबोधसंभवाच्च। न हि समासघटकैकपदार्थाज्ञाने तद्घटकपदार्थान्तरस्यापि न शाब्दबोध इति नियमः। मुखनयनं पश्येत्युक्तौ मुखपदार्थमजानतोऽपि नयनं पश्येति प्रतितेरानुभविकत्वात्। न च सह विवक्षायां द्वन्द्वविधानात् सहितबोधस्यैव वक्तृतात्पर्यविषयत्वेन कथं

केवललकारबोधः पूर्वमिति वाच्यम् । शाब्द-सामान्ये तात्पर्यज्ञानस्याकारणत्वेन तद्विषयेऽपि केवललकारबोधे बाधकाभावात् । कारणत्वेऽप्येकदेश-तात्पर्यज्ञानात् प्रथमबोधेन हल्पदार्थप्रसिद्धौ चरमं तात्पर्यविषयबोधसम्भवात् । न हि यादृशं वक्तुस्तात्पर्यं तादृशतात्पर्यबोधमादायैव दोषपरिहार इति नियमः । अत एव हल्प्रत्याहारसिद्धेः प्राक् संयोगसञ्ज्ञाया असिद्धौ कथं संयोगान्तलोप इत्याशङ्कायां हलोऽनन्तरा इति सूत्रे हल्प्रत्याहारसिद्धेः प्रागनन्तरा हकारलकाराः संयोग इति वाक्यार्थबोधानन्तरं लकारपदस्य संयोगसञ्ज्ञायां तदन्तलोपेन लकारस्येत्सञ्ज्ञायां हल्प्रत्याहारसिद्धौ वास्तवार्थबोध इति कैश्चित् समाहितम् । आशङ्का चेयमतिस्थूलदृशः । न हि संयोगान्तलोपलक्षणानुसन्धानाभावे लुप्तलकारार्थतदनुकार्यलकारानुसन्धानं न सम्भवति । लौकिकव्युत्पत्त्यैव तत्संभवात् । अन्यथा क्विब्लोपलक्षणमजानतोऽग्निचिदित्यतः क्विबर्थबोधो न स्यात् । कथमन्यथा सुब्प्रत्याहारसापेक्षलक्षणविहितो द्वन्द्वो हल्पदादृत्तिपक्षे षष्ठीतत्पुरुषस्य तव मते सङ्गच्छेत । प्रकृते लकारबोधपूर्वकद्वन्द्वार्थबोधतात्पर्यकल्पने बाधकाभावाच्चेत्यलम् । एवञ्चान्योन्याश्रयपरिहाराय हलन्त्यमिति सूत्रमावर्त्य वाक्यद्वयं प्रकल्प्य हल्सूत्रे-

ऽन्त्यमित्यर्थकेनैकेन वाक्येन लकारेत्सञ्ज्ञायां हल्स-ञ्ज्ञासिद्धौ द्वितीयं वाक्यं णकारादीनामित्सञ्ज्ञार्थमिति तेषामुक्तिर्गौरवपराहतेति प्रक्रियाकौमुदीप्रकाश एव स्फुटमिति ॥

उपदेशे ।

उपदेश इति करणे बाहुलकाल्ल्युडभावे घञि ति भाष्यकारादयः । अद्योच्चारणमुपदेशः । भावे घञ् । भाष्यादिषु करणे घञिति तु प्रौढि-वाद इति केचित् । तन्न । भाष्यकारैः करणघ-ञन्तस्योपदेशशब्दस्य लोकेऽपि साधुत्वस्वीकारात् । तदनुरोधेन करणे घञोऽवश्यस्वीकर्तव्यत्वात् । न च सौत्रस्यैवोपदेशशब्दस्य साधुत्वं भाष्यसम्मतं न तु लौकिकस्यापीति वाच्यम् । तथा सति सौत्रत्वेन परि-हारसम्भवे कृत्यल्युटो बहुलमिति बाहुलकस्वीकारा-नुपपत्तेः । सर्वार्थत्वे बाहुलकस्य सम्भवति सौत्रमात्रविष-यकत्वेन सङ्कोचे मानाभावाच्च । अत एव एओङ्सूत्रे सन्ध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणमिति वार्त्तिके उपदेशशब्द उपदेशप्रयोजने करणव्युत्पत्त्या प्रयुक्तः । कौस्तुभे स्वयं व्याख्यातमेति । यत्तु प्रक्रियन्ते शब्दा याभिरिति करणव्युत्पत्तिः पराहता । परत्वेन ल्युटा

शप्रत्ययस्य बाधादिति तन्न । बाहुलकेन ल्युडभावेन करणेऽपि प्रक्रियेति रूपसिद्धिः । न चात्र बाहुलकस्वीकारे मानाभावः । कृञः श चेति सूत्रे हरदत्तेन यदा भावकर्मणोः शस्तदा सार्वधातुके यक् रिङ्शयग्लिङ्क्ष्विति रिङादेशः । अन्यत्र श एव परतो रिङादेश इत्यभिधानात् करणे शस्य स्वीकारात् । न च भावे अकर्तरि च कारके इत्यनुवृत्त्या कृञः श चेति सूत्रेण सिद्धस्य करणाधिकरणयोर्ल्युटा बाधेऽपि संप्रदानापादानयोर्हरदत्तोक्तिविषयत्वमिति वाच्यम् । भीमादयोऽपादान इति सूत्रे ताभ्यामन्यत्रोणादय इति पर्युदासे प्राप्त इति काशिकोक्ते भीमादिगणपठितवृष्टिप्रस्कन्दनादेरपि क्तिन्नादेः पर्युदासः प्राप्त इत्यवगम्यते । तेन ताभ्यामन्यत्रेत्यत्र उणादिशब्देन तार्तीयकतृतीयचतुर्थचरणोक्तप्रत्यया गृह्यन्ते न तु पञ्चपाद्युक्ता एवेत्यवगमात्तृतीयचरणोक्तस्यासंप्रदानापादानयोरप्राप्तेरिति । न च कृत्यल्युट इति सूत्रे कृत्यस्थाने कृद्ग्रहणस्य वार्तिककृतोक्तेर्बाहुलकात् संप्रदानादावेव शः कुतो नेति वाच्यम् । सौत्रस्य कृत्यल्युटमात्रविषयकबाहुलकस्य प्रथमोपस्थितेस्तमादाय ल्युडभावस्यैव करणे स्वीकर्तुमुचितत्वात् । विनिगमकाभावेनाप्युक्तरीत्या करणे शस्योचितत्वाच्च । यत्तु यत्तु धातुसूत्रेत्यादि पठन्ति यच्च

संस्कृतपुस्तकानां सूचीपत्रम् । मूल्य

CONTENTS.

All Communications, remittances etc., etc.

To be Addressed to :—

THE MANAGER,

E. J. LAZARUS & Co.,

MEDICAL HALL PRESS, BENARES CANT.

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 4] April 1910. [VOL. XXXII

BENARES:

PRINTED BY A. C. CHAKRAVARTY AT THE MAHAMANDAL SHASTRA PRAKASAK SAMITI PRESS,

AND

PUBLISHED BY ALOPI PRASAD FOR E. J. LAZARUS & CO., BENARES CANT.

Price Rs. 9 per annum.

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कररिमः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्त्रम् ।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता ते·श्रीरामशास्त्रिणा संशोधिता	१।)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधित	।=)
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम, श्रीराजशेखरप्रणीतम्	=)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	५)
लघुकौमुदी, श्रीयुतडाक्तरबालनटेनाचार्य्येणेङ्ग्लण्डीयभाषायामनूदिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणेङ्ग्लण्डीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	३।)
श्रौतपदार्थनिर्वचनम्	४)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूरुशास्त्रि- संशोधिता	४)
काव्यप्रदीपः, पं· रामशास्त्रिभागवताचार्य्येण परिशोधितः	३॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्य्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	७॥)
श्रीभाष्यस्य प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं·श्रीराममिश्र- शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः	६॥)
श्रीभाष्यस्य प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा ..	८।)
श्रीभाष्यस्य तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा ..	४॥)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	३॥)

इको यणचि ॥ ६ । १ । ७७ ॥

इकः स्थाने यण् स्यादचि संहितायां विषये ॥ दध्यत्र । सुध्युपास्यः । मध्वरिः । धात्रंशः । लाकृतिः । स्थानत आन्तर्यादिकारादीनां यकारादयः ॥ इकः प्लुतपूर्वस्य सवर्णदीर्घबाधनार्थं यणादेशो वक्तव्यः ॥ * ॥ भो ३ इ इह । भो३ यिह ॥

एचो ऽयवायावः ॥ ६ । १ । ७८ ॥

एचः क्रमादय् अव् आय् आव् एते स्युरचि ॥ यवयोरुच्चारणसामर्थ्यादित्संज्ञालोपौ न । हरये । विष्णवे । नायकः । पावकः ॥

वान्तो यि प्रत्यये ॥ ६ । १ । ७९ ॥

यकारादौ प्रत्यये परे ओदौतोरवावौ स्तः ॥ गोर्विकारो गव्यम् । गोपयसोर्यत् । नावा तार्यं नाव्यम् ॥ नौवयोधर्मेत्यादिना यत् । वान्तः किम् । रैयति । यि किम् । गोभ्याम् । प्रत्यये किम् । गोयानम् ॥ गोयूतौ छन्दस्युपसंख्यानम् ॥ * ॥ आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । ऊतियूतीत्यादिना यूतिशब्दो निपातितः । छन्दसि किम् । गोयूतिः ॥ अध्वपरिमाणे च ॥ * ॥ गव्यूतिमध्वानं गतः । अन्यत्र गोयूतिः । वान्त इत्यत्र वकाराद्गो यूतावित्यत्र छकाराद्वा पूर्वभागे लोपो व्योर्वलीति लोपेन वकारः प्रश्लिष्यते । तेन श्रूयमाणवकारान्त आदेशः स्यात् । वकारो न लुप्यत इति यावत् ॥

धातोस्तन्निमित्तस्यैव । ६ । १ । ८० ॥

यादौ प्रत्यये परे धातोरेचश्चेद्वान्तादेशः स्यात्तर्हि तन्निमित्तस्यैव नान्यस्य ॥ लव्यम् । अवश्यलाव्यम् । धातोः किम् । प्रातिपदिकस्यैव नियमो मा भूत् । तथा सति गव्यमित्यत्र न

स्यात् । श्रायते इत्यत्र च स्यात् । तन्निमित्तस्य किम् । श्रायते । श्रायत । एवकार इष्टतोऽवधारणार्थः । अन्यथा बाभ्रव्यो व्याकुप्येत ॥

क्षय्यजय्यौ शक्यार्थे । ६ । १ । ८१ ॥

यान्तादेशनिपातनार्थमिदम् । क्षेतुं शक्यं क्षय्यम् । जेतुं शक्यं जय्यम् । शक्यार्थे किम् । क्षेतुं योग्यं क्षेयं पापम् । जेतुं योग्यं जेयं मनः ॥

क्रय्यस्तदर्थे । ६ । १ । ८२ ॥

तस्मै प्रकृत्यर्थायेदं तदर्थम् । क्रेतारः क्रीणीयुरिति बुद्ध्या आपणे प्रसारितं क्रय्यम् । क्रेयमन्यत् । क्रयणार्हमित्यर्थः ॥

भय्यप्रवय्ये च छन्दसि । ६ । १ । ८३ ॥

बिभेत्यस्मादिति भय्यः । वेतेः प्रवय्या स्त्रियामेव निपातनम् । प्रवेयमन्यत्र । छन्दसि किम् । भेयम् । प्रवेयम् ॥ ह्रदय्या आप उपसंख्यानम् ॥ * ॥ ह्रदे भवा ह्रदय्या आपः । भवे छन्दसीति यत् । अकारस्यायादेशः ॥

एकः पूर्वपरयोः । ६ । १ । ८४ ॥

अधिकारोऽयम् । ख्यत्यात् परस्येति प्रागेतस्मात् सूत्रात् । इत उत्तरं यद्वक्ष्यामस्तत्र पूर्वस्य परस्य च द्वयोरपि स्थाने एक एवादेशो भवतीत्येवं तद्वेदितव्यम् । वक्ष्यत्यादुगुण इति । तत्रापि पूर्वस्यावर्णाच्च परस्य स्थाने एको गुणो भवति । गङ्गेशः । पूर्वपरग्रहणं द्वयोरपि युगपदादेशप्रतिपत्त्यर्थम् । अन्यथैकस्यैव स्यात् । न ह्युभे सप्तमीपञ्चम्यौ युगपत् प्रकल्पिके भवतः । एकग्रहणं पृथगादेशनिवृत्त्यर्थम् । अन्यथा स्थानिभेदाद्भिन्नादिषु नत्ववद् द्वावादेशौ स्याताम् ।

अन्तादिवच्च । ६ । १ । ८५ ॥

योऽयमेकादेशः स पूर्वस्यान्तवत् परस्यादिवत् स्यात् ॥ क्षीरपेया। अचैकाजुत्तरपदत्वमन्तवद्भावेन। वृक्षौ। अचादिवद्भावात् सुप्त्वम्। वर्णाश्रये विधावन्तादिवद्भावो न भवति । षत्वतुकोरसिद्धवचनात् । तेन खट्वाभिरित्यत्रैस् न । तपरकरणं कीलालपाभिरित्यत्र कृतार्थम् । जुहाव इत्यत्र आत औ णल इति च न । उभयत आश्रये नान्तादिवत् । पूर्वं प्रत्यन्तवत्वे परम्प्रत्यादिवत्वे चैकस्योभयापेक्षया पारतन्त्र्यविरोधात् । तेनाभीयादित्यत्रैतेर्लिङीति ह्रस्वत्वमुपसर्गात् परस्य विधीयमानं न । प्राच्छंतीत्यादौ रेफस्यान्तवद्भावेन पदान्तस्य न विसर्गः । उभयथर्क्षु कर्तरि चर्षिदेवतयोरित्यादिनिर्देशात् ॥

षत्वतुकोरसिद्धः । ६ । १ । ८६ ॥

षत्वे तुकि च कर्तव्ये एकादेशशास्त्रमसिद्धं स्यात् ॥ कोऽसिचत् । कोऽस्य । अधीत्य । प्रेत्य ॥ पदान्तपदाद्योरेकादेशोऽसिद्धो भवतीति वक्तव्यम् ॥ * ॥ शक्रहूषु । उषा । वसेः क्विपि संप्रसारणम् । वृक्षे च्छत्रम् । दीर्घात् पदान्ताद्वेति वैकल्पिकस्तुग्न । किमर्थं षत्वतुकोरादेशस्यासिद्धत्वमुच्यते । यावता द्विपदाश्रयत्वाद्बहिरङ्गत्वादेवैकादेशस्यासिद्धत्वं सिद्धम् । एवं तर्हि ज्ञापनार्थम् । एतज्ज्ञापयत्यचोरानन्तर्ये बहिरङ्गस्यापि नासिद्धत्व भवति । तेनाक्षद्यूरित्यत्रोठोऽसिद्धत्वाभावाद्यणादेश उपपन्नो भवति ॥

आद् गुणः । ६ । १ । ८७ ॥

अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात् संहितायां विषये ॥ रमेशः । गङ्गोदकम् । कृष्णर्द्धिः । तवल्कारः ।

वृद्धिरेचि । ६ । १ । ८८ ॥

आदेचि परे वृद्धिरेकादेशः स्यात् ॥ गुणापवादः । कृष्णैकत्वम् । गङ्गौघः । देवैश्वर्यम् । कृष्णौत्कण्ठ्यम् ॥

एत्येधत्यूठ्सु । ६ । १ । ८९ ॥

अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः ॥ पररूपगुणापवादः । उपैति । उपैधते । प्रष्ठौहः । एजाद्योः किम् । उपेतः । मा भवान् प्रेदिधत् । पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरानिति न्यायेनेयं वृद्धिरेङि पररूपस्यैव बाधिका न त्वोमाङोश्चेत्यस्य । तेनावैहीति वृद्धिरसाधुरेव ॥ अक्षादूहिन्यामुपसंख्यानम् ॥ * ॥ अक्षौहिणी सेना ॥ स्वादीरेरिणोः ॥ * ॥ स्वैरः । स्वेनेरितुं शीलमस्येति स्वैरी । स्वैरिणी ॥ प्रादूहोढोढ्येषैष्येषु ॥ * ॥ प्रौहः । प्रौढः । अर्थवद्ग्रहणेनानर्थकस्य ग्रहणम् । व्रश्चेति सूत्रे राजेः पृथग्भ्राजिग्रहणात् । तेनोढग्रहणे क्तान्तमेव गृह्यते न तु क्तवत्वन्तस्यैकदेशः ॥ प्रौढवान् । प्रौढिः । इष इच्छायां तुदादिः । इष गतौ दिवादिः । इष आभीक्ष्ण्ये क्र्यादिः । एषां घञि ण्यति च एष एष्य इति रूपे । तत्र पररूपे प्राप्ते ऽनेन वृद्धिः । प्रैषः । प्रैष्यः । यस्तु ईष उञ्छे । यश्च ईष गतिहिंसादर्शनेषु । तयोर्दीर्घोपधत्वादीष ईष्यस्तत्राद्गुणेन प्रेषः । प्रेष्यः ॥ ऋते च तृतीयासमासे ॥ * ॥ सुखेन ऋतः सुखार्तः । तृतीयेति किम् । परमर्तः ॥ प्रवत्सतरकम्बलवसनार्णदशानामृणे ॥ * ॥ प्रार्णम् । वत्सतरार्णमित्यादि । ऋणस्यापनयनाय यदन्यदृणं क्रियते तदृणार्णम् । दशार्णो देशः । नदी च दशार्णा । ऋणशब्दो दुर्गभूमौ जले च ॥

आटश्च । ६ । १ । ९० ॥

आटोऽचि परे वृद्धिरेकादेशः स्यात् ॥ ऐचत । औक्षीत् । औब्जीत् ॥

उपसर्गादृति धातौ । ६ । १ । ९१ ॥

अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात् ॥ उपार्छति । प्रार्छति । उपसर्गात् किम् । खट्वर्छति । प्रगत ऋच्छकः प्रर्छकः । ऋति किम् । उपेतः । उपसर्गेणैव धातोरा-क्षेपे सिद्धे धाताविति योगविभागेन पुनर्वृद्धिविधानार्थम् । तेन ऋत्यक इति पाक्षिकोऽपि प्रकृतिभावोऽत्र न भवति ॥

वा सुप्यापिशलेः । ६ । १ । ९२ ॥

अवर्णान्तादुपसर्गादृकारादौ सुब्धातौ परे वृद्धिर्वा स्यात् ॥ आपिशलिग्रहणं पूजार्थम् । प्रार्षभीयति । प्रर्षभीयति । साव-र्ण्याल्लृवर्णस्य ग्रहणम् । प्राल्कारीयति । प्रल्कारीयति । तपरत्वा-द्दीर्घे न । उप ॠकारीयति । उपर्कारीयति ॥

औतोऽम्शसोः । ६ । १ । ९३ ॥

आ ओत इति च्छेदः । ओकारादम्शसोरचि परे आकार एकादेशः स्यात् ॥ गाम् । गाः । द्याम् । द्याः । उः शम्भुः स्मृतो येन तं स्मृताम् । स्मृताः । शसा साहचर्यात् सुबेवाम् गृह्यते । तेनेह न । असुनवम् । अचिनवम् ॥

एङि पररूपम् । ६ । १ । ९४ ॥

आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात् ॥ प्रेजते । उपोषति । इह वासुपीत्यनुवर्त्य वाक्यभेदेन व्याख्येयम् । तेन एङादौ सुब्धातौ वा । उपेडकीयति । उपैडकीयति । प्रोघी-यति । प्रौघीयति ॥ एवे चानियोगे ॥ * ॥ नियोगोऽवधारणम् । क्वेव भोक्ष्यसे । अनवक्लृप्तावेव शब्दः । अनियोगे किम् । तवैव ।

शकन्ध्वादिषु पररूपं वाच्यम् ॥ * ॥ तच्च टेः । शकन्धुः । कर्कन्धुः । कुलटा । सीमन्तः केशवेशे । सीमान्तोऽन्यः । मनीषा । हलीषा ॥ लाङ्गलीषा । पतञ्जलिः । सारङ्गः पशुपक्षिणोः । साराङ्गोऽन्यः । आकृतिगणोऽयम् । मार्तण्डः ॥ ओत्वोष्ठयोः समासे वा ॥ * ॥ स्थूलोतुः । स्थूलौतुः । विम्बोष्ठः । विम्बौष्ठः । समासे किम् । तवौष्ठः ॥ एमन्नादिषु च्छन्दसि ॥ * ॥ अपां त्वा एमन् । अपां त्वेमन् । अपां त्वोद्मन् । अपां त्वा ओद्मन् ॥

ओमाङोश्च । ६ । १ । ९५ ॥

अवर्णादोमि आङि च परे पररूपमेकादेशः स्यात् ॥ शिवायोन्नमः । शिव एहि शिवेहि । आ ऋश्यात् अर्श्यात् । अद्यर्श्यात् । प्रतिपदविधेर्बलवत्वात् परोऽपि सवर्णदीर्घो बाध्यते ॥ उस्योमाङ्क्वाटः प्रतिषेधः ॥ * ॥ ओस्रीयत् । ओङ्कारीयत् । ओढीयत् । अत्र यद्वक्तव्यं तत्तृतीये निरूपितम् ॥

उस्यपदान्तात् । ६ । १ । ९६ ॥

अपदान्तादवर्णादुसि पररूपमेकादेशः स्यात् ॥ भिन्द्युः । छिन्द्युः । अपदान्तात् किम् । का उस्रा कोस्रा । आत् किम् । चक्रुः ॥

अतो गुणे । ६ । १ । ९७ ॥

अपदान्तादकाराद्गुणे परतः पररूपमेकादेशः स्यात् ॥ पचन्ति । पचे । अतः किम् । यान्ति । गुणे किम् । अपचे । अपदान्तात् किम् । दण्डाग्रम् । रामा इत्यत्र तु परत्वात् पूर्वसवर्णदीर्घः । अतो गुण इति हि पुरस्तादपवादन्यायेनाकः सवर्णे इत्यस्यैवापवादो न तु प्रथमयोरित्यस्यापि ॥

अव्यक्तानुकरणस्यात इतौ । ६ । १ । ९८ ॥

ध्वनेरनुकरणस्य योऽच्छब्दस्तस्मादितौ परे पररूपमेकादेशः स्यात् ॥ पटत् इति पटिति । अव्यक्तानुकरणस्य किम् । जगज्जगदिति । अतः किम् । वटगिति । इतौ किम् । पटदत्र ॥ एकाचो न ॥ * ॥ अदिति । कथं पटदितीति । दान्तमेतत् ॥

नाम्रेडितस्यान्त्यस्य तु वा । ६ । १ । ९९ ॥

आम्रेडितस्य प्रागुक्तं न स्यादन्त्यस्य तु तकारमात्रस्य वा स्यात् ॥ पटत्पटेति । पटत्पटदिति । डाचि बहुलं द्वे भवत इति बहुलवचनाद् द्वित्वम् । समुदायानुकरणे तु भवत्येव पटत्पटिति ॥

नित्यमाम्रेडिते डाचि । ६ । १ । १०० ॥

डाज्परं यदाम्रेडितं तस्मिन् परे पूर्वपरयोर्वर्णयोः पररूपं स्यात् ॥ इति तकारपकारयोः पकारः । पटपटायति ॥

अकः सवर्णे दीर्घः । ६ । १ । १०१ ॥

अकः सवर्णेऽचि परे दीर्घरूप एकादेशः स्यात् ॥ दैत्यारिः । श्रीशः । विष्णूदयः । अचि किम् । कुमारी शेते । नाज्झलाविति निषेधस्तु न दीर्घशकारयोः । ग्रहणकशास्त्रस्य सावर्ण्यविधिनिषेधाभ्यां प्रागनिष्पत्तेः । अकः किम् । हरये । अकोऽकि दीर्घ इत्येव सुवचम् ॥ ऋति सवर्णे ऋ वा ॥ * ॥ होतृकारः । होतॄकारः ॥ लृति सवर्णे लृ वा ॥ * ॥ होतॢकारः । पक्षे ऋकारः सावर्ण्यात् । होतॄकारः । ऋति ऋ वा लृति लृ वेत्युभयत्रापि विधेयं वर्णद्वयं द्विमात्रम् । आद्यस्य मध्ये द्वौ रेफौ तयोरेका मात्रा । अभितोऽज्भक्तेरपरा । द्वितीयस्य तु मध्ये द्वौ लकारौ शेषं प्राग्वत् ।

इहोभयत्रापि ऋत्यक इति पाक्षिकोऽपि प्रकृतिभावो वक्ष्यते ॥

प्रथमयोः पूर्वसवर्णः । ६ । १ । १०२ ॥

प्रथमाशब्देन प्रथमाद्वितीयारूपसुब्विभक्त्योर्ग्रहणम् । अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः ॥ अग्नी । वायू । वृक्षाः । प्लक्षाः । वृक्षान् । प्लक्षान् । अचि किम् । वृक्षः । अकः किम् । गावौ । नावौ । पूर्वग्रहणं किम् । अग्नी इत्यत्र पक्षे परसवर्णो मा भूत् । दीर्घग्रहणं किम् । त्रिमात्रस्य स्थ निनस्त्रिमात्रो मा भूत् ॥

तस्माच्छसो नः पुंसि । ६ । १ । १०३ ॥

शस इत्यवयवषष्ठी । स चावयवः परत्वेन विशेष्यते । पूर्वसवर्णदीर्घात् परो यः शसः सकारस्तस्य नः स्यात् पुंसि ॥ वृक्षान् । अग्नीन् । वायून् । तस्मात् किम । एतान् गाः पश्य । शसः किम् । वृक्षाः । पुंसि किम् । नद्रीः ॥

नादिचि । ६ । १ । १०४ ॥

अवर्णादिचि परे न पूर्वसवर्णदीर्घः ॥ शिवोऽर्च्याः । वृक्षौ । खट्वे । आत् किम् । अग्नी । इचि किम् । वृक्षान् ॥

दीर्घाज्जसि च । ६ । १ । १०५ ॥

दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात् ॥ गौर्यौ । विश्वपाः । विश्वपौ ॥

वा छन्दसि । ६ । १ । १०६ ॥

दीर्घाज्जसि इचि च पूर्वसवर्णदीर्घो वा स्यात् ॥ मारुतीश्चतस्रः पिण्डीः । मारुत्यश्चतस्रः पिण्ड्यः । वाराही । वाराह्यौ । उत्तरसूत्रद्वयेऽपीदं वाक्यभेदेन सम्बध्यते । तेनामि पूर्वत्वं वा स्यात् ।

शर्मी च शम्यञ्च सूर्म्यं सुषिरामिव । सम्प्रसारणाच्चेति पूर्वरूपमपि वा । इज्यमानः । यज्यमानः ॥

अमि पूर्वः । ६ । १ । १०७ ॥

अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात् ॥ वृक्षम् । अग्निम् । पटुम् । पूर्वग्रहणं किम् । रामम् । गौरीम् । अत्र द्विमाचो मा भूत् ॥

सम्प्रसारणाच्च । ६ । १ । १०८ ॥

सम्प्रसारणादचि पूर्वरूपमेकादेशः स्यात् ॥ इष्टम् । उप्तम् । गृहीतम् । सुध्युपास्यः शक्रव्हर्थः शक्रव्हौ इत्यादौ तु न संप्रसारणपूर्वत्वे । समानाङ्गग्रहणमिति वार्तिकोक्तेः । संप्रसारणस्थानिकस्य हल इत्यारम्भसामर्थ्यात् संप्रसारणत्वेऽपि तत्स्थाने जातस्यातथात्वाच्च ॥

एङः पदान्तादति । ६ । १ । १०९ ॥

पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् ॥ हरेऽव । विष्णोऽव । एङः किम् । दध्यत्र । पदान्तात् किम् । भवति । अति किम् । वायवित । तपरे किम् । वायवायाहि ॥

ङसिङसोश्च । ६ । १ । ११० ॥

एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात् ॥ अग्नेर्वायोरागच्छति । अग्नेर्वायोः स्वम् ॥

ऋत उत् । ६ । १ । १११ ॥

ऋदन्तान्ङसिङसोरति परे उदेकादेशः स्यात् ॥ रपरत्वम् । रात् सस्येति सलोपः । रेफस्य विसर्गः । कर्तुः । भ्रातुः । गम्लृ शक्लृ अनयोरनुकरणे लपरत्वम् । संयोगान्तलोपः । गमुल् ।

शकुल् । ऋत इति तपरकरणं किम् । कृ तृ अनयोरनुकरणे प्रकृतिवदनुकरणमिति वैकल्पिकत्वादित्वाभावपक्षे कः । तः ॥

ख्यत्यात् परस्य । ६ । १ । ११२ ॥

खितिशब्दाभ्यां खीतीशब्दाभ्यां च कृतयणादेशाभ्यां परस्य ङसिङसोरत उत् स्यात् ॥ सख्युः । पत्युः । सखीयतेः सह खेन वर्तत इति सखस्तमिच्छतीति क्यच् । सखीयतेः सुखीयतेः सुतीयतेश्च क्विपि सख्युः । सुख्युः । सुत्युः । लूनीयतेः क्षामीयतेः प्रस्तीमीयतेश्च क्विबन्तान् ङसिङसोर्यणि नत्वमन्वयोरसिद्धत्वादुत्वम् । लून्युः । क्षाम्युः । प्रस्तीम्युः । विकृतनिर्देशः किम् । अतिसखेः । सेनापतेः । शुष्कीयतेः पक्वीयतेश्च क्विबन्तान् ङसिङसोः संयोगपूर्वत्वाद्यणभावे इयङि शुष्कियः । पक्वियः । परस्येति ग्रहणमेकः पूर्वपरयोरित्यधिकारनिवृत्त्यर्थम् ॥

अतो रोरप्लुतादप्लुते । ६ । १ । ११३ ॥

अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति ॥ भोभगो इति प्राप्तस्य यत्वस्यापवादः । उत्वं प्रति रुत्वस्यासिद्धत्वं तु न भवति । रुत्वमनूद्य उत्वविधेः सामर्थ्यात् ॥ शिवोऽर्च्यः । अतः किम् । अग्निरत्र । तपरः किम् । देवा अत्र । अति किम् । वृक्ष इह । तपरः किम् । श्व आगन्ता । अप्लुतात् किम् । एहि सुस्रोता३ अत्र स्नाहि । प्लुतस्यासिद्धत्वादतः परोऽयम् । अप्लुतादिति विशेषणे तु तत्सामर्थ्यान्नासिद्धत्वम् । तपरकरणस्य तु न सामर्थ्यं दीर्घनिवृत्त्या चरितार्थत्वात् । अप्लुते किम् । तिष्ठतु पय आ३ग्निदत्त । गुरोरनृत इति प्लुतः । रोरित्युकारानुबन्धग्रहणान्नेह । प्रातरत्र ॥

हशि च। ६। १। ११४॥

अप्लुतादतः परस्य रोरुः स्याद्धशि॥ शिवो वन्द्यः। उकारानुबन्धग्रहणान्नेह। भ्रातर्गच्छ॥

प्रकृत्याऽन्तःपादमव्यपरे। ६। १। ११५॥

पादशब्देन ऋक्पादस्यैव ग्रहणमिहेष्यते। ऋक्पादमध्यस्थ एङ् प्रकृत्या स्यादति न तु यकारवकारपरेऽति। सुजाते अश्वसूनृते। उप प्रयन्तो अध्वरम्। अन्तःपादं किम्। एता स एते ऽचैन्ति। अव्यपरे किम्। तेऽवदन्। तेऽयस्मयन्। एङ् किम्। प्रत्यगिनरुषसामग्रमख्यत्। केचिदिदं सूत्रं नान्तःपादमिति पठन्ति ते संहितायामिह यत् प्राप्तं तस्य सर्वस्य प्रतिषेधं वर्णयन्ति॥

अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च।६।१।११६॥

एषु व्यपरे ऽप्यति एङ् प्रकृत्या॥ वसुभिर्नो अव्यात्। मित्रमहो अवद्यात्। मा शिवासो अवक्रमुः। ते नो अव्रता। शतधारो अयं मणिः। ते नो अवन्तु। कुशिकासो अवस्यवः। यद्यपि बह्वृचैस्तेनोऽवन्तु रथतूः सोऽयमागात् तेऽरुणेभिरित्यादौ प्रकृतिभावो न क्रियते। तथापि बाहुलकात् समाधेयम्। प्रातिशाख्ये तु वाचनिक एवायमर्थः॥

यजुष्युरः। ६। १। ११७॥

उरःशब्द एङन्तोऽति प्रकृत्या यजुषि॥ उरो अन्तरिक्षम्। यजुषि पादाभावादनन्तःपादार्थं वचनम्॥

आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बे ऽम्बाले ऽम्बिकेपूर्वे। ६। १। ११८॥

आपो जुषाणो वृष्णो वर्षिष्ठ इत्येते शब्दा अम्बे अम्बालिके

इत्येतौ चाम्बिकेशब्दात् पूर्वौ यजुषि पठितौ । ते यजुषि अति प्रकृत्या ॥ आपो अस्मान्मातरः । जुषाणो अग्निराज्यस्य । वृष्णो अंशुभ्याम् । वर्षिष्ठे अधि नाके । अम्बे अम्बाले अम्बिके यजुषीदमीदृशमेव पठ्यते । अस्मादेव वचनादम्बार्थेति ह्रस्वो न ॥

अङ्ग इत्यादौ च । ६ । १ । ११९ ॥

अङ्गशब्दे एङ् तदादौ च अकारे य एङ्पूर्वः सोऽति प्रकृत्या यजुषि ॥ ऐन्द्रः प्राणो अङ्गे अङ्गे वृषो वृषः ॥

अनुदात्ते च कुधपरे । ६ । १ । १२० ॥

कवर्गधकारपरे ऽनुदात्ते ऽति परे एङ् प्रकृत्या यजुषि ॥ अयं सो अग्निः । अयं सो अध्वरः । अनुदात्ते किम् । अधो ऽग्रे रुद्रे । ऋज्रेन्द्राग्रेत्यग्रशब्द आद्युदात्तो निपात्यते । कुधपरे किम् । सोऽयमग्निमन्तः ॥

अवपथासि च । ६ । १ । १२१ ॥

अनुदात्ते ऽकारादौ अवपथाः शब्दे परतो यजुषि एङ् प्रकृत्या ॥ त्रिरुद्रेभ्यो अवपथाः । वपेर्लङि थासि तिङ्ङतिङ इत्यनुदात्तत्वम् । अनुदात्ते किम् । यद्रुद्रेभ्योऽवपथाः । निपातैर्यद्यदीति निघातो न ॥

सर्वत्र विभाषा गोः । ६ । १ । १२२ ॥

लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः स्यात् पदान्ते ॥ गो अग्रम् । गोऽग्रम् । छन्दसि । अपशवो वा अन्ये गोअश्वेभ्यः । एङन्तस्य किम् । चित्रग्वग्रम् । प्रतिपदोक्तस्यैङो ग्रहणान्नेह । चित्रगोऽग्रम् । पदान्ते किम् । गोः ॥

अवङ् स्फोटायनस्य । ६ । १ । १२३ ॥

अतीति निवृत्तम्। अचि परे पदान्ते एङन्तस्य गोरवङ् वा स्यात्॥ गवाग्रम्। गवोग्रम्। पदान्ते किम्। गवि। व्यवस्थितविभाषया गवाक्षः। आद्युदात्तोऽयमादेशो निपात्यते। स च बहुव्रीहौ प्रकृतिस्वरविधाने एव भवति। गावो ऽग्रं यस्य गवाग्रमिति। अन्यत्र तु गवाक्ष इत्यादौ परत्वात् पूर्वं समासान्तोदात्तत्वे सत्यवङ्प्रसङ्ग इत्युपदेशिवद्भावात् पूर्वमवङि सति शिष्टं समासान्तोदात्तत्वं भवति। स्फोटायनग्रहणं पूजार्थम्॥

इन्द्रे च। ६। १। १२४॥

एङन्तस्य गोरवङ् स्यादिन्द्रे च। गवेन्द्रः॥ गवेन्द्रयज्ञः॥

प्लुतप्रगृह्या अचि नित्यम्। ६। १। १२५॥

प्लुताः प्रगृह्याश्चाचि परे नित्यं प्रकृत्या स्युः॥ एहि कृष्ण३ अत्र गौश्चरति। आश्रयादत्र प्लुतः सिद्धः। सुहरी एतौ। विष्णू इमौ। गङ्गे अमू। पचेते इमौ। अचीति वर्तमाने पुनरज्ग्रहणं प्रत्यासत्त्या यत्राचि अनयोः प्रकृतिभावस्तदज्निमित्तकार्यस्यैव तेनाभाव इत्यर्थम्। तेन जानु उ अस्य रुजति। जानू अस्येत्यादौ सवर्णदीर्घरूपसन्धिर्भवत्येव। नित्यमिति किम्। हरी एतावित्यादावप्येव प्रकृतिभावो यथा स्यादिकोऽसवर्णे इति ह्रस्वसमुच्चितो मा भूत्। मणीवोष्ट्रस्येति तु इवार्थे वशब्दो वाशब्दो वा बोध्यः॥

आङो ऽनुनासिकश्छन्दसि। ६। १। १२६॥

आङोऽचि परे संहितायामनुनासिकः स्यात् स च प्रकृत्या॥ अभ्र आँ अपः। गभीर आँ उग्रपुत्रे। इह बहुलमिति पठन्ति। तेनेह न। इन्द्रो बाहुभ्यामातरत्। आ अतरत्। आतरत्।

इको ऽसवर्णे शाकल्यस्य ह्रस्वश्च । ६ । १ । १२७ ॥

पदान्ता इकोऽसवर्णेऽचि परे प्रकृत्या स्युर्ह्रस्वश्च वा ॥ अत्र ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारो न कर्तव्य इति भाष्ये स्थितम् । चक्रि अत्र । चक्र्यत्र । इकः किम् । खट्वेन्द्रः । असवर्णे किम् । कुमारीन्द्रः । पदान्ता इति किम् । गौर्यौ । शाकल्यग्रहणं पूजार्थम् । आरम्भसामर्थ्यादेव हि यथादेशेन विकल्पः सिद्धः ॥ सिन्नित्यसमासयोः शाकलप्रतिषेधो वक्तव्यः ॥ * ॥ पार्श्वम् । कुमार्यर्थं व्याकरणम् । नित्यग्रहणेन नार्थः । सित्समासयोरित्येव । इदमपि सिद्धम् । वाप्यामश्वो वाप्यश्वः ॥ ईषाअक्षादिषु छन्दसि प्रकृतिभावमात्र वक्तव्यम् ॥ * ॥ ईषा अक्षो हिरण्ययः । ज्या इयम् । पूषा अविष्टुः ॥

ऋत्यकः । ६ । १ । १२८ ॥

ऋति परेऽकः प्राग्वत् ॥ ब्रह्म ऋषिः । ब्रह्मर्षिः । होतृ ऋकारः । अकः किम् । खट्वेन्द्रः । असवर्णे किम् । कुमारीन्द्रः । पदान्ता इत्येव । आर्च्छत् । ईषदसमाप्त ऋच्छको बहृच्छकः । समासेऽप्ययं प्रकृतिभावः । सप्त ऋषीणाम् । सप्तर्षीणाम् । सवर्णार्थमनिगर्थञ्चेदं वचनम् ॥

अप्लुतवदुपस्थिते । ६ । १ । १२९ ॥

उपस्थितोऽनार्ष इति शब्दस्तस्मिन् परे प्लुतोऽप्लुतवद्भवति ॥ अप्लुतकार्यं यणादिकं करोतीत्यर्थः । सुश्लोका३ इति सुश्लोकेति । वत् किम् । अप्लुत इत्युक्ते ऽप्लुत एव विधीयेत । तथा च प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात् । अग्नी३ इति ॥

ई चाक्रवर्मणस्य । ६ । १ । १३० ॥

ई प्लुतोऽचि परेऽप्लुतवद्वा ॥ चिनुही३ इदम् । चिनुहीदम् चिनुही३ इति । चिनुहीति । उभयत्र विभाषेयम् । ईग्रहणेन नार्थः । अविशेषेण चाक्रवर्मणस्याप्लुतवदित्येव । इदमपि सिद्धम् । वशा३ इयम् । वशेयम् ॥

दिव उत् । ६ । १ । १३१ ॥

दिवोऽन्तादेश उकारः स्यात् पदान्ते ॥ द्युकामः । द्युमान् । विमलद्यु नभः । द्युभ्याम् । सुद्युभ्याम् । निरनुबन्धकस्य प्रातिपदिकस्य ग्रहणान्नेह । अक्षद्यूभ्याम् । तपरत्वं तु च्छ्वोः शूडित्यत्र क्ङितीत्यननुवृत्तिपक्षे द्युभ्यामित्यादौ परत्वादूठि कृते ऽनेन ह्रस्व एव यथा स्यादान्तर्यतो दीर्घो मा भूदिति । भाव्यमानत्वादेव न भविष्यतीति चेत् । एवं तर्हि भाव्यमानोऽप्युकारः सवर्णान्न गृह्णातीत्यर्थज्ञापनार्थम् । तेनामूभ्यामित्यादौ दीर्घस्य दीर्घो भवति । क्ङितीत्यनुवृत्तिपक्षे तु तपरत्वसामर्थ्याद्धल इति दीर्घाभावार्थम् । पदान्ते किम् । दिवौ ॥

एतत्तदोः सुलोपोऽकोरनञ्समासे हलि । ६ । १ । १३२ ॥

अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद्धलि न तु नञ्समासे ॥ एष विष्णुः । स शम्भुः । अकोः किम् । एषको रुद्रः । अनञ्समासे किम् । असः शिवः । हलि किम् । एषोऽत्र ॥

स्यश्छन्दसि बहुलम् । ६ । १ । १३३ ॥

स्य इत्यस्य सो लोपः स्याद्धलि ॥ एष स्य भानुः । न च भवति । यत्र स्यो निपतेत् ॥

सोऽचि लोपे चेत् पादपूरणम् । ६ । १ । १३४ ॥

स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्यत ॥ सेमामविड्ढि प्रभृतिम् । इह ऋक्पाद एव गृह्यत इति वामनः । अविशेषाच्छ्लोकपादेऽपीत्यपरे । सैष दाशरथी रामः । लोपे चेदिति किम् । स इत्वेति । स एवमुक्ता । सत्येवेत्यवधारणं तु बहुलग्रहणानुवृत्त्या लभ्यते । तेनेह न । सोऽहमाजन्मशुद्धानाम् । बाहुलकादेव लोपं विना पादपूरणेऽपि क्वचिद्भवति । सास्मै अरंसः । अस्मै इति च्छेदः ।

सुट् कात् पूर्वः । ६ । १ । १३५ ॥

अधिकारोऽयम् । पारस्करप्रभृतीनि च संज्ञायामिति यावत् । वक्ष्यति सम्पर्युपेभ्य इत्यादि । संस्कृषीष्ट । समस्कृत । संस्क्रियते । संस्क्रियात् । कात्पूर्वग्रहणं सुटोऽभक्तत्वज्ञापनार्थम् । तेन संयोगादिलक्षणाविड्गुणौ न भवतः । टित्करणं सुट्स्तुस्वञ्जामिति विशेषणार्थम् ॥

[१]अडभ्यासव्यवायेऽपि । ६ । १ । १३६ ॥

सुट् कात् पूर्वः स्यात् ॥ समस्करोत् । सञ्चस्करतुः । ऋतश्च संयोगादेर्गुण इत्यत्र संयोगोपधग्रहणाद्गुणः । कात् पूर्व इत्यादि भाष्ये प्रत्याख्यातम् । तथाहि । पूर्वं धातुरुपसर्गेण युज्यते । एवं चान्तरङ्गत्वादेकोपसर्गनिमित्तः सुट् पूर्वम् । ततोऽट्द्वित्वे । एवं च ऋतश्च संयोगादेरित्येव गुणः । संयोगादिलक्षणाविड्गुणौ तु ऋतश्च संयोगादेरित्यत्र एकाच उपदेश इति सूत्रादुपदेश इत्यनुवर्त्य उपदेशे यः संयोगादिरिति व्याख्यानाद्गुणोऽर्तीति सूत्रे नित्यं छन्दसीति सूत्रान्नित्यमित्यनुवर्त्य नित्यं यः संयोगादिस्तस्येत्यर्थाच्च परिहर्तव्यौ ॥

१ इदं वार्तिकं सूत्रेषु प्रक्षिप्तम् ।

कामतस्तु यदा विप्रश्चण्डालीं यदि सेवते ।
चान्द्रायणेन शुध्येत प्राजापत्यद्वयेन च ॥

इति । चण्डाल्यादिगमनभोजनाद्यत्यन्तसंपर्के तु पातित्यमेव । तथा च मनुः ।

चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति ॥

इति । वाशब्दद्वयोपादानात्पुल्कस्यादिगमनेऽपि स्मृत्योक्तं प्रायश्चित्त मनुज्ञायते । तथा च संवर्तः ।

पुल्कसीगमनं कृत्वा कामतोऽकामतोऽपि वा ।
कृच्छ्रं चान्द्रायणं कुर्यात्ततो मुच्येत किल्बिषात् ॥
नटीं शैलूषकीं चैव रजकीं वेणुजीविनीम् ।
गत्वा चान्द्रायणं कुर्यात्तथा चर्मोपजीविनीम् ॥

आपस्तम्बोऽपि ।

म्लेच्छी नटी चर्मकारी रजकी बुरुडी तथा ।
एतासु गमनं कृत्वा चरेच्चान्द्रायणद्वयमिति ॥

शातातपः ।

कैवर्तीं रजकीं चैव वेणुचर्मोपजीविनीम् ।
प्राजापत्यविधानेन कृच्छ्रेणैकेन शुध्यति ॥
कापालिकस्त्रीगमने तु यमः ।
कापालिकान्नभोक्तॄणां तन्नारीगामिनां तथा ।
ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञानादैन्दवद्वयम् ॥
इति । रजस्वलागमने तु संवर्तः
रजस्वलां तु यो गच्छेद् गर्भिणीं पतितां तथा ।
तस्य पापविशुध्यर्थमतिकृच्छ्रो विशोधकम् ॥
तत्रैव दिनभेदेन विशेषश्चतुर्विंशतिमते ।
रजस्वलां द्विजो गत्वा पराकं तु समाचरेत् ।
सांतपनं द्वितीयेऽन्हि प्राजापत्यं परेऽहनीति ।

गर्भिण्यां विशेषमाहात्रिः ।
षण्मासान्कामयेन्मर्त्यो गर्भिणीं स्त्रियमेव हि ।
आदन्तजननादूर्ध्वमेवं धर्मो न हीयते ॥

इति । गर्भिणीं षण्मासानेव गच्छेचातः परम् । ऊर्ध्वं प्रसूतेरादन्तजननाद् बालस्य दन्तजननमारभ्य न प्रागित्यर्थः ।

क्षत्रियवैश्ययोस्तदाह ।

क्षत्रियो वाथवैश्यो वा चण्डालीं यदि गच्छतः ।
प्राजापत्यद्वयं कुर्याद्दद्याद्गोमिथुनद्वयम् ॥ ७ ॥

क्षत्रियो वैश्यो वा चण्डालीं श्वपाकीं वा गत्वा पर्षन्निदेशेन त्रिरात्रमुपोष्य सशिखं वपनं कृत्वा प्राजापत्यद्वयं चरित्वा गोमिथुनद्वयं गोद्वयं वृषभद्वयं च दक्षिणां दद्यात् ।

शूद्रस्य तदाह ॥

श्वपाकीं वाथ चण्डालीं शूद्रो वा यदि गच्छति ।
प्राजापत्यं चरेत्कृच्छ्रं चतुर्गोमिथुनं वहेत् ॥ ८ ॥

शूद्रः श्वपाकीं चण्डालीं वा गत्वा प्राजापत्यसंज्ञकमेकं पूर्वोक्तरीत्या चरित्वा चतुर्णां गोमिथुनानां समाहारश्चतुर्गोमिथुनं चतस्रो गाश्चतुरो वृषभांश्च दद्यात् ।

इदानीमज्ञानतो मात्रादिगमने प्रायश्चित्तमाह ।

मातरं यदि गच्छेत्तु भगिनीं स्वसुतां तथा ।
एतास्तु मोहितो गत्वा त्रीणि कृच्छ्राणि संचरेत् ॥ ९ ॥
चान्द्रायणत्रयं कुर्याच्छिश्नच्छेदेन शुध्यति ।

माता जननी अन्यासां पितृदारान्समारुह्येत्यत्र वक्ष्यमाणत्वात् । भगिन्येकोदरप्रसूता, स्वसुता सवर्णायां भार्यायां स्वस्मादुत्पन्ना, एतासामज्ञानतस्सकृद्गमने चरमधातुविसर्गपर्यन्ते व्यापारे शिश्नछेदादीनि त्रीण्यपि प्रायश्चित्तानि प्रातिलोम्यक्रमेण भवन्ति । तद्यथा । मातृगमने शिश्नछेदः । भगिनीगमने चान्द्रायणत्रयं स्वसुतागमने कृच्छ्रत्रयमिति ।

ननु

जनन्यां च भगिन्यां च स्वसुतायां तथैव च ।
स्नुषायां गमने चैव विज्ञेयमतिपातकमिति ॥

कात्यायनस्मरणादतिपातकत्वाविशेषे प्रायश्चित्तविशेषः किंनिबन्धन इति चेत् । सत्यम् । ब्रह्महत्यादीनां पञ्चानां गोवधादीनां पञ्चचत्वारिंशतां च महापातकत्वोपपातकत्वाविशेषे भवतां वा प्रायश्चित्ते विशेषः किंनिबंधनः ? वाचनिक इतिचेत् प्रकृतेऽपि दीयतां दृष्टिः । नचैवमतिपातकिनस्त्वते प्रविशेयुर्हुताशनमिति कात्यायनीयमेव प्रायश्चित्ततौल्यं नोपपद्यत इति वाच्यम् । तस्य जनन्यां कामतः सकृद्गमने भगिन्यादिषु चासकृद्गमने ज्ञेयत्वात् । शिश्नच्छेद इति शिश्नमात्रच्छेदो न वृषणच्छेदः । अत एव नारदः । माता मातृष्वसाश्वश्रूरित्याद्युपक्रम्य ।

आसामन्यतमां गच्छन् गुरुतल्पग उच्यते ।
शिश्नस्योत्कर्त्तनात्तत्र नान्यो दण्डो विधीयते ॥

इत्यभिहितवान् । दण्ड इति दमनार्थं शुध्यर्थं च । शिश्नमात्रच्छेदे च पाक्षिकं जीवनमपि संभवतीति नात्यन्तिकं मरणान्तमेवेदं प्रायश्चित्तमकामतः सकृद्गमने । तत्रैवाभ्यासे तु नित्यवन्मरणमेव ।

पितृभार्यां तु विज्ञाय सवर्णां योऽधिगच्छति ।
जननीं वाप्यविज्ञाय नामृतः शुद्धि माप्नुयादिति ॥

षट्त्रिंशन्मतोक्तं द्रष्टव्यम् । अपेराधिक्यार्थत्वात्तस्य चाभ्यासपर्यायत्वात् । कामतः सकृद्गमने तु ।

यः कामतो महापापं नरः कुर्यात्कथंचन ।
न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ॥

इत्यंगिरोविहितं भृग्वग्न्यन्यतरपतनं द्रष्टव्यम् । कथंचनशब्दस्य सकृदकामपर्यायस्य कामशब्दोपादानेन सकृत्वे परिशेषितत्वात् । कामतोऽभ्यासे त्वग्निपतनं निष्कालको घृताभ्यक्तो गोमयाग्निना पादप्रभृत्यात्मानमवदाहयेदिति वसिष्ठोक्तेतिकर्तव्यताकमनुसंधेयम् । नन्वकामकृते प्रायश्चित्तमभिधाय कामकृते तदनभिदधत आचार्यस्य न्यूनतेतिचेत् । उच्यते ।

सर्वधर्मप्रवचनार्थमाचार्यस्य न प्रवृत्तिः । किंतु कलौ केषांचिदपूर्वाणामेव विधानार्थं, केषांचित्स्मृत्यन्तरप्रसिद्धानामपि गुणविशेषविधानार्थं च । तेन च येषां नापूर्वत्वं नवा गुणविशेषविधिस्तेषां स्मृत्यन्तरप्रसिद्धानां यथावस्थितानामेव ग्राह्यत्वान्न पुनर्वचनमिति न न्यूनतेति । नचैवं कलावपि मरणान्तिकप्रायश्चित्तप्राप्तौ प्रायश्चित्तविधानं च विप्राणां मरणान्तिकमितिवचो विरुध्येतेति वाच्यम् । तस्य विधानशब्देनोपदेशपरत्वात् । स्वतो ज्ञात्वा तु तत्करणेऽपि न दोष इत्युपपादितं प्राक् । भगिन्यां गमने चान्द्रायणत्रयम् । यथाह बृहद्यमः ॥

चण्डालीं पुल्कसीं म्लेच्छीं शूद्रां च भगिनीं सखीम् ।
मातापित्रोः स्वसारं च निक्षिप्तां शरणागताम् ।
मातुलानीं प्रव्रजितां सगोत्रां नृपयोषितम् ॥
शिष्यभार्यां गुरोर्भार्यां गत्वा चान्द्रायणं चरेत् ॥

इति । एकत्वं चात्र त्रित्वावयुत्यानुवादेन विधेयं चान्द्रायणत्रयं कुर्यादिति त्रित्वस्य विहितत्वात् । यत्तु संवर्तवचनम् ॥

भगिनीं मातुराप्तां च स्वसारं वान्यमातृजाम् ।
एता गत्वा स्त्रियो मोहात् तप्तकृच्छ्रं समाचरेत् ॥

इति । तद्रेतःसेकादर्वाङ्निवृत्तौ द्रष्टव्यम् । भगिन्यादिषु तु कामतो गमने शिश्नच्छेदमेवोपलक्षयिष्यति । अभ्यासे त्वग्निप्रवेश इति । तथा चतुर्विंशतिमते ।

मातरं गुरुपत्नीं च स्वसारं स्वसुतां तथा ।
गत्वा तु प्रविशेदग्निं नान्या शुद्धिर्विधीयते ॥

इति । जननीगमने विहितं प्रायश्चित्तमन्यत्राप्यतिदिशति ॥

मातृष्वसृगमे चैवमात्ममेढ्रनिकृन्तनम् ॥ १० ॥

मातृष्वसुश्चकारात् स्वानुक्तविशेषाणां श्वश्रूपितृष्वस्रादीनां ग्रहणम् । एतासु गमने आत्मनो मेढ्रस्य शिश्नस्य निकृन्तनं छेदनमेव शुद्धिहेतुः । यथाह नारदः ।

माता पितृष्वसा श्वश्रूर्मातुलानी पितृष्वसा ।
पितृव्यसखिशिष्यस्त्री भगनी तत्सखी स्नुषा ॥
दुहिताचार्यभार्या च सगोत्रा शरणागता ।
राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या ॥
आसामन्यतमां गच्छन् गुरुतल्पग उच्यते ।
शिश्नस्योत्कर्त्तनात्तत्र नान्यो दण्डो विधीयते ॥

इति । न च जनन्यां तद्भगिन्यादीनां च गमने समानव्रतमयुक्तमितिशंकनीयम् । जनन्यामकामतोऽन्यासु च कामतो गमने समानव्रतत्वसंभवात् ।

कामकृतविषयत्वं वा स्यात्कामकृते पृथक्प्रायश्चित्तश्रवणादेव गम्यते ॥

तदेवाह

अज्ञानेन तु यो गच्छेत्कुर्याच्चान्द्रायणद्वयम् ।
दशगोमिथुनं दद्याच्छुद्धिं पाराशरोऽब्रवीत् ॥ ११ ॥

आसां मातृष्वस्रादीनां मध्ये भगिनीसुतयोरकामतस्सकृद्गमने प्रायश्चित्तं पूर्वमुक्तम् । अन्यासामपि मातृसखीभ्रातृसुतागुरुपत्नीस्नुषाभ्रातृभार्यामातुलानीसगोत्राणां गमने नामग्रहं वक्ष्यति । अवशिष्टानां मातृष्वस्रादीनामज्ञानतो गमने चान्द्रायणद्वयं कृत्वा दशानां गोमिथुनानां समाहारो दशगोमिथुनं दक्षिणां दद्यादितिवृद्धपाराशरोऽब्रवीत् । तदुक्तं चतुर्विंशतिमते ।

पितृष्वसा मातुलानीश्वश्रूर्मातृष्वसा तथा ।
एता गत्वा स्त्रियो मोहाच्चरेच्चान्द्रायणव्रतम् ॥

इति । अत्रैकत्वंजात्यभिप्रायेण । संख्याकांक्षायां तु मूलवाक्यैकवाक्यतया द्वित्वमेवान्वेति । दक्षिणाकांक्षायां च दशगोमिथुनमिति । यद्वा चान्द्रायणैकत्वं रेतःसेकादर्वाङ्निवृत्त्यभिप्रायेण । मूलोक्तं तु साङ्गक्रियानिनिर्वृत्तिमभिप्रेत्येति न विरोधः ।

इदानीं सापत्नमात्रादिगमने प्रायश्चित्तमाह ॥

पितृदारान् समारुह्य मातुराप्तां तु भ्रातृजाम् ।
गुरुपत्नीं स्नुषां चैव भ्रातृभार्यां तथैव च ॥ १२ ॥
मातुलानीं सगोत्रां च प्रजापत्यत्रयं चरेत् ।
गोद्वयं दक्षिणां दत्वा मुच्यते नात्र संशयः॥१३॥

पितृदारा जननी व्यतिरिक्ता । मातुराप्ता मातृसखी भ्रातृजा ज्येष्ठकनिष्ठान्यतरभ्रातृसुता । गुरुः पितृव्यतिरिक्ताचार्यादिस्तस्य पितृदारानित्यनेनैव प्राप्तत्वात् । तस्य पत्नी पाणिगृहीती, स्नुषा पुत्रभार्या, भ्रातृभार्या भ्रातुर्ज्येष्ठस्य कनिष्ठस्य वा भार्या, मातुलानी मातुलपत्नी, सगोत्रा समानगोत्रा, एतास्तथैवाज्ञानेनैव सम्यक्क्रियानिर्ष्पत्तिपर्यन्तमारुह्य गत्वा प्राजापत्यत्रयाचरणानन्तरं गोद्वयं दक्षिणां दत्वा तस्मात्पापान्मुच्यते इत्यत्र संशयो नास्ति । संशयाभाववचनं स्वल्पस्यास्य प्रायश्चित्तं कथं महापातकनिवर्तकत्वमितिशङ्कानिरासाय । तेन समारोहणमात्रविषयमिदं स्वल्पं प्रायश्चित्तमितिनिरस्तम् । आरोहणे सम्यक्त्वस्य क्रियानिष्पत्तिपर्यवसायित्वात् । पितृदारानिति सामान्योपादानेऽपि सवर्णपितृदाराणामकामतस्सकृद्गमन इदं द्रष्टव्यम् । तत्रैवाज्ञानादभ्यासे वृद्धमनुः ।

गमने गुरुभार्यायाः पितृभार्यागमे तथा ।
अब्दत्रयमकामात्तु कृच्छ्रं नित्यं समाचरेत् ॥

इति । अकामान्नित्यं पितृभार्यागमे अब्दत्रयं समाचरेदित्यर्थः । तत्रैव कामतः सकृद्गमने शङ्खः ।

अधःशायी जटाधारी पर्णमूलफलाशनः ।
एककालं समश्नन्वै वर्षे तु द्वादशे गते ॥
रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः ।
व्रतेनैतेन शुध्यन्ति महापातकिनस्त्विमे ॥

इति । तत्रैव कामतोऽभ्यासे तु मरणमेव । तथा षट्त्रिंशन्मते ।

पितृभार्यां तु विज्ञाय सवर्णां योऽधिगच्छति ।
जननीं वाप्यविज्ञाय नामृतः शुद्धिमाप्नुयात् ॥

इति । अत्रापराधैक्यमर्थः । तच्चाभ्यासपर्याय इत्युक्तम् । पितृदारानिति बहुवचनान्तदारशब्दोपादानसामर्थ्यादसवर्णपितृदारगमनेऽपि प्रायश्चित्तं भवतीति ज्ञापितम् । तच्च स्मृत्यन्तरादवगन्तव्यम् । यथा अज्ञानात्सकृत् क्षत्रियागमने च पृथक् आह ।

चान्द्रायणं तप्तकृच्छ्रमतिकृच्छ्रं तथैव च
सकृद् गत्वा गुरोर्भार्यामज्ञानात् क्षत्रियां द्विज इति ॥

अत्रायमभिसंधिः । गमनं हि त्रेधा भवति । पुरुषेच्छया, स्त्रीच्छया, उभयेच्छया चेति । तत्रेयं व्यवस्था । उभयेच्छातः प्रवृत्तौ तप्तकृच्छ्रः स्त्रीच्छयातिकृच्छ्रः पुरुषेच्छया चान्द्रायणमिति तत्रैवाज्ञानादभ्यासे जातूकर्ण्यः ।

गुरोः क्षत्रसुतां भार्यां पुनर्गत्वा त्वकामतः ।
अण्डमात्रं समुत्कृत्य शुध्येज्जीवन्मृतोऽपि च ॥

इति तत्रैव कामतः सकृद्गमने व्याघ्रः ।

कृच्छ्रं वैवातिकृच्छ्रं च तथा कृच्छ्रातिकृच्छ्रकम् ।
चरेन्मासत्रयं विप्रः क्षत्रियागमने गुरोः ॥

इति । अत्राप्युभयेच्छातः प्रवृत्तावतिकृच्छ्रः स्त्रीच्छया कृच्छ्रः स्वेच्छया कृच्छ्रातिकृच्छ्रः । तत्रैवकामतोऽभ्यासे देवलः ।

मत्या गत्वा पुनर्भार्यां गुरोः क्षत्रसुतां द्विजः ॥
अण्डाभ्यां वर्जितं लिङ्गमुत्कृत्य च मृतः शुचिः ।

इति । अज्ञानात्सकृद्वैश्यागमने प्रजापतिः ।

पञ्चरात्रं तु नाश्नीयात्सप्ताष्टौ वा तथैव च ।
वैश्यां भार्यां गुरोर्गत्वा सकृदज्ञानतो द्विजः ॥

इति । तत्राप्युभयेच्छातः प्रवृत्तौ सप्तरात्रं स्त्रीच्छया पञ्चरात्रं स्वेच्छयाऽष्टरात्रमिति । तत्रैवाज्ञानादभ्यासे हारीतः ।

अभ्यस्य विप्रो वैश्यायां गुरोरज्ञानमोहितः ।
स षडङ्गं ब्रह्मचर्यमाचरेद्यावदायुषम् ॥

इति । तत्रैव कामतः सकृद्गमने कण्वः ।

तप्तकृच्छ्रं पराकं च तथा सांतपनं गुरोः ।
भार्यां वैश्यां सकृद् गत्वा शुध्या मासं चरेद्द्विजः ॥

इति । अत्राप्युभयेच्छातः प्रवृत्तौ तप्तकृच्छ्रम् । स्त्र्येच्छया सांतपं स्वेच्छया पराक इति । तत्रैव कामतोऽभ्यासे लौगाक्षिः ।

गुरोर्वैश्यां पुनर्गत्वा गत्वा चापि पुनः पुनः ।
लिङ्गाग्रं छेदयित्वा तु ततः शुध्येत्स किल्बिषात् ॥

इति । अस्मादेव ज्ञापकादभ्यासोक्तमेवगुरुतल्पप्रायश्चित्तमत्यन्ताभ्यासे ऽपि द्रष्टव्यम् । अज्ञानतः सकृच्छूद्रागमने दीर्घतपाः ।

प्राजापत्यं सांतपनं सप्तरात्रोपवासकम् ।
गुरोः शूद्रां सकृद्गत्वा चरेदज्ञानतो द्विजः ॥

इति । अत्राप्युभयेच्छातः प्रवृत्तौ सांतपनं स्त्रीछया प्राजापत्यं स्वेच्छया सप्तरात्रोपवास इति । अत्रैवाज्ञानादभ्यासे मनुः ।

चान्द्रायणं वा त्रीन्मासानभ्यस्य नियतेन्द्रियः ।
हविष्येण यवाग्वा वा गुरुतल्पापनुत्तये ॥

इति । अत्रैव कामतः सकृद्गमने जाबालिः ।

अतिकृच्छ्रं तप्तकृच्छ्रं पराकं च तथैव च ।
गुरोः शूद्रां सकृद् गत्वा शुध्या विप्रः समाचरेद् ॥

इति । तत्राप्युभयेच्छातः प्रवृत्तौ तप्तकृच्छ्रः स्त्रीछयाऽतिकृच्छ्रः स्वेच्छया पराक इति । तत्रैव कामतोऽभ्यासे मनुः ।

पुनः शूद्रां द्विजो गत्वा शुध्या विप्रः समाहितः ।
ब्रह्मचर्यं च दुष्टात्मा चरेद्द्वादशकं समाः ॥

इति । एवं च ब्राह्मणीपुत्रादेरानुलोम्येन गमने द्रष्टव्यं प्रातिलोम्येन गमने त्वग्निप्रवेश एव सर्वेषाम् । प्रातिलोम्ये वधः पुंसो नार्याः

कर्णादिकर्त्तनमिति स्मरणात् । वधेतिकर्तव्यताकाङ्क्षायां तु वसिष्ठोक्तमनुसन्धेयम् । शूद्रस्तु ब्राह्मणीमभिगच्छेद्वीरणैर्वेष्टयित्वा शूद्रमग्नौ प्रास्येत् ब्राह्मण्याः शिरसि वपनं कारयित्वा नग्नां सर्पिषाभ्यज्य कृष्णखरमारोप्य महापथमनुसंव्राजयेत् पूता भवतीति विज्ञायते । वैश्यश्चेद्ब्राह्मणीमुपगच्छेल्लोहितदर्भैर्वेष्टयित्वा वैश्यमग्नौ प्रास्येत । ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां गौरखरमारोप्य महापथमनुसंव्राजयेत्पूता भवतीति विज्ञायते । राजन्यश्चेद्ब्राह्मणीमुपगच्छेच्छरपत्र वेष्टयित्वा राजन्यमग्नौ प्रास्येद्ब्राह्मण्याः शिरसि वपनं कारयित्वाभ्यज्य नग्नां रक्तखरमारोप्य महापथमनुसंव्राजयेत् पूता भवतीति विज्ञायते । एवं वैश्यो राजन्यां शूद्रश्चराजन्यवैश्ययोरिति । नचेदमुपपातकविषयमत्र न प्रवर्तत इति शङ्कनीयम् । यदोपपातकेऽपिप्रातिलोम्यगमने एवं तदा महापातके प्रातिलोम्यगमने सुतरामिति न्यायेनैवात्र प्रवृत्तेः । यद्यपि विजातीयगुरुतल्पगमनप्रायश्चित्तप्रतिपादनं न प्रकृतोपयोगि, कलौ विजातीयकन्याविवाहाभावात् । तथापि शास्त्रार्थस्वरूपजिज्ञासानिवर्तकत्वेन सङ्गतमिति । सामान्यतस्तु पुरुषवत्स्त्रीणामप्यत्रमहापातकोत्वाविशेषाद्यथोक्तदोषप्रायश्चित्ते भवतः । तथा च कात्यायनः ।

एष दोषश्च शुद्धिश्च पतितानामुदाहृता ।
स्त्रीणामपि प्रसक्तानामेष एव विधिःस्मृतः ॥

इति । अयमर्थः । यस्मिन्निमित्ते पुरुषस्य प्राणान्तिकं प्रायश्चित्तमुक्तम् । तत्रस्त्रिया अपि तदेव । यत्र तु व्रतरूपं तत्र तदेव । तथा च मनुः ।

एतदेव व्रतं कार्यं योषित्सु पतितास्वपि ।

इति । तत्रैतदेवेत्यविकृतातिदेशात्रार्धःकल्पनावकाशोऽन्यत्र तु सा भवत्येव । अत एव मनुः ।

यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतम् ।

इति पारदार्यं एतत्स्त्रीणां सकलव्रतमतिदिष्टवान् । सोऽयं गुरुतल्पदोषः साधारणस्त्रियां नास्ति । तथा च व्याघ्रः ।

नात्युक्तं पारदार्यं च कन्यादूषणमेव च ।
साधारणस्त्रियां नास्ति गुरुतल्पत्वमेव च ॥

इति । मातृसख्यादीनां तु कामतो गमने नारदोक्तः शिश्नच्छेद एव । अभ्यासे तु चतुर्विंशतिमताभिहितोऽग्निप्रवेश एव चेति । चकाराद्भ्रातृस्त्रियादिगमनेऽपि स्मृत्यन्तरोक्तं प्रायश्चित्तं समुचितम् । तथा चतुर्विंशतिमते ।

भ्रातुश्चैव कनिष्ठस्य भार्यां गत्वा तु कामतः ।
सान्तपनं तु कुर्वीत कृच्छ्रद्वयमथापि वा ॥
मातुश्च स्वस्रीयां गत्वा पितृव्यतनयां तथा ।
तप्तकृच्छ्रं प्रकुर्वीत षड्रात्रं तु सुतासु च ॥
गुरोर्दुहितरं गत्वा पराकं तु समाचरेत् ।
भागिनेयीं द्विजो गत्वा चरेच्चान्द्रायणव्रतम् ॥
मातुलस्य सुतां गत्वा पितुश्च स्वस्रीयां तथा ।
प्राजापत्यं प्रकुर्वीत हारीतवचनं यथा ॥
मातुश्च स्वस्रीयां चैव भार्यां गत्वा तु कामतः ।
पितृव्यतनयस्यैव सपादं कृच्छ्रमाचरेत् ॥
दौहित्रीं पुत्रतनयां चरेच्चान्द्रायणव्रतम् ।
तत्सुतां च स्नुषां गत्वा पराकं तु समाचरेत् ॥
चरेच्चान्द्रायणं विप्रो गत्वोपाध्याययोषितम् ।
आचार्यस्य पराकं तु बौधायनवचो यथा ॥
सर्वान्धिनस्त्रियो गत्वा सपादं कृच्छ्रमाचरेत् ।
विधवागमने कृच्छ्रमहोरात्रसमन्वितम् ॥
व्रतस्थागमने कृच्छ्रं सपादं तु समाचरेत् ।
सखिभार्यां समारुह्य ज्ञातिस्वजनयोषितम् ॥
स कृत्वा प्राकृतं कृच्छ्रं पादं कुर्यात्ततः पुनः ।
कुमारीगमने विप्रश्चरेच्चान्द्रायणव्रतम् ॥
पतितां तु द्विजां गत्वा तदेव व्रतमाचरेद् ।

इति । अत्र च विधवात्वादिगुणनिमित्त प्रायश्चित्तं पारदार्य-प्रायश्चित्तेन समुच्चीयते । निमित्तद्वयसमावेशात् । पतितां कृतप्रायश्चित्तामपि परित्यक्तामितिज्ञेयम् । तथा मूलवचनपरिगणितातिरिक्तपारदार्यो-क्तमपिप्रायश्चित्तं चकारात्समुच्चीयते । तदाह व्याघ्रः ।

ब्राह्मणो ब्राह्मणीं गच्छेदकामां यदि कामतः ।
कृच्छ्रं चान्द्रायणं कुर्यादर्द्धमेव प्रमादतः ॥
अर्द्धमेव सकामायां तप्तकृच्छ्रं सकृद्गतो ।
अर्द्धमर्द्धं नृपादीनां दारेषु ब्राह्मणश्चरेत् ॥
एतद्व्रतं चरेत्सार्द्धं श्रोत्रियस्य परिग्रहे ।
अश्रोत्रियश्चद्विगुणमनुक्तमर्द्धमेव च ॥

इति । अयमर्थः । ब्राह्मणस्य ब्राह्मण्यामकामायां कामतो गमने चान्द्रायणं कृच्छ्रमिति चान्द्रायणविशेषणं । तस्यामेवाकामतो गमने चान्द्रायणार्द्धं सकामायां कामतो गमनेऽपि चान्द्रायणार्द्धमेव । इदमप्य-भ्यासे । सकृद्गमने तु तप्तकृच्छ्रमेव सर्वत्र ब्रह्मणस्य क्षत्रियवैश्यशूद्रस्त्रीगम-नेऽप्यर्द्धमेव चान्द्रायणम् । इदं च श्रोत्रियस्याश्रोत्रियस्त्रीगमने तु चान्द्रा-यणम् । श्रोत्रियस्य श्रोत्रियस्त्रीगमने तु सार्द्धं चान्द्रायणम् । अश्रोत्रि-यस्य श्रोत्रियस्त्रीगमने चान्द्रायणद्वयम् । इदमपि गुप्तायामगुप्तायान्त्वर्द्ध-मेव चान्द्रायणं सर्वत्रेति । शूद्रादिगमने तु विशेषमाह कण्वः ।

शूद्रदारान् गतो विप्रो ह्यतिकृच्छ्रं समाचरेत् ।
चान्द्रायणं विशो राज्ञः समं च ब्राह्मणं व्रतम् ॥

इति । शूद्रस्त्रीगमनेऽत्रातिकृच्छ्रं चरेत् । विशो राज्ञश्च दारान् गतो विप्रश्चान्द्रायणं चरेत् । समं तुल्यं चान्द्रायणमेव ब्राह्मणीगमन-सम्बन्धिव्रतमित्यर्थः । तदेतदत्यन्ताभ्यासे द्रष्टव्यम् । ब्राह्मणोऽक्षत्रिया-दिगमने तु विशेषमाह । व्याघ्रः ।

विप्रेणैव निविष्टाश्चेच्चातुर्वर्ण्यप्रसूतयः ।
क्रमेण पादशो हीनं व्रतं तासु गतश्चरेत् ॥

इति। ब्राह्मणस्य ब्राह्मणीगमने कामाकामादिभेदेन यदुक्तं व्रतं तदेव ब्राह्मणेतरक्षत्रियादिगमनेऽपि पादहीनं भवतीत्यर्थः । प्रातिलोम्येन गमने त्वाह संवर्त्तः ।

कथं चिद्ब्राह्मणीं गच्छेत्क्षत्रियो वैश्य एव वा ।
गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति ॥
शूद्रस्तु ब्राह्मणीं गत्वा कथं चित्काममोहितः ।
गोमूत्रयावकाहारोमासेनैकेन शुध्यति ॥

इति। मासश्चार्द्धं चेति मासार्द्धे, तच्च प्रातिलोम्येन क्षत्रियवैश्ययोर्ज्ञेयम् । तद्यथा क्षत्रियस्य ब्राह्मणीगमने मासार्द्धं वैश्यस्य मासमिति । इदं चाकामविषयं कथं चित्काममोहित इति विशेषाभिधानात् । कामतो गुरुतल्पप्रायश्चित्तमेव। माता यस्माद्धि तस्येति प्रचेतोलिङ्गात् । तच्च प्रातिलोम्यगुरुतल्पप्रायश्चितप्रस्तावे वसिष्ठवाक्योदाहरणेन प्रतिपादितम् । इदं च सर्वमपि व्रतं गर्भानुत्पत्तौ । तदुत्पत्तौ प्रतिपदोक्तं चतुर्विंशतिमताभिहितमेव कार्यं ।

ब्राह्मणीगमने कृच्छ्रं गर्भे सान्तपनं चरेत् ।
राज्ञीगर्भे पराकः स्याद्विड्गर्भे तु त्र्यहाब्दिकम् ॥
शूद्रगर्भे द्विजः कुर्यात्तदुच्चान्द्रायणव्रतम् ।
चाण्डाल्यां गर्भमारोप्य गुरुतल्पव्रतं चरेद् ॥

इति। एतदतिरिक्तस्थले तु तत्तदेवद्विगुणं कार्यम् । तदाहोशनाः

गमने तु व्रतं यत्स्याद्गर्भे तद्द्विगुणं भवेद् ।
इति । एवं मानुष्यागमने प्रायश्चित्तमुक्तम् ।

इदानीं पश्वादिगमने प्रायश्चित्तमाह ॥

पशुवेश्यादिगमने महिष्युष्ट्रीं कपीं तथा ॥
खरीं च शूकरीं गत्वा प्राजापत्यं समाचरेत् ॥ १४ ॥

पशुरुक्तातिरिक्तोश्वादिः सर्वः वेश्या वेशोभृतिस्सा । जीवनमस्याःसा वेश्या पञ्चचूडाभिधाप्सरस्सन्ततिः समानजातेरुत्कृष्टजातेर्वा पुरुषादु-

त्यत्वा पुरुषसम्भोगवृत्तिर्ब्राह्मण्यादीव स्वतन्त्रा जातिः स्कन्दपुराणोक्ता। आदिशब्दात्स्वैरिण्यादीनां ग्रहणम्। आसां गमने महिष्युष्ट्रकपीखरीशूकरीषु गत्वा यथोक्तं प्राजापत्यं कुर्यात्। यद्यप्यत्र सर्वपशुसाधारण्येन प्राजापत्य उक्तस्तथापि शुनीगमनेऽतिकृच्छ्रो ज्ञेयः।

तथा च चतुर्विंशतिमते।
सर्वासां पशुजातीनां गमने कृच्छ्रमाचरेत्।
शुनीं चैव द्विजो गत्वा अतिकृच्छ्रं समाचरेत्॥

इति। स्वैरिणीगमने शङ्खलिखितावाहतुः। स्वैरिण्यां वृषल्यां चावकीर्णः सचैलस्नात उदकुम्भं दद्याद्ब्राह्मणाय। वैश्यायां चतुर्थकालाहारो ब्राह्मणान् भोजयेत्। क्षत्रियायाम् त्रिरात्रोपोषितो यवाढकं दद्यात्। ब्राह्मण्यां त्र्यहमुपोष्य घृतपात्रं दद्यादिति। बन्धकीगमने तु षट्त्रिंशन्मते प्रायश्चित्तमुक्तम्।

ब्राह्मणीं बन्धकीं गत्वा किञ्चिद्दद्याद्द्विजातये।
राजन्यां तु धनुर्दद्याद्वैश्यां गत्वा तु चेलकम्॥
शूद्रां गत्वा तु वै विप्र उदकुम्भं द्विजातये।
दिवसोपोषितो वास्याद्दद्याद्विप्राय भोजनम्॥

इति। स्वैरिणी बन्धक्योर्लक्षणमुक्तं स्मृत्यन्तरे। चतुर्थे स्वैरिणी प्रोक्ता पञ्चमे बन्धकी भवेदिति। व्यभिचार इति शेषः। यद्यपि वेश्यादीनांमनुष्यावान्तरजातित्वान्मानुषीगमनप्रायश्चित्तप्रस्ताव एव प्रायश्चित्ताभिधानमुचितं। तथापि पुरुषविशेषापरिग्रहसाम्यात्पश्वादिभिः सहाभिधानम्। अत एव इदमनवरुद्धासु तु परदारवदेव दोषमाह नारदः।

स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी तथा।
गम्याःस्युरानुलोम्येन स्त्रियो न प्रतिलोमतः॥
आस्वेव तु भुजिष्यासु दोषः स्यात्परदारवत्।
गम्यास्वपि हि नोपेयाद्यत्ताः परपरिग्रहाः॥

इति। निष्काशिनी स्वाम्यनवरुद्धा दासी। गम्यत्वाभिधानं तु दण्डाभावाभिप्रायेण। न तु प्रायश्चित्ताभावमभिप्रेत्य तस्याःपत्यविधा-

नात् । भुजिष्या नियतपुरुषपरिगृहीताः । इदं च गर्भानुत्पत्तौ । तत्र तु कण्व आह ।

प्रसूतो यस्तु वैश्यायां भैक्ष्यभुग्नियतेन्द्रियः ।
शतं सहस्रमभ्यस्य सावित्रीमिति शुद्धताम् ॥

इति । अत्राकामतोऽभ्यासे विशेषश्चतुर्विंशतिमते ।

सकृत्कृते तु यत्प्रोक्तं त्रिगुणं तत्त्रिभिर्दिनैः ।
मासात्पञ्च गुणं प्रोक्तं षण्मासाद्दशधा भवेत् ॥
संवत्सरात्पञ्चदश त्र्यब्दाद्विंशद्गुणं भवेत् ।
ततोऽप्येवं विकल्पः स्याच्छातातपवचो यथा ॥

इति । कामतोऽभ्यासे तु लौगाक्षिः ।

अभ्यासेऽहर्गुणा वृद्धिर्मासादर्वाग्विधीयते ।
ततो मासगुणा वृद्धिर्यावत्संवत्सरं भवेत् ॥
ततःसंवत्सरगुणा यावत्पापं समाचरेत् ॥

इति । अनेनैव न्यायेनानुक्तविशेषेषूपपातकेष्वभ्यासे प्रायश्चित्त मूहनीयम् ।

गोगमने विशेषमाह ॥

गोगामी च त्रिरात्रेण गामेकां ब्राह्मणो ददत् ॥

गोगामी ब्राह्मणस्त्रिरात्रमुपोष्य गामेकां दत्वा शुध्यति । महिष्यादिगमने यदुक्तंप्राजापत्यं तदभ्यासविषयम् ॥

इदानीं सकृद्गमने विशेषमाह ॥

महिष्युष्ट्रीखरीगामी त्वहोरात्रेण शुध्यति ॥ १५ ॥

महिष्युष्ट्रीखरीर्गत्वा अहोरात्रोपोषितः शुध्येदिति ।

वक्ष्यमाणप्रायश्चित्तनिमित्तानुत्पादार्थं स्त्रीरक्षणमाह ॥

अमरे समरे वापि दुर्भिक्षे वा जनक्षये ॥
बन्दिग्राहे भयार्त्तौ वा सदा स्वस्त्रीं निरीक्षयेत् ॥ १६ ॥

अमरो धाडा समरो युद्धं दुर्भिःक्षमशनाभावो जनक्षयो मारिका बन्दिग्राहो बलाद्दासीकरणं भयार्त्तिश्चोरराजादितोयद्दुःखं तस्मिन् पुरुषः स्वानिष्टमपरिहृत्यापि स्वस्त्रीपरिरक्षणमवहितः कुर्यात् । तथा च वसिष्ठः । अप्रमत्ता रक्षत तन्तुमेनमिति । निरीक्षयेदितिणिचा स्वयमशक्तोऽन्यद्वाराऽपि रक्षयेदित्युक्तम् ।

चण्डाल्यादिगमने पुंसः प्रायश्चित्तमभिहितम् । इदानीं स्त्रीणां चण्डालादिगमने पञ्चभिः श्लोकैः प्रायश्चित्तमाह ॥

चण्डालैः सह सम्पर्कं या नारी कुरुते ततः ।
विप्रान् दश वरान्कृत्वा स्वयं दोषं प्रकाशयेत्॥१७॥

या चातुर्वर्ण्यस्त्री चण्डालैः सह संपर्कं व्यवायं कुरुते । ततो हेतोर्दश विप्रान् वरान् चातुर्वैद्येत्याद्युक्तगुणसम्पन्नान् पर्षदं कृत्वा स्वयमेव स्वकीयं दोषं पर्षद्दक्षिणादानादिपूर्वकं प्रकाशयेत् । चण्डालैरितिबहुवचनं स्वसमानधर्मश्वपचाद्यभिप्रायेण । तथाहाङ्गिराः ।

चण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा ।
मागधायोगवौ चैव सप्तैतेंत्यावसायिनः ।

इति । अत एव ऋष्यशृङ्गः । संपृक्तास्यादथांत्यैर्यैत्यांत्यग्रहणमेव कृतवान् ।

तेन रजकश्चर्मकारश्च नटो बुरुड एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते त्वन्त्यजाः स्मृताः ॥

इत्यापस्तंबोक्तानामप्यंत्यानामग्रहणं सिद्धम् । दशावरानिति पाठे दश अवरा येऽल्पास्तानित्यर्थः । पर्षदि दोषप्रकाशनस्य सामान्यतः प्राप्तावपि स्वयं दोषं प्रकाशयेदिति पुनर्विधानमप्रकाशस्याप्यस्य दोषस्य रहस्यप्रायश्चित्तापवादेन पर्षदुपदिष्टप्राश्चितप्राप्त्यर्थं ।

तदेवाह ॥

आकण्ठसंमिते कूपे गोमयोदककर्दमे ॥
तत्र स्थित्वा निराहारा त्वहोरात्रेण निष्क्रमेत् ॥१८॥

कण्ठप्रमाणं कूपं गत्वा सोदकेन गोमयेन समापूर्य तत्रैकमहोरात्रं निराहारा स्थित्वा परेद्युर्निष्क्रमेत् ।

किञ्च

सशिखं पवनं कृत्वा भुञ्जीयाद्यावकौदनम् ।
त्रिरात्रमुपवासित्वा त्वेकरात्रं जले वसेत् ॥१९॥

गोमयोदककूपान्निर्गत्य सशिखं पवनं कृत्वा यावकौदनं यवमयं चरुं द्वितीयेऽहनि भुक्त्वा अनन्तरं त्रिरात्रमुपोष्य षष्ठेऽहोरात्रं आकण्ठं जले वसेत् । यद्यपि ॥

शिखा यज्ञोपवीतं च कुशा मौनं तथैव च ।
वेदाध्ययनभैक्ष्ये च स्त्रीशूद्रपतनानि षड् ॥

इति स्मृत्यन्तरे स्त्रीणां शिखानिषेधात्सशिखमिति नोपपद्यते तथापि ।

सर्वान्केशान्समुद्धृत्य छेदयेदङ्गुलद्वयम् ॥

इति विशेषविहितस्त्रीवपनापवादेन समूलकेशवपनमत्रानेनोच्यत इति ।

किञ्च ॥

शङ्खपुष्पीलतामूलं पत्रं वा कुसुमं फलम् ।
सुवर्णं पञ्चगव्यं च क्काथयित्वा पिबेज्जलम् ॥ २० ॥

सप्तमेऽहनि जलान्निर्गत्य शङ्खपुष्पीलतायाः मूलपत्रपुष्पफलानामयतमं सुवर्णं पञ्चगव्यं चैकत्र जले क्काथयित्वा तज्जलं पिबेत् ।

किञ्च ॥

एकभुक्तं चरेत्पश्चाद्यावत्पुष्पवती भवेत् ।
व्रतं चरति तद्यावत्तावत्संवसेत बहिः ॥ २१ ॥

ततोऽष्टमदिनमारभ्य यावदृतुदर्शनमेकभुक्तं चरेत् । यावदुक्तं व्रतं समाप्नोति । तावत्सा बहिरेव तिष्ठेन्न गृहे सम्व्यवहरेदिति ।

[1]इत्युक्तवन्तं राजानं सर्वलोकपितामहः ।
प्रत्युवाच शुभां वाणीं मधुराक्षर[2]भूषिताम् ॥ १९ ॥
[3]तपोधन महाभाग भगीरथ महारथ ।
एवं भवत्वविच्छिन्नमिक्ष्वाकु-कुलमव्ययम् ॥ २० ॥
[4]इयन्तु गङ्गा सरितां प्रवरा स्वर्गतश्च्युता ।
[5]या सा देवनदी गङ्गा शुद्धा हिमवतश्च्युता ॥ २१ ॥
दारयेत् पृथिवीं कृत्स्नां निपतन्ती महौघिनी ।
तदस्या धारणे राजन् शिवो देवः प्रसाद्यताम् ॥२२॥
[6]गङ्गांतु प्रच्युतां राजन् स मूर्ध्ना धारयिष्यति ।
नान्यस्तस्माच्छिवादस्याः शक्तो वेगं हि दुःसहम् ॥२३॥
सोढुं निपतमानायास्तस्मात् तं त्वं प्रसादय ।
गङ्गायाः पतनं व्यक्तं भूमिः सोढुं न शक्ष्यति ॥ २४ ॥
तस्या धारयितारञ्च नान्यं पश्यामि शङ्करात् ।
वेगं सुदुःसहं लोके तस्मात् तं त्वं प्रसादय ॥ २५ ॥

1. For this Sl. B. 21. उक्तवाक्यं तु राजानं सर्वलोकपितामहः । प्रत्युवाच शुभांवाणीं मधुरां मधुराक्षरां ॥ G. 19 इत्युक्तवाक्यं etc. 2. P...भाषितं 3. For this Sl. B. 22. मनोरथो महानेष भगीरथ महारथ । एवं भवतु भद्रंते इक्ष्वाकुकुल(a) वर्धन ॥ (a) V...मव्ययं । 4. For this and the following 4 Slokas B. 23-24 इयं हैमवती ज्येष्ठा गंगा हिमवतः सुता । तां वै धारयितुंराजन् हरस्तत्र नियुज्यतां ॥ गंगायाः पतनं राजन् पृथिवी न सहिष्यते । तां वै धारयितुं राजन् नान्यं पश्यामि शूलिनः ॥ 5. this line is wanting in G. 6. this Sl. and the following line are wanting in G.

[1]स एवमुक्त्वा राजानं भगवान् प्रपितामहः ।
आभाष्य च [2]महीपालं भगवान् त्रिदिवं ययौ ॥ २६ ॥

आदिकाण्डे भगीरथवरप्रदानम् ।

XLV

[3]प्रजापतौ गते तस्मिन्नङ्गुष्ठाग्रनिपीडितम् ।
कृत्वा महीतलं राजा संवत्सरमुपा[4]विशत् ॥ १ ॥
[5]ऊर्ध्वबाहुर[6]नालम्बो वायुभक्षो निराश्रयः ।
अचलः स्थाणुवत् स्थित्वा रात्रिंदिवमतन्द्रितः ॥ २ ॥
[7]अथ संवत्सरेपूर्णे सर्व देवनमस्कृतः ।
उमापतिः पशुपतिर्भगीरथमभाषत ॥ ३ ॥
[8]प्रीतस्तेऽहंनरश्रेष्ठ करिष्यामि प्रियं महत् ।
पतन्तीं धारयिष्यामि दिवस्त्रिपथगां नदीम् ॥ ४ ॥

---

1. For this Sl. B. 25. तमेवमुक्त्वा राजानं गंगा चाभाष्यलोकहृत् । जगाम त्रिदिवं(a)देवैः सर्वैः सह मरुद्गणैः ॥ (a) S. ब्रह्मा देवैः सह etc. G. 24. तमेवमुक्त्वा etc. 2. G. 24. महीं नेतुं गंगा स त्रिदिवं etc but P. agrees with our text. 3. For this and the following Sl. B. XLIII. 1. देवदेवे गते तस्मिन् सोंगुष्ठाग्रनिपीडितं । कृत्वा वसुमतींराम(a)वत्सरं समुपासत ॥ (a) V. संवत्सरमुपासत. 4 G. 1...वसत्. 5. This Sl. is wanting in B. but V. उर्द्ध्वबाहुर्निरालम्बो वायुभक्षो निराश्रयः । अचलः स्थाणुवत्स्थित्वं(a) रात्रिंदिवमतंद्रितः ॥ (a) S. रात्रिंदिवमुपागतः 6. G. 2. निरालम्बो etc., but P. has रनालम्बो etc. 7. For this Sl B. 2. अथ संवत्सरे पूर्णे सर्वलोकनमस्कृतः । उमापतिः पशुपती राजानमिदमब्रवीत् ॥ 8. For this Sl. B. 3. प्रीतस्तेऽहं नरश्रेष्ठ करिष्यामि तवप्रियं । शिरसा धारयिष्यामि शैलराजसुतामहं ॥

[1]ततो हिमवतः शृङ्गमधिरुह्य महेश्वरः ।
निपतेत्यब्रवीद्गङ्गामाभाष्याकाशगां[2]तदा ॥ ५ ॥
जटाकलापं विपुलं विनिकीर्य समन्ततः ।
बहुयोजन[3]विस्तारं शैलकन्दरसंनिभम् ॥ ६ ॥
तस्मिन् पपात गगणाद्गङ्गा देवनदी च्युता ।
वेगेन महता राम शिरस्यमिततेजसः ॥ ७ ॥
तत्र संवत्सरं पूर्णं बभ्राम परिमोहिता ।
गङ्गा शिरसि देवस्य[4]निःसृता वेगवाहिनी ॥ ८ ॥
[5]ततः प्रसादयामास पुनरेव भगीरथः ।
गङ्गायाः परिमोक्षार्थं महादेवमुमापतिम् ॥ ९ ॥
[6]तस्याथ वचनाद्गङ्गामुत्ससर्ज[7]भगार्दनः ।

1. For this, and the following 3 slokas, B. 4-9. ततो हैमवती ज्येष्ठ सर्वलोकनमस्कृता । तदा साति महद्रूपं कृत्वा वेगं च दुःसहं ॥ आकाशादपतद्राम शिवे शिवशिरस्युत ॥ अचिंतयच्च सा देवी गंगा परमदुर्धरा ॥ विशाम्यहं हि पातालं स्रोतसा गृह्य शंकरं । तस्यावलेपनं ज्ञात्वा क्रुद्धस्तु भगवान् हरः ॥ तिरोभावयितुं बुद्धिं चक्रे त्रिनयनस्तदा । सा तस्मिन्पतिता पुण्या पुण्ये रुद्रस्य मूर्द्धनि ॥ हिमवत्प्रतिमे राम जटामंडलगह्वरे । सा कथंचिन्महीं गंतुं नाशक्नोद्यत्नमास्थिता ॥ नैव सा निर्गमं लेभेजटामण्डल (a) मंततः । तत्रैवाबभ्रमद्देवी संवेत्सरगणान् बहून् ॥ (a) V. मोहिता- 2. G. 5. नटीं. P. तया 3. G. 6. विस्तीर्णं etc. but P. has विस्तारं etc. 4.G.8. विसृता etc. 5. For this Sl.B.10. तामपश्यत्पुनस्तत्र तपः परममास्थितः । स तेन तोषितश्चासी(a)दत्यंतं रघुनंदन ॥ (a) S...दत्ययं etc. 6. For this aud the following 15 Slokas, B. 11-13. विससर्ज ततो गंगां हरो विन्दुसरः प्रति । तस्यां विसृज्यमानायां सप्तस्रोतांसि जज्ञिरे ॥ ह्लादिनी पावनी चैव नलिनीच तथैव च । तिस्रः प्राचीं दिशं जग्मुर्गंगाशिवजला शुभा । सुचक्षुश्चैव सीता च सिंधुश्चैव महानदी । तिस्रश्चैता दिशं जग्मुः प्रतीचीं तु(a)दिशं शुभा ॥ (a) V. शुभोदका 7.

जटामेकां समाक्षिप्य स्रोतः संजनयंस्तदा ॥ १० ॥
स्रोतसा तेन सुस्राव गङ्गा त्रिपथगामिनी ।
प्लावयन्ती जगद्राम पुण्या देवनदी शुभा ॥ ११ ॥
[1]तां च सिद्धाःसर्षिगणाः शिरसा जगृहुस्तदा ।
[2]सेन्द्रैः सुरगणैः सार्द्धं पूजयन्तो महानदीम् ॥ १२ ॥
ततो देवर्षिगन्धर्वा यक्षाः सिद्धगणास्तथा ।
विमानैर्विविधैराम हयैर्गजवरैस्तथा ॥ १३ ॥
परिप्लवगताश्चापि देवतास्तत्र विष्ठिताः ।
स्वयं चानुजगामैनां ब्रह्मा लोकपितामहः ॥ १४ ॥
तदद्भुततमं लोके गङ्गापतनमुत्तमम् ।
दिदृक्षवो देवगणाः समीयुरमितौजसः ॥ १५ ॥
संपतद्भिः सुरगणै स्तेषां[3] चाभरणौजसा ।
शतादित्यमिवासी[4]त्तद् गगणं गततोयदम् ॥ १६ ॥
क्वचिद्द्रुततरं प्रायात् कुटिलं क्वचिदायतम् ।
विततं क्वचिदुद्भूतं शनैरपि पुनः क्वचित् ॥ १७ ॥
सलिलेनैव सलिलं क्वचिदभ्याबधीत् पुनः ।
शिशुमारोरगगणै र्मीनैरपि[5] सुचञ्चलैः ॥ १८ ॥

G. 10. तदा हरः; but P. has जनार्दनः 1. this Sl. is wanting in G.; P. has तां प्रच्युतां मुनिगणाः शिरसा etc. 2. P. सेन्द्राः etc. 3. G. 15. चाभरणज्वलं, but P. has चाभरणौजसा 4. G. 15...त्तु etc. but P. has त्तद् etc. 5, G. 17. च चञ्चलैः

विद्युद्भिरिव विक्षिप्तैराकाशमभवद्वृतम् ।
पाण्डुरैः सलिलोत्पीडैः कीर्यमाणंसहस्रधा ॥ १९ ॥
[1]शरदभ्रमिवाभाति गगणं हंससंप्लवैः ।
मुहुरूर्ध्वमधो गत्वा पपात धरणीतले ॥ २० ॥
तच्छङ्करशिरोभ्रष्टं गतं भूमितलं पयः ।
ग्रहाः सगणगन्धर्वा वसुधातलवासिनः ॥ २१ ॥
नागाश्च शोधयामासुर्मार्गमस्य महौजसः ।
भवाङ्गसङ्गते तोये पवित्रे तत्र पूजिते ॥ २२ ॥
कृत्वाभिषेकं ते सर्वे बभूवुर्गतकल्मषाः ।
[2]पापाद्भूप्रतिता ये च गगनाद्वसुधातलम् ॥ २३ ॥
पूतात्मानः पुनस्तेन सलिलेन दिवं गताः ।
जेपुर्देवर्षयो जप्यं सिद्धाश्च परमर्षयः ॥ २४ ॥
जगुश्च देवगन्धर्वा ननृतुश्चाप्सरोगणाः ।
मुनिसंघा मुमुदिरे प्रह्लादं[3]जगदाप्नवत् ॥ २५ ॥
[4]त्रयोऽपि लोका मुदिता गङ्गावतरणे तदा ।
भगीरथोपि राजर्षिर्दिव्यं स्यन्दनमास्थितः ॥ २६ ॥
[5]प्रायादग्रे महातेजास्तं गङ्गा पृष्ठतोऽन्वयात् ।

---

1. G. 19. शरच्छुभ्र etc., P. शरच्चन्द्र etc. 2. G. 22. शापात् प्रपतिता etc. 3. G. 24. जगदाप्नुवान्, but P. has जगदाप्तवत्· 4. For this Sl. B. 14. सप्तमी चान्वगात्तासां भगीरथ(a)रथंतदा ।। भगीरथोऽपि राजर्षिर्दिव्यंस्यंदनमास्थितः॥ (a) V. मथो नृपं· 5. For this Sl. B. 15. प्रायादग्रे महातेजा गंगा तंचाप्यनुव्रजत् । गगनाच्छंकरशिरस्ततो धरणीमागता ॥ B. (16-31) then reads the following, whiich very closely agrees with slokas 10–27 of our text, and

महातरङ्गौघवती प्रनृत्यन्तीव राघव ॥ २७ ॥
स्ववेगोद्भ्रामितजला फेनमालावतंसिका ।
महाजलावर्त्तवती महावेगप्रवाहिनी ॥ २८ ॥
प्रययौ विलसन्तीव भगीरथरथानुगा ।
देवाः सर्षिगणाः सर्वे दैत्यदानवराक्षसाः ॥ २९ ॥
गन्धर्वयक्षप्रवराः सकिन्नरमहोरगाः ।

---

comes back to प्रायादगे etc. again, slightly changed (a)असर्पत जलं तत्र तीव्रशब्दपुरस्कृतं । मत्स्यकच्छपसंघैश्च । (b)शिशुमारगणैस्तथा ॥ पतद्भिः पतितैश्चैव व्यरोचत वसुंधरा । ततो देवर्षिगंधर्वायक्षसिद्धगणास्तथा ॥ व्यलोकयन्त ते तत्र गगनाद्गांगतां तदा । विमानै(c)र्नगराकारैर्हयैर्गजवरै(d)स्तदा ॥ पारिप्लवगताश्चापि देवतास्तत्रविष्ठिताः । तदद्भुतमिमंलोके गंगाव(e)तरमुत्तमं । दिदृक्षवो देवगणा समीयुरमितौजसः । संपतद्भिः सुरगणैस्तेषां चाभरणौजसा ॥ शतादित्यमिवाभाति गगनं गततोयदं ।(f)शिशुमारोरगगणैर्मीनैरपि च चंचलैः ॥ विद्युद्भिरिव(g)विक्षिप्तैराकाशमभवत्तदा । पाण्डुरैः सलिलोत्पीडैः कीर्यमाणैः सहस्रधा ॥ शारदाभ्रैरिवाकीर्णं गगनं हंससंप्लवैः । क्वचिद्द्रुततरं याति कुटिलं क्वचिदायतं ॥ विनतं क्वचिदुद्धूतं क्वचिद्याति शनैः शनैः ।(h)सलिलेनैव सलिलं क्वचिदभ्याहतं पुनः ॥ मुहुरूर्ध्वपथंगत्वा पपात वसुधां पुनः । तच्छंकरशिरोभ्रष्टं भ्रष्ट भूमितले पुनः ॥ व्यरोचत तदा तोयं निर्मलं गतकल्मषं । तत्रर्षिगणगंधर्वा वसुधातलवासिनः ॥ भवांगपतितं तोयं पवित्रमितिपस्पृशुः । शापात्प्रपतिता ये च गगनाद्वसुधातलं ॥ कृत्वा तत्राभिषेकं ते बभूवुर्गतकल्मषाः । (j)धूतपापाः पुनस्तेनतोये(k)नाथ शुभान्विताः ॥ पुनराकाशमाविश्य(l)स्वान् लोकान् प्रतिपेदिरे । मुमुदे मुदितो लोकस्तेन तोयेन भास्वता ॥ कृताभिषेको गंगायां बभूव गतकल्मषः भगीरथो हि राजर्षिर्दिव्यं स्यंदनमास्थितः ॥ प्रायादग्रे(m)महाराजस्तंगंगा पृष्ठतोन्वगात् । देवाः सर्षिगणा सर्वे दैत्यदानवराक्षसाः ॥ the last Sl. covers the ground of slokas 27–29 of our text. (a) V. & S.व्यसर्पत etc. (b) S.e शिंशुमार etc (c) V. गगनाकारै etc. (d). V. तथा. (e) V. तरणं शुभं. (f) V. & S. शिंशुमार etc. (g) V. विक्षिप्तमाकाश etc. (h) सच्छंदेनैव etc. (j) V. धूतशापा etc. (k) V. नानेन भास्वता. (l) S. स्वर्लोकान् etc. (m) V. महातेजा etc. 1. G. 28. पथा.

[1]सर्वाश्चाप्सरसो राम भगीरथरथानुगा ॥ ३० ॥
गङ्गामन्वगमन् प्रीताः सर्वे जलचराश्च ये ।
[2]यतो भगीरथो[3]राजा ततो गङ्गा यशस्विनी ॥ ३१ ॥
[4]जगाम नरशार्दूल सर्वलोकनमस्कृता ।
स गत्वा सागरं राजा गङ्गयानुगस्तदा ॥ ३२ ॥
[5]प्रविवेश तलं भूमेः खातं यत् सगरात्मजैः ।
उपानीय ततो गङ्गां रसातलतलं प्रभुः ॥ ३३ ॥

नुगा. 1. B. 32. सर्पा etc., but V. has सर्वा etc. 2. Between the 2 lines of this Sl. P. reads the additional line, गंगा मभियुस्तन मर्वाश्च सरितः शुभा । 3. G. 30. गच्छेत् etc ; but P. has राजा &c. Between the slokas 31&32 of our text, B. (34-38) reads जगाम सरित श्रेष्ठा सर्वपापप्रणाशिनी । ततो हि य .मानस्य जह्नोरद्भुतकर्मणः । गंगा संप्लावयामास यज्ञवाटं महात्मनः । तस्यावलेपनं ज्ञात्वा क्रुद्धो जह्नुश्च राघव ॥ अपिबत्तु जलं सर्वं गंगायाः परमाद्भुतं । ततो देवाः सगंधर्वा ऋषयश्च सुविस्मिताः ॥ पूजयन्ति महात्मानं जह्नुं पुरुषसत्तमं । गंगांचापि नयन्ति स्म दुहितृत्वे महात्मनः ॥ ततस्तुष्टे महातेजा श्रोत्राभ्यामसृज(a)त्प्रभुः । (b)तस्माज्जह्नुसुता गंगा प्रोच्यते जाह्नवीति च ॥ (a) V...त्पुनः (b) Before this line V. reads the Sl. विसृज्य गंगां राजेन्द्र ज्ञात्वा प्राप्तं भगीरथं । पूजयित्वा यथान्यायं यज्ञवाटमुपागमत् ॥ 4. For this Sl. B. 39. जगाम च पुनर्गंगा भगीरथरथानुगा । सागरं चापि संप्राप्ता सा सरित्प्रवरा तदा ॥ 5. For this and the following 3 Slokas, B. 40-42, and XLIV. 1-3. रसातलमुपागच्छत् सिद्ध्यर्थं तस्य कर्मणः । भगीरथोऽपि राजर्षिर्गंगामादाय यत्नतः ॥ पितामहान् भस्मकृतानपश्यद् गतचेतनः । अथ(a)तद्भस्मनां राशिं गंगासलिल.मुत्तमं ॥ प्लावयत्(b)पूतपाप्मानः स्वर्गं प्राप्ता रघूत्तम ॥ ४२ ॥ सगत्वा सागरं राजा गंगयानुगतस्तदा । प्रविवेश तलं भूमेर्यत्र ते भस्मसात्कृताः ॥ भस्मन्यथाप्लुते राम गंगायाः सलिलेन वै । सर्वलोकप्रभुर्ब्रह्मा राजानमिदमब्रवीत् ॥ तारिता नरशार्दूल दिवंयाताश्च देववत् । (a) V. तं etc. (b) V. धूत etc.

तर्पयामास तान् सर्वान् भस्मभूतान् पितामहान् ।
अथ गङ्गाम्भसा[1] तत्र प्लाविताः सगरात्मजाः ॥ ३४ ॥
दिव्यमूर्तिधरा भूत्वा जग्मुः स्वर्गं मुदा[2] युताः ।
तान् दृष्ट्वा प्लावितान् सर्वान् पितृ[illegible]न महात्मना ॥३५॥
भगीरथमुवाचेदं ब्रह्मा सुरगणैः सह ।
तारिता नरशार्दूल त्वया पूर्वपितामहाः ॥ ३६ ॥
[3]षष्टिः पुत्रसहस्राणि सगरस्य महात्मनः ।
अक्षयः सगरस्यायं नाम्ना ख्यातो महोदधिः ॥ ३७ ॥
व्यक्तं सागर इत्येव ख्यातिं लोके गमिष्यति ।
यावत्स सागरो लोके स्थितोऽयमिह शाश्वतः ॥३८॥
[4]सगरः सहितः पुत्रैस्तावत् स्वर्गे निवत्स्यति ।
इयञ्च दुहिता राजंस्तव गङ्गा भविष्यति ॥ ३९ ॥
[5]भागीरथीति विख्याता त्रिषु लोकेषु[6] भूपते ।
गङ्गेति गमनाद्भूमेः ख्याता भागीरथीति च ॥ ४० ॥
[7]भविष्यति सरिच्छ्रेष्ठा लोके त्रिपथगेति च ।

---

1. G. 33. तेन etc. but P. has तत्र etc. 2. G. 34. न्विताः, but P. has युताः 3. For this, and the following Sl B. 3-4. षष्टिः पुत्रसहस्राणि सगरस्यमहात्मनः ॥ सागरस्य जलंलोके यावत् स्थास्यति पार्थिव । 4. For this Sl. B. 4-5. सगरस्यात्मजाः सर्वे दिवि स्थास्यंति देव वत ॥ इयं च दुहिता ज्येष्ठा तव गंगा भविष्यति । 5. For this Sl. B. 5.-6. त्वत्कृतेन च नाम्नाय लोके स्थास्यति विश्रुता ॥ गंगा त्रिपथगा नाम दिव्या भागीरथीति च । 6. G. 39. विश्रुता· 7. For this, and the following 4 slokas, B. 6-15. त्रीन् पथो भावयंतीति तस्मात्त्रिपथगा स्मृता ॥ पितामहानां सर्वेषां त्वमत्र-

प्रसिद्धं चापि नामास्यास्त्रिमार्गगमनादिदम् ॥ ४१ ॥
त्रींल्लोकान्[1] तारयन्त्या वै सुरर्षिभिरुदाहृतम् ।
द्वितीयञ्चापि गङ्गेति गाङ्गताया विशांपते ॥ ४२ ॥
भागीरथीति चाप्येतत् तृतीयं नाम सुव्रत ।
त्वत्प्रीत्या[2] भविष्यतिच सुतेयं ते विचक्षण ॥ ४३ ॥
यावच्च भुवि गङ्गेयं भविष्यति महानदी ।
तावत्तवाक्षया कीर्तिर्लोकेषु विचरिष्यति ॥ ४४ ॥
[3]पितामहानां सलिलं कुरुष्व च यथासुखम् ।
स्वस्ति तेऽस्तु गमिष्यामि स्वर्लोकं नरपुङ्गव ॥ ४५ ॥

मनुजाधिप । कुरुष्व सलिलं राजन्प्रतिज्ञामपवर्जय ॥ (a)पूर्वकेण हितं राज्ञस्तेनाति यशसा तदा । धर्म्मिणां प्रवरेणाथ नैष प्राप्तो मनोरथः । तथैवांशुमता वत्स-लोकेऽप्रतिमतेजसा । गंगां प्रार्थयता नेतं प्रतिज्ञा नापवर्जिता ॥ राजर्षिणा गुणवता महर्षिसमतेजसा । मत्तुल्यतपसा चैव क्षत्रधर्म्मस्थितेन च ॥ दिलीपेन महाभाग तव-पित्रातितेजसा । पुनर्नशक्तिता नेतुं गंगां प्रार्थयतानघ ॥ सा त्वया समतिक्रान्ता प्रतिज्ञा पुरुषर्षभ । प्राप्तोऽसि परमं लोके यशः परमसंमतं ॥ तच्च गंगावतरणं त्वया कृतमरिंदम । अनेन च भवान् प्राप्तो धर्म्मस्यायतनं महत् ॥ प्लावयस्व त्वमात्मानं नरोत्तम सदोचिते , सलिले पुरुषश्रेष्ठ शुचिःपुण्यफलोभव ॥ पितामहानां सर्वेषां कुरुष्वसलिलक्रियां । स्वस्ति तेऽस्तु गमिष्यामि(b)स्वंलोकं गम्यतां नृप ॥ (a). V. पूर्वकेणापिते etc. (b) S स्वर्लोकं etc. 1. G. 41. प्लावयन्त्या etc. 2. G. 42, च भविष्यति etc. 14. 3. Before this Sl. G. reads 8 Slokas, which the same as B. 7-14. in matter, but differ here and there in wording—पितामहानां सर्वेषां त्वमत्र मनुजाधिप । कुरुष्व सलिलं राजन् प्रतिज्ञामप(a)वर्जय ॥ पूर्वजेनापिते राज्ञंस्तेनातियशसा सता । धर्म्मिणां प्रवरेणापि नैव प्राप्तो मनोरथ ॥ तथैवांशुमता तात लोकेऽप्रतिमतेजसा । गंगां प्रार्थयतानेन न प्राप्तः काम एव हि ॥ राजर्षीणां पुराणानां महर्षिसमतेजसां । अतुल्यतपसा चापि क्षत्रधर्म्मस्थितेन च ॥ दिलीपेन महाभाग तव पित्रातितेजसा । पुनर्न शक्तितं तेन गंगां प्रार्थयतानघ ॥ सा

[1]इत्युक्त्वा भगवान् ब्रह्मा भगीरथमरिन्दमम् ।
जगाम सहितो देवैर्ब्रह्मलोकमनामयम् ॥ ४६ ॥
[2]भगीरथोऽपि राजर्षिः कृत्वा तेषां जलक्रियाम् ।
पितामहानां सर्वेषामयोध्यां पुनरागमत् ॥ ४७ ॥
समृद्धार्थो नरश्रेष्ठो[3]राज्यं चानुशशास ह ।
प्रमुमोद च लोकस्तं नृपमासाद्य राघव ॥ ४८ ॥
[4]इति ते राम गङ्गाया विस्तरोऽभिहितो मया ।
स्वस्ति प्राप्नुहि भद्रं ते सन्ध्या[5]काल उपस्थितः ॥ ४९ ॥
[6]धन्यंयशस्यमायुष्यं स्वर्ग्यं पावनमेव च ।
इमदाख्यानमाख्यातं गङ्गावतरणं मया ॥ ५० ॥

आदिकाण्डे गङ्गावतरणम् ॥

[Page 213] The author next proceeds to describe the different kinds of Inference. *It is of two kinds* etc. The word *'ca'* has a restrictive force, meaning that Inference is of two kinds *only*. (1) Of those two, the '*dṛshṭa*' is that which follows upon the absolute identity, in kind, of that which is known from before as concomitant with the *linga*, and that which has to be got at by means of the inference in question. E. g. having seen the dewlap in the cow only, we have the inferential recognition of an animal with the dewlap seen on some future occasion being a '*cow*'. In this case we see that on the former occasion the dewlap was seen to exist in an animal that belongs to the class '*cow*;' and that leads us, on the subsequent occasion of our seeing the dewlap, to infer that this dewlap too must belong to an animal that belongs to the same class ; and this kind of inference is called '*Dṛshṭa*,' seen,—the name being due to the fact that the generality of 'cow' that is inferred, on the latter occasion in the forest, from the sight of the dewlap, has had its specific individuality 'seen' in the city on the former occasion.

(2) The *Sāmānyatodṛshṭa* inference is that where that which is already known as concomitant with the *linga* and that which has to be inferred belong to two distinct classes; that is to say, that Inference is the *Sāmānyatodṛshṭa* which follows from the invariable concomitance of the generality of the *linga* with the generality of the Object of Inference. For instance, having seen that the activity of the farmer, the trader and the king's servants always bring about certain results, we infer that the activity of such persons as perform the rites and duties of their castes must also lead to definite results. We find that the activity of the farmer brings about the result in the shape of a rich harvest; and that of the trader and the King's servants brings to them a mass of gold and jewels, horses and elephants; and this leads us to infer that the performance of the rites etc., also brings about results in the shape of heaven and the like.

The followers of Bṛhaspati (the Atheists) hold that we have never found any such result as Heaven necessarily following after any action; and hence the result of these rites etc., must be held to be the mere obtaining of a living. In opposition to this, the author adds—*the activity which is not found to have reference to any visible purpose etc.* It cannot be doubted that there are some people who, without the least desire for any visible results, betake themselves to such observances as those of the '*Vānaprastha*' and the like; and what we seek to prove by the inference in question is the fruitful character of such observances; and as such it cannot be regarded as a mere repetition of the former inference.

The word '*Pramāṇa*' has been explained as that which *is the means* towards a certain end; and as this character could not be complete without a definite result, the author proceeds to distinguish the means from the *result*——*The 'perception of the linga' is the means of knowledge.'* That it is to say, it is the perception of the linga *by means of which* the inferential cognition is obtained, and the 'cognition,' brought about by that *means* is the 'cognition of fire' (in the case of the inference of fire from the presence of smoke). Though in regard to the origin of the cognitions of the *linga* and the *lingi* (that which is concomitant with the *linga*), there is a difference in the objectives of the two cognitions, yet, inasmuch a cognition of the *linga* has a certain action towards the bringing about of the cognition of the *lingi*, that can in any way, be said to have the *lingi* for its objective; and hence the 'means of knowledge' and its 'result' remain co-extensive (pertaining to the same objective).

[Page 212] Another explanation is given : Or the cognition of fire may be regarded as the 'means of knowledge;' and in that case, the character of the 'result' would belong to the cognition of the (1) good, (2) bad or (3) indifferent character of the fire— the 'goodness' of fire consisting in its being a cause of pleasure,

badness in its leading to pain, and that of indifference in its being a source of neither pain nor pleasure ; the idea of these is the 'result' because they appear only after the cognition of fire.

All this refers to inference for the sake of one's own definitive cognition. In the word '*niçcita*' the affix has the abstract signification.

Text (105) *Word, and the other means of knowledge, are included under 'Inference'; because of the process of those being similar to that of Inference. Just as for one who is cognisant of the invariable concomitance, there arises, from the perception of an undoubted 'linga' and the remembrance of another concomitance, an inferential cognition of supersensuous things,—so in the same manner, does cognition arise from Word &c. also. Scripture even in the form of Çrutis and Smṛtis depends upon the authoritative character of the speaker; as the authority of the scripture rests upon his authority. And that Word is non-eternal is proved by inference:—'the creation of a sentence is due to an intelligent action,' and 'the word dadāti in the Veda is preceded by intelligent action because of its being spoken of as dadāti* (*Vaiçeshika Sutras VI-i-*1 *&* 3).

Commentary.

Question: "Philosophers have spoken of othor means, or forms, of knowledge—such as Word (or Verbal) and the like—(besides Sensuous cognition and Inference) ; how then is it that these others have not been mentioned here ?"

In answer to this, the author proceeds to show that these other means of knowledge are not mentioned for the simple reason that they are all included in the two that have been

सम्परिभ्यां करोतौ भूषणे । ६ । १ । १३७ ॥

समवाये च । ६ । १ । १३८ ॥

सम्परिपूर्वस्य करोतेः सुट् स्यात् भूषणे सङ्घे चार्थे ॥ संस्करोति । अलङ्करोतीत्यर्थः । संस्कुर्वन्ति । सङ्घीभवन्तीत्यर्थः । संपूर्वस्य क्वचिदभूषणेऽपि सुट् । संस्कृतं भक्षा इति ज्ञापकात् । परिष्करोति ॥

उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु च । ६ । १ । १३९ ॥

उपात् कृञः सुट् स्यादेष्वर्थेषु चात् प्रागुक्तयोरर्थयोः ॥ प्रतियत्नो गुणाधानम् । विकृतमेव वैकृतं विकारः । वाक्याध्याहार आकाङ्क्षितैकदेशपूरणम् । उपस्कृता कन्या । अलङ्कृतेत्यर्थः । उपस्कृता ब्राह्मणाः । समुदिता इत्यर्थः । एधो दकस्योपस्कुरुते । गुणाधानं करोतीत्यर्थः । उपस्कृतं भुङ्क्ते । विकृतमित्यर्थः । उपस्कृतं ब्रूते । वाक्याध्याहारेण ब्रूत इत्यर्थः ॥

किरतौ लवने । ६ । १ । १४० ॥

उपात् किरतेः सुट् स्यात् छेदेऽर्थे ॥ उपस्किरति । उपास्किरत् । उपचस्कार ॥

हिंसायां प्रतेश्च । ६ । १ । १४१ ॥

उपात् प्रतेश्च किरतेः सुट् स्याद्धिंसायाम् ॥ प्रतिस्किरति ॥

अपाच्चतुष्पाच्छकुनिष्वालेखने । ६ । १ । १४२ ॥

अपात् किरतेः सुट् स्यात् ॥ हर्षजीविकाकुलायकरणेष्विति वक्तव्यम् ॥ * ॥ एवमेवाऽऽत्मनेपदविधावुक्तम् । अपस्किरते

वृषो हृष्टः । कुक्कुटो भक्षार्थी । श्वा आश्रयार्थी । हर्षादिष्विति किम् । म्रियमाणो वृषभः पादैर्भुवमपकिरति ॥

कुस्तुम्बुरूणि जातिः । ६ । १ । १४३ ॥

अत्र सुणिनपात्यते ॥ कुस्तुम्बुरुर्धान्याकम् । क्लीबत्वमतन्त्रम् । जातिः किम् । कुतुम्बुरूणि । कुत्सितानि तिन्दुकफलानीत्यर्थः ॥

अपरस्पराः क्रियासातत्ये । ६ । १ । १४४ ॥

सुणिनपात्यते ॥ अपरस्पराः सार्था गच्छन्ति । सततमविच्छेदेन गच्छन्तीत्यर्थः । क्रियेति किम् । अपरपरा गच्छन्ति । अपरे च परे च सकृदेव गच्छन्तीत्यर्थः ॥ समो हिततनयोर्वा लोपो वक्तव्यः ॥*॥ सहितम् । संहितम् । सन्ततम् । सततम् । सततस्य भावः सातत्यम् । सन्ततशब्दात्तु ष्यञ् न भवति ॥ संतुमुनोः कामे लोपो वक्तव्यः ॥*॥ सकामः । भोक्तुकामः ॥ मनसि च वक्तव्यम् ॥*॥ समनाः । भोक्तुमनाः ॥ अवश्यमः कृत्ये लोपो वक्तव्यः ॥*॥ अवश्यभाव्यम् ॥

गोष्पदं सेवितासेवितप्रमाणेषु । ६ । १ । १४५ ॥

सुट् षत्वञ्च निपात्यते ॥ गावः पद्यन्ते ऽस्मिन्देशे स गोभिः सेवितो वा गोष्पदः । असेविते । अगोष्पदान्यरण्यानि । प्रमाणे । गोष्पदमात्रं क्षेत्रम् । सेवितेत्यादि किम् । गोः पदम् गोपदम् ॥

आस्पदं प्रतिष्ठायाम् । ६ । १ । १४६ ॥

आत्मयापनाय स्थाने सुट् निपात्यते ॥ आस्पदमनेन लब्धम् । प्रतिष्ठाऽनेन लब्धेत्यर्थः । प्रेति किम् । आपदापदम् ॥

आश्चर्यमनित्ये । ६ । १ । १४७ ॥

अनित्यतया विषयभूतयाऽद्भुतत्वमिह लक्ष्यते तस्मिन् सुट् निपात्यते ॥ आश्चर्यं यदि स भुञ्जीत । चित्रमद्भुतमित्यर्थः । अनित्ये किम् । आचर्यं कर्म शोभनम् ॥

वर्चस्केऽवस्करः । ६ । १ । १४८ ॥

कुत्सितं वर्चो वर्चस्कमन्नमलं तस्मिन् सुट् ॥ अवकीर्यत इत्यवस्करः । वर्चस्के किम् । अवकरः ॥

अपस्करो रथाङ्गम् । ६ । १ । १४९ ॥

अपकरोऽन्यः ॥

विष्किरः शकुनौ विकिरो वा । ६ । १ । १५० ॥

पक्षे विकिरः ॥ वावचनेनैव सुड्विकल्पे सिद्धे विकिरग्रहणं तस्यापि शकुनेरन्यत्र प्रयोगो मा भूदिति वृत्तिः । तन्न । भाष्यविरोधात् ॥

ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे । ६ । १ । १५१ ॥

ह्रस्वात् परस्य चन्द्रशब्दस्योत्तरपदस्य सुट् स्यान्मन्त्रे ॥ हरिश्चन्द्रो मरुद्गणः । ह्रस्वात् किम् । सूर्याचन्द्रमसो धाता यथा । मन्त्रे किम् । सुचन्द्रा पौर्णमासी । उत्तरपदे किम् । शुक्रमसि चन्द्रमसि ॥

प्रतिष्कशश्च कशेः । ६ । १ । १५२ ॥

कश गतिशासनयोरित्यस्य प्रति पूर्वस्य पचाद्यचि सुडिनपात्यते षत्वञ्च ॥ सहायः पुरोयायी वा प्रतिष्कश इत्युच्यते । कशेः किम् । प्रतिगतः कशां प्रतिकशोऽश्वः । यद्यपि कशेरेव कशा, तथापि कशेरिति धातोर्ग्रहणमुपसर्गस्य प्रतेर्ग्रहणार्थम् । तेन धात्वन्तरोपसर्गान्न ॥

प्रस्कण्वहरिश्चन्द्रावृषी । ६ । १ । १५३ ॥

हरिश्चन्द्रग्रहणममन्त्रार्थम् ॥ ऋषी किम् । प्रकण्वो देशः । हरिचन्द्रो माणवकः ॥

मस्करमस्करिणौ वेणुपरिव्राजकयोः । ६ । १ । १५४ ॥

मकरशब्दोऽव्युत्पन्नस्तस्य सुडिनिश्च निपात्यते ॥ वेणिवति कम् । मकरो ग्राहः । मकरी समुद्रः ॥

कास्तीराजस्तुन्दे नगरे । ६ । १ । १५५ ॥

ईषत्तीरमस्येति कास्तीरं नाम नगरम् ॥ अजस्येव तुन्दमस्येत्यजस्तुन्दं नाम नगरम् । नगरे किम् । कातीरम् । अजतुन्दम् ॥

कारस्करो वृक्षः । ६ । १ । १५६ ॥

कारं करोतीति कारस्करो वृक्षः ॥ अन्यत्र कारकरः । केचित्तु कस्कादिष्विदं पठन्ति न सूत्रेषु ॥

पारस्करप्रभृतीनि च संज्ञायाम् । ६ । १ १५७ ॥

एतानि ससुट्कानि निपात्यन्ते नाम्नि ॥ पारस्करः । किष्किन्धा ॥ तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च ॥ * ॥ तात् पूर्वं चर्त्वेन दकारोऽपि बोध्यः । तद्बृहतोस्तकारदकारौ लुप्येते । करपत्योस्तु सुट् । चोरदेवतयोरिति समुदायोपाधिः । तस्करः । बृहस्पतिः ॥ प्रात्तुम्पतौ गवि कर्त्तरि ॥ * ॥ प्रस्तुम्पति गौः ॥ श्तिपा निर्देशाद्यङ्लुकि न । प्रतोतुम्पीति ॥ प्रायस्य चित्तिचित्तयोः ॥ * ॥ प्रायश्चित्तिः । प्रायश्चित्तम् । वनस्पतिरित्यादि । आकृतिगणोऽयम् ॥

अनुदात्तं पदमेकवर्जम् । ६ । १ । १५८ ॥

परिभाषेयं स्वरविधिविषया ॥ यस्मिन् पदे यस्योदात्तः स्वरितो वा विधीयते तमेकमचं वर्जयित्वा शेषं तत् पदमनुदात्ताच्कं स्यात् ॥

गोपायतं नः। अत्र सनाद्यन्ता इति धातुत्वे धातुस्वरेण यकाराकार उदात्तः। शिष्टमनुदात्तम्। एकग्रहणं विधीयमानोपलक्षणम्। तेन तवैचान्त इत्यादौ ह्यादीनां वर्जनसिद्धिः। इन्द्राबृहस्पती इत्यत्र देवताद्वन्द्वे चेति पदद्वयस्यापि प्रकृतिस्वरे विधेये त्रयाणां वर्जनम्। बृहस्पतिशब्दो हि वनस्पत्यादित्वात् द्व्युदात्तः। पदग्रहणं किम्। देवदत्त गामभ्याज शुक्लां दण्डेन। वाक्ये प्रतिपदं पृथक् स्वरो भवति। तच्च परिमाणार्थम्। यस्य भावि पदत्वं तस्य प्रागपि पदव्यपदेशात् स्वरविधिसमकालमेव शिष्टस्यानुदात्तत्वम्। तेन कुवल्या विकारः कौवलमित्यनुदात्तादिलक्षणोऽञ् सिद्धः। अन्यथा अनुदात्तादेरित्यस्य प्रातिपदिकविशेषणत्वान्न स्यात्। कुवलशब्दो हि गौरादित्वादाद्युदात्तः। तस्माद्गौरादित्वान्ङीष्। न चानुदात्तादेरिति समर्थविशेषणमेवास्तु विभक्त्युत्पत्तौ सत्यां ङ्यन्तस्यानुदात्तादित्वादिति वाच्यम्। वाचो विकारस्त्वचो विकार इत्यत्राप्यापत्तेः। सावेकाच इति विभक्तेरुदात्तत्वात्। प्रातिपदिकयोस्तु धातुस्वरेणान्तोदात्तत्वम्। सर्वेषां विकारः सार्व इत्यत्रानापत्तेश्च। सर्वशब्दश्च सर्वस्य सुपीति सुप्याद्युदात्तः। केवलस्त्वयमुणादिष्वन्तोदात्तो निपातित इत्यनुदात्तादिः। तस्माद्विभक्त्युत्पत्तेः प्रागनुदात्तादित्वमाश्रयणीयम्। अत एवानुदात्तादिलक्षणाञ्बाधनार्थं भिक्षादिषु गर्भिणीशब्दपाठः सार्थकः॥ अर्तिगृभ्याम्भन्निति प्रत्ययस्य नित्वाद्गर्भशब्दो ह्याद्युदात्तः॥ एषा चाधिककार्यार्थस्वरितत्वप्रतिज्ञानात्त्रिपाद्यां न प्रवर्तते। तेन देवदत्तेत्यादौ प्लुतासिद्धत्वात् पूर्वं षाष्ठाद्युदात्तत्वे ततः प्लुते तदेकवाक्यतापन्नशेषनिघाताभावेनोदात्तद्वयसमावेशः। परनित्यान्तरङ्गापवादैः स्वरैः सर्वत्र व्यवस्थानं वेदितव्यम्। किञ्च॥ सतिशिष्टस्वरबलीयस्त्व-

मन्यत्र विकरणस्वरान्नञ्स्वराच्चेति वक्तव्यम् ॥*॥ तेन गोपायतमित्यत्र गुपेर्धातुस्वर आयस्य प्रत्ययस्वरश्च न शिष्यते । अन्यत्रेति किम् । यज्ञं यज्ञमभिवृधे गृणीतः । अत्र सति शिष्टोऽपि श्ना इत्यस्य स्वरो न शिष्यते किन्तु तस एव । अतिस्रः। विभक्तिस्वरो न शिष्यते । किन्तु नञ्स्वर एव । अचत्वारः । आम्स्वरो न शिष्यते । किन्तु नञ्स्वर एव । अकरणिः । आक्रोशे नञ्यनिः । गतिकारकोपपदादित्युत्तरपदप्रकृतिस्वरो न शिष्यते । किन्तु नञ्स्वर एव । अन्यत्र विकरणस्वरादित्यंशे तासेः परस्यानुदात्तवचनं ज्ञापकं बोध्यम् ॥

कर्षात्वतो घञोऽन्त उदात्तः । ६ । १ । १५९ ॥

कर्षतेर्धातोराकारवतश्च घञन्तस्यान्त उदात्तः स्यात् ॥ कर्षः । शपा निर्देशात्तुदादेराद्युदात्त एव । कर्षः । पाकः । दायः । धायः । ञित्स्वरापवादोऽयम् ॥

उञ्छादीनाञ्च । ६ । १ । १६० ॥

अन्त उदात्तः स्यात् । उञ्छादिषु युगशब्दो घञन्तोऽगुणो निपात्यते । कालविशेषे रथाद्यवयवे च । वैश्वानरः कुशिकेभिर्युगे युगे । अन्यत्र । योगे योगे तवस्तरम् । भत्रशब्दो घञन्तः । गावः सोमस्य प्रथमस्य भक्षः । उत्तमंशश्वत्तमावपि । उदुत्तमं वरुणम् । शश्वत्तममीलते ॥

अनुदात्तस्य च यत्रोदात्तलोपः । ६ । १ । १६१ ॥

यस्मिन्ननुदात्ते परे उदात्तो लुप्यते तस्योदात्तः स्यात् ॥ देवीं वाचम् । अत्र ङीबुदात्तः ॥

धातोः । ६ । १ । १६२ ॥

धातोरन्त उदात्तः स्यात् ॥ पचति । ऊर्णोति । गोपायतं नः । असि सत्यः ॥

चितः । ६ । १ । १६३ ॥

अन्त उदात्तः । भङ्गुरम् । भासुरम् ॥ चितः सप्रकृतेर्बह्वकजर्थम् ॥ * ॥ चिति प्रत्यये सति प्रकृतिप्रत्ययसमुदायस्यान्त उदात्तो वाच्य इत्यर्थः । बहुपटुः । नभन्तामन्यके समे । यके सरस्वन्तीं तकत्सुते ॥

तद्धितस्य । ६ । १ । १६४ ॥

चितस्तद्धितस्यान्त उदात्तः ॥ पूर्वेणैव सिद्धे ञित्स्वरबाधनार्थमिदम् । कौञ्जायनाः ॥

कितः । ६ । १ । १६५ ॥

कितस्तद्धितस्यान्त उदात्तः । यदाग्नेयः ।

तिसृभ्यो जसः । ६ । १ । १६६ ॥

अन्त उदात्तः । तिस्रो द्यावः सवितुः ।

चतुरः शसि । ६ । १ । १६७ ॥

चतुरोऽन्त उदात्तः शसि परे ॥ चतुरः कल्पयन्तः । अचि र इति रादेशस्य पूर्वविधौ स्थानिवत्त्वान्नेह । चतस्रः पश्य । चतेरुरन् । नित्वादाद्युदात्तता ।

सावेकाचस्तृतीयादिर्विभक्तिः । ६ । १ । १६८ ॥

सुः सप्तमीबहुवचनं तत्र य एकाच् ततः परा तृतीयादिर्विभक्तिरुदात्ता ॥ वाचा विरूपा । सो किम् । राज्ञेत्यादौ एकाचोऽपि

राजञ्शब्दात् परस्य मा भूत् । राज्ञो नुते विधत्ते राजनि त्वे । तृतीयादिः किम् । न ददर्श वाचम् ॥

अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे ।६।१।१६९॥

नित्याधिकारविहितसमासादन्यत्र यदुत्तरपदमन्तोदात्तमेकाच् ततः परा तृतीयादिविभक्तिरन्तोदात्ता वा स्यात् ॥ परमवाचा ।

अञ्चेश्छन्दस्यसर्वनामस्थानम् ।६।१।१७०॥

अञ्चेः परा विभक्तिरुदात्ता । इन्द्रो दधीचः । चाविति पूर्वपदान्तोदात्तत्वं प्राप्तम् । तृतीयादिरित्यनुवर्तमाने असर्वनामस्थानग्रहणं शस्परिग्रहार्थम् । प्रतीचो बाहून् ।

ऊडिदंपदाद्यप्पुम्रैद्युभ्यः ।६।१।१७१॥

एभ्योऽसर्वनामस्थानविभक्तिरुदात्ता । प्रष्ठौहः । प्रष्ठौहा ॥ ऊठ्युपधाग्रहणं कर्तव्यम् ॥ * ॥ इह मा भूत् । अक्षद्युवा । अक्षद्युवे । इदम् । एभिर्नृभिर्नृतमः । अन्वादेशे न । अन्तोदात्तादित्यनुवृत्तेः । न च तत्रान्तोदात्तताऽप्यस्तीति वाच्यम् । इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादाविति सूत्रेणानुदात्तस्याशो विधानात् ॥ प्रतेबभूमाभ्यां गा अनु । पद्दन्नोमास्हृन्निशिति षट् पदादयः । एकाच इत्यनुवृत्तेः । पद्भ्यां भूमिः । दद्भिर्न जिव्हा । जायते मासि मासि । मनश्चिन्मे हृद आ । अप् । अपां फेनेन । पुम् । अम्नाते व पुंसः । रै । राया वयम् । रायो धर्ता । दिव । दिवे दिवे ॥

अष्टनो दीर्घात् ।६।१।१७२॥

शसादिर्विभक्तिरुदात्ता । अष्टाभिर्दशभिः ॥

शतुरनुमो नद्यजादी । ६ । १ । १७३ ॥

अनुम् यः शतृप्रत्ययस्तदन्तादन्तोदात्तात् परा नदी अजादिश्च शसादिर्विभक्तिरुदात्ता स्यात् । अच्छावदं प्रथमा जानती कृण्वते । अन्तोदात्तात् किम् । दधती । अभ्यस्तानामादिरित्याद्युदात्तः । अनुमः किम् । तुदन्ती । एकादेशो ऽच उदात्तः । अदुपदेशात् परत्वात् शतुर्लसार्वधातुक इति निघातः ॥ बृहन्महतोरुपसङ्ख्यानम् ॥*॥ बृहती बृहता । महता । शतृवद्भावादेव सिद्धत्वान्नियमार्थमेतत् । पृषदादिभ्यो मा भूदित्येवमर्थम् ॥

उदात्तयणो हल्पूर्वात् । ६ । १ । १७४ ॥

उदात्तस्थाने यो यण् हल्पूर्वस्तस्मात् परा नदी शसादिर्विभक्तिश्चोदात्ता स्यात् ॥ चोदयित्री सूनृतानाम् । एवा नेत्री । कर्त्रे देवाय कृण्वते सविते । उदात्तग्रहणं किम् । कर्त्री । तृन्नन्तोऽयमाद्युदात्तः । हल्पूर्वादिति किम् । बहुतितवा ब्राह्मण्या ॥ नकारग्रहणञ्च कर्तव्यम् ॥*॥ वाक्पत्नी । तत्पुरुषः । न भूवाक्चिद्दिधिष्विति पूर्वपदप्रकृतिस्वरनिषेधात् समासान्तोदात्तत्वम् । विभाषा सपूर्वस्येति नकारादेशः ॥

नोङ्धात्वोः ॥ ६ । १ । १७५ ॥

अनयोर्यणः परे शसादय उदात्ता न स्युः ॥ ब्रह्मबन्ध्वा । सेत्पृश्निः सुभ्वे ॥

ह्रस्वनुड्भ्यां मतुप् ॥ ६ । १ । १७६ ॥

ह्रस्वान्तादन्तोदात्तान्नुटश्च परो मतुबुदात्तः ॥ यो अब्दिमाँ उदनि माँ इयर्ति । नुटः । अक्षण्वन्तः । अन्तोदात्तात् किम् ।

मात्वा विददिषुमान् । स्वरविधौ व्यञ्जनमविद्यमानवदित्येतदत्र न । मरुत्वानिन्द्र । नियुत्वान्वा यवागहि ॥ रैशब्दाच्च ॥ * ॥ रेवां इन्द्रेवत: ॥ त्रेश्च प्रतिषेधो वक्तव्य: ॥ * ॥ त्रिवतीर्याज्यानुवाक्या भवन्ति ॥

नामन्यतरस्याम् ॥ ६ । १ । १७७ ॥

मतुपि यो ह्रस्वस्तदन्तादन्तोदात्तात् परो नामुदात्तो वा ॥ चेतन्ती सुमतीनाम् । ह्रस्वात् किम् । कुमारीणाम् । अन्तोदात्तात् किम् । वसूनाम् ॥

ङ्याश्छन्दसि बहुलम् ॥ ६ । १ । १७८ ॥

ङ्या: परो नामुदात्तो वा ॥ देवसेनानामभिभञ्जतीनाम् । वेत्युक्तेर्नेह । जयन्तीनामरुतो यन्तु । अन्यतरस्यामित्यनुवर्तमाने बहुलोक्तिरन्तोदात्तादित्यस्य निवृत्त्यर्था ॥

षट्त्रिचतुर्भ्यो हलादिः ॥ ६ । १ । १७९ ॥

एभ्यो हलादिर्विभक्तिरुदात्ता । आषड्भिर्हूयमान: । त्रिभिष्ट्वन्देव । हलादि: किम् । चतस्र: पश्य ॥

झल्युपोत्तमम् ॥ ६ । १ । १८० ॥

षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं स्यात् ॥ अध्वर्युभि: पञ्चभि: । नवभिर्वाजैर्नवती च । सप्तभ्यो जायमान: । आदशभिर्विवस्वत: । उपोत्तमं किम् । आ षड्भिर्हूयमान: । विश्वेदेवैस्त्रिभि: । झलि किम् । नवानाम् । नवतीनाम् ॥

विभाषा भाषायाम् ॥ ६ । १ । १८१ ॥

पूर्वसूत्रविषये ॥

न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः ॥ ६ । १ । १८२ ॥

एभ्यः प्रागुक्तं न । गवां शता । गोभ्यो गातुम् । सावेकाच इति प्राप्तः । सुगुना । सुगुभ्याम् । अन्तोदात्तादिति प्राप्तः । शुनश्चिच्छेप । पूर्ववत् प्राप्तः । परमशुना । परमश्वभ्याम् । पूर्ववत् प्राप्तः । सौ प्रथमैकवचने अवर्णान्तात् । तेभ्यो द्युम्नं तेषां पाहि श्रुधी हवम् । राट् । राजा । परमराजा । अच् । अञ्चतेः क्विन्नन्तस्य सनकारस्य ग्रहणं विषयावधारणार्थम् । यत्रास्य नलोपो नास्ति तत्र प्रतिषेधो यथा स्यात् । नाञ्चेः पूजायामिति प्रतिषिध्यते । नलोपः । प्राञ्चा । प्राङ्भ्याम् । नलोपविषये तु भवत्येव । विभक्तेरुदात्तत्वम् । प्राचा । क्रुङ् । क्विन्नन्त एव । क्रुञ्चा । परमक्रुञ्चा । कृत् । करोतिः । कृतिर्वा । क्विबन्तः । कृता । परमकृता ॥

दिवो झल् ॥ ६ । १ । १८३ ॥

दिवः परा झलादिर्विभक्तिर्नोदात्ता । द्युभिरक्तुभिः । स त्वेकाच इति ऊडिदंपदादिति वा प्राप्तः । झलिति किम् । उपत्वाग्ने दिवे दिवे ।

नृ चान्यतरस्याम् ॥ ६ । १ । १८४ ॥

नुः परा झलादिर्विभक्तिर्वोदात्ता । नृभिर्ये मा नः ।

तित् स्वरितम् ॥ ६ । १ । १८५ ॥

निगदव्याख्यातम् । क्व नूनम् ॥

तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमन्हिङ्कोः । ६ १ । १८६ ॥

अस्मात् परं लसार्वधातुकमनुदात्तं स्यात् । तासि । कर्ता । प्रत्ययस्वरापवादोऽयम् । अनुदात्तेत् । य आस्ते । ङितः । अभि-

चष्टे अनृतेभिः । अदुपदेशात् । पुरुभुजा चनस्यतम् । चित्स्वरोऽप्यनेन बाध्यते । वर्धमानं स्वे दमे । तास्यादिभ्यः किम् । अभिवृधे गृणीतः । उपदेशग्रहणान्नेह । हतो वृत्राण्यार्या । इह च भवति । पचावः । लग्रहणं किम् । कतीह निघ्नानाः । सार्वेति किम् । शिश्ये । अन्हिङोः किम् । न्हुते । यदधीते ॥ विदीन्धिखिदिभ्यो नेति वक्तव्यम् ॥ * ॥ इन्धे । राजा । एतच्चानुदात्तस्य च यत्रेति सूत्रे भाष्ये स्थितम् ॥

आदिः सिचोऽन्यतरस्याम् । ६ । १ । १८७ ॥

सिजन्तस्यादिरुदात्तो वा । यासिष्टं वर्तिरश्विनौ । मा हि कार्ष्टाम् । मा हि कार्ष्टाम् । एकोऽत्राद्युदात्तः । परोऽन्तोदात्तः मा हि लाविषाताम् । मा हि लाविषाताम् । एकोऽत्राद्युदात्तः । अपरो मध्योदात्तः । सिचश्चित्करणमागमानुदात्तत्वं बाधते ॥ सिच आद्युदात्तत्वेऽनिटःपितःपक्ष उपसंख्यानम् ॥ * ॥ मा हि कार्षम् । पक्षे आद्युदात्तम् । पक्षे त्वन्तोदात्तम् । अन्यथा धातुस्वरेण नित्यमाद्युदात्तं स्यात् । अनिटः किम् । मा हि लाविषम् । पक्षे आद्युदात्तं तिङन्तम् । पक्षे मध्योदात्तम् । सिच्स्वरेण नत्वन्तोदात्तम् ॥

स्वपादिहिंसामच्यनिटि । ६ । १ । १८८ ॥

स्वपादीनां हिंसेश्चानिट्यजादौ लसार्वधातुके परे आदिरुदात्तो वा स्यात् ॥ स्वपादिरदाद्यन्तर्गणः । स्वपन्ति । श्वसन्ति । हिंसन्ति । पक्षे प्रत्ययस्वरेण मध्योदात्तता । अनिटि किम् । स्वपितः । अचि किम् । स्वप्यात् । लेति किम् । शानशि स्वपानः । सार्वधातुके किम् । सुषुपतुः । ङित्येवेष्यते । नेह । स्वपानि । हिनसानि ॥

अभ्यस्तानामादिः। ६। १। १८९ ॥

अनिट्यजादौ लसार्वधातुके परेऽभ्यस्तानामादिरुदात्तः ॥ ये ददति प्रिया वसु। जक्षति। जाग्रति। परत्वाच्चित्स्वरमयं बाधते। दधाना इन्द्रे। आदिरित्यनुवर्तमाने आदिग्रहणं नित्यार्थम् ॥

अनुदात्ते च। ६। १। १९० ॥

अनुदात्त इति बहुव्रीहिनिर्देशः। अविद्यमानोदात्ते लसार्वधातुकेपरेऽभ्यस्तानामादिरुदात्तः। दधासि रत्नं द्रविणं च दाशुषे मा हि स्म दधात्। नित्यत्वादिकारलोपे कृतेऽप्ययं स्वरः प्रवर्तत एव ॥

सर्वस्य सुपि। ६। १। १९१ ॥

सुपि परे सर्वशब्दस्यादिरुदात्तः स्यात् ॥ सर्वे नन्दन्ति यशसा। प्रत्ययलक्षणेनाऽप्ययं स्वरो भवति। सौवरीणां सप्तमीनां तदन्तसप्तमीत्वात्। सर्वस्तोमः। सुपि किम्। सर्वस्य विकारः सार्वं इत्यत्रानुदात्तादिप्रकृतिकसुबन्तलक्षणाञ् प्रत्ययो यथा स्यात् ॥ सर्वस्वरोऽनच्कस्येति वक्तव्यम् ॥ * ॥ इह मा भूत्। सर्वके ॥

भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात् पूर्वं पिति। ६। १। १९२ ॥

भीप्रभृतीनामभ्यस्तानां पिति लसार्वधातुके परे प्रत्ययात् पूर्वमुदात्तं स्यात्। बिभेति। जिह्रेति। बिभर्ति योऽग्निहोत्रं जुहोति। ममत्तु नः परिज्मा। मदेर्बहुलं छन्दसीति विकरणस्य श्लुः। जजनदिन्द्र। जनं जनने इत्यस्य पञ्चमे लकारे रूपम्। माता यद्वीरं दधनत्। धन धान्ये इत्यस्य। दरिद्राति। जागर्षि त्वम्। भ्यादीनां

किम् । ददाति । प्रत्ययग्रहणं किम् । बिभयानि । अचाट एव मा भूत् । ननु पित्ग्रहणेन ग्राहिष्यते । एवं तर्हि प्रत्ययग्रहणं स्वरविधौ सङ्घातः कार्यीति ज्ञापयति । तेन चित्स्वरात्तास्यादिभ्योऽनुदात्तत्वस्य विप्रतिषेध उपपद्यते । यतो लसार्वधातुकस्य सर्वस्यानुदात्तत्वं नन्वादेरेकस्मिन्विषये प्रसङ्गादुदात्तानुदात्तयोः । पूर्वग्रहणं सौवरीणां सप्तमीनां तदन्तसप्तमीत्वज्ञापनार्थम् । तेनोपोत्तममिति चङ्यन्यतरस्यामित्यादौ रिदन्तस्य चङन्तस्येत्यर्थलाभः । चतुरः शसीत्यत्र तु शसग्रहणसामर्थ्यान्न । अन्यथा ऊडिदंपदाद्यप्पुम्रैद्युभ्यः चतुर्भ्यश्चेत्येव वदेत् । असर्वनामस्थानग्रहणानुवृत्त्या षट्त्रिचतुर्भ्यो हलादिरिति हलादेश्चोदात्तत्वविधानाच्छस एव भविष्यति । पिति किम् । बिभृतः । दरिद्राति ॥

लिति । ६ । १ । १९३ ॥

प्रत्ययात् पूर्वमुदात्तम् । चिकीर्षकः । भौरिक्विधम् ॥

आदिर्णमुल्यन्यतरस्याम् । ६ । १ । १९४ ॥

अभ्यस्तानामादिरुदात्तो वा स्याण्णमुलि परे । लोलूयं लोलूयम् । पक्षे लित्स्वरः ॥

अचः कर्तृयकि । ६ । १ । १९५ ॥

तास्यनुदात्तेदित्यत उपदेशग्रहणमनुवर्तते । उपदेशेऽजन्तानां कर्तृयकि परे आदिरुदात्तो वा । लूयते केदारः स्वयमेव । स्तीर्यते केदारः स्वयमेव । जनेरन्तर्भावितण्यर्थात् कर्मकर्तरि । जायते स्वयमेवेत्यत्र तु ये विभाषेत्यत्र य इति विषयसप्तमीमाश्रित्य प्रत्ययोत्पत्तेः प्रागेवात्वप्रवृत्त्या सिद्धम् । अचः किम् । भिद्यते स्वयमेव । कर्तृग्रहणं किम् । लूयते केदारो देवदत्तेन ॥

थलि च सेटीडन्तो वा । ६ । १ । १९६ ॥

सेटि थलन्ते पदे इडुदात्त अन्तो वा आदिर्वा स्यात् ॥ यदा नैते त्रयस्तदा लितीति प्रत्ययात् पूर्वमुदात्तम् । लुलविथ । अत्र चत्वारोऽपि पर्यायेणोदात्ताः । सेटि किम् । ययाथ ॥

ञ्नित्यादिर्नित्यम् । ६ । १ । १९७ ॥

ञिदन्तस्य निदन्तस्यादिरुदात्तः स्यात् ॥ यस्मिन्विश्वानि पौंस्या । पुंसः कर्मणि ब्राह्मणादित्वात् ष्यञ् । सुते दधिष्व नश्चनः । चायतेरसुन् । चायतेरन्ने ह्रस्वश्चेति चकाराद्दसुनो नुडागमः ॥

आमन्त्रितस्य च । ६ । १ । १९८ ॥

आमन्त्रितस्यादिरुदात्तः स्यात् ॥ अग्न इन्द्र वरुण मित्र देवाः ॥

पथिमथोः सर्वनामस्थाने । ६ । १ । १९९ ॥

आदिरुदात्तः स्यात् । अयं पन्थाः । सर्वनामस्थाने किम् । ज्योतिष्मतः पथो रक्ष । उदात्तनिवृत्तिस्वरेणान्तोदात्तं पदम् ॥

अन्तश्च तवै युगपत् । ६ । १ । २०० ॥

तवैप्रत्ययान्तस्याद्यन्तौ युगपदाद्युदात्तौ स्तः ॥ हर्षसे दातवा उ ॥

क्षयो निवासे । ६ । १ । २०१ ॥

आद्युदात्तः ॥ स्वे क्षये शुचिव्रत ॥

जयः करणम् । ६ । १ । २०२ ॥

करणवाची जयशब्द आद्युदात्तः ॥ जयत्यनेन जयोऽश्वः ॥

वृषादीनां च । ६ । १ । २०३ ॥

आदिरुदात्तः ॥ आकृतिगणोऽयम् । वाजेभिर्वाजिनीवती । इन्द्र वाणीः ॥

संज्ञायामुपमानम् । ६ । १ । २९४ ॥

उपमानशब्दः संज्ञायामाद्युदात्तः ॥ चञ्चेव चञ्चा । कनो लुप् । एतदेव ज्ञापयति क्वचित् स्वरविधौ प्रत्ययलक्षणं नेति । तेन गर्गाः वत्साः बिदाः उष्ट्रग्रीवा वामरज्जुः । इत्यत्र ञिनत्तीत्याद्युदात्तत्वमत्रय इति तद्धितस्य कित इत्यन्तोदात्तत्वं पथिप्रिय इति पथिमथोः सर्वनामस्थाने इत्याद्युदात्तत्वं सर्पिरागच्छ सप्तागच्छतेत्यामन्त्रितस्य चेत्याद्युदात्तत्वमा हि दातामित्यादिः सिचोन्यतरस्यामित्यादयो न भवन्ति । संज्ञायां किम् । अग्निर्माणवकः । उपमानं किम् । चैत्रः ॥

निष्ठा च द्व्यजनात् । ६ । १ । २०५ ॥

निष्ठान्तस्य द्व्यचः संज्ञायामादिरुदात्तो न त्वाकारः ॥ दत्तः । द्व्यच् किम् । चिन्तितः । अनात् किम् । त्रातः । संज्ञायामित्यनुवृत्तेर्नेह । कृतम् । हृतम् ॥

शुष्कधृष्टौ । ६ । १ । २०६ ॥

एतावाद्युदात्तौ स्तः ॥ असंज्ञार्थमिदम् । अतसन्न शुष्कम् । धृष्टः ॥

आशितः कर्ता । ६ । १ । २०७ ॥

कर्तृवाच्याशितशब्द आद्युदात्तः ॥ कृषं नित्फाल आशितम् ॥

रिक्ते विभाषा । ६ । १ । २०८ ॥

रिक्तशब्दे वादिरुदात्तः । रिक्तः । संज्ञायान्तु निष्ठा च द्व्यजनादिति नित्यमाद्युदात्तत्वं पूर्वविप्रतिषेधेन ॥

उक्तव्रतोत्तराङ्गमाह ।

प्रायश्चित्ते ततश्चीर्णे कुर्याद् ब्राह्मणभोजनम् ।
गोद्वयं दक्षिणां दद्याच्छुद्धिं पाराशरोऽब्रवीत् ॥२२॥

यथोक्तप्रायश्चित्ताचरणानन्तरं द्वौ ब्राह्मणौ भोजयित्वा ताभ्यामेकैकां गामेवं गोद्वयं दक्षिणां दद्यादिमां शुद्धिं वृद्धपराशरोऽब्रवीदिति। तदेतत्सप्तरात्रसाध्यं व्रतम् । स्मृत्यन्तरे त्विदमेव नवरात्रसाध्यं व्रतमुक्तम् ।

चण्डालेन तु सम्पर्कं यदि गच्छेत्कथंचन ।
सशिखं वपनं कृत्वा भुञ्जीयाद्यावकौदनम् ॥
त्रिरात्रमुपवासः स्यादेकरात्रं जले वसेत् ।
आत्मना संमिते कूपे गोमयोदककर्दमे ॥
तत्र स्थित्वा निराहारा त्रिरात्रं तु ततः क्षिपेत् ।
शङ्खपुष्पीलतामूलं पत्रं वा कुसुमं फलम् ॥
क्षीरं सुवर्णसंमिश्रं क्वाथयित्वा ततः पिबेत् ।
एकभुक्तं चरेत्पश्चाद्यावत्पुष्पवती भवेत् ॥
बहिस्तावच्च निवसेद्यावच्चरति सा व्रतम् ।
प्रायश्चित्ते ततश्चीर्णे कुर्याद् ब्राह्मणभोजनम् ॥
गोद्वयं दक्षिणां दद्याच्छुद्धिं स्वायंभुवोऽब्रवीद् ।

इति । कथंचनेतिवचनादिदमकामविषयमुक्तम् ।

इदानीं कामतो गमने प्रायश्चित्तमाह ।

चातुर्वर्ण्यस्य नारीणां कृच्छ्रं चान्द्रायणव्रतम् ॥
यथा भूमिस्तथा नारी तस्मात्तां न तु दूषयेत् ॥२३॥

चातुर्वर्ण्यस्त्रीणां कामतश्चण्डालसम्पर्के चान्द्रायणं कृच्छ्रं प्रायश्चित्तं व्रतं शोधकं भवति । तदाह संवर्त्तः ।

चण्डालं पुल्कसं म्लेच्छं श्वपाकं पतितं तथा ।
एतान् गत्वा स्त्रियः श्रेष्ठाः कुर्युश्चान्द्रायणं परम् ॥

इति । यद्यप्यत्र कामत इति नोपात्तं तथापि पूर्वस्याकामविषयत्वेनेदं कामविषये पर्यवस्यति प्रायश्चित्ताधिक्यात् ।

ननु

चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या ।
पतिघ्नी च विशेषेण जुङ्गितोपगता च या ॥

इति । जुङ्गितपदोपात्तप्रतिलोमगते स्त्रीणां वसिष्ठेन हीनवर्णोपभुक्ता या त्याज्या वध्यापि वा भवेदिति वर्णेभ्यो हीनो हीनवर्णश्चण्डालस्तद्गमने बृहस्पतिना च त्याग एवोक्तस्तत्कथं तत्रापि व्रताभिधानमित्यत आह । यथा चण्डालाद्युपभुक्ताया भूमेर्यथोक्तशुध्यनन्तरमुपादानमेव न तु परित्यागः । तथा चण्डालाद्युपभुक्ताया अपि स्त्रिया यथोक्तप्रायश्चित्ताचरणानन्तरं स्वीकार एव तस्मात्तां न दूषयेन्न परित्यजेदिति कामतो भोजनव्यवायाद्यत्यन्तसम्पर्के तु मरणान्तिकमेव । तदाहोशनाः ।

अन्त्यजेन तु सम्पर्के भोजने मैथुने कृते ।
प्रविशेत्सम्प्रदीप्तेऽग्नौ मृत्युना सा विशुध्यति ॥

इति । अत एव मरणान्तं प्रायश्चित्तमचिकीर्षन्त्या वासिष्ठत्यागो वार्हस्पत्यो वधो वा योजनीयस्तेन कामतः सकृद्गमने चान्द्रायणं विदधता मूलवाक्येनापि न विरोध इति । सगर्भायाश्चण्डालादिव्यवाये विशेषमाह ऋष्यशृङ्गः ।

अन्तर्वत्नी तु युवतिः संपृक्ता यान्त्ययोनिना ।
प्रायश्चित्तं न सा कुर्याद्यावद्गर्भो न निःसृतः ॥
न प्रचारं गृहे कुर्यान्न वाङ्गेषु प्रसाधनम् ।
न शयीत समं भर्त्रा न च भुञ्जीत बांधवैः ॥
प्रायश्चित्तं गते गर्भे विधिं कृत्वाब्दिकं चरेत् ।
हिरण्यमथवा धेनुं दद्याद्विप्राय दक्षिणाम् ॥ इति ।

इदानीं बन्दीकृतायाश्चण्डालादिसंपर्के प्रयश्चित्तमाह ।

बन्दिग्राहेण भुक्ताया हत्वा वध्वा बलाद्भयाद् ॥
कृत्वा सान्तपनं कृच्छ्रं शुध्येत्पाराशरोऽब्रवीत् ॥ २४ ॥

वन्दिग्राहो वन्दीकरणं तेन बलाद्रज्ज्वादिभिर्बध्वा कशादिभिर्हत्वा वा भयाद् ल्यब्लोपे पञ्चमीविधानात् भयमुत्पाद्य या स्त्री पूर्वानुषक्ता चातुर्वर्ण्यसम्बन्धिनी उत्तरानुषङ्गात्पापकर्मभिश्चण्डालाद्यैर्भुक्ता सा सान्तपनं कृच्छ्रं प्रायश्चित्तं वक्ष्यमाणलक्षणं कृत्वा शुध्येदिति वृद्धपराशरोऽब्रवात्। इदं तु द्विरभ्यासे। सकृद्गमनेऽग्रे प्राजापत्यविधानात्। न च द्व्यहसाध्यस्य सान्तपनस्य प्राजापत्यात् न्यूनत्वेनाभ्यासविषयत्वमयुक्तमिति शङ्कनीयम्। सप्ताहसाध्यस्यात्र विवक्षितत्वात्। तथा च त्रिरात्रोपवासवतः प्राजापत्यात्सप्ताहोपवासात्मकस्यास्य पञ्चगव्याशनक्लेशेनाधिकत्वात्। यद्यपि शुध्येदिति सामान्यतोऽभिहितम्। तथापि परलोकशुद्धिरेवात्र विवक्षिता न संग्रहः। बलात्कारादिदुष्टस्त्रीसंग्रहो विधिवोदित इति कलिवर्ज्यस्मरणात्। अत एव बृहस्पतिः।

अनिच्छन्ती तु भुक्ता या गुप्तां तां कारयेद्गृहे।
मलिनाङ्गीमधःशय्यां पिण्डमात्रोपजीविनीम्।
कारयेन्निष्कृतिं कृच्छ्रं पराकं वा ऽसमङ्गताम्।

इति। अयमर्थः। असममतिहीनं चण्डालादिकमनिच्छन्तीं सकृद्गतां स्त्रीं कृच्छ्रं द्विर्गतां पराकं वा कारयेत्। परन्तु स्वगृह एव गुप्तां वासो गृहान्तिके देय इति स्मरणादिति। पराकसान्तपनयोस्तु समानक्लेशत्वादेकविषयत्वमेव।

तत्रैव सकृत्सम्पर्के प्रायश्चित्तमाह।

सकृद्भुक्ता तु या नारी नेच्छन्ती पापकर्मभिः॥
प्राजापत्येन शुध्येत ऋतुप्रस्रवणेन च॥ २५॥

पापकर्मभिश्चण्डालादिभिरनिच्छन्ती वन्दीकृतिबन्धनताडनादिना बलात्सकृद्भुक्ता या नारी चातुर्वर्ण्यस्त्री सा यथोक्तेन प्राजापत्येन ऋतुदर्शनेन च शुध्येदिति। तदाह संवर्तः।

बलात्प्राप्ता भुक्ता चेद्वध्यमानेन चेतसा।
प्राजापत्येन शुद्धिः स्यात्तत् तस्याः पावनं परम्॥

इति । अत्रैव विषये सवर्णसम्पर्के ऋष्यशृङ्गः ।

बलेन कामिता नारी सवर्णेन कथं चन ।
प्रायश्चित्तं त्रिरात्रं वै तस्याः शुध्यर्थमादिशेद् ॥

इति । अन्यत्र तु स्त्रीणामकामतः प्रातिलोम्येन व्यवाये संवर्त्तः ।

ब्राह्मण्यां कामतो गच्छेत् क्षत्रियो वैश्य एव वा ।
गोमूत्रयावकैर्मासात्तदर्द्धाच्च विशुध्यति ॥
ब्राह्मण्याः शूद्रसंपर्के कथं चित्समुपागते ।
चान्द्रायणेन शुद्धिः स्यात्तत्तस्याः पावनं परम् ॥

इति । क्षत्रियसङ्गमेऽर्द्धमासं वैश्यसङ्गमे मासमिति द्रष्टव्यम् । यदेव ब्राह्मण्याः क्षत्रियसङ्गमे तदेव क्षत्रियाया वैश्यसङ्गमे यदेव ब्राह्मण्या वैश्यसङ्गमे तदेव क्षत्रियायाः शूद्रसङ्गम इत्याद्यूह्यम् । एकान्तरत्वस्य साम्याद्धतान्तराश्रवणाच्च । कामतस्तु बृहत्प्रचेताः ।

विप्रा शूद्रेण संपृक्ता न चेत्तस्मात्प्रसूयते ।
प्रायश्चित्तं स्मृतं तस्याः कृच्छ्रं चान्द्रायणत्रयम् ॥
चान्द्रायणे द्वे कृच्छ्रश्च विप्राया वैश्यसङ्गमे ।
कृच्छ्रचान्द्रायणे स्यातां तस्याः क्षत्रियसङ्गमे ॥
क्षत्रिया शूद्रसंपर्के कृच्छ्रं चान्द्रायणद्वयम् ।
चान्द्रायणं सकृच्छ्रं तु चरेद्वैश्येन सङ्गता ॥
शूद्रं गत्वा चरेद्वैश्या कृच्छ्रं चान्द्रायणात्परम् ।
इति । आनुलोम्येन व्यवाये तु विशेषमाह स एव ।
आनुलोम्येन कुर्वीत कृच्छ्रं पादावरोपितम् ॥

इति । क्षत्रियावैश्याशूद्राणां ब्राह्मणगमने त्रिपादार्द्धपादकृच्छ्राः क्रमेण भवन्ति । वैश्याशूद्रयोः क्षत्रियगमने त्रिपादार्द्धकृच्छ्रावित्याद्यूह्यम् । सवर्णव्यवाये तु पुरुषोक्तमेव प्रायश्चित्तम् । तदाह वृहस्पतिः ।

यत्पुंसः परदारेषु समानेषु व्रतं स्मृतम् ।
व्यभिचाराच्च भर्तुः स्त्री तदशेषं समाचरेद् ॥

इति। तदेतेषु सवर्णानुलोमप्रतिलोमव्यवायेषु त्रिष्वपि विलक्षणं प्रायश्चित्तमुक्तं षड्त्रिंशन्मते। ब्राह्मणी क्षत्रियवैश्यसेवायामतिकृच्छ्रकृच्छ्रातिकृच्छ्रौ चरेत्। क्षत्रिययोषितो ब्राह्मणराजन्यवैश्यसेवायां कृच्छ्रपादः कृच्छ्रार्द्धंप्राजापत्यं च शूद्रायां शूद्रसेवने प्राजापत्यं ब्राह्मणराजन्यवैश्यसेवायामहोरात्रं त्रिरात्रं कृच्छ्रार्द्धमिति। सगर्भाया व्यभिचारे स्मृत्यन्तरे विशेषः।

अन्तर्वत्नी तु या नारी समेताक्रम्य कामिभिः।
प्रायश्चित्तं न सा कुर्याद्यावद्गर्भो न निःसृतः॥
जाते गर्भे व्रतं पश्चात्कुर्यान्मासं तु यावकम्।
न गर्भदोषस्तत्रास्ति सस्कार्यः स यथाविधि॥ इति।

ननु वन्दीकृतायाश्चण्डालसंपर्कवत्सुरापानमपि सम्भवति। तत्र किं कार्यमित्यत आह।

पतत्यर्द्धं शरीरस्य यस्य भार्या सुरां पिबेत्॥
पतितार्द्धशरीरस्य निष्कृतिर्न विधीयते॥ २६॥

चातुर्वर्ण्यस्येत्यनुवृत्तावपि तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति त्रैवर्णिकस्यैव निषेधश्रवणाद्यच्छब्देन परामर्शः। तथा च यस्य त्रैवर्णिकस्य भार्या सजातीया, विजातीयायाः कलावभावात्, सुरां स्वस्वनिषिद्धां वक्ष्यमाणलक्षणां पिबति। तस्य शरीरस्यार्द्धं भार्यारूपं पतति। भार्याया अर्द्धशरीरत्वं श्रुतिसिद्धम्। अर्द्धो वा एष आत्मनो यत्पत्नीति। नन्विदं नारम्भणीयं सामान्यत एव

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥

इत्यादिना सुरापानस्य पातकत्वस्मरणात्। न च तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदित्यादिनिषेधेषु पुंस्त्वश्रवणात्स्त्रीणां पातित्याप्राप्ताविदमारभ्यते इति वाच्यम्। पुंस्त्वस्योद्देश्यगतत्वेन ग्रहे-

कत्ववदविवक्षितत्वात् । सुरापाननिषेधोऽयं जात्याश्रय इति स्थितिरिति स्मरणेनाहत्य जात्याश्रयताबोधनाश्चेति चेत् । मैवम् । आत्यन्तिकपातित्यविधानायेदमारभ्यत इति ब्रूमः । पतितं च तदर्द्धशरीरं चेति पतितार्द्धशरीरं तस्य भार्यारूपस्य निष्कृतिर्व्रतरूपप्रायश्चित्तानुष्ठानेव व्यवहार्यतासिद्धिर्न विद्यत इति । अत एव सुरापी व्याधिता चाधिवेत्तव्येत्याद्यधिवेदनस्मरणमपि तस्याः दृष्टार्थत्वेन युज्यते। तथा मद्यपस्त्रीनिषेवणमपि पुंस उपपातकं संगच्छते । तच्च कृतप्रायश्चित्ताया एव निषेवणं नत्वकृतप्रायश्चित्तायाः । तथात्वे यौनसंबंधस्य सद्यः पातकत्वेन महापातकं स्यात् । न चेदमर्द्धप्रायश्चित्तापवादेन संपूर्णप्रायश्चित्तविधानपरमिति वाच्यम्। तस्यापदार्थत्वादवाक्यार्थत्वाच्च । नापि स्त्रीकृतेन सुरापानेन पुरुषस्यैव पातित्यमनेनोच्यते वचनांजस्यात्, यस्य भार्येति पुंसम्बन्धपुरस्करणाच्च । अन्यथा या सुरां पिबेत्सा पततीत्येवोच्येतेति मन्तव्यम् । शास्त्रफलं प्रयोक्तरीति न्यायविरोधात् । किञ्च स्वकृतेऽपराधे प्रायश्चित्तेन शुद्धिर्भार्याकृतापराधे न च निष्कृत्यभाव इति महदेववैषम्यमनन्तरोक्तसांतपनप्रायश्चित्तासंगतिश्चेत्यास्तां तावत् । तस्माद्द्विजातिभार्याया निषिद्धसुरापाने न व्यवहार्यता प्रायश्चित्तेन तु परलोकशुद्धिर्भवतीति वचनान्तरसामर्थ्यादवगम्यत इति । ननु पतितार्द्धशरीरस्येत्यत्र बहुव्रीहेरपि सम्भवात्पत्युः प्रायश्चित्ताभाव एव कुतो नेष्यत इत्यत आह ।

गायत्रीं जपमानस्तु कृच्छ्रं सांतपनं चरेत् ।

सुरापभार्यः पुमान् गायत्रीं जपमानो वक्ष्यमाणलक्षणं सांतपनं कुर्यात् । जपमान इतिवर्तमानार्थप्रत्ययप्रयोगाद्यावद्व्रतानुष्ठानं जपानुवृत्तिः सिध्यति ।

सांतपनलक्षणमाह ॥

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥
एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतम् ॥ २७ ॥

समासान्तर्गतस्याप्येकरात्रशब्दस्य बुध्यविच्छिन्नस्य गोमूत्रादिभिः प्रत्येकं समुदितैश्च समन्वयेन सप्तरात्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।

एकैकं प्रत्यहं पीत्वा त्वहोरात्रमभोजनम् ।
कृच्छ्रं सांतपनं नाम सर्वपापप्रणाशनम् ॥
इति । द्विरात्रमाह याज्ञवल्क्यः ।
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
प्राश्यापरे तूपवसेत्कृच्छ्रं सांतपनं चरन् ॥
इति । तदनयोः कल्पयोर्यथायोगं विनियोगो द्रष्टव्यः ।

नन्वेवमस्तु व्यभिचारे प्रायश्चित्तं गर्भोत्पत्तौ तु कथमित्यतआह ।

जारेण जनयेद्गर्भं मृते व्यक्ते गते पतौ ॥
तां त्यजेदपरे राष्ट्रे पतितां पापकारिणीम् ॥ २८ ॥

या त्रैवर्णिकस्त्री पत्यौ मृते प्रेते व्यक्ते प्रत्यक्षे गते परोक्षे वा जारेण शूद्रेण निहितं गर्भं जनयेत्पूर्णकाले प्रजनयेत्तां पापकारिणीं पापाचरणशीलामत एव पापाभ्यासात्पतितां स्वराष्ट्रादुत्सार्य परराष्ट्रे त्यजेत् । तथा च वसिष्ठः ।

ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण संगताः ।
अप्रजाता विशुध्यन्ति प्रायश्चित्तेन नेतराः ॥

इति । शूद्रेणेतिवचनादन्यगर्भोत्पत्तौ जनयेदिति वचनाच्च शूद्रगर्भस्याप्यन्तराविनाशे वा न त्याग इत्युक्तम् । तथा चतुर्विंशतिमते ।

विप्रगर्भे पराकः स्यात् क्षत्रियस्य तथैन्दवम् ।
ऐन्दवञ्च पराकश्च वैश्यस्याकामकारतः ॥
शूद्रगर्भे भवेत्त्यागश्चण्डालो जायते यतः ।
गर्भस्रावे धातुदोषैश्चरेच्चान्द्रायणत्रयम् ॥

इति । ननु

स्त्रीणां नास्ति परित्यागो ब्रह्महत्यादिभिर्विना ।
तत्रापि गृहमध्ये तु प्रायश्चित्तानि कारयेत् ।

परित्यक्ता चरेत्पार्श्वं बहुधा वापि किंचन ।
तत्पापं शतधा भूत्वा बान्धवाननुगच्छति ॥

इति तत्रैव स्त्रीणामात्यन्तिकपरित्यागे दोष उक्तस्तत्कथमुच्यते तां त्यजेदपरे राष्ट्र इति । सत्यम् । प्रायश्चित्तार्हत्वे सति परित्यागस्या न्याय्यत्वात् । प्रायश्चित्तादि कारयेदिति स्मरणात् । तदभावे तु संसर्गनिवृत्तये तदत्यानुज्ञानात् । सचोपपादित एव प्रायश्चित्तेन नेतरा इति । अत एव ।

चतस्र एव संत्याज्याः पतने सत्यपि स्त्रियाः ।
श्वपाकोपहता या तु भर्तृघ्नी पितृपुत्रगा ॥
इति तत्रैव क्वचित्त्यागोऽभ्यनुज्ञायते । एतेन
चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या ।
पतिघ्नी च विशेषेण जुंगितोपगता च या ॥
इति वासिष्ठमपि वाक्यं स्पष्टीकृतम् ।

नन्वेवमस्तु गर्भितव्यभिचारायाम्, शङ्कितव्यभिचारायां तु कथमित्यत आह ।

ब्राह्मणी तु यदागच्छेत्परपुंसा समन्विता ॥
सा तु नष्टा विनिर्दिष्टा न तस्या गमनं पुनः ॥ २९ ॥

रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्द्धके ।
अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित्स्त्रियाः ॥

इत्याद्युक्तरक्षकातिरिक्तः पुमान्परत्वेन विवक्षितस्तेन पुंसा समन्विता प्रीत्यतिशयद्योतकहास्यादिव्यवहारपुरस्सरं सम्यगन्विता ब्राह्मणी यदा दशाहाधिकं कालं गृहान्तरं च ग्रामान्तरं देशान्तरं वा गच्छेत्सा नष्टेति पूर्वैर्विनिर्दिष्टा तस्याः पुनर्गमनं ज्ञातिषु प्रवेशो नास्तीति ।

किंच ।

कामान्मोहाच्च या गच्छेत्त्यक्त्वा बन्धून्सुतान्पतिम् ॥
सापि नष्टा परे लोके मानुषेषु विशेषतः ॥ ३० ॥

स्त्रीणां यस्यां यस्यामवस्थायां यो यो रक्षक उक्तो यथा तारुण्ये पतिर्वार्द्धक्ये पुत्रा उभयाभावे ज्ञातयस्तस्यां तस्यामवस्थायां कामात्स्वातन्त्र्यान्मोहात्स्त्री धर्मापरिज्ञानाच्च तं तं त्यक्त्वा या दशाहाधिकं कालमन्यत्र गच्छेत्सापि शास्त्रोल्लंघनजनितप्रत्यवायात्परलोके नष्टा नरकभाग्भवति। कथं चित्तविवृत्तावपि मानुषेषु स्वबन्धुषु प्रवेशाभावाद्विशेषतो नष्टा भवतीति। पितृपरित्यागापरिगणनन्तु कौमारे कामचारप्राबल्याद्दोषाभावमभिप्रेत्येति।

उक्तार्थस्य क्वचिदपवादमाह।

मदमोहगता नारी क्रोधाद्दण्डादिताडिता॥
अद्वितीयगता चैव पुनरागमनं भवेत्॥ ३१॥

मदः पत्यादितिरस्कारजनकविरागाभिमानातिशयस्तेन मोहः पत्यादिशुश्रूषायाः परधर्मत्वज्ञानविरहस्तेन वातीत्यागता आक्रान्ता स्त्रीपत्यादिभिः शिक्षार्थं दण्डादिना ताडिता सती क्रोधादपि परपुरुषसमन्वयव्यतिरेकेणाद्वितीया एकाकिन्येव क्वापि गता तथापि स्वबन्धुषु पुनरागमनं भवेत्प्राप्नुयादिति ताडनमधिवेदनस्याप्युपलक्षणम्।

तथा च मनुः।

अधिविन्ना तु या नारीनिर्गच्छेद्रुषिता गृहात्।
सा सद्यः सन्निरोधव्या त्याज्या वा कुलसंनिधौ।

इति। रुषितायाः कथं चिदनुनयासंभवे कुलसंनिधौ बन्धुमध्ये त्याज्या स्यादित्येतियावत्। इदं च समानन्यायत्वात्प्रकृतेऽपि द्रष्टव्यम्।

पुनरागमने कालावधिमाह।

दशमे तु दिने प्राप्ते प्रायश्चित्तं न विद्यते॥
दशाहं न त्यजेन्नारीं त्यजन्नष्टमृतां तथा॥ ३२॥

या ताडिता सती बहिर्निर्गता तया दशमेऽपि दिने स्वकीये गृहे प्राप्ते सति तस्या अनिर्णीते व्यभिचारे शङ्कामात्रेण प्रायश्चित्तं न

भवति। निर्गते तु तत्रापि भवत्येव। अत एव तादृशीं नारीं दशाहपर्यन्तं न त्यजेच्च व्यवहारं परिहरेत्तया सत्यपि तां त्यजन्नष्टो भवतीति । अनेन दशाहादूर्ध्वमनिर्गतेऽपि व्यभिचारे शङ्कामात्रेणापि प्रायश्चित्तं त्यागो वा भवत्येवेति गम्यते । यद्यप्युभयत्रापि शङ्का समानैव तथापि दशाहान्तर्वचनात्प्रायश्चित्ताभावः । परपुरुषसमन्वयेन स्वातन्त्र्येण वा गमने तु दशाहमध्ये अनिर्गतेऽपि व्यभिचारे प्रायश्चित्तं भवति। ऊर्ध्वमसंग्राह्यताप्रतिपादनात् ।

नन्वसंग्राह्यामपि भर्त्रादिश्चेत्संगृह्णाति तदा कथमित्यत्त आह ।

भर्त्ता चैव चरेत्कृच्छ्रं कृच्छ्रार्द्धं चैव बांधवाः ॥
तेषां भुक्त्वा च पीत्वा च अहोरात्रेण शुध्यति॥३३॥

या परपुरुषसमन्वयेन स्वातन्त्र्येण निर्गता तां दशाहान्तः प्रायश्चित्तमकारयित्वा तदूर्ध्वं कारयित्वापि वा संगृह्णन् भर्त्ता कृच्छ्रं चरेत् तत्रैव बांधवाः पितृश्वशुरादयोऽर्द्धकृच्छ्रं चरेयुः । यः पुनरकृतप्रायश्चित्तानां भर्त्रादीनां गृहे भुङ्क्ते पिबति वा सोऽप्यहोरात्रोपवासेन शुध्यतीति ।

नन्वस्तु परपुरुषसमन्वितायास्त्यागः क्रोधनिर्गतायास्तु स कथमित्यत आह ।

ब्राह्मणी तु यदा गच्छेत् परपुंसा विवर्जिता ॥
गत्वा पुंसां शतं याति त्यजेयुस्तान्तु गोत्रिणः ॥३४॥

यद्यपि ब्राम्हणी क्रोधादिना परपुंसा विवर्जितैव गच्छति तथाप्येकाकिनी गत्वा पुंसां शतमपि याति बाधकाभावादिति मत्वा गोत्रिणो बांधवास्तां तादृशीं त्यजेयुरेवेति ।

तादृश्याः प्रवेशे गृहस्याप्यशुद्धिमाह ।

पुंसो यदि गृहं गच्छेत्तदाऽशुद्धं गृहं भवेत् ॥
पितृमातृगृहं यच्च जारस्यैव तु तद्गृहम् ॥ ३५ ॥

सेयं दुर्ब्राह्मणी यदि पुंसः स्वपत्युर्गृहं पितृमातृगृहं जारस्यैव वा गृहं यच्चान्यदपि गच्छेत्तदा तत्रस्य कस्यापि गृहमशुद्धमप्रयतं भवेत् ॥

नन्वेवमप्रायत्ये तच्छुद्धिः कथं स्यादित्यत आह ।

उल्लिख्य तद्गृहं पश्चात्पञ्चगव्येन सेचयेत् ॥
त्यजेच्च मृन्मयं पात्रं वस्त्रकाष्ठांश्च शोधयेत् ॥३६॥

यस्मिन् गृहे सा ब्राह्मणी प्रविष्टा तद्गृहं सभूमिभित्युल्लिख्य पश्चात्पञ्चगव्येन सेचयेत् । तत्र स्थितं च समृन्मयं पात्रमखिलं त्यजेद्, वस्त्रं काष्ठं च द्रव्यशुध्युक्तप्रकारेण शोधयेत् ।

संभारान् शोधयेत्सर्वान्गोकेशैश्च फलोद्भवान् ॥
ताम्राणि पञ्चगव्येन कांस्यानि दश भस्मभिः ॥३७॥

संभारान् मुसलोलूखलादीन् द्रव्यशुध्युक्तप्रकारेणैव शोधयेत् । फलोद्भवान् नारिकेलादिफलनिर्मितान् पात्रविशेषांश्च गोबालैर्मार्जयेत् । ताम्रपात्राणि पञ्चगव्येन कांस्यपात्राणि दशवारमावर्तितैर्भस्मभिश्च शोधयेत् ।

किंच ।

प्रायश्चित्तं चरेद्विप्रो ब्राह्मणैरुपपादितम् ॥
गोद्वयं दक्षिणां दद्यात्प्राजापत्यद्वयं चरेत् ॥ ३८ ॥

गृहस्वामी विप्रः पर्षन्नियोजितैर्ब्राह्मणैरुपपादितमुपदिष्टं प्रायश्चित्तं चरेत् । न स्वत एव ज्ञात्वा अनेन रहस्यत्वेऽप्यस्य पर्षदुपदेशोक्तमित्युक्तम् । तच्च प्राजापत्यद्वयं कृत्वा गोद्वयं दक्षिणां दद्यादिति ॥

किंच ।

इतरेषामहोरात्रं पञ्चगव्यं च शोधनम् ॥ ३९ ॥

अन्येषां तद्गृहवासिनामहोरात्रोपवासेन पञ्चगव्यप्राशनेन च शुद्धिरिति ।

एवं ब्राह्मणशुद्धिमुक्त्वा क्षत्रियादिशुद्धिमाह ॥

उपवासैर्व्रतैः पुण्यैः स्नानसंध्यार्चनादिभिः ॥
जपहोमदयादानैः शुध्यन्ते ब्राह्मणादयः ॥ ४० ॥

ब्राह्मण आदौ येषां ते ब्राह्मणादयः क्षत्रियवैश्यशूद्राः उपवासादिभिर्यथायथमनुष्ठितैः शुध्यन्ति। तद्यथा उपवासैरशनत्यागैर्व्रतैरेकभुक्तादिभिः पुण्यैस्तीर्थादिगमनैः शूद्रः शुध्यति। स्नानं महानद्यादौ सन्ध्या संध्यामठादौ अर्चनं विष्णुशिवादीनां आदिशब्दाद्ब्राह्मणभोजनं चेत्येतैर्वैश्यः शुध्यति। जपो गायत्र्याः, होमस्तिलैः, दया दीनेषु, दानं गवादेस्तैः क्षत्रियः शुध्यतीति।

यदुक्तं संभारान् शोधयेदिति। तस्य क्वचिदपवादमाह।

आकाशं वायुरग्निश्च मेध्यं भूमिगतं जलम् ॥
न दुष्यन्ति च दर्भाश्च यज्ञेषु चमसा यथा ॥४१॥

आकाशं रिक्तभाण्डं वायुस्तत्साधनं व्यजनभस्त्रादिरन्यथाशुध्युक्तिप्रकारापवादानर्थक्यात्। अग्निर्महानसादिसंस्थो भूमिगतं जलं कूपवाप्यादिस्थंवारि कुशाश्चत्येते दुर्ब्राह्मणीसंपर्कवत्यपि गृहे विद्यमाना न दुष्यन्ति। यथा यज्ञेषु ऋत्विङ्मुखोच्छिष्टा अपि चमसा न दुष्यन्तीति।

यतस्त्वं विश्वस्मिन्नखिलमपि भूतं तृणमित
स्मृतौ मेरुं कृत्वा निवससि मदैवाच्युत इव ॥
तदेकां विज्ञप्तिं कलय भगवन्नच्युतमनाः
स्वनामान्तः स्वान्तं सफलय ममाप्यच्युत इति ॥१॥
धर्माधिकारिकुलकैरवकाननेन्दुः
श्रीरामपण्डितसुतेन विनायकेन ॥
व्याख्यात एष दशमोऽपि पराशरस्या-
ध्यायः स्मृतावनुपगम्य गमे विशुध्ये ॥ १ ॥

इति श्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनामधेयविनायकपण्डितकृतौ पराशरस्मृतिविवृतौ विद्वन्मनोहरायां दशमोऽध्यायः ॥

श्रीगणेशायनमः ॥

पिबन्तमसकृद्दृगञ्चलपुटैर्मुखेन्दोः सुधाम्
श्रियः श्रितनिजोरसः स्मितमिषात् श्रवन्तीं मुखात् ॥
स्फुटं तदुदितारुणच्छविभिरीषदुन्मीलितै-
र्जनार्दनमुपास्महे स्मरमहे महेच्छाकुलम् ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दुश्रीरामपण्डितसुतेन विनायकेन ॥
एकादशं विवरणं क्रियतेऽधुनात्राध्याये पराशरकृतावघमद्यशुध्यै ॥ २ ॥

एवं पूर्वाध्यायेनागम्यागमनप्रायश्चित्तमभिधायेदानीमभोज्यभोजनप्रायश्चित्तं वक्तुमेकादशाध्यायमारभते ॥

तत्रादावमेध्यादिभोजने प्रायश्चित्तमाह ।

अमेध्यरेतो गोमांसं चाण्डालान्नमथापि वा ॥
यदि भुक्तं तु विप्रेण कृच्छ्रं चान्द्रायणं चरेत् ॥ १ ॥

अमेध्यं विरामूत्रादि, तदाह देवलः ।
मानुषास्थि शवं विष्ठा रेतोमूत्रार्तवं वसा ।
स्वेदाश्रुदूषिका श्लेष्मा मद्यं वाऽमेध्यमुच्यते ॥ इति ।

अमेध्यग्रहणेन सिद्धेऽपि रेतोग्रहणे पृथगुपादानं मलान्तरसंग्रहार्थम् । तथा च मनुः ।

वसा शुक्रमसृङ्मज्जामूत्रं विट् कर्णविरानखः ।
श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः ॥

इति । गोमांसम्पक्वमपक्वान्वा चण्डालान्नं, पक्वामित्येतद्यदि विप्रोभुङ्क्ते तदा कृच्छ्रं चान्द्रायणं चरेत् । अयमर्थः । अमेध्यादीनामकामतः सकृद्भोजने कृच्छ्रं प्राजापत्यं वक्ष्यमाणं पञ्चगव्यस्नानपाने चरेत् । कृच्छ्रमितिसामान्योपादाने च कृच्छ्रातिकृच्छ्रतप्तकृच्छ्राणां ग्रहणम् ।

कामतस्तद्भोजने तु चान्द्रायणमिति । तत्राकामतो विरामूत्रादिभक्षणे गौतमः । अमत्या मद्यपाने पयो घृतमुदकं वायुः प्रतित्र्यहं

तप्तानि पिबेतप्तकृच्छ्रस्ततोऽस्य संस्कारो मूत्रपुरीषकुणपरेतसां प्राशनेनेति । कामतस्तद्भक्षणे तु बृहस्पतिः ।

अलेह्यानामपेयानामभक्ष्याणां च भक्षणे ।
रेतोमूत्रपुरीषाणां शुद्धिश्चान्द्रायणं स्मृतम् ॥ इति ।
अभ्यासे तु चतुर्विंशतिमतेऽभिहितम् ।
विण्मूत्रभक्षणे विप्रश्चरेच्चान्द्रायणद्वयम् । इति ।

अत्यन्ताभ्यासेऽपि तत्रैव श्वकाकोच्छिष्टक्रिमिकीटादिभक्षणे ।

अमेध्यानां च सर्वेषां चरेच्चान्द्रायणत्रयम् । इति ।
श्वादिमूत्रादिभक्षणे तु संवर्तः ।
श्वचण्डालखरोष्ट्राणां कपेर्गोमायुकाकयोः ।
प्राश्य मूत्रं पुरीषं वा चरेच्चान्द्रायणव्रतम् ॥ इति ।
कामतस्तद्भक्षणे तु चतुर्विंशतिमते ।
श्वादीनां चैव विण्मूत्रं चरेच्चान्द्रायणत्रयम् ॥ इति ।
बलाकादिमूत्रादिभक्षणे त्वङ्गिराः ।
बलाकाभासगृध्राखुखरवानरसूकराः ।
दृष्ट्वा चैषाममेध्यानि स्पृष्ट्वाचम्य विशुध्यति ॥
इच्छयैषाममेध्यानि भक्षयित्वा द्विजातयः ।
कुर्युः सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छया ॥ इति ।
विण्मूत्रादिसंसृष्टभक्षणे तु विष्णुः ।
मृद्वारिकुसुमादींश्च फलकन्देतुमूलकान् ।
विण्मूत्रदूषितान्प्राश्य चरेत्कृच्छ्रं च पादतः ॥
सन्निकृष्टेऽर्द्धमेव स्यात्कृच्छ्रस्याशु विशोधनम् । इति ।
दूषणं संसर्गः सन्निकर्षस्तदतिशयः ।

एतेन मूलोक्तं प्रायश्चित्तं मूत्रादिसंसृष्टान्नभक्षणे साक्षात्तद्भक्षणस्यासंभावादिति परास्तम् । मूत्रादिसंसृष्टजलपाने कूर्मः ।

अपो मूत्रपुरीषाद्यैर्दूषिताः प्राशयेद्यदा ।
तदा सान्तपनं कृच्छ्रं व्रतं पापविशोधनम् ॥

इति । अकामतो गोमांसभक्षणे च बृहद्यमः ।

वराहैकशफानां च काककुक्कुटयोस्तथा ।
क्रव्यादानां च सर्वेषामभक्ष्या ये च कीर्तिताः ॥
मांसमूत्रपुरीषाणां प्राश्य गोमांसमेव च ।
श्वगोमायुकपीनां च तप्तकृच्छ्रं विशोधनम् ॥ इति ।

प्रचेता अपि श्वशृगालकाककुक्कुटपारावतवानरचक्रवाकक्रव्यादखरोष्ट्रगजवाजिविड्वराहगोमानुषमांसभक्षणे तप्तकृच्छ्रमादिशेदिति । कामतो गोमांसभक्षणे तु संवर्तः ।

गोमांसं मानुषं चैव सूतिहस्तात्समाहृतम् ।
अभक्ष्यं तद् द्विजातीनां भुक्त्वा चान्द्रायणं चरेद् ॥ इति ।

इदमपि सकृद्भक्षणे अभ्यासे तु चान्द्रायणत्रयम् । तदाह प्रजापतिः ॥

चन्द्रायणत्रयं कुर्यादभक्ष्यपशुभक्षणे ।
एकमेवसकृद् भुक्त्वाचरेदाह प्रजापतिः ॥ इति ।

चण्डालान्नभक्षणे त्वङ्गिराः ।

चण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा ।
मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः ।
अन्त्यावसायिनामन्नमश्नीयाद्यश्च कामतः ॥
स तु चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा । इति ।

अकामतस्तप्तकृच्छ्रं कामतश्चान्द्रायणमिति । इदमेव प्रायश्चित्तं रजकान्नभक्षणेऽपि ज्ञेयम् । तदाह बौधायनः ।

बहूनामेकधर्माणामेकस्यापि यदुच्यते ।
सर्वेषामेव तत्कुर्यादेकरूपा हि ते स्मृताः ॥ इति

अतएवापस्तम्बः ।

रजकव्याधशैलूषवेणुचर्मोपजीविनः ।
एतेषां यस्तु भुञ्जीत द्विजश्चान्द्रायणं चरेत् ॥

इदं कामतो ज्ञेयम् । अत्रैव कामाभ्यासयोराह यमः ।

भुक्त्वाचैषां स्त्रियो गत्वा पीत्वापः परिगृह्य च ।
कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम् ॥

कामाकामाभ्यामत्यन्ताभ्यासे तुपातित्यतज्जातीयत्वे भवतः तदाह सुमन्तुः ।

चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति ॥ इति

पातित्ये महापातकप्रायश्चित्तम् । तज्ज्यतीयत्वे तु प्रायश्चित्ताभाव एव भवति । चण्डालाद्यभथापिवेत्यनास्थया तस्य धर्मोणा मन्येषामपि ग्रहणम् । तथाच हारीतः ।

यदन्नं प्रतिलोमस्य शूद्रजस्योत्तमस्त्रियाम् ।
महापातकिनश्चैव यदन्नं स्त्रीघ्नतघ्नयोः ॥
आरूढपतितस्यैव सगोत्राभर्तुरेव च ।
पाषण्डमाश्रितानां च यतेश्चैव तथैवच ।
अतिकृच्छ्रं चरेद्भुक्त्वा प्रमादाद्ब्राह्मणः सकृत् ।
मत्या चान्द्रायणं कुर्यादामं चेदर्द्धमेव वा ।
तद्धस्तभोजने चापि त्रिगुणं सहभोजने ।
चतुर्गुणं तदुच्छिष्टे पानीये चार्द्धमेव च ।
कृच्छ्राब्दपादमुद्दिष्टमज्ञानाभ्यासभोजने ।

मत्याभ्यासे तथा कुर्यात्त्रिंशत्कृच्छ्रं द्विजोत्तमः । इति उत्तमस्त्रियां ब्राह्मण्यां प्रातिलोम्येन शूद्रजश्चण्डालः । आरूढपतितः सन्यासानन्तरं पुनर्गृहस्थः । पाषण्डी बौद्धादिमतानुगः । अनाश्रितः सामर्थ्येऽप्यनाश्रमी । अन्नार्द्धत्वादिप्रतियोगि चान्द्रायणमेव सन्निहितत्वात् । कृच्छ्राब्दपादं त्रैमासिकं कृच्छ्रत्रिंशत्कृच्छ्रमब्दमिति । चण्डालादिस्पृष्टान्नभोजने तु शंखः । अमेध्यपतितचण्डालपुल्कसरजस्वलावधूतकुष्ठिकुणिस्पृष्टानि भुक्त्वा कृच्छ्रमाचरेदिति । चण्डालादिस्पृष्टस्य स्नानं विना भोजने पैठीनसिः ।

चण्डालपतितामेध्यैः कुनखैः कुष्ठिना तथा ।
संस्पृष्टस्तु यदा भुङ्क्ते तप्तकृच्छ्रं समाचरेदिति ॥

बाधपरिहारार्थं देवदत्तेति पक्षविशेषणम् । ईश्वरज्ञान जन्यत्वेनार्थान्तरतापरिहाराय साध्ये ऽपि तत्पदम् । यज्ञदत्तसुखादौ व्यभिचारवारणाय देवदत्तनिष्ठेति । देवदत्तात्ममनःसंयोगे व्यभिचारवारणाय प्रत्यक्षपदम् । आत्मत्वादौ व्यभिचारवारणाय कार्यपदम् । न च वृत्तिज्ञाने व्यभिचारस्तस्यापि साक्षिण्यध्यासेन तज्जन्यत्वादिति भावः । जन्यज्ञानातिरिक्तस्फुरणं कल्पयित्वा तस्य कारणत्वकल्पने ऽतिगौरवमित्याशङ्क्य स्फुरणस्यात्मस्वरूपत्वेनाकल्प्यत्वात्तस्यैकस्य कृतिकारणताकल्पने लाघवमित्याह । न च त्वत्पक्ष इति । वृत्तिव्यतिरिक्तं स्फुरणं कृतिहेतुरित्यङ्गीकृत्य तस्य विषयतादात्म्यमाक्षिपति । नन्वेवमिति । वृत्त्यभिव्यक्तस्फुरणे सत्यप्यनुमितिगोचरे कृत्यनुदयान्न तेन रूपेण तस्य हेतुत्वमित्याह । न तस्येति । विषयावच्छिन्नस्फुरणे सत्यपि कृत्यनुदयान्न तेन रूपेणापि हेतुत्वमिति चोदयति । ननु विषयेति । अभिव्यक्तस्य तस्य न व्यभिचार इति परिहरति । नाभिव्यक्तेति । नन्वपरोक्षवृत्त्यभिव्यक्तत्वेन रूपेण व्यभिचार इति चेन्न वृत्त्यपरोक्ष्यस्य विषयापरोक्ष्यप्रयुक्तत्वाद्विषयापरोक्ष्यस्य संवित्तादात्म्याधीनत्वाद्विषयाभिन्नसंवित्त्वेन कृतिहेतुत्वे सम्भवति न तत्परम्पराप्राप्तरूपेण हेतुत्वमुचितमित्यभिप्रेत्याह । ज्ञानगतमिति । तच्चेति । तदव्यवहितत्वं वृत्त्यभिव्यक्तप्रमातृचैतन्यस्य विषयावच्छिन्नचैतन्यस्य चैक्यं विना नेत्यर्थः । यदा प्रमातृचैतन्योपाधिभूतमन्तःकरणं वृत्तिरूपेण विषयाधिष्ठानचैतन्यं व्याप्नोति तदा विषयचैतन्यमपि प्रमातृचैतन्याभिन्नं भवति विषय-

चैतन्याभेदेन विषयस्याध्यासात्सोपि भवति प्रमातृव्यवहित इति भावः ॥

नन्वेवं सतीष्टो घटो द्विष्टो घट इत्याद्यनुभवादिच्छादिव्यतिरिक्तविषयगतं धर्मान्तरमप्यङ्गीक्रियतामिति चोद्यमयुक्तमित्याह । एतेनेति ।

एतेनेष्टो घटो द्विष्टो घट इत्यादिप्रतितन्दीपरस्परकृता तत्रेच्छाविषयत्वाद्यतिरिक्तधर्मान्तरानङ्गीकारे बाधकाभावात्तदङ्गीकारगौरवादिति ।

(स्फुरणस्य ज्ञाततापरपर्यायज्ञानजन्यत्वखण्डनम् ।) तच्च स्फुरणं ज्ञातताऽपरपर्यायं ज्ञानजन्यमिति केचित्तन्न । तस्य जन्यत्वे प्रमाणाभावात्तदङ्गीकारे गौरवादिति । नन्विदानीं घटः स्फुरतीति तस्य कालभेदावच्छेदानुभव एव जन्यत्वे प्रमाणमिति चेन्न । इदानीमहमस्मीति वत्तदनुभवस्य वर्तमानकालसम्बन्धित्वमात्रविषयतया प्रक्कालासम्बन्धित्वाविषयत्वात् । पूर्वकालासम्बन्धित्वे सत्युत्तरकालसम्बन्धित्वस्यैव कार्यत्वात् । एतावत्कालं नास्फुरदिदानीं स्फुरतीति तद्ग्राहकानुभवोऽप्यस्तीति चेन्न । तस्याऽज्ञानाभिव्यक्तस्फुरणविषयत्वे-

ऽप्युपपत्तेः । अविद्याया एव स्फुरणाभावत्वात् । ननु ज्ञानेन ज्ञातता न जायते चेज्ज्ञानस्य विषयनियमो न स्यात् । न ह्यात्मसमवेतस्य विषयेण साक्षात्सम्बन्धोऽस्ति, येन विषयविशेषे व्यवहारस्ततो जायेत ॥

वृत्तिस्फुरणभेदस्यानेकप्रमाणसिद्धत्वेनेत्यर्थः । इष्टत्वादैव तन्नास्तीत्याह । तत्रेच्छेति । ननु स्फुरणस्यात्मरूपत्वमुक्तमयुक्तं तस्योत्पत्त्यादिमत्त्वेनानात्मात्वादात्माभेदायोगादिति वार्तिककारीयाः प्रत्यवतिष्ठन्त इत्याह । तच्चेति । स्यादेतदेवं यद्युत्पत्त्यादिकमस्य प्रामाणिकं स्यान्न त्वेतदस्तीति दूषयति । नेति । इदानीं स्फुरतीति कालविशेषे प्रतीयमानत्वात्कालान्तरसत्त्वे च मानाभावात्कार्यत्वमिति चोदयति । नन्विति । तर्हि कालान्तरेऽसत्त्वेऽपि मानाभावाद्वर्तमानतयानुभवस्य नित्यत्वेऽपि सम्भवान्नतस्या नित्यत्वमिति दूषयति । नेदानीमिति । वर्त्तमानतावभासमात्रस्यानित्यत्वाप्रयोजकत्वे कस्य तर्ह्यनित्यत्वे प्रयोजकत्वमित्यत आह । पूर्वकालेति । तर्हि पूर्वकालासम्बन्धित्वमप्यनुभूयत इति चोदयति । एतावदिति । नास्फुरदिति । तत्स्फुरणावारकाविद्यैव प्रतिसन्धीयते न तु स्फुरणासत्त्वमिति परिहरति । न तस्येति । नास्फुरदिति नञा तदभाव एव प्रतीयत इत्यत आह । अविद्याया इति । अविद्यानिवृत्तेरधिष्ठानस्फुरणमात्रत्वात्तदभावोऽप्यविद्यैवेत्यर्थः । ज्ञाने नियतविषयकत्वानुपपत्त्या ज्ञानजन्या ज्ञातता विषयनिष्ठा सिध्यतीति चोदयति । ननु

ज्ञानेनेति । अस्तु तर्हि प्रभाकुम्भयोरिव साक्षात्सम्बन्धोऽपि विषयतानिषायक इत्यत आह । न ह्यात्मेति । ज्ञानस्यात्मगुणत्वेन विषयेण संयोगादिकं न सम्भवतीत्यर्थः । तर्हि मास्तु विषयनियम इत्याशङ्क्य व्यवहार नियमोऽपि न स्यादित्याह । येनेति ॥

तर्हि ज्ञानजनकमेव विषयत्वनियामकमित्याशङ्क्य किं जनकत्वमात्रं नियामकमुत समवायाद्यतिरिक्तत्वे-सति जनकत्वं विषयतया जनकत्वं वा । आद्यमतिप्रसङ्गेन दूषयति । न च ज्ञानज्ञेययोरिति ।

(ज्ञानजनकस्य विषयत्वनियामकत्वे दोषः) न च ज्ञानज्ञेययोर्जन्यजनकभाव सम्बन्ध इति वाच्यम् । आत्मादेरपि घटादिज्ञानजनकस्य तद्विषयत्वप्रसङ्गात् । न च समवायाद्यतिरिक्तं ज्ञानजनकं तद्विषय इति-वाच्यम् । आत्मनः स्वज्ञाने ऽप्यविषयत्वापत्तेः । न च विषयतया जनकं तथेति वाच्यम् । ज्ञानकालीनविषयत्वस्य तत्पूर्वकालीनजनकतानवच्छेदकत्वात् । घटादेः पूर्वविषयत्वे बीजानिरूपणाच्च । अत एव तज्जनकेन्द्रियसम्प्रयुक्तस्तद्विषय इति निरस्तम् । आत्मादावपि प्रसक्तेः । अनियतज्ञानकालीनस्य तस्य नियतज्ञानकालीनविषयत्वाप्रयोजकत्वाच्च । अतो यस्मिन्

विषये ज्ञानाज्ज्ञाततोत्पद्यते स एव तस्य विषयो नान्य इति। ज्ञातताभिन्नं स्फुरणमपि ज्ञानजन्यमेवेति चेत्तर्हि विषयनियमार्थं ज्ञानजन्या ज्ञातताऽऽस्थेया। तव मते परोक्षज्ञान इवापरोक्षज्ञानेप्यन्यत एव नियतविषयभानोपपत्तेः। न च परोक्षज्ञानेनाप्यर्थगता ज्ञातताधीयते। अतीतादिज्ञानविषयस्य तदानीमसत्त्वादन्नाश्रयकार्यायोगात्। तथा सति विनष्टेऽपि घटे लौहित्याद्युत्पत्तिप्रसङ्गात्॥

द्वितीये समवायिरूपस्यात्मनः स्वसमवेताहमिति ज्ञानविषयत्वं न स्यादित्याह। न च समवायीति। तृतीयमसम्भवेन दूषयन्ति। न च विषयतयेति। विषयताया ज्ञानघटितशरीरत्वेन ज्ञानसमकालायास्तत्कालपूर्वकालीनजनकताम्प्रत्यनवच्छेदकत्वादित्यर्थः। किञ्च घटादेर्विषयत्वे सिद्धे तेन रूपेण जनकत्वसिद्धिः, जनकत्वे च सिद्धे विषयत्वसिद्धिरितीतरेतराश्रयः स्यादित्याह। घटादेरिति। अस्तु तर्हि ज्ञानजनकेन्द्रियसन्निकृष्टत्वं विषयत्वनियामकमित्यत आह। अत एवेति। अतः शब्दार्थमाह। आत्मादाविति। गणनादिरादिपदार्थः। सम्प्रयोगस्य निमित्तकारणत्वेन ज्ञानकाले नियतत्वाभावेन तत्काले नियतविषयत्वानियामकतेत्याह। अनियतेति। परिशेषाज्ज्ञानजन्यज्ञातताधारत्वमेव विषयत्वनियामकमित्युपसंहरति। अतो यस्मिन्निति। ज्ञातताया ज्ञानजन्यत्वे ऽपि स्फुरणस्य किमायात-

मित्यत आह । ज्ञातताभिन्नमिति । ज्ञातताभावेऽपि विषयनियमदर्शनान्न ज्ञातताधारत्वं विषयतानियामकमिति दूषयति । तर्हीति । परोक्षेऽपि वध्यादौ ज्ञाततास्त्वित्याशङ्क्यातीताद्यर्थं सा न सम्भवती त्याह । न च परोक्षेति । अतीतादेरपि कारणात्मना सत्त्वात्तत्र ज्ञातताधीयतामित्याशङ्क्याह । तथा सतीति

अतीतादिव्यक्तेरभावेऽपि तत्सामान्यस्य सत्त्वात्तत्र ज्ञाततोत्पत्स्यत इत्याशङ्क्य तथापि सामान्यस्यैव तद्विषयतास्यान्न व्यक्तेरित्याह । न चातीतेति ।

न चातीताद्यर्थगतसामान्ये ज्ञातता भवत्विति वाच्यम् । अन्यज्ञाततयान्यस्य ज्ञानविषयतानियमानुपपत्तेः । उपपत्तौ वा घटत्वाश्रयनिखिलघटस्याप्ययं घट इति ज्ञानविषयत्वप्रसङ्गात् । ज्ञाततोत्पत्तौ पूर्वज्ञानज्ञेयसम्बन्धाभावेन ज्ञानस्य ज्ञेयविशेषनिष्ठज्ञातताजनकत्वानुपपत्तेश्च । नापि कृतिनियमार्थं ज्ञातताश्रणीया । तव मते निर्विशेषविषये ज्ञाततावत्कृतेरप्युपपत्तेः । नित्यस्फुरणेनापि तदुपपत्तेश्च । कस्तर्हि ज्ञानज्ञेययोः सम्बन्धो येन घटज्ञानं घटीयं भवेदिति चेत् । स्वरूपसम्बन्ध एवेति केचित् । अस्मदाचार्यास्तु प्रत्यक्षज्ञानज्ञेययोर्न स्वरूपसम्बन्धः सति मुख्यसम्बन्धे स्वरूपसम्बन्धकल्पना-

योगात् । किन्त्वन्तःकरणात्सहकारिसहिताद्विषयदेशव्यापिनी काचिद्वृत्तिर्जायते । तया च वृत्त्या विषयस्य यथायथं संयोगादिः सम्बन्धः । वृत्त्यभिव्यक्ततत्तदवच्छिन्नचैतन्येनाध्यासिकतादात्म्यं परोक्षे तु तदभावात् स्वरूपसम्बन्ध एवेत्यर्थः ॥

जातिव्यक्त्योस्तादात्म्यसम्बन्धात्सामान्याश्रयापि ज्ञातता व्यक्तिविषयतानियामिकेत्याशङ्क्यातिप्रसङ्गमाह । उपपत्तौ वेति । किञ्च ज्ञातताधारत्वस्यापि नियामकाभावान्न तेन विषयत्वनियम इत्याह । ज्ञाततोत्पत्तेरिति । अनुमेयादिषु कृत्यदर्शनात्तन्नियामकाज्ञाततास्थैयेत्याशङ्क्य ज्ञातताधारत्वनियमवत्तन्नियमो ऽप्यन्यत उपपद्यत इत्याह । नापीति । अस्मिन्मते च नित्यमपि स्फुरणं विषयतादात्म्येनाभिव्यक्तं कृतिहेतुरित्याह । नित्येति । ज्ञाततानङ्गीकारे ज्ञानस्य ज्ञेयविशेषेणसम्बन्धाभावाद्व्यवहारविशेषो न स्यादिति चोदयति कस्तर्हीति । वैशेषिकादिमते त माह । स्वरूपेति । सिद्धान्ते प्रतिकर्मव्यवस्थां दर्शयति । अस्मदिति । तुशब्दसूचितं वैषम्यमाह । प्रत्यक्षेति । तत्र तावद्वृत्तिरूपापरोक्षज्ञानस्य द्रव्येण संयोगः गुणादिना तु संयुक्ततादात्म्यं विषयनियामकमित्याह । किन्त्वन्तःकरणेति । पञ्चमीचापादाने । अपरोक्षवृत्त्याभिव्यक्ताधिष्ठानचैतन्यात्मकस्फुरणस्य विषयनियामकं सम्बन्धमाहवृत्त्यभिव्यक्तेति । विषयदेशसंसृष्टवृत्त्युदये विषयावच्छि-

न्नचैतन्यमपि वृत्तिमदन्तःकरणावच्छेदात् प्रमातृप्रमाण-चैतन्याभेदेनाभिव्यज्यते । तथा च प्रमातृतादात्म्या-द्विषयस्यापरोक्ष्यं प्रदीपेन प्रकाशत इति प्रदीपस्वरूपप्र-काशविषयत्ववन्मया विदित इति प्रमात्रात्मकफलवि-षयत्वानुभवादिति भावः। परोक्षस्य तु वृत्त्या संयोगादेर-भावाद्वृत्तितदवच्छिन्नचैतन्याभ्यां परेषामिव स्वरूपस-म्बन्ध एव नियामक इत्याह । परोक्ष इति ॥

इदानीं वृत्तिस्फुरणयोर्भेदमङ्गीकृत्यापरोक्षवृत्तेर्विष-यदेशव्यापित्वमुक्तमाक्षिपति । ननु किमिति ।

(वृत्तिस्फुरणयोर्भेदेऽप्यपरो-क्षवृत्तेर्विषयदेशव्यापित्वा-क्षेपपरिहारः ।)

ननु किं वृत्तिनिर्गमनेन प्रमा-तृगतयैव तया निखिलव्य-वहारोपपत्तेः, अतस्तन्निर्गमनमप्रमाणमिति चेत् । उक्तं तावत्प्रत्यक्षार्थापत्तिभ्यां प्रत्यक्ष-विषये प्रमातृसमवायिज्ञानातिरिक्तस्फुरणमा-श्रयमिति, तच्च स्फुरणमभिव्यक्तचैतन्यमेव-ज्ञातता प्रत्यक्षस्य निरस्तत्वात् । अभिव्यक्तिस्तु चैतन्यस्यावरणाविद्यानिवृत्तिरेव । ततोऽन्यस्य भावस्याभावस्य वानिरूपणात् । अविद्यानिवृ-त्तिश्चाविद्यासमानाश्रयविषयया वृत्त्या भवति । यज्ञदत्तस्य घटज्ञानेन तदीयपटाज्ञानस्य देवद-त्तघटाज्ञानस्याप्यनिवृत्तेः। तस्या लाघवेन प्रति-योगिसामानाधिकरण्याज्ञानजन्यत्वाच्च । विषय

चैतन्यावरणमज्ञानं च विषयावच्छिन्नचैतन्यगतमिति तद्गतया वृत्त्यापि भवितव्यम् । वृत्तेश्च विषयचैतन्यगतत्वं न निर्गमनाद्वृत्तेः सम्भवति । न चैवमनुपलब्धिबाधः । वृत्तेर्बहिरिन्द्रियायोग्यत्वात् ॥

विषयावच्छिन्नचैतन्यस्याविद्यानिवृत्त्यर्थं वृत्तिनिर्गमनमावश्यकमिति वक्तुमर्थं स्मारयति । उक्तं तावदिति । अर्थापत्तिशब्देन धारानुसन्धानाद्यनुपपत्तिर्देवदत्तकृतिर्देवदत्तज्ञानजन्येत्यनुमानं च परिगृह्यते । ज्ञानातिरिक्तस्फुरणं ज्ञाततैवेत्याशङ्क्याह । तच्च स्फुरणमिति । अस्तु तर्हि वृत्तिकृतः प्रकाश एव तदभिव्यक्तिरित्याशङ्क्य स्वप्रकाशचैतन्यस्य प्रकाशान्तराविषयत्वादविद्यानिवृत्तिरेवाभिव्यक्तिरित्याह । अभिव्यक्तिस्त्विति । अस्तु तर्हि प्रमातृसमवेतयैव वृत्त्याविद्यानिवृत्तिरित्यत आह । अविद्यानिवृत्तिश्चेति । भिन्नविषयस्य भिन्नाश्रयस्य वा वृत्तिज्ञानस्य नाज्ञाननिवर्त्तकत्वमिति व्यतिरेकमाह । यज्ञदत्तस्येति । ननु यदज्ञानं यं प्रति यदाऽऽवृणोति तदा तद्विषयज्ञानेन तन्निरसयनमभ्युपेयं, अन्यथैकघटावच्छिन्नचैतन्यस्य चैत्रमैत्रज्ञानसमानाधिकरणचैत्रघटज्ञानेन तदुभयाज्ञाननिवृत्तिप्रसङ्गात् । तथा च समानाधिकरणत्वमनपेक्षितमित्याशङ्क्याह । तस्या इति । यद्यप्येवं तथाप्यविद्यास्वसाधकप्रमाणो ज्ञाननिवर्त्यत्वेन सिध्यन्तलाघवेन स्वसमानाधिकरणज्ञाननिवर्त्यत्वेन सिध्यतीति तत्प्रमाणबलात्समानाधिकरणत्वमपि वाच्यमिति भावः ।

भवतु तर्हि प्रमातस्यैव विषयावरकमज्ञानमित्याशङ्क्य तस्यावरकत्वात् वाह्यतमोवदावृत्ताश्रितत्वं वक्तव्यमित्याह । वृत्तिविषयचैतन्येति । वृत्तेर्विषयचैतन्याश्रितत्वसाधनफलमाह । वृत्तेरिति । वृत्तेर्बहिर्निर्गमने घटच्छिद्रनिर्गतदीपप्रभावत्सादृश्येनेत्याशङ्क्याह । न चैवमिति ॥

तर्कितेऽर्थेऽनुमानं प्रयुङ्क्ते । तथा चेति ।

(उक्तेऽर्थेऽनुमानप्रयोगः) तथा च घटावच्छिन्नचैतन्यस्याविद्यानिवृत्तिः, प्रतियोगिसमानाश्रयज्ञानजन्या, अविद्यानिवृत्तित्वान्मूलाज्ञाननिवृत्तिवत् । न च साध्यविकलो दृष्टान्तः । चरमान्तःकरणवृत्तेरप्यन्तःकरणाभिन्नसदधिष्ठानत्वात् । अपि च विषयापरोक्षार्थमपि वृत्तेर्निर्गमनं वाच्यमन्यथा विषयस्य प्रमात्रव्यवहितत्वलक्षणापरोक्षत्वानुपपत्तेः, वृत्तिद्वारा विषयावच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेद एव तदध्यस्तविषयस्यापि तत्सम्भवात्। तथा च प्रत्यक्षो घटादिः स्वाकारवृत्तिसंयुक्तप्रत्यक्षद्रव्यत्वादात्मवत् । विपक्षे चानुमेयस्येवाप्रत्यक्षत्वापत्तिर्बाधिका । अत एव वृत्तेः संयोगपरिमाणादिद्रव्यत्वव्यवस्थापकगुणसत्त्वाद्द्रव्यत्वसिद्धिः ॥

मूलाज्ञाननिवृत्तौ सिद्धसाधनतापरिहाराय घटा-

वच्छिन्नेति विशेषणम् । इन्द्रियसन्निकर्षादिनार्थान्तरवार णाय ज्ञानपदम् । चिन्मात्रस्य मूलाज्ञानाश्रयत्वात्तन्निवर्तकवृत्तेः प्रमातृनिष्ठत्वाद्वैय्यधिकरण्यमित्याशङ्क्याज्ञानाश्रयस्यैव चिन्मात्रस्य सर्वाधिष्ठानतया वृत्तिप्रत्यय्याश्रयत्वान्नैवमित्याह । न च साध्येति । किञ्चैकान्तःकरणसम्बन्धात्प्रमातृप्रमाणप्रमेयचैतन्यानामेकलोलीभावेनाभिव्यक्तत्वेन तदध्यस्तविषयापरोक्ष्यसम्भवाद्वृत्तिरूपेण परिणातान्तःकरणोपहितत्वं विषयावच्छिन्नचैतन्यस्यावश्यकमित्याह । अपि चेति । अत्राप्यनुमानमाह । तथा चेति । स्वाकारवृत्तिसंयुक्त इति । स्वाकारवृत्त्या स्वरूपसम्बन्धवान्न भवतीत्यर्थः । स्वशब्दः पक्षवाची । तथा च वृत्तौ न व्यभिचारः । न वा दृष्टान्तः सा यविकलः । स्वरूपस बन्धमात्रवत्वे दोषमाह । विपक्षे चेति । ज्ञानघटयोः स्वरूपसम्बन्धनिषेधे परिशेषात् संयोग एव पर्यवस्यति । तथा च बुद्धेर्गुणत्वक्षतिरित्याशङ्क्य इष्टापत्तिरित्याह । अत एवेति ॥

ननु वाचस्पतिमते घटावच्छिन्नचैतन्यावरकमप्यज्ञानं जीवनिष्ठम् । अर्थापरोक्षं चापरोक्षज्ञानविषयत्वप्रयुक्तम् । ज्ञानापरोक्षत्वं च करणविशेषजन्यत्वप्रयुक्तमित्यभिमतम् । वृत्तिनिर्गमनेन विना किमनुपपन्नमिति तत्राह । केचित्त्विति ।

(अत्र वाचस्पति संवादः) केचित्तु घटप्रत्यक्षं घट एव व्यवहार मुत्पादयति न पट इति नियमेन तस्य घटेन सह पटव्यावृत्तसम्बन्धसिद्धौ स्वरूपसम्बन्धस्य

सम्बन्धिद्वयस्वरूपमात्रात्मकस्य पटसाधारणत्वान्मुख्यसम्बन्धे सम्भवत्यमुख्यसम्बन्धकल्पनायोगाच्च संयोगादिसिद्धौ वृत्तेर्निर्गमनं वाच्यम् । अनुमितेस्तु नैवं निर्गमहेत्विन्द्रियसन्निकर्षाभावात् । व्यवहारनियमस्यानिर्वचनीयवादे अविद्ययैवोपपत्तेः । तस्या अघटितघटनापटीयस्त्वादित्याहुः ॥

ननु स्वरूपसम्बन्ध एव नियतव्यवहारहेतुः तथा च न वृत्तेर्निर्गमनमपेक्षितमित्याशङ्क्य तस्य चक्षुरादिसाधारणत्वान्न नियामकत्वमित्याह । स्वरूपसम्बन्धस्येति । किञ्च यथा परमते चक्षुषः प्राप्यकारितानिर्वाहाय ध्रुवादिमण्डलेनास्य संयोगस्तदर्थं निर्गमनं च कल्प्यते तत्कस्य हेतोः, सम्भवति मुख्यसम्बन्धे स्वरूपसम्बन्धस्याकल्पनीयत्वात् । एवमत्रापि प्रत्यक्षवृत्तेर्विषयेण संयोगादिसम्भवात्तदभिव्यक्तचैतन्यस्य तादात्म्यसम्भवात्तदर्थं वृत्तिनिर्गमनं वाच्यमित्याह । मुख्यसम्बन्ध इति । तर्हि वृत्तित्वाविशेषादनुमित्यादेरपि निर्गमनं स्यादित्याशङ्क्य क्लृप्तकारणाभावान्नैवमित्याह । अनुमितेस्त्विति । कथं तर्हि ततो व्यवहारनियम इत्याशङ्क्याह । व्यवहारनियमस्येति । अविद्या वा कथमसम्बद्धविषयव्यवहारनिर्वाहिकेत्याशङ्क्यातीतादेरप्यनिर्वचनीयसूक्ष्मरूपेण विद्यमानत्वात्परोक्षविषयमात्रस्याविद्यकस्वरूपसम्बन्धविशेषादेव व्यवहारनियम इत्याह । तस्या इति ॥

वृत्तिनिर्गमनेऽनुपपत्तिर्वक्तुं तत्स्वरूपं विमर्शति । अथ केयमिति ।

(वृत्तिस्वरूपे पूर्वपक्षः) अथ केयं वृत्तिर्यस्या निर्गमनं निरूप्यते? न तावत्पराभिमतज्ञानवदात्मगुणः । तस्य निष्क्रियत्वात् । नापि द्रव्यम् । तस्यात्मसमवयानुपपत्तेः । आत्मनो द्रव्यासमवायित्वात् । नाप्यन्तःकरणसमवेतं द्रव्यम् । कार्यद्रव्यस्य स्वाश्रयं विनान्यत्रागमनात् । स्वाश्रयेण सहैव गच्छतीति चेन्न । मूर्तद्रव्यस्य युगपद्विरुद्धदेशसम्बन्धासम्भवेन पूर्वदेशविश्लेषे मरणप्रसङ्गात् । देहावच्छिन्नात्मनो वियोगस्यैव मरणत्वात् । न च विषयदेश एव वृतिरारभ्यत इति वाच्यम् । तदुपादानस्यान्तःकरणस्य तत्राभावात् ॥

किं वैशेषिकाद्यभिमतज्ञानमिव गुणः, उत सांख्याभिमतज्ञानमिव द्रव्यमथवा भट्टाभिमतज्ञानमिव क्रियेति किं शब्दार्थः । आद्ये क्रियारहितत्वान्निर्गमनानुपपत्तिरित्याह । न तावदिति । द्वितीयं निराकरोति । नापीति । तत्र किमात्मसमवेतद्रव्यमुतान्तःकरणसमवेतम् । नाद्यः स्पर्शरहितस्यात्मनो द्रव्यासमवायित्वादित्याह । तस्येति । द्वितीयं दूषयति । नेति । अत्रापि वक्तव्यम्, किं वृत्तिरन्तःकरणेन सहैव विषयदेशं गच्छति उत स्वयमेव, अथवा विषयदेश एवोत्पद्यत इति । न तावत् द्वितीयकल्प इत्याह ।

कार्यद्रव्यस्येति । आद्यमनूद्य दूषयति । स्वाश्रयेणेति । प्राणोत्क्रमणाभावान्न मरणमित्याशङ्क्यान्तःकरणगमने । तदपि स्यादित्यभिप्रेत्याह । देहावच्छिन्नेति । तृतीयं दूषयति । न चेति ।

आद्यतृतीये ऽपि किं परिस्पन्दलक्षणा क्रिया, उत परिणामलक्षणा । उभयथापि किमात्मसमवेता, उतान्तःकरणसमवेता । सर्वथाप्यनुपपत्तिरित्याह । अत एवेति ।

अतएव न क्रियापि वृत्तिरात्मनि परिस्पन्दपरिणामयोरसम्भवात् । अन्तःकरणगतयोश्च तयोराश्रयं विना अगमनादिति चेत् ।

(वृत्तिस्वरूपनिरूपणम्) **उच्यते, अन्तःकरणस्य स्वाश्रयस्यस्यैव चक्षुरादेरिव देशान्तरप्राप्तलूतावस्थावृत्तिरित्युच्यते । सा च चक्षुरादिनिमित्तसम्बन्धात्प्रत्यक्षस्थले विषयव्यापिनी भवत्यनुमेयादौ तु नैवम् । तत्सहकारिण इन्द्रियसम्बन्धस्यैवाभावात् । एतेन यदन्तःकरणं सङ्कोचविनाशशीलं स्वदेशस्थमेव वृद्धिं गतं वृत्तिरित्युच्यते ? कृतं तर्हि चक्षुरादिना, तस्य तेन विनापि सत्त्वात्, वृद्ध्यर्थं च तदपेक्षायां वृद्धेस्ततोऽन्यत्वान्नोक्तदोषपरिहार इति निरस्तम् । कार्यस्य सदसत्त्ववादिमत एवास्योपालम्भस्य प्रसङ्गात् । अनीर्वच-**

नोयवादे ऽस्यानवकाशत्वात् । कार्यद्रव्यमात्रस्य स्वसमवायिदेशादधिकदेशत्वाच्च । अतो ऽन्तःकरणवृत्तिस्तस्यैवावस्थाविशेषो द्रव्यम् ॥

सावयवमन्तः करणं चक्षुवत्सङ्कोचविकाससशीलं तद्वृद्ध्यधीनवृद्धिमच्च । तथा च तस्य विस्तीर्णावृत्तिरिति नोक्तविकल्पावकाश इति परिहरति । उच्यत इति । ननु विस्तीर्णावस्यापि किमन्तःकरणमेव किं वा ततोऽन्या । आद्ये न चक्षुर्वृद्ध्यपेक्षास्यादन्तःकरणस्य तया विनापि सत्त्वात् । द्वितीये पुनर्गुणादिविकल्पप्रसङ्गादिति चोद्यं चक्षुर्दृष्टान्ताभिधानेन निरस्तमित्याह । एतेनेति । किञ्च वृद्धेर्भेदादिना दुर्निरूपत्वं चक्षुरादेस्तत्त्वतोवृद्धिमङ्गीकुर्वाणस्य तवैव दोषावहमस्माकन्तु कारणस्यैव तत्तद्दुर्निरूपरूपान्तरापत्तिमङ्गीकुर्वतां नायमुपालम्भ इत्याह । कार्यस्येति । यदुक्तं वृत्तेर्द्रव्यत्वे ऽन्तःकरणादधिकदेशत्वं न सम्भवतीति तत्राह । कार्यद्रव्येति । आद्यतन्त्वारब्धस्य पटस्यान्त्यतन्तुदेशेऽपि दर्शनादित्यर्थः । न च तत्राप्युपादानान्तरमस्तीति वाच्यमत्रापि ब्रह्मरूपोपादानस्य विषयदेशेऽपि सत्त्वादिति भावः । वृत्तेः संयोगादिमत्वाद्द्रव्यत्वमित्युपसंहरति । अत इति ॥

ननु वृत्तेस्त्रिक्षणावस्थायित्वाच्छब्दवद्द्रव्यत्वमनुपपन्नमिति चोदयति । नन्विति ।

(वृत्तेर्द्रव्यत्वे चोद्यपरिहारौ) ननु यदि वृत्तिरन्तःकरणस्यैवावस्थाविशेषो द्रव्यमित्युच्येत, तदा कथं प्रतिक्षणं विष-

यज्ज्ञानानां विनाशः । द्रव्यस्याक्षणिकत्वात् । तद्विनाशहेतोरनिरूपणाच्च । न चोत्तरवृत्त्या पूर्ववृत्तिनिरास इति वाच्यम् । एकद्रव्यवति-द्रव्यान्तरानारम्भादिति चेन्न तु वृत्तिविनाशे वृत्त्यन्तरं हेतुः । सुषुप्तिपूर्वक्षणवृत्तेरपि नाशप्रसङ्गात् ।

किञ्चवृत्तेर्गुणत्वे शब्दवद्विरोधिगुणोदयान्नाशः स्याद्द्रव्यत्वे तु नाशकारणमपि नास्तीत्याह । तद्विनाशेति । गुणत्वपक्ष इव द्रव्यत्वपक्षे ऽपि वृत्त्यन्तरोदयादेव विनाशः किन्न स्यादित्याशङ्क्य पूर्वद्रव्यविनाशमन्तरेण तदाश्रये द्रव्यान्तरोत्पत्तिरेव न सम्भवतीत्याह । न चोत्तर-वृत्त्येति । कारणविनाश एव वृत्तिविनाशे हेतुस्तस्याक्षिच-णावस्थायित्वनियमेप्यसिद्ध इति वक्तुं पराभिमतविनाश-कारणं दूषयति । न तु वृत्तिविनाश इति ॥

उपान्त्यवृत्तिविनाश एव तत्र हेतुरित्याशङ्क्याननुग-मात्कारणविनाशद्वारा वानुगतो वृतिविनाशहेतुरित्याह । अपित्विति ।

(वृत्तिविनाशहे-तोरनुगतत्वम्) अपि तु तद्धेतोरिन्द्रियमनःसंयोगादे-र्विनाश एव कारणविनाशत्वेनानुगतो वृत्तिवि-नाशमात्रे हेतुः । न च निमित्तविनाशाद्द्रव्यवि-नाशो न दृष्ट इति वाच्यम् । कारणान्तरानिरू-

तस्य वृत्तौ पूर्वमिति पूर्वनिपातः। महान्तं धर्मं श्रित इति सापेक्षत्वाद्वृत्त्यभावः। यदा महांश्चासौ धर्मश्च महाधर्म इति तदा महाधर्मश्रित इति भवति॥

स्वयं क्तेन॥ २२॥

स्वयमित्येतत् भिसंज्ञं क्तान्तेन सह षसो भवति। इबधिकारो ऽसम्भवादिमं योगमुत्प्लुत्य गच्छति। स्वयन्धौतौ पादौ। स्वयंगुप्ताः। कृद्ग्रहणे तिकारकपूर्वस्यापि ग्रहणम्। स्वयंविलीनमाज्यम्। एकपदं प्रयोजनम्। स्वयंधौतस्येदं स्वायंधौतम्॥

खट्वा ऽक्रमे॥ २३॥

आचार्यासनं खट्वा। उत्पथगमनमक्रमः। खट्वाशब्द इबन्तः क्तान्तेन सह षसो भवति अक्रमे। खट्वारूढो जाल्मः। खट्वाश्रितः। खट्वास्तुतः। सर्व एते अविनीतपर्यायाः। गुरुभिरनुज्ञातेन खट्वा आरोढव्या तदन्यथाकरणमक्रमोऽत्र प्रतीयते। अत्रापि वृत्तिपदेनाक्रमो गम्यत इति नित्यः सविधिः। वाक्यं सादृश्यमात्रेण। अक्रम इति किम्। खट्वामारूढोऽध्यापको ऽध्यापयति॥

सामि॥ २४॥

सामि इत्यर्द्धवाचि भिसंज्ञं तत् सुबन्तं क्तान्तेन षसो भवति। सामिकृतम्। सामिभुक्तम्। सङ्घाताद्वृदुत्पत्तिः प्रयोजनम्। इबित्युपेक्षया गच्छति॥

कालाः॥ २५॥

कालवाचिनः शब्दा इबन्ताः क्तान्तेन सह षसो भवति। कालाध्वन्यविच्छेद इत्यनेन या विहितेप् तस्या

उत्तरसूत्रेणाक्तान्तेन वृत्तिं वक्ष्यति विच्छेदे क्तान्तेनेहोदाहरणम् । षण्मुहूर्त्ताश्चराः । ते उत्तरायणेऽहर्गच्छन्ति । दक्षिणायने रात्रिम् । तेन नास्त्यविच्छेदः । अहरतिसृता मुहुर्त्ताः । अहःसंक्रान्ताः । रोसुपीत्यन्हो नकारस्य रेफादेशः । रात्र्यारूढाः । रात्रिसंक्रान्ताः । मासं प्रमितो मासप्रमितश्चन्द्रमाः । मासं प्रमातुमारब्धः प्रतिपच्चन्द्रमाः । तेन विच्छेदः ॥

अविच्छेदे ॥ २६ ॥

क्तान्तेनेति निवृत्तम् । अविच्छेदोऽत्यन्तसंयोगः । कालाः इबन्ताः सुबन्तेन सह षसो भवति अविच्छेदे । अविच्छेदश्च कालस्य द्रव्यक्रियागुणैः सम्बन्धिभिर्व्याप्तिः । अत्यन्तं सुखमत्यन्तसुखम् । अत्यन्तरमणीयम् । सर्वरात्रकल्याणी । सर्वरात्रशोभना । कालाध्वन्यविच्छेद इतीप् ॥

भा गुणोक्त्यार्थैनोनैः ॥ २७ ॥

भान्तं गुणोक्त्या अर्थशब्देन गुणवाचिभिश्च शब्दैः सह षसो भवति । शङ्कुलया खण्डः शङ्कुलाखण्डः । गुणवचनाद्विति मतोरुप् । एवं गिरिणा काणः गिरिकाणः । मदेन पटुर्मद पटुः । कुसुमैः सुरभिः कुसुमसुरभिः । कार्यकारणभावलक्षणमत्र सामर्थ्यं शङ्कुलादिकृतत्वात् खण्डत्वादीनाम् । उक्तिग्रहणं किमर्थम् । उच्यते इत्युक्तिः । गुणेनोक्तिर्गुणोक्तिः । गुणद्वारेण द्रव्ये यः शब्दो वर्तते तेन वृत्तिर्यथा स्यात् केवलेन गुणेन मा भूत् । मदेन पाटवम् । वृत्तेन पाटवम् । अर्थेन । धान्येनार्थो धान्यार्थः । पुण्येनार्थः पुण्यार्थः । अर्थशब्दोऽत्र प्रयोजनवाची । ऊनैः । माषेणोनो माषोनः । माषविकलम् । एतैरिति किम् । गोभिर्वपावान् । अस्त्यत्र

कार्यकारणभावः । गोभिः कृतत्वाद्वपावत्वस्य । इह कस्मान्न भवति । अक्ष्णा काणः । असामर्थ्यात् । नात्र काणत्वमक्षिकृतमन्येन केनापि काणः कृतः । केवलमक्ष्णा काणत्वयुक्ता लक्ष्यते । इह कस्मान्न भवति । दध्ना पटुः । घृतेन पटुः । अनभिधानात् ॥

पूर्वावरसदृशकलहनिपुणमिश्रश्लक्ष्णसमैः ॥२८॥

पूर्व-अवर-सदृश-कलह-निपुण-मिश्र श्लक्ष्ण-सम इत्येतैः सह भान्तं षसो भवति । मासेन पूर्वो मासपूर्वः । संवत्सरपूर्वः । मासावरः । संवत्सरावरः । अस्मादेव वचनाद्वा । हेतौ वा । पित्रा सदृशः । पितृसदृशः । भाऽतुलोपमाभ्यां तुलार्थैरिति भा । विद्यया सदृशो विद्यासदृशः । असिना कलहोऽसिकलहः । वाचा निपुणो वाङ्निपुणः । गुडेन मिश्रा गुडमिश्राः । तिलमिश्रा धानाः । वाचा श्लक्ष्णो वाक्श्लक्ष्णः । जिह्वाश्लक्ष्णः । मात्रा समो मातृसमः । कुलेन समः कुलसमः ॥

साधनं कृता बहुलम् ॥ २९ ॥

साधनं कारकं तत् कृदन्तेन बहुलं षसो भवति । कर्तृ । अहिना हतोऽहिहतः । करणम् । विषेण हतो विषहतः । कृद्ग्रहणे तिकारकपूर्वस्यापि । नखनिर्भिन्नः । तथा देवदत्तेन नखैर्निर्भिन्नः देवदत्तनखनिर्भिन्नः । कर्म । ग्रामं गमी ग्रामगमी । ओदनं बुभुक्षुरोदनबुभुक्षुः । अपादानम् । ग्रामनिर्गतः । अधर्मजुगुप्सुः । सम्प्रदानम् । पादाभ्यां ह्रियते पादहारको भूपः । अधिकरणम् । गले चोपते गलेचोपकः । युद्धाबहुलमिति बहुलवचनादुभयत्र कर्मणि

एवुच् । क्वचिन्न भवति । दात्रेण लूनवान् । परशुना छिन्नवान् । व्यान्तैरधिकार्थवचन इष्यते । कुक्कुटैः सम्पात्याः कुक्कुटसम्पात्या ग्रामाः । अत्यासन्नताकथनम् । काकपेया नदी । श्वलेह्यः कूपः । कण्टकसंचेय ओदनः । बाष्पच्छेद्यानि तृणानि । क्वचिन्न भवति । काकैः पातव्याः । काकैः पानीया नदी । क्वचिदधिकार्थाभावेऽपि । बुसोपेन्धयम् । तृणोपेन्धयम् । पूर्वमुत्तरञ्च कारकविभक्तीलक्षणं सविधानमस्यैव प्रपञ्चः । साधनमिति किम् । भिक्षाभिरुषितः । हेतौ भा । कृद्ग्रहणं किम् । कृदन्तेनैव वृत्तिर्यथा स्यात् सुबन्तेन मा भूत् । अभ्रविलिप्तो । क्तादल्प इत्यकारान्तात् ङाविधिः सिद्धः । सुप्पुंलिङ्गयुक्ताद्भवति ॥

भक्ष्यान्नाभ्यां मिश्रणव्यञ्जने ॥ ३० ॥

मिश्रणव्यञ्जनवाचिनी सुबन्तेन भक्ष्यान्नवाचिभ्यां यथासंख्यं षसो भवति । गुडेन मिश्रा धाना गुडधानाः । वृत्तौ क्रियाया अन्तर्भावादप्रयोगः । एवं गुडपृथुकाः । तिलपृथुकाः । व्यञ्जनम् । दध्ना उपसिक्त ओदनो दध्योदनः । घृतौदनः ।

अप्तदर्थार्थबलिहितसुखरक्षितैः ॥ ३१ ॥

तस्मै इदं तदर्थम् । अबन्तं तदर्थेनार्थशब्देन च बलिहित-सुख-रक्षित इत्येतैश्च सह षसो भवति । रथाय दारु । रथदारु । कुण्डलाय हिरण्यम् । कुण्डलहिरण्यम् । बहुलग्रहणानुवृत्तेः प्रकृतिविकृतिभावे तदर्थेन वृत्तिः । विकृतिः प्रकृत्या सह इत्यर्थः । इह न भवति । रन्धनाय स्थाली । अवहननायोदूखलम् । इदमेव ज्ञापकं तादर्थ्ये

अप् भवति । कथमश्वघासो हस्तिविधेति । तासेन सिद्धम् । अर्थशब्देन नित्यं वृत्तिः । मात्रे इदं मात्रर्थम् । त्रिलिङ्गता लोकाश्रयत्वाल्लिङ्गस्य । आतुरार्था यवागूः । आतुरार्थः सूपः । देवाय बलिः । देवबलिः । गृहबलिः । तादर्थ्ये अप् । गोभ्यो हितं गोहितम् । अश्वहितम् । हितयोगे इदमेव ज्ञापकमपः । गोभ्यः सुखं गोसुखम् । अप्चाशिष्येत्यादिना अप् । गोभ्यो रक्षितं गोरक्षितम् । तादर्थ्ये अप् ।

का भीभिः ॥ ३२ ॥

बहुवचनादर्थविज्ञानम् । कान्तं भीवचनैः सह षसो भवति । वृकेभ्यो भीः वृकभीः । वृकेभ्यो भीतो वृकभीतः । वृकेभ्यो भीतिः वृकभीतिः । वृकेभ्यो भयं वृकभयम् । सुखानुग्रहार्थम् । पूर्वस्यायं प्रपञ्चः ।

मुक्तापेतापोढपतितापत्रस्तैः प्रायः ॥ ३३ ॥

मुक्त-अपेत-अपोढ-पतित-अपत्रस्त इत्येतैः सह कान्तं प्रायः षसो भवति । भवान्मुक्तो भवमुक्तः । पापापेतः । सुखापोढः । स्वर्गपतितः । तरङ्गापत्रस्तः । सर्वत्रापादाने का । प्राय इति किम् । प्रासादात् पतितः । भोजनादपत्रस्त इत्येवमादौ न भवति ॥

स्तोकान्तिकदूरार्थकृच्छ्रं क्तेन ॥ ३४ ॥

स्तोक अन्तिक दूर इत्येवमर्थाः शब्दाः कृच्छ्रशब्दश्च कान्ताः क्तान्तेन सह षसो भवति । स्तोकान्मुक्तः । अन्तिकादागतः । अभ्यासादागतः । दूरादागतः । विप्रकृष्टादागतः । कृच्छ्रान्मुक्तः । कृच्छ्राल्लब्धः । स्तोकार्थकृच्छ्रेभ्यो

ऽपादाने का । दूरान्तिकार्थेभ्य इप्चेति का । कायाः स्तोका-देरित्यनुप् ।

ईप्शौण्डैः ॥ ३५ ॥

ईबन्तं शौण्डादिभिः सह षसो भवति । शौण्डैः सहचरिताः शौण्डाः । अक्षेषु प्रसक्तः शौण्डोऽक्षशौण्डः । पानशौण्डः । वृत्तौ प्रसक्तिक्रियाया अन्तर्भावादप्रयोगः । सर्वत्र अधिकरणे ईप् । शौण्ड धूर्त कितव व्याड संवीत समीरण अन्तर् वने अन्तर्वनान्तः । अधि । राज्ञि अधि राजाधीनम् । अषडक्षाशितंग्वधिघोरिति खः । यदा पूर्वप-दार्थप्राधान्यं विभक्त्यर्थश्च तदा हसः । अन्तर्वणम् । अधिस्त्रि । पण्डित । कुशल । चपल । निपुण ॥

सिद्धशुष्कपक्वबन्धैः ॥ ३६ ॥

सिद्ध-शुष्क-पंक-बन्ध इत्येतैरीबन्तं षसो भवति । कांपिल्ये सिद्धः कांपिल्यसिद्धः । सांकास्यसिद्धः । ऊके शुष्कः । ऊकशुष्कः । छायाशुष्कः । कुम्भोपक्वः । स्थाली-पक्वः । चक्रबन्धः । चारकबन्धः । साधनं कृतेत्यस्यैव प्रपञ्चः ।

ऋणे व्यैः ॥ ३७ ॥

ईबन्तं व्यान्तैः सह षसो भवति ऋणे गम्यमाने । मासे देयमृणं मासदेयम् । मासैकदेशे मासशब्दः । अधि-करणे ईप् । एवं संवत्सरदेयम् । नियोगतः कार्यमृणम् । तेनेहापि भवति पूर्वाह्णज्ञेयम् । प्रातरध्येयम् । अत्र यत्या-न्तेनैवाभिधानादिह न स्यात् । मासे दातव्यम् । मासे दानीयम् । ऋण इति किम् । मासे देया भिक्षा ।

खौ ॥ ३८ ॥

खुविषये ईबन्तं सुबन्तेन सह षसो भवति । अरण्येतिलकाः । वृत्तिपदेन संज्ञा गम्यत इति नित्यः सविधिः । ईपोऽह्ल इत्यनुप् । एवमरण्येमाषकाः । वनेकसेरुकाः । वनेवल्वजकाः । पूर्वाह्णेस्फोटकाः । कूपेपिशाचिकाः ।

क्तेनाहोरात्रभेदाः ॥ ३९ ॥

भेदा अवयवाः । क्तान्तेन सह अहोरात्रभेदा ईबन्ताः षसो भवति । पूर्वाह्णकृतम् । अपराह्णकृतम् । पूर्वरात्रभुक्तम् । अपररात्रभुक्तम् । भेदग्रहणं किम् । उलूखलैराभरणैः पिशाची यदभाषत । एतत्तु ते दिवा नृत्तं रात्रौ नृत्तन्तु द्रक्ष्यसि ।

तत्र ॥ ४० ॥

क्तेनेति वर्तते । तत्रेत्येतत् क्तान्तेन सह षसो भवति । तत्रकृतम् । तत्रभुक्तम् । तत्रपीतम् । ऐकपद्यं प्रयोजनम् ।

क्षेपे ॥ ४१ ॥

क्षेपः कुत्सा । क्षेपे गम्यमाने ईबन्तं क्तान्तेन सह षसो भवति । कृद्ग्रहणे तिकारकपूर्वस्यापि । अवतप्तेनकुलस्थितं एतत् । कार्येष्वनवस्थितत्वं तवेदमित्यर्थः । षे कृति बहुलमित्यनुप् । एवमुदकेविशीर्णं भस्मनिहुतम् । निष्फलं तवेदमित्यर्थः ।

ध्वाङ्क्षैः ॥ ४२ ॥

क्तेनेति निवृत्तम् । क्षेप इति वर्तते । बहुवचनादर्थनिर्देशः । ध्वाङ्क्षवाचिभिः सुबन्तं षसो भवति क्षेपे ।

तीर्थे ध्वाङ्क्ष इव तीर्थध्वाङ्क्षः । वृत्ताविवार्थस्यान्तर्भावः । तीर्थकाकः । श्राद्धवायसाः । अनवस्थित एवमुच्यते । ध्वाङ्क्षैरित्यर्थनिर्देशात्तत्सदृशानामपि ग्रहणमिति केचित् । तीर्थश्वा । तीर्थसारमेयः । तीर्थसृगालः । क्षेप इति किम् । तीर्थे ध्वाङ्क्षो वास्यते ।

पात्रेसमितादयश्च ॥ ४३ ॥

क्षेप इति वर्तते । पात्रेसमितादयश्च शब्दा गणपाठादेव निपातिताः षसंज्ञा भवन्ति क्षेपे । पात्रे एव समिताः पात्रेसमिताः । पात्रेबहुलाः । न क्वचित्कार्य इति क्षेपो गम्यते । निपातनादनुप् । उदुम्बरे मशक इव उदुम्बरमशकः । उदुम्बरकृमिः । कूपकच्छपः । अवटकच्छपः । कूपमण्डूकः । उदपानमण्डूकः । नगरकाकः । नगरवायसः । एतेष्विवार्थो वृत्तावन्तर्भूतः । मातरिपुरुषः । अयुक्तकारीत्यर्थः । पिण्डीशूरः । निरुत्साह इत्यर्थः । गेहेक्ष्वेडी । गेहेनर्दी । गेहेनर्ती । गेहेविजिती । गेहेव्याडः । गर्भेतृप्तः । गर्भेदृप्तः । आखनिकवकः । गोष्ठेशूरः । गोष्ठेविजिती । गोष्ठेक्ष्वेडी । गेहेशूरः । गेहेमेही । गेहेदासः । गोष्ठेपटुः । गोष्ठेपण्डितः । गोष्ठेप्रगल्भः । कर्णेचुरुचुराः । चकारोऽवधारणार्थः । पात्रेसमितादय एव न वृत्त्यन्तरं लभन्ते । परमाः पात्रेसमिताः । अत एव क्तान्तेनापीह वृत्तिः स्वार्थिका अन्यथा क्षेप इत्यनेनैव सिद्धा स्यात् ।

पूर्वकालैकसर्वजरत्पुराणनवकेवलं यश्चैकाश्रये ॥ ४४ ॥

एकाश्रयः समानाधिकरणम् । पूर्वकालवाचि-एक-सर्व-जरत्-पुराण-नव-केवल इत्येते सुबन्ता एकाश्रये सति सुबन्तेन सह यसंज्ञः सो भवति षसंज्ञश्च । पूर्वः कालो यस्य स पूर्वकालः । सम्बन्धिशब्दत्वादपरकालेन तस्य वृत्तिः । पूर्वं स्नाताः पश्चादनुलिप्ताः स्नातानुलिप्ताः । कृष्टसमीकृतम् । छिन्नप्ररूढम् । दग्धप्ररूढम् । एकसाटी । एकचर्या । एकभिक्षा । सर्वदेवाः । सर्वपदार्थाः । जरद्धस्ती । जरद्गवः । पुरा भवं पुराणम् । सायञ्चिरम्प्राह्णेप्रगेभ्यः-भ्यस्तनडिति तनट् । अत एव निपातनात्तत्वम् । पुराणान्नम् । पुराणशास्त्रम् । नवावसथः । केवलमसहायं ज्ञानं केवलज्ञानम् । विशेषणवृत्तेरयं प्रपञ्चः । चशब्दः षसंज्ञासमावेशार्थः । अन्यथा राजपुरुषादौ कृतार्था षसंज्ञा बाध्येत । मोषिका गौः मोषकगवी । स्त्र्युक्तपुंस्कादिना पुंवद्भाव नधुहृत्कोङ इति प्रतिषिद्धो यसंज्ञायां पुंवद्यजातीयदेशीयेति पुनर्भवति । षसंज्ञाश्रयो गोरहृदुपीति टः सान्तः । इत उत्तरमेकाश्रयाधिकारो यावन्मयूरव्यंसकादयश्चेति । एकाश्रय इति किम् । एकस्या साटी ।

दिक्संख्यं खौ ॥ ४५ ॥

दिग्वाचि संख्यावाचि च सुबन्तं एकाश्रये सुबन्तेन सह षसो भवति खुविषये । पुर्वेषुकामसमी । अपरेषुकामसमी । पूर्वकृष्णमृत्तिका । अपरकृष्णमृत्तिका । दक्षिणपञ्चालाः । उत्तरपञ्चालाः । संख्या । पञ्चाम्राः । पञ्चवटाः । सप्तर्षयः । खाविति किम् । दक्षिणा ग्रामाः । पञ्च ग्रामाः ।

हृदर्थद्युसमाहारे ॥ ४६ ॥

दिक्संख्यमिति वर्तते । ह्रदर्थविषये द्यौ परतः समाहारेऽभिधेये दिक्संख्यमेकाश्रये सुबन्तेन सह षसो भवति । दिक् । ह्रदर्थे । पूर्वस्यां शालायां भवः षसे कृते समुदायाद्दिगादेरखाविति णः । पौर्वशालः । आपरशालः । द्यौ । पूर्वा शाला प्रिया अस्य पूर्वशालाप्रियः । अपरशालाप्रियः । अवयवापेक्षया षसाः । पूर्वपदस्य पुंवद्भावः । दिशां समाहारो नास्ति । क्रियागुणापेक्षयाऽपि समाहारे अनभिधानम् । संख्या । ह्रदर्थे । पञ्चभिः शष्कुलीभिः क्रीतः पञ्चशष्कुलः । अनेन षसे कृते तस्य संख्यादोरश्चेति रसंज्ञायां आर्हीयस्य ठणो रादुबस्वावित्युप् । ह्रदुप्युबिति स्त्रीत्यस्योप् । पञ्चानां नापितानामपत्य पाञ्चनापितिः । रस्योबनपत्य इति वचनं ज्ञापकं ह्रदर्थेपि से ह्रदुत्पत्तिर्भवति । द्यौ । पञ्च गावो धनमस्येति पञ्चगवधनः । अवयवसापेक्षया गोरह्रदुपीति टः सान्तः सिद्धः । द्वे ऽहनी जातस्य द्व्यन्हजातः । एभ्योऽन्होन्ह इत्यन्हादेशः । समाहारे । पञ्च पूलाः समाहृताः पञ्चपूली । अनेन षसः । उत्तरसूत्रेण रसंज्ञायां रादिति ङीविधिः । कथं षण्णगरी अत्रापि क्रियागुणापेक्षया समाहारोऽस्ति । लब्धा शोभना-चेति गम्यते समाहारस्यैकत्वादेकवचनम् । ननु समाहारः समूह स तु ह्रदर्थ एव न पृथक् समाहारनिर्देशात् । समूहार्थस्य त्यस्यानुपपत्तिः पञ्चानां कुमारीणां समाहारः पञ्चकुमारी । त्योत्पत्तौ हि रस्योबनपत्य इत्युप् प्रसज्येत । ततश्च ह्रदुप्युबिति स्त्रीत्यस्योप् स्यात् ।

संख्यादी रश्च ॥ ४७ ॥

ह्रदर्थद्युसमाहार इत्यत्र संख्यादिर्यः स उक्तः स

रसंज्ञो भवति । हृदर्थे । द्वावनुयोगौ वेत्त्यधीते वा द्व्यनुयोगः । रस्योऽवनपत्य इत्यण उप् । पञ्चसु कपालेषु संस्कृतः पञ्चकपालः । द्यौ । पञ्च नावः प्रिया अस्य पञ्चनावप्रियः । नावो रादिति टः सान्तः । समाहारे । पञ्चपूली । चशब्दः षसंज्ञासमावेशार्थः । द्वे अङ्गुली समाहृते द्व्यङ्गुली । षेङ्गुलेर्झिसंख्यादेरिति अः सान्तः । रादिति ङीविधिश्च सिद्धः ।

कुत्स्यं कुत्सनैः ॥ ४८ ॥

कुत्स्यवाचि सुबन्तं कुत्सनवाचिना षसो भवति । वैयाकरणखसूचिः । प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तस्य कुत्सायामयं सविधिः । रूपसिद्धिं पृष्टो निःप्रतिभः सन् य खं सूचयति वीक्षते स खसूची । खसूचित्वं कुत्सनम् । विशेषणस्य परनिपातार्थ आरम्भः । एवं क्षत्रियभीरुः । श्रोत्रियकितवः । भिक्षुविटः । मीमांसकदुर्दुरूढः । कुत्स्यमिति किम् । वैयाकरणः कितवः । न हि वैयाकरणत्वं कितवत्वेन कुत्स्यते । कुत्सनैरिति किम् । कुत्सितो ब्राह्मणः ।

पापाणके कुत्स्यैः ॥ ४९ ॥

पापाणकशब्दौ कुत्सनवचनौ कुत्स्यवचनैः षसो भवति । पापकुलालः । अणकनापितः । पूर्वयोगेन कुत्स्यस्य पूर्वनिपाते प्राप्ते परनिपातार्थ आरम्भः ।

सामान्येनोपमानम् ॥ ५० ॥

उपमानोपमेययोः साधारणो धर्मः सामान्यम् । उपमीयते परिच्छिद्यते अनेन सादृश्येनार्थ इत्युपमानम् । उपमा-

नवाचि सुबन्तं सामान्यवाचिना सुबन्तेन सह षसो भवति । निराधारं सामान्यं न प्रतीयत इति सामान्यधर्मेण विशिष्टं यदुपमेयं तेनात्र वृत्तिः । शस्त्रीव श्यामा शस्त्रीश्यामा देवदत्ता । शस्त्रीशब्दः श्यामगुणमुपादाय देवदत्तायां वर्तत इति एकाश्रया वृत्तिर्न विरुध्यते । मृगीव चपला मृगचपलेति पुंवद्भावश्च भवति । एवं कुमुदश्येनी हंसगमनी न्यग्रोधपरिमण्डला दूर्वाकाण्डश्यामा सरकाण्डगौरी । सामान्येनेति किम् । फला इव तण्डुलाः । पर्वता इव बलाहकाः । उपमानमिति किम् । देवदत्ता श्यामा ।

व्याघ्रैरुपमेयेऽतद्योगे ॥ ५१ ॥

तस्य समानस्य योगः प्रतिषिध्यते । उपमेयार्थवाचिव्याघ्रादिभिः सह षसो भवत्यतद्योगे । उपमेयशब्दस्य सम्बन्धित्वादुपमाने वृत्तिः । साधारणधर्मः सामान्यं हि वृत्तावन्तर्भूतम् । अतद्योग इत्यनेन विशिष्टः साधारणधर्मः प्रतिषिध्यते । पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः । पुरुषविशेषस्य परनिपातार्थ आरम्भः । व्याघ्र सिंह ऋषभ चन्दन वृक वृषभ वृष वराह हस्तिन् कुञ्जर रुरु पुण्डरीक स्त्री पलाविका । आकृतिगणोऽयम् । तेन मुखकमलं करकिशलयं पुरुषचन्द्रादि सिद्धम् । अतद्योग इति किम् । पुरुषोऽयं व्याघ्र इव शूरः । इदमेव प्रतिषेधवचनं ज्ञापकं भवति प्रधानस्य सापेक्षस्यापि वृत्तिः । तेन राजपुरुषो दर्शनीयः । राजपुरुषः पण्डित इत्येवमादि सिद्धम् ।

विशेषणं विशेष्येणेति ॥ ५२ ॥

एकाश्रय इति वर्तते । यत् सामान्याकारेण प्रवृत्तं सत् अनेकप्रकाराधारभूतं वस्तु प्रकारान्तरेभ्यो वृत्त्यै-

कत्र प्रकारे अवस्थापयति तद्विशेषणम् । अनेकप्रकाराधारभूतं वस्तु विशेष्यम् । विशेषणवाचिना सह षसो भवति । कृष्णश्च स कम्बलश्च स कृष्णकम्बल । लोहिता च सा साटी च सा लोहितसाटी । अर्द्धंच तत् पिप्पली च सा अर्द्धपिप्पली । यदा पिप्पल्यवयवे पिप्पलीशब्दस्तदेयं वृत्तिरेकाश्रयाधिकारात् । यदा समुदाये वर्तते तदा पिप्पल्यर्द्धमिति तासः । भिक्षैकदेशे भिक्षाशब्दः । द्वितीया भिक्षा द्वितीयभिक्षा । तृतीयभिक्षा । चतुर्थभिक्षा । तुर्यभिक्षा । इह भिक्षाद्वितीय मिति तासो नोपपद्यते । ङदूग्रहणादिप्रतिषेधस्य बलीयस्त्वात् । कायैकदेशे कायशब्दः । पूर्वः कायः पूर्वकायः । अपरः कायः । अपरकायः । उत्तरकायः । एवं मध्यान्हः । सायान्हः । पूर्वं कायस्येति अवयवसम्बन्धे तासानभिधानं पूर्वं कायादिति प्राप्नोति । विशेषणविशेष्ययोरन्यतरस्य ग्रहणेऽपि सम्बन्धिशब्दत्वादुभयोः प्रतिपत्तिरिति द्वयनिर्देशो व्यर्थः । नैवं यत्र पूर्वोत्तरपदयोः प्रत्येकं विशेषणविशेष्यभावस्तत्र यथा स्यादिह मा भूत् । वृक्षः शिंशपा । शिंशपा हि वृक्षार्थं न व्यभिचरतीति न तस्या विशेष्यत्वम् । यदा शिंशपादिशब्दाः फलादिष्वपि वर्तन्ते तदोभयोर्विशेष्यत्वं सविधिर्भवत्येव । शिंशपावृक्षः । पलाशवृक्षः । उभयोर्विशेषणत्वे कस्य पूर्वनिपात इति चेत् प्रधानद्रव्यापेक्षयान्वर्थस्य नीचो गुणस्य पूर्वनिपातः । यद्यप्युत्पलादिशब्दो जातिशब्दस्तथापि जातिर्द्रव्यस्योत्पत्तेः प्रभृत्या विनाशादात्मभूता प्रतीयत इति जातिनिमित्तः शब्दो द्रव्यशब्दो व्यवस्थाप्यते । अत एव विशेष्यत्वमुत्तरपदार्थस्य द्रव्यद्वारेण जातेरनीलत्वादना-

धेयानिशयत्वाच सामानाधिकरण्यन्तु जात्यपेक्षया जाते-र्भेदाभेदविवक्षा अनेकान्ताधिकाराल्लभ्यते । विशेषण-मिति किम् । तक्षकः सर्पः । संज्ञैषा । अस्यां विशेष्यत्वमेव विशेषणत्वम् । विशेष्येणेति किम् । लोहितस्तक्षकः । तस्य लोहितत्वाव्यभिचारादविशेष्यत्वम् । इतिशब्दः किमर्थो यत्र लोके विवक्षा तत्र यथा स्यात् । इह न भवति रामो जामदग्न्यः । अर्जुनः कार्तवीर्यः । इह कृष्णसर्पः । लोहिताहिः लोहितशालिरित्येवमादिषु संज्ञाशब्देषु नित्यः सविधिः । वाक्यन्तु सादृश्यमात्रेण । नीलोत्पलादिषूभयम् । नीलमुत्पलं नीलोत्पलम् । इहेच्छया विशेषणत्वम् । खञ्जकुण्टः । कुण्टखञ्जः ।

पूर्वापरप्रथमचरमजघन्यसमानमध्य-मध्यमवीराः ॥ ५३ ॥

पूर्व-अपर-प्रथम-चरम-जघन्य-समान-मध्य-मध्यम-वीर इत्येते एकाश्रये सुपा सह समस्यन्ते षसो भवति । पूर्वपुरुषः । अपरपुरुषः । प्रथमपुरुषः । चरमपुरुषः । जघन्य-पुरुषः । समानपुरुषः । मध्यपुरुषः । मध्यमपुरुषः । वीर-पुरुषः । इह सूत्रे पूर्वशब्दो वीरशब्दश्चोपसर्जनं तयोर्वृत्तौ परत्वात् वीरशब्द उपसर्जनम् । वीरपूर्वः । वृन्दारकना-गकुञ्जरैस्तदित्यत्र नागशब्दः प्रधानं पोटायुवतीत्यत्र प्रवक्तृशब्दः प्रधानं तयोर्वृत्तौ परत्वात् प्रवक्ता प्रधानम् । नागप्रवक्ता ॥

श्रेण्यादि कृतैः ॥ ५४ ॥

श्रेण्यादयः कृतादिभिः सह एकाश्रये षसो भवति ।

वैषम्याद्यथासङ्ख्यं न भवति । श्रेण्यादिषु च्व्यर्थग्रहणं कर्तव्यं न कर्त्तव्यमितिशब्दानुवृत्तेस्तत्र च वृत्तिः। अश्रेणयः श्रेणयः कृताः श्रेणिकृताः। अनूका ऊकाः कृताः ऊककृताः। च्व्यर्थादन्यत्र श्रेणयः कृताः। करोतेरनेकार्थत्वाद्दण्डिता पूजिता वेति गम्यते। विकल्पेन च्विर्विधास्यते यदा च्चिस्तदा परत्वात् तिकुप्रादय इति नित्यं षसः। श्रेणीकृताः। ऊकीकृताः। श्रेणी ऊक पूग कुन्दुम राशि निचय विषय विशिष्ट निर्धन देव इन्द्र मुण्ड श्रमण भूत वदान्य अध्यापक ब्राह्मण क्षत्रिय पटु पण्डित कुशल चपल निपुण इति श्रेण्यादिः। कृतादिराकृतिगणः । कृत मित मत भूत उक्त समाज्ञात समाख्यात समास्नात सम्भावित अवधारित संसेवित अवकल्पित निराकृत उपकृत इत्येवमादि । क्रियाकारकसम्बन्धोऽत्र न विशेषणविशेष्यभाव इति ।

विसमाप्तौ क्तो ऽनञ् ॥ ५५ ॥

विगता समाप्तिः विसमाप्तिः। ईषन्निष्पत्तिरित्यर्थः। अनञ् क्तान्तं विसमाप्तौ सामर्थ्यात् क्तान्तेन समस्यते षसो भवति। एकस्यां हि क्रियायां विसमाप्तिर्भवति न क्रियाभेद इति सामर्थ्यम्। क्तान्तस्यानञिति प्रतिषेधान्नञ्पूर्वेणापि क्तान्तेन सविधिः। कृतञ्च तदकृतञ्च कृताकृतम्। कृतभागसम्बन्धात् कृतम्। अकृतभागसम्बन्धात्तदेवाकृतम्। एवं भुक्ताभुक्तम्। पीतापीतम्। अशितानशितम्। क्लिष्टाक्लिशितम्। क्लिशस्त्क्त्वोरिति वेट्। मुक्तविमुक्तम्। पीतविपीतम्। कृतापकृतम्। विसमाप्ताविति किम्। सिद्धं चाभुक्तं च। क्रियाभेदे विसमाप्तिर्नास्ति एकस्याः समाप्तत्वादपरस्या अननुष्ठानात्। क्त इति किम्। कर्तव्यं

तदकर्तव्यं च । अनञिति किम् । अकृतं च तत्कृतञ्च । ननु कृद्ग्रहणे तिकारकपूर्वस्यैव ग्रहणमनञिति किमर्थम् । नञ्-पूर्वेणापिवृत्त्यर्थमितिशेषः । इह गतप्रत्यागतः यातानुयात इत्येवमादिषु पूर्वकालैकेत्यादिना षसः ॥

सन्महत्परमोत्तमोत्कृष्टं पूज्येन ॥ ५६ ॥

सत्-महत्-परम-उत्तम-उत्कृष्ट इत्येते सुबन्ताः । पूज्यवचनेन सह समस्यन्ते षसो भवति । संश्च सः पुरुषश्च सत्पुरुषः । महापुरुषः । परमपुरुषः । उद्गततमः उत्तमः । अत एव निपातनात् किमेन्मिभ्भिभादामद्रव्य इत्याम् न भवति । उत्तमपुरुषः । उत्कृष्टपुरुषः । पुज्येनेति वचनादत्र सदादयः पूजावचना ज्ञातव्याः । पूज्येनेति किम् । उत्कृष्टो गौः । कर्दमादुद्धृत इत्यर्थः ॥

वृन्दारकनागकुञ्जरैस्तत् ॥ ५७ ॥

पूज्येनेति वर्त्तमानमर्थवशाद्बहुवचनान्तं संपद्यते । वृन्दारकादिभिः सह तत् पूज्यवाचि सुबन्तं समस्यते षसो भवति । तदित्यनेन पूज्यवचनेनाभिसम्बन्धात् वृन्दारकादयः पूजा-वचना गृह्यन्ते । गौश्चासौ वृन्दारकश्च गोवृन्दारकः । पुन्नागः । गोकुञ्जरः । अश्वकुञ्जरः । व्याघ्रादेराकृतिगणत्वात् व्याघ्रैरुपमेयेऽतद्योग इत्येव सिद्धे सामान्यप्रयोगेऽपि यथा स्यादित्यारम्भः । गोनागो बलवान् । तदिति किम् । शोभना शीमा फणा अस्य सुशीमो नागः ॥

कतरकतमौ समर्थौ ॥ ५८ ॥

किंशब्दात् किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरः वा बहूनां जातिप्रश्ने डतमः । तयोः परतष्टिखे कृते कतर-

described. 'Word' and the rest do not differ from Inference, because the process of cognition by those means is similar to the process of inferential cognition. That is to say, just as the Inferential process functions through invariable concomitance so do Word &c., also; the verbal cognition is inferential in its character,—as it takes cognizance of objects by means of invariable concomitance—like smoke.

The author proceeds to show the similarity of the inferential and verbal processes of cognition. When the man who knows the invariable concomitance (of smoke with fire) happens to see smoke rising in a certain place, and then comes to recall in his mind his previous knowledge of the concomitance that wherever there is smoke there is fire also,—then he has an inferential cognition of the thing (fire) not directly perceptible to the senses; and the process is the same in the case of verbal and other cognitions also. As a matter of fact, we know that a word never denotes anything until it is known for certain that it never fails in its concomitance with such denotation; and when it does denote an object after the unfailing concomitance has been ascertained, it becomes an inferential 'indicative' pure and simple.

Against the above, some people put forward the following objection: "In inferential cognitions what is cognised is a certain object qualified by the 'property to be inferred' (the "*sādhya*). What would be such an 'object' in the case of "the inference of the denotation from the Word? The "denotation itself could not be this 'object,' as it is not "known at the time. If the Word be regarded as that 'object,' "then what would be its '*sādhya*'? Mere 'denotability' "could not be this '*sādhya*; as between the Word and its "denotation we cannot detect any such relationship as that of "Conjunction or Inherence, which is perceptible in the case of "the mountain and the fire; and hence the word as qualified by "the denotation could not be the object to be inferred, as the

"only relation that there is between the Word and its denotation is that of the 'denoter and the denoted'; and this comes after the word has signified the object, and not before that signification. Nor is there any strict unfailing concomitance between the word and its denotation, as there is between fire and smoke; for the simple reason that we do not find both appearing at one and the same place and time [the word is often heard without the hearer having any idea of the object signified by it, and the object is known even without its significant word being known]. For instance, even though there is no *Yudhiṣṭhira* living in the present Kali age, yet we find the word 'yudhiṣṭhira' being used (this with regard to *time*), and even though there is no Lankā in *Jambudvīpa* (India), yet we find the word '*lankā*' used in India (this with reference to *place*). Thus then, in as much as we find the accessories of verbal cognition to be of a character quite different from those of inferential cognition, the two cannot be regarded as one and the same.

"Then again, verbal cognition cannot be regarded as the same as inferential cognition, because of the fact that in different countries one and the same word signifies different things; and thus there is no such invariable concomitance between the word and its denotation, as there is between smoke and fire; for instance, the word '*cora*' is found among the people of the south, to be used as a name for *cooked rice*, though among the people of Āryāvarta (India to the north of the Vindhyā range) it is used for *thief*. If verbal cognition were the same as the inferential, then it would, like the latter, be duly cognised only when there would be present the three conditions of Inference (described in Text 104), and it would not be based upon the cognition of the fact of its having been uttered by a trustworthy person. As, however the authority of verbal cognition is based solely upon the fact of its originating from a trustworthy source, it cannot but

"be regarded, on account of this very dissimilarity, as wholly "different from inferential cognition."

To the above we make the following reply : When the fore-finger is raised, there appears an inference of number *ten* with regard to things not present at that time and place. And in this case too, the number is not the 'subject' (*dharmī*), as it is not known ; nor can the particular position of the fore-finger be regarded as the 'subject ; as it is something that is being made cognisable at the time, and as such having no other relationship with the number *ten*, could not indicate anything qualified by that number. Nor is there any coevality or co-extensiveness between the raising of the finger and the ten things. How then do you account for the process of inference in this case? And yet we find that in the usage of tradespeople there is an unfailing concomitance between that particular position of the forefinger and the desire of indicating the number *ten*.

Obj : "The gesture becomes indicative of the number *ten*, through the recognition (on the part of the observer) of the intention of the person (making the gesture) to convey an idea of that number (and this concomitance is the basis of the inference)."

Reply : The same may be said with regard to verbal cognition also. As in the first instance, when the word '*gō*' is uttered, we come to recognise the fact that the speaker wishes to indicate a certain animal with the hump &c ;—this recognition being due to our having found that the utterance of the word '*gō*,' in its own turn, is preceded (originated) by an intention of speaking of that animal ; and this intention leads to the inference of the animal. The inferential argument would be in the following syllogistic form :—'The *subject*, man, is endowed with the intention of speaking of the animal with the hump &c.,—because he is the pronouncer of the word '*gō*,'—like myself.'

Obj: "In the case of the untrustworthy person, we find that they often have the intention of speaking of things that have no real existence; and hence the mere presence of the intention cannot indicate the existence of the object (there being no actual unfailing concomitance between the two)?"

Reply: How too could there be an indication of the object by means of the word itself? As words are often used by mistake, or with the intention of cheating (hence there can be no certain relationship between the word and any object).

Objection: "The object is cognised only when the word is uttered by a trustworthy person (in whose case there is no chance of either mistake or an intention of cheating)."

Reply: This comes to the same thing as to assert that the cognition of the object is due to the *intention* of the trustworthy person to speak of that thing.

[**Page 215**] It has been urged by the opponent that, "even though the word may be indicative of the object, yet the concomitance between the two (as we find when one and the same word is used in different countries) is not quite unfailing, as there is that between the smoke and the fire." In reference to this we have the following reasoning: As for the smoke, it is indicative of the fire by its natural (inborn) relationship to it; as for the word, on the other hand, it becomes indicative, like a gesture, only when used in accordance with a certain convention made by the wish of the persons concerned; and as such it becomes, through the 'intention of the person to speak' of the thing, indicative of only that thing with regard to which the said convention has been fixed; as the object having been definitely cognised, as in the case of Gesture etc., only in accordance with the word as used by trustworthy persons, it is only when the word is used by the trustworthy that it has an unfailing concomitance with the object; just as it is only when the smoke is found to rise upwards in a continuous volume that it is indicative of fire.

Objection : " Why cannot you assume the fact that the word denotes the object by direct denotation (without the intervention of conventions or notions of concomitance etc) ? "

Reply : For the simple reason that there is no such direct relation between the two ; and if a word were to be denotative of an object without any relation, then there would be no restriction as to the denotations of words (any word) denoting anything).

Objection : " But there is a natural relationship between the word and its denotation."

Reply : It is not so ; as one and the same word is used, in different countries, in the sense of different things (which could not be if the word had an inborn relationship with any one denotation).

Objection : " The word may be regarded as *denotative* (*vācaka*) of that thing with regard to which it is used by the Āryas ; while as regards other objects, in as much as it is dependent upon convention, it can only be regarded as *indicative* (*linga*)."

Reply : Not so ; as we find that the word *cora* ' is as expressive of the *thief* as of *cooked rice* (as used among the *Āryas* and the Southern people respectively) ; and we have no reason for making any such distinction as that in regard to the former, the word is *denotative* while with regard to the latter it is only *indicative.* Then again, even among the Āryas the verbal cognition of what is denoted by the word ' *cora* ' is preceded by a definite inferential indicative,—because it is a cognition produced by the word ' *cora* ',—like the cognition produced by the word ' *cora* ' among the people of the south, in which latter case both opponents admit the fact of its following upon an inferential indicative. Nor is there any evidence for an inborn relationship between the word and the object denoted

by it. You hold that the only relationship consists in the inborn *denotativeness* of the word as pertaining to that which is *denoted*, as it is this that pervades over both (the *denoter* and the *denoted*); as has been declared—" relationship lies in potency;" and the denotative potency of the word existing naturally in the denoted object, this object would be cognised by the man ignorant of the meaning of the word, just as well as by the person who knows the word; as in both cases, the word, the object and the relation between them would be equally present.

Objection: " It is only when the relationship is duly known that it becomes the means of the verbal cognition of the object, and not when it merely exists (and is not known). As has been declared: ' The relationship being the cause of the cognition, stands in need of its own cognition; and hence even when it exists, if it is not known or recognised, it does not lead to the cognizance of the object (denoted)."

[Page 216.] *Reply*: Of what sort is the knowledge of the relationship?

Objection: "It is in the form that, ' such and such a thing is the *denoted* of such and such a word '."

Reply: Whence does this knowledge proceed?

Objection: " From the usage of old experienced persons."

Reply: This same knowledge based upon the name and the named, when appearing in the boy sitting near older people talking among themselves, is known as ' *sankēta* ', ' convention ' or ' *vyutpatti*,' ' knowledge of the word '; and this, through impressions left on the mind, would be the cause of the verbal cognition of the object (denoted by the word); and under the circumstances, what would be the use of assuming any other relationship? The inborn potency of the word constitutes its ' *çabdatva*,' verbal character ', and the adventitious (or caused appearing subsequently) potency constitutes the ' *sankēta*

'convention' with regard to it, and also the particular order (in which it occurs in a sentence); and as the cognition of its denotation would be quite explicable through this twofold potency, there would be no necessity for the assumption of another relationship; specially as so long as a thing can be explained on perceptible facts, there is no room for assuming imperceptible ones.

Objection: "If a word were significant only through the 'intention of speaking' on the part of the speaker, then there could be no significance in the words and sentences of the Veda in which case there is no speaker (on whose intention the signification could be based)."

In reply to this the author says—*the Scripture also in the form Çrutis and Smṛtis depends upon the authority of the speaker.* That is to say, it is not only ordinary assertions that signify their meanings on the strength of the trustworthy character of speakers; but the assertions in the form of *Vaidika* and *Smārta* scriptures also are similarly significant; and the weakness or faultiness of these is due to the deficiencies in the speaker, and is not inherent in them, like the evil odour of foul smelling things; as has been thus declared: 'In a word, the discrepancies of the origin, the letter and the rest are due to the person pronouncing it; and the word is not deficient by its nature, like the evil smell of malodorous substances.'

Objection: "The Veda being eternal, and as such there being no speaker in its case, there can be no room for any discrepancies, and thus alone is its absolute authority established; while if it were the work of an author, we could never get at an absolutely undoubted authority for it; as we find men often making use of false assertions, under the influence of certain likes and dislikes."

Reply: *The authority of the scriptures rests upon his authority.* The word 'his' refers, by the 'law of provision,' to

a speaker superior to ourselves, as described under the *sūtra* '*asmadbuddhibhyo lingamṛshēḥ*. Thus the meaning comes to be that the authority of the Veda is due to the fact of its having been composed by a person superior to ourselves. That is to say, its authority is due to the *absence of discrepancies*, and not to *eternality*; for instance, we find in the case of the ear and the mind, that though both of these are eternal (the ear being eternal because it is only *ākāça*), yet they often lose their authoritative or truthful character by reason of the subsequent advent of discrepancies; and obviously in the case of the eye and the other organs we find that even though they are not eternal, they have authority only when all their deficiencies have been removed. And we have already proved that there are no faults or discrepancies in the "superior person"; hence the scripture that is composed by him, must be regarded as authoritative, even though it be the work of a personal author. It is never suspected that one who sees the reality of things, and is free from likes and dislikes, when moved by mercy to instruct the people of the world, could impart wrong or false teachings.

Page 217] *Question*: "How is it known that the Veda is the work of a superior person?"

Answer: It is inferred from the fact of its sense being indisputably accepted by all men of various castes and conditions. If it were the work of an ordinary person, it could not be indisputably followed in practice by all intelligent persons; as we find in the case of the scriptures composed by *Buddha* and others; there would always be some people who would not accept it as authoritative, and as such not regulate their conduct in accordance with it. But that with regard to which all men are agreed (on the point of its authority), cannot but be accepted as an authoritative means of knowledge; as we find in the case of sensuous cognition. The argument may be thus stated:—The Veda is authoritative, as it is always found to give rise, in all men, to non-contradictory cognition, like Sense-perception.

Though it is true that, in the case of certain actions laid down in the Veda as bringing about a visible result, we often find that even when the action is duly performed, the result does not appear,—yet this fact does not set aside the authoritative character of the Veda ; as this failing is always due to the deficiencies in the auxiliaries leading up to the result ; as is proved by the fact of the due result always appearing when these auxilliaries are present in full force.

Objection : " It is not right to say that the Veda is composed by a trustworthy person ; as at the time that the action laid down therein is performed, even the most learned of the performers have no idea of any such author, who would be most likely to be remembered."

The expression '*dârçânārtha*' means *that which is directly perceived* by means of the five means of knowledge (the sense-organs); and the *arthāpatti*,' the 'presumptive cognition' of a thing based upon such direct perception is a case of 'Inference per contraries.' That is to say, the character of the 'inferential indicative' is in accordance with the nature of the invariable concomitance (upon which the inference may be based); and in the case in question what is invariably concomitant with the thing to be inferred is what is *contrary* to the cognitions by other means of knowledge; and hence in this case the 'inferential indicative' is what is contradictory. For instance, if *absence from the house* were to indicate *existence outside* by mere 'inconsistency,' then it might as well indicate other things also; as there would be nothing to limit the scope of this indication.

Objection : "But it is for the sake of establishing its consistency that *absence from the house* indicates something else; and nothing else except *outside existence* could make it consistent (and hence it could not indicate anything but the *outside existence*)."

Reply: By whom has it been asserted that *absence from the house* is made consistent by *outside existence?* In fact we declare that even when there is *outside existence, absence from the house* is as inconsistent as ever.

Object: "We have often seen that when a thing is of a limited extent, if it is in one place, it is not in any other place; *e. g.* when the sun is seen either in the east or in the west, it is

not seen on the other side; and similarly from a directly perceived fact we learn that the *absence from the house* of the living Devadatta is possible or consistent only when he exists somewhere outside of it."

Reply: Well in that case the cognition of *outside existence* is preceded by, and follows from, a cognition of invariable concomitance; and thus Presumptive Cognition being born of invariable concomitance would be purely inferential. Then, as for the assertion that it is an inference that operates by contraries, it is only meant to show the distinctive feature of the inference in the case. The inferential argument would be stated in this form; 'Dēvadatta exists outside,—because though living, he is not found in the house,—like ourselves.'

The author next proceeds to show that the Presumptive Cognition based upon verbal cognition is also included in Inference: The cognition that *Dēvadatta eats at night*, following from the verbal cognition of the assertion 'fat Dēvadatta eats not in the day,' is a case of 'inference per inference'; as in this case the assertion, serving as an 'inferential indicative,' leads to the inference of *fatness*, which, in its turn, leads to the inference of its cause in the form of 'eating at night.'

The sense of all this is as follows: The 'inconsistency' of a means of knowledge lies in its incapability to bring about the cognition of its objective; and the assertion 'he eats not during the day' is found to be quite capable of expressing what it is meant to express; and as such where would lie its 'inconsistency' (on which you seek to base the presumptive cognition of *eating at night*)?

Objection: "*Fatness*, the effect of eating, would not be possible without *eating in the day*, because of there being no cause for the fatness; and this impossibility would make the assertion in question also inconsistent; as it is not in keeping with the real state of things."

Reply: Then, in that case, the 'inconsistency' of the assertion would lie in the improbability of its meaning, and its 'consistency' in the probability of its meaning; and there would be no 'consistency' or 'inconsistency' in the assertion itself; and the 'meaning' or object of *fatness of one who does not eat in the day*, being an effect of *eating*, becomes 'consistent' or probable by reason of the '*meaning*' or object in the form of *eating at night*, and not by reason of the assertion that 'he eats at night;' and thus what the 'inconsistency' or improbability of the object needs, for the justification of itself and its expressive sentence, would be an *object*, and not a *sentence*; as a sentence could not justify the inconsistency of an *object*. And the object that is justified is cognised by means of an object; as, in the case in question, the object in the shape of the *fatness of one who does not eat in the day* is found to be unfailing in its character of being the effect of *eating at night*; and hence there can be no *Arthāpatti* (presumptive cognition) amenable to verbal expression.

Objection: "It is quite true that an *object* is justified by an *object*; and it is by this justification of the *object* that the word expressive of it is also justified; but a *verbal object* is justified only by a *verbal object*; as anything cognised by other means of knowledge could have no concomitance with a *verbal object*; for instance, when the verb '*pacati*,' 'cooks,' is uttered, its deficiency due to the absence of the objective is not removed by the *sensuous perception* of the cooked grain; as even though this grain is perceived, the verbal deficiency of an objective for the verb 'cooks' remains just the same. When however the objective is brought forward by means of a word, ('*kalāyam*') the definite cognition comes forward in its entirety, in the form '*kalāyam pacati*' (cooks the *kālaya* grain) or '*çākam pacati*' (cooks vegetables). In the case of the sentence—'fat Dēvadatta eats not in the day'—also we have the deficiency or inconsistency of what is expressed by the sentence; and hence this deficiency could be removed only by means of a *verbal object*

and hence what the 'apparent inconsistency' in the case needs is a *sentence* expressing the fact of *eating at night*; otherwise, in as much as the denotations of the words composing the sentence expressive of *non-eating in the day* could have no connection with the *eating* at night, and as the apparent inconsistency would rest in the *sentence* (verbal expression), the *object*, in the shape of *eating* at night, could never become an object of *Presumptive Cognition*; specially as it would form an object of verbal cognition (by means of the *sentence* 'he eats at night'). Nor can it be argued that, 'the sentence (expressive of *eating at night*) could not be indicated either by the sentence expressive of *non-eating in the day*, or by this *non-eating* itself,—as there would be no proximity between these and that sentence.' *

"Nor would it be right to argue that—'in as much as neither the sentence *eats not in the day*, nor its meaning, has any kind of proximity to the sentence *eats at night*, the former two could not in any way indicate this latter?' Because through the proximity to them of the *meaning* of the latter sentence, there would be a proximity of this latter *sentence* also. Nor is the proximity absolutely necessary, in *presumptive* cognition, as it is in the *inferential*; as the former operates through (is based upon) mere *inconsistency*. To this effect it has been declared—'The meaning (that *the fat person eats not in the day*) does not directly indicate the other meaning (that *he eats at night*); for the simple reason that while the former is an object of verbal cognition (by means of the sentence uttered—*the fat person eats not in the day*) the latter is not amenable to any expressive operation of that sentence. That such is the case is apparent from the fact that until the person has a conception of other words ('he eats at night') he has no idea of the words uttered ('the fat person eats not in the day') having any significance (with regard to the meaning that *the person eats at night*)

* The reading appears to be corrupt; as it is, the reading '*vākyam*, does not give any sense

"Thus then, in as much as a verbal need can be supplied only by words, as shown above, the *meaning* or fact *of eating at night,* which is not in any way signified by the sentence pronounced, could not supply the need of removing the inconsistency of *fatness accompanied by absence of food during the day,* which is distinctly signified by the words uttered; and hence that *fatness* could not indicate the fact of *eating at night.*"

"And for this reason the presumptive cognition (*arthāpatti*) must be regarded as always pertaining to words."

"That is to say, in the case in question, the presumptive cognition, due to the sentence *the fat person eats not in the day,* must pertain to, and bring about the cognition of, the *sentence—he eats at night.*"

"And it would be this latter sentence which, being thus comprehended (by presumptive cognition), would indicate its *meaning* (the fact of his *eating at night.*)*

To the above we make the following reply: Words are used for the purpose of expressing the meanings of sentences; and each word singly is not capable of expressing the *meaning of the sentence,* which consists of the relationships between the words composing the sentence; and thus having their final end still unaccomplished, and while fulfilling a single purpose, the word stands in need of the other words. And in a case where the words have fully expressed the meaning of the sentence, they do not stand in need of any other words; as their function has been

*The reading of the whole page of the text is very corrupt. On line 13, for क्वं we must have च्यम्. On line 15 for च there should be च्य. In l. 17 for ता, तो. In l. 18 'ह्यन्यात् तत्तिरोहित,' we must have ह्येणावृत्तिरोहितः In l. 18 for सामर्थ्य we should have ऽसामर्थ्य In l. 19 for तेनैवां......गोचराः, there should be तेनैषा.........गोचरा. Without these changes the whole page before अत्रोच्यते in l. 21 would be unintelligible.

fully served. Nor can it be argued that "the meaning expressed by these words is not consistent." Because the function of the word does not lie in the removal of inconsistences as to *facts* (objects),—its function resting in mere expression of the fact. And this *expressing* (of the fact of fat Devadatta not eating in the day) is fully accomplished by the sentence under consideration, even when the sentence expressive of *eating at night* is not near it; as we find that from the sentence ('fat Devadatta eats not in the day') we fully cognise the fact of his not *eating in the day*; and this cognition is free from all doubts and discrepancies; specially as if it were not so, then there would be no active force for the 'apparent inconsistency' either; as it is only when we have a definite and correct cognition of the man being *fat*, and yet as fully known to be one who does not eat in the day, that an 'inconsistency' with regard to it can be considered undesirable, and a removal thereof sought after. On the other hand, if the cognition derived from the sentence were either doubtful or known as mistaken, then where would be the necessity of *presuming* a fact for the justification of such a cognition? Nor is it necessary that when two facts are mutually contradictory, the *cognition* of these should become a *non-cognition*. Consequently, the word having its inconsistency removed by the cognition of a new fact, it would not stand in need of any other words; as there is nothing else left to be done by it; and in reality it is the fact signified by the sentence ('fat Devadatta etc.,') which, being inconsistent in the absence of another fact, seeks this latter for its own justification. And thus there can be no objection to the declaration that in the case of *Çrutārthāpatti*, there is an 'inference upon inference.'

[**Page 225.**] *Text* (109): ***Probability also, following from invariable concomitance, is a form of Inference*** (IX-ii-5).

Commentary.

Some people hold that the cognition of a *thousand* gives rise to the cognition of the *hundred*; and this is due to a dis-

tinct *means of knowledge*, in the form of ' Probability,' based upon the probable existence of the ' hundred ' in the ' thousand.' In opposition to this view the author has declared that this is a case of Inference ; as ' thousand ' is invariably concomitant with ' hundred,' as this latter always precedes the former ; and hence the cognition of ' hundred ' from that of ' thousand ' cannot but be regarded as purely *inferential.*

[P. 225.] *Text* (110) : *Negation also is mere Inference ; just as the appearance of the effect becomes ' indicative ' of the existence of the cause, so also does the non-appearance of the effect become ' indicative ' of the non-existence of the cause.* (IX-ii-5).

Commentary.

Some people hold that for the cognition of the *absence* of a thing there is a distinct means in the shape of Negation, which consists in the non-appearance of sense-perception and the four means of knowing the *presence* of things. With a view to set aside this view the author says—*Negation also is mere Inference.* In proof of this assertion he adds : *Just as etc.* He also who regards Negation as a distnict means of knowledge, does not maintain that the cognition of the absence or non-existence of a thing follows from mere non-appearance of its cognition ; as if it were so then, a thing that is at a great distance from the observer (and is *not cognised*) would come to be cognised as *non-existent* (there being an absence of its cognition). What he would hold is that, when all causes and conditions of cognising it are present, if there is non-appearance of the due cognition of an object which is cognisable, then its non-cognition would lead to the cognition of its non-existence. There is however no difference in nature between the non-cognition of the cognisable and that of the non-cognisable object ; as there are no varying grades of negation; and hence a negation cannot, by itself, like the sense organs, bring about the cognition of anything ; what constitutes a difference between the two however is that *the non-cognition of the cognisable object* is never found to fail in its concomitance with the *absence or non-existence* of that object ;

whereas the *non-cognition the non-cognisable* object is found to fail in such concomitance; as even when the non-cognisable object, *exists*, there is *non-cognition* of it; and it is on account of this difference that it is the non-cognition of the cognisable object, and not that of the non-cognisable object, that brings about the cognition (of the non-existence of the object). And thus negation becomes merely an 'inferential indicative,' as it would stand in need of the due recognition of invarible concomitance; if it did not require this invariable concomitance, then there would be nothing to prevent the undesirable contingency that all negation is equally liable to bring about the cognition (of the absence of things; which the opponent cannot admit).

[P. 226] Then again, we find that when an empty spot of earth has been seen by the eye, there comes about the cognition of *absence* also, in the form that 'this spot of earth has no jar on it;' and in this case why should not the cognition of this absence of the jar be regarded as *sensuous*, just like the cognition of the spot of earth?

Object "The sense-organ is connected only with the positive factor in the conception (*i. e.* with the *spot*), which alone is capable of being thus connected."

Reply: This cannot be accepted until it is proved; all capability is inferred from certain effects; and just as in the case of the *existence of* objects we find the effect (cognition) regulated by the presence or absence of the operation of the sense-organs, so do we also perceive in the case of that same effect with regard to the *non-existence* of objects; and hence *non-existence* also is as capable of being perceived by means of the sense-organs as *existence*. And the connection also of non-existence with certain sense-organs might be assumed on the strength of the nature of the effects produced (in the shape of cognition).

Objection: "No non-existence is ever cognised without a "substratum; as its action or want of action is always found to "be in reference to definite points of place and time, etc., and

"the operation of the sense-organs pertains to the substratum "of the non-existence, and not to the non-existence itself; as is "shown by the fact of the cognition of non-existence appearing "even after the operation of the sense-organ has ceased; "as for instance it so happens that a man having seen a house "goes to another place; and there on being asked by some one "as to the presence of Dēvadatta in the house, he has aroused "in his mind, at that moment, the desire to learn the where-"abouts of Dēvadatta; and then having cognised the fact of his "non-existence in the house, he replies—'he is not in the house,' "(and here we find that the non-existence has been cognised "while the man is away from the temple, and he has none of his "sense-organs in contact with the non-existence). Nor can it "be rightly urged that, this non-existence of Devatta in the "house had been cognised, indeterminately, at the time that the "house was seen; and it is remembered at the subsequent "time;' because the indeterminate cognition of such objects as "the jar and the like is all very well, on account of their being in "contact with the sense-organs; specially as the forms of these "things are independent of all other things; as for non-existence "on the other hand, in as much as it is of a negative character, "its very form depends upon that of which it is the negation; "and thus there being no other form for non-existence than the "negation of that thing, any comprehension of it is impossible, "without the comprehension of that thing which is its counter-"entity. The only difference between *existence* and *non-exis-"tence* is that, while the former is cognised as a positive entity by "itself, the latter is cognised only as the negation of something "else; as has been declared by the author of the Nyāyāvartika.

"The difference between *existence* and *non-existence* "is due to the fact of the former being by itself the cause of its "own cognition and non-cognition, and the latter depending "upon something else for both; that is to say that which *exists* "is by itself the substratum of the means of cognition, while "that which does not exist is so only in the form of the nega-

ॐ श्रीरस्तु ।

श्रीमते हयग्रीवाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

सङ्कल्पसूर्योदये तृतीयोऽङ्कः ।

ततः प्रविशतो रागद्वेषौ ।

रागः—सखे, त्वत्सहायस्यमे स्वामिकार्यनिर्वर्तनं सिद्धप्रायमिति निश्चिनोमि ।

द्वेषः—वयस्य त्वद्विरुद्धविषयविवेकसंरंभनिरोधेन त्वदेककार्य एवह्यहमादिष्टोस्मि महाराजेन ।

रागः—सखे, अन्यदपि तावदवसरोचितमाज्ञप्तिगोचरमावेदयामि

विवेककुहनाबलाद्व्यतिहतेषु बाह्येष्वसौ
त्रिवर्गपदवीपरं शरणमद्य मोहश्रियः ।
विरक्तिमिह तापसीं व्यपनयामि दूरादहं
विमथ्य विनिवर्त्यतां सपदि विष्णुभक्तिस्त्वया ॥ १ ॥

अथेदानीं किंचित्सूच्यमर्थं सूचयितुमर्थोपक्षेपकं विष्कम्भं विरचयतिततइति—।

सिद्धप्रायं प्रायेण सिद्धं ।

त्वयाविरुद्धः त्वद्विरुद्धः विषयोमोक्षरूपो यस्य स तथा सचासौ विवेकसंरंभः तस्य निरोधने निवारणे । त्वदेककार्यः त्वयाधिकृत एवकार्ये ह्यहमादिष्टो । आदिष्ट आज्ञायाः ।

गोचरं विषयं ।

विवेकेति—॥ विवेकस्य कुहनाबलात् मायाबलेन बाह्येषु बाह्यकुदृष्टिषु व्यतिहतेषु पराजितेषु सत्सुमोहश्रियः मोहलक्ष्म्याअसौ त्रिवर्गपदवीधर्मादिवर्गत्रयपद्धति शरणं रक्षित्री इह अस्मिन्कार्ये तापसीं शोच्यां विरक्तिमहं दूरादपनयामि त्वया विष्णुभक्तिस्सपदिविमथ्यबलात् विनिवर्त्यतां विनिवृत्ताकार्या ॥ १ ॥

संभवति च सर्वथा सर्वतः प्रसारिताभ्यां स्वर्गापवर्गगुणदोष जालाभ्यां तयोरुपरोधः। अहं पुनर्मायासहस्रवेदी मारीचमैथिलीन्यायेन विरक्तिन्तावत्तपस्विनीं विप्रलभे, भवतस्तु विष्णुभक्तिविमथने पौलस्त्य एव प्रमाणं।

द्वेषः—अथ किं।

रागः—यद्यपि, त्रय्यन्तवादिना महामोहसौवस्तिकानामग्रगण्या हिरण्यासुरपुरोहिता इव धरण्यामवतीर्णाः कबन्धमीमांसकाः प्रतिक्षिप्ताः, तथापि तन्मतमेव सोपपत्तिकमुत्तम्भयन् स्वामिकार्यं निर्वर्तयामि।

द्वेषः—स्थाने खलु भवतस्सामारम्भः, यदिहनास्तिक्यसम्वर्द्धकानां

कथं तयोर्विनिवर्त्तन मित्यत आह संभवति चेति।

सर्वथा सर्वैः प्रकारैः। सर्वतः प्रसारिताभ्यां विस्तृताभ्यां स्वर्गापवर्गगुणदोष जालाभ्यां स्वर्गस्य गुणजालेन अपवर्गस्यदोषजालेन च तयोरुपरोधस्संभवति। मायानां सहस्रं वेत्तीति मायासहस्रवेदी। मारीचमैथिलीन्यायेन मारीचोयथामैथिलीं विप्रलब्धवान् तथेत्यर्थः। विष्णुभक्तेर्विमथने पौलस्त्यः रावणएवप्रमाणं। रावणो यथा वैदेहीम पहृतवान् तथा त्वयापि विष्णुभक्तिरपहरणीयेत्यर्थः।

अथ किमित्यंगीकारे।

महामोहस्य सौवस्तिकानां पुरोधसां त्रय्यन्तवादिनां निर्विशेषचिन्मात्र ब्रह्मैव सत्यमन्यत्सर्वं मिथ्येतिवदतामग्रगण्याः सेनानेतारः। मायिनां महामोहसौवस्तिकत्वं। तदतिशयापादकत्वात्बोद्धव्यं।

धरण्यामवतीर्णाः हिरण्यासुरपुरोहिताः शुक्राचार्या इव स्थिताः तेह्येकदृष्टि विकलाः एवमेतेपि कबन्धमीमांसकाः उपनिषद्वैकल्यात्। एतेहि मायिनां अग्रण्यः। स्वयं वेदान्तानामप्रामाण्यमंगीकृत्य तद्वदेव तेषां पूर्वभागाप्रामाण्यांगीकारापादकत्वात्ते प्रतिक्षिप्ता यद्यपि इत्यवधारणे प्रतिक्षिप्ता एवेत्यर्थः। तथापि तन्मतं कबन्धमीमांसकमतमेव सोपपत्तिकं उपपत्तिसहितं यथा भवति यथा उत्तंभयन् अवलंबमानः स्वामी महामोहः तत्कार्यं।

नासीरे सेनामुखे वर्त्तमाना विजयसूचनी पताका विजयपताका। सोपपत्तिकमित्यवोक्तामुपपत्तिमाहाल्पमिति—॥

महामोहसैनिकधुरन्धराणां नासीरविजयपताका निरीश्वरमीमांसा समालम्ब्यते ।

रागः—

अल्पमस्थिरमानन्दमिच्छतो यदि रागिता ।
अनन्तस्थिरकामस्य विरक्तिः कस्यकीदृशी ॥ २ ॥
स्वस्यैवाप्तिस्सुखमिति मृषास्वेतरस्यानुभूतौ कामा
दन्यः क इव घटते मोक्षनामा पुमर्थः ।
तस्मादस्मद्बहुमतनिरध्यक्षमीमांसकोक्त्या ।
स्वेच्छानृत्यद्बहुगुणनिधिस्स्वर्ग एवापवर्गः ॥ ३ ॥

अल्पमिति—॥ अल्पं परिमितं दुःख बहुलमस्थिरं अचिरस्थायिनं चानन्दमिच्छतो जनस्य रागिता रागवत्ताभ्युपगतायदि ज्योतिष्टोमादिकर्मानुष्ठानेन स्वर्गं प्राप्तस्य योयमानन्दस्सखल्वल्पोऽस्थिरश्च तथाच श्रुतिः ।

"तद्यथेह कर्मचितोलोकः क्षीयते एवमेवामुत्रपुण्यचितोलोकः क्षीयते अन्तवदेवास्य तद्भवति" इत्यादिका श्रुतिश्च

तेतंभुंक्त्वा स्वर्गलोकं विशालं ।
क्षीणेपुण्ये मर्त्यलोकं विशन्ति ॥
स्वर्गेपि पातभीतस्य क्षयिष्णोर्नास्तिनिर्वृतिः ।

इत्यादिका । एवंभूतमानन्दमिच्छन् रागितयादूष्यते यदि अनन्ते स्थिरेचानन्दे कामइच्छा यस्य तस्य विरक्तिः कीदृशीकिंभूता मुक्तानन्दस्यानन्तास्थिरत्वं च निरतिशयानन्दरूपब्रह्मानुभवतयैव ।

रसो वैसः रसँह्येवायंलब्ध्वानन्दीभवति ।

इति श्रुतेश्चाल्पास्थिरानन्दकामस्यापि वैराग्याभावांगीकारे अनन्तस्थिरानन्दकामस्य वैराग्याभावः किं पुनर्न्यायसिद्धइतिभावः ॥ २ ॥

एवं विरक्तेरसंभवउक्तः अथ

स्वर्गापवर्गयोः गुणदोषौ दर्शयति अपिचेतिप्रथमं तावन्मोक्षस्य कामत्वं प्रतिपाद्य तद्द्वारा दोषं दर्शयति

स्वस्येति—॥ मोक्षोनाम स्वस्यैवाप्तिर्वा स्वेतरानुभूतिर्वेतिद्वेधा विकल्प्यप्रथमं दूषयति स्वस्यैवाप्तिस्सुखं मोक्षसुखं इतिमतं चेत्तन्मृषा स्वस्य नित्यप्राप्तत्वेन मोक्षो

द्वेषः—किमुच्यते, अयं पुनर्महामोह तन्त्रपारदृश्वभिः परमार्थोपदेशिभिस्सावधाननिपुणनिरूपितसम्प्रदाय परंपरासमधिगतोऽर्थः ।

प्रपञ्चकृतकंचुकं यदि परं महः प्राप्यते
नदुःखमपहस्तितं भवति नैकथोपप्लवात् ।
अथैकमखिलोज्झितं नखलु भोग्यतामेतित
त्ततो निगममस्तकै र्निगदमात्रशेषैस्स्थितम् ॥ ४ ॥

रागः—सखे, साधुभाषितं, नूनमीदृशेन वचसा दवदहनदन्दह्यमान तरुशिखरकुलायकुहरनिष्क्रान्ता विहङ्गपङ्क्तिरिव विष्णुभक्तिरपसर्पति, अद्य खल्वनादिभोगवासनाजालजटिलबुद्धे रात्मनः कथंनाम निर्विवेको विवेकस्सभारजिहासां साधयिष्यति, प्रत्युत

पायोपदेशवैयर्थ्यात् द्वितीयं दूषयति स्वेति स्वस्मादितरस्यानुभूतो मोक्षतयाङ्गीकृतायां मोक्षनामापुमर्थः कामादन्यः कइव घटते किंतु कामएवघटति । स्वर्गस्यगुणंदर्शयति तस्यादिति—। तस्मात्कामस्यैवमोक्षत्वादस्माभिर्बहुमतया निरध्यक्षमीमांसकोत्त्या निरीश्वरमीमांसकोत्त्या स्वेच्छया नृत्यतां बहूनां गुणानां निधिः स्थानभूतः स्वर्ग एवअपवर्गः ॥ ३ ॥

एवं स्वर्गापवर्गयोः गुणदोषौ श्रुत्वा मोक्षप्रतिपादकश्रुतिशिरसां वैयर्थ्यंद्वेषः प्रतिपादयितुं तत्प्रतिपादनस्य संप्रदायसिद्धत्वमाह—अयमिति ।

महामोहतन्त्रस्य महामोहमतस्य पारदृश्वभिः पारदर्शिभिः परमार्थं सत्यमुपदिशन्तीति परमार्थोपदेशिनः तैस्सावधानतया निपुणं समर्थं निरूपितस्संप्रदायः उपदेष्टृपारंपरीतस्यपरंपरा अविच्छेदः ततोधिगतः अर्थः । कोसावित्यत आह—।

प्रपञ्चेति—॥ प्रपञ्चेन चिदचिदात्मकेन कृतकंचुकं कृतावरणं तद्विशिष्टं परंमहः प्राप्यते यदि दुःखमपहस्तितं निरस्तं न भवति कुतः नैकथा अनेकप्रकारेण उपप्लवात् क्लेशात् चिदचिद्गतदोषाणां तद्विशिष्टब्रह्मण्यवर्जनीयत्वेन तत्प्राप्तॄणां न दुःखं निरस्तंभवति अथेति पक्षान्तरे अखिलोज्झितं अखिलविशेषविधुरमेकं प्राप्यते यदि तत् ब्रह्मभोग्यतां नैति खलु प्रस्तरतुल्यस्य तस्य भोग्यताभावात् तत उक्तरीतेः निगममस्तकैः वेदान्तैः निगदमात्रं पाठमात्रं शेषः येषांतैस्स्थितं नत्वर्थज्ञानपरैः ॥ ४ ॥

दवदहनेन वनवह्निना दह्यमानस्य तरोःकुलायकुहराचीडाभ्यन्तरान्निष्क्रान्ता विहङ्गपङ्क्तिरिवानादिभोगवासनया अनिदंप्रथमया भोगवासनया जटिला निबद्धा-

दिव्यभौमयुवतिगुणापह्नवकुतूहली तद्गुणैरेव निबिडं निबध्यते पश्य तावदमृतोद्भवाः अमरलोकतिलकभूताः पद्मलोचनाः ।

यासां

स्मेरेण स्तनकुट्मलेन भुजयोर्मध्यं तिरोधित्सितं
नेत्रेण श्रवणं लिलंघयिषितं नीलोत्पलश्रीमुषा ।
अङ्गं सर्वमलञ्चिकीर्षितमहोभावैस्स्मराचार्यकै
स्तन्वीनां विजिगीषितञ्चवयसा धन्येन मन्येजगत्॥५॥

तिष्ठतु तावदभिनवयौवनविजृम्भणं, परामृश्यतां पुनर्विभ्रमावेशः ।

अभिनयति यथार्थान्भ्रूपताकापुमर्थान्
गतिरपिगतिमन्यां मन्यते गर्हणीयां ।

बुद्धिर्यस्य तस्यात्मनस्य पुरुषस्य निर्विवेकः विवेकशून्यः संसारे जिहासां त्यागेच्छ- साधयिष्यति अत्रकाकुरनुसंधेया न साधयिष्यतीत्यर्थः दिव्याश्च भौमाश्च युवतयः तासां येगुणाः सौन्दर्यशीलादयः तेषां अपह्नवे तिरस्कारे कुतूहली प्रत्युतवैपरीत्यात् तद्गुणैरेव निबिडं निबध्यते केते गुणा इत्यत आह पश्येति । अमृतोद्भवाः अमृतेन सहोत्पन्नाः अमरलोकस्य स्वर्गस्य तिलकभूताः अलंकारभूताः यासां ॥

स्मेरेणेति—॥ तन्वीनां स्मेरेण विकसितेन स्तनकुड्मलेन कुड्मलेनेव स्थितेन स्तनेन ईषदुदयतेत्यर्थः भुजयोर्मध्यं तिरोधित्सितं तिरोधितं कर्तुमिष्ठं नीलोत्पलस्य कुवलयस्यश्रियं मुष्णातीति मुट् तेन नेत्रेण श्रवणं लिलङ्घयिषितं लङ्घयितुमिष्ट स्मराचार्यकैः स्मरः आचार्यो येषांते तथा तैः भावैः विलासैः सर्वमङ्गमलञ्चिकीर्षितं अलंकर्तुमिष्टं धन्येन श्लाघ्येन वयसा यौवनेन जगत् विजिगीषितं विजेतुमिष्टं । अनेन यौवनारंभवर्णनेनाप्सरसां सेवावस्थेति व्यज्यते ॥ ५ ॥

तदेवोच्यते तिष्टत्वित्यादिना–।

अभिनवस्य यौवनस्य विजृंभणमिदं तिष्ठतु । विभ्रमाणामावेशः विकारः परामृश्यतां निरूप्यतां । कोसावीत्यत आह

अभिनयतीति—॥ भ्रूपताका पताकेवस्थिताभ्रूःयथार्थान् सत्यान् पुमर्थान् कामपुरुषार्थानभिनयति प्रत्यक्षंदर्शयति गतिरपि अन्यांगतिंकरिवरहंसादिगतिंगर्हणीयां

मदकलुषितमन्तर्मन्मथाद्वैतगर्भा
मुपनिषदमधीते लोचनं लोलतारं ॥ ६ ॥

द्वेषः—सहर्षामर्षं, । सखेविश्वपुरुषार्थविशेषविद्भिस्त्वन्मतप्रतिष्ठा पकैः कामकामैरेभिः कक्षीकृतं महानन्द लक्षणं मोक्षतया महर्षि विशेषभाषितं पुरन्दरपुरीभुजिष्याभोगमवधूय विपश्चितामपि कथ्वायं विप्रतिषिद्धवादः ।

सर्वाधारः कथं भूयात्सर्वदोषबिवर्जितः ।
तथैव सर्वकामार्थी निरपेक्षः कथं प्रभुः ॥ ७ ॥

रागः—सखे, न चैतावदेव ।

मधुभरित हेम कुंभी
मधुरिमधुर्यौ पयोधरौ सुदृशां ।

निन्दनीयां मन्यते नैवामयातुल्येति मनुते लोलातारायस्मिन् तत्तयालोचनमन्तर्मदकलुषितं मदेनाविलं सत् मन्मथाद्वैतं मन्मथः एक एव दैवतं नान्यदितितदैक्यं गर्भं यस्यास्तामुपनिषदमधीते ॥ ६ ॥

अप्सरस्संभोगस्मरणाद्धर्षः तदवधूननेनामर्षःताभ्यां सहितं यथा भवति तथा। सखे इतिरागस्य संबोधनं । विश्वेषां पुरुषार्थानां विशेषविद्भिः तारतम्यविद्भि कामकामैः कामेषु काम्येषु भोग्येषु वस्तुषु काम इच्छा येषां तैः कक्षीकृतमङ्गीकृतं महानानन्दं लक्षणं स्वरूपनिरूपधर्मं यस्य तन्मोक्षतया महर्षिविशेषभाषितं । महर्षिविशेषश्चौं वात्स्यायनपरः। नीवीमोक्षोमोक्ष इतिहितेनभाषितं । पुरंधरपुरी अमरावती तस्यां भुजिष्याः वेश्याः तासां भोगं विपश्चितामपि विविधंपश्येच्छित्वंहि विपश्चित्वं तेषामपि विप्रतिषिद्धवादः विरुद्धवादः ॥

तमेवाह

सर्वेति-॥ सर्वेषां चिदचितामाधारः शरीरितया धारकः परमात्मा सर्वदोषविवर्जितः मद्गतदोषास्पृष्टः कथं भूयात् शरीरगतैरपि रोगादिभि रात्मनोपि दुःखादिदर्शनात् सर्वकामार्थी सर्वैः कामैः अर्थी प्रभुः कथं निरपेक्षः तस्य सर्वकामार्थित्वं तस्मिन्कामास्समाहिता इत्यादिश्रुतिसिद्धं नानवाप्तंमवाप्तव्यमित्यादिभिर्निरपेक्षत्वं च प्रतिपाद्यते । अतोयंवादः विप्रतिसिद्धः ॥ ७ ॥

एतावद्विप्रतिसिद्धभाषणमात्रं न अन्यदप्यस्तीत्यर्थः । तत्किमित्यत आह—

मध्विति-॥ मधुना भरितयोः पूर्णयोः हेमकुंभ्योः मधुरिमणा प्रियत्वे धुर्यौ

पिशितमिति भावयन्तः
पिशाचकल्पाः प्रलोभयन्ति जडान् ॥ ८ ॥

[आकाशे] किं ब्रूथ, किंच तथेति, अहह अन्धानां कथमभिलष्यते पयसो नैर्मल्यं ।

द्वेषः—अहोमहानयमध्यात्माभिनिवेशो विवेकपरतन्त्राणां वेतालानां अथवा, युक्तमेवैतत्, न खलु बधिराणां कुतूहलमातनोति काकिलालापः, तिष्ठन्त्वेते विवेक एव तावज्जेतव्यः, यतः

विवेक विजयादेव विद्वत्परिषदो जयः ।
उपघ्नतरुविच्छेदे न किमुच्छिद्यते लता ॥ ९ ॥

रागः—साधु विचिन्तितं ।

द्वेषः—[सोच्चैर्हासं]

अनघगुणौघमेकमवधूत समाभ्यधिकं
स्ववितरणीय्य सर्वपुरुषार्थ मुपास्ति पदं ।

धूर्वहो सुदृशां पयोधरौ पिशितं मेद इति भावयन्तः ध्यायन्तः अतएवपिशाचकल्पाः सदसद्विवेकशून्याः जडान् मन्दान् प्रलोभयन्ति वञ्चयन्ति ॥ ८ ॥

तथापि पिशितं न किमिति ब्रूथ । किमित्यनुवादः । अहहेति खेदे । पयसो जलस्य नैर्मल्यं अन्धानां कथमभिलष्यते ।

अध्यात्मशास्त्राभिनिवेशो विवेकपरतन्त्राणां वेतालानां पिशाचविशेषाणां अध्यात्माभिनिवेशात्किलेयमुक्तिरितिभावः ।

पक्षान्तरमाह अथवेति—।

विवेकेति—॥ विद्वत्परिषदः तदुपजीवि शमदमादीनां विदुषां परिषदः समूहस्य जयोभवतीति शेषः उपघ्नभूतस्य तरोर्विच्छेदे तदाश्रयालता नोच्छिद्यते किं उच्छिद्यत एवेत्यर्थः ॥ ९ ॥

विवेक सामर्थ्यज्ञानेनोच्चैर्हासः ।

अनघेति—॥ अनघः हेयगुणरहितः गुणानां सत्यकामत्वादीनामोघः समवायो यस्य तमेकमद्वितीयं अवधूतो समाभ्यधिकोयेनतं स्ववितरणीयाः स्वेन वितरणीयाः प्रदेयास्सर्वे पुरुषार्थाः धर्मादयः यस्य तं उपास्तिपदं उपास्तेः उपासनस्यपदं स्थानं

उपनिषदूषरान्तरुपवर्तनधूसरधी
र्नखलु विवेकएषमयि तिष्ठति साधयिता ॥ १० ॥

[नेपथ्ये] कः कोऽत्रभोः ।

उभौ–(कर्णन्दत्वा), (सभयसंभ्रमं), आः कष्टमापतितं । नरपतिनियोग निर्वाहकौ कथमावां भविष्यावः, हन्त विपरिवृत्तमिवास्माकं भागधेयं ।

अद्यहि

अतिक्रम्यदुरुच्छेदामास्माकीङ्गुणवागुरां ।
विरक्तिर्विष्णुभक्तिश्च विवेक स्थानमृच्छतः ॥ ११ ॥

स चैष नूनं विरक्तिविष्णुभक्तिभ्यां प्रोत्साहितो देव्यासुमत्या दत्तहस्त इतोऽभिसमेति, जितकाशिनश्चामुष्यसन्निधाने मन्दभाग्यैर्नास्माभिस्थातव्यं, जीवन्तोऽहि भद्राणि पश्यन्ति । अस्मदवरजाभ्यामपि कामक्रोधाभ्यामविलंबितकारिभ्यां विलंबनीयं, कालेहिसर्वं संपद्यते न चानेन व्यवसायसहायेन दुर्जयः कश्चित् एवञ्च नूनमापत्स्यते राजकृत्यं ।

उपास्यमित्यर्थः उपनिषद एव ऊषरं सस्यानर्हं लवणप्रायं क्षेत्रं तदन्ते तत्परिसरे परिवर्तनेन भ्रमणेनधूसराः रजस्वलाधीर्यस्य सतथा एषविवेकः मयितिष्टति पुरतोवर्त्तमाने सति साधयिता । न खलु द्वेषे जायति वेदान्तवेद्यं ब्रह्मोपास्यमिति विवेको न घटत इतिभावः ॥ १० ॥

इदमाकर्ण्य नेपथ्ये स्थितो विवेकः कोपादाहकः कइति ।

तद्वचस्समाकर्णनाय कर्णं दत्वा ।

आतिपतितः अतिक्रान्तः नरपतिः राजा महामोहः तन्नियोगस्य तत्प्रेरणस्य निर्वाहः निर्वहणंयाभ्यांतौ आवां कथं भविष्यावः राजनियोगमति लंघितवतोरावयोर्जीवितंधिगितिभावः । परिवृत्तं पराङ्मुखं ॥

अतिक्रम्येति–॥ दुरुच्छेदां दुःखसाध्योच्छेदां गुणवागुरां स्वर्गादिगुणवर्णनामयीं वागुरां मृगबन्धिनीं विवेकस्थानं ऋच्छतः गच्छतः ॥ ११ ॥

जितकाशिनो जयशीलस्य मन्दं भाग्यं येषां तैरविलंबितं यथाभवतितथाकुरुत इत्यविलंबितकारिणौ ताभ्यां विलंबे कार्यहानिस्स्यादित्यत आह कार्यं अनेनविवेकेन दुर्जयः कश्चिदपिनास्तीत्यर्थः । आपत्स्यते आपन्नं भविष्यति ।

धिग्धिग्वासवशम्भलीनयनयोरालोलमालोकित
न्धिग्धिङ्मान्मथकार्मुकंयुधिसदाटङ्कारसाडंबरं ।
धिग्धिक्पञ्चमपाठकान्परभृतो धिग्धिक्किमन्यैर्जडै
श्शृङ्गारागमरङ्गमण्टप नटींमोहेन्द्रवीरश्रियं ॥१२॥

अद्यहि ।

निर्जित्यमोहमसुरेन्द्रमिवामरेन्द्रो
बद्धस्य संसृपुरुषस्य पुरुषस्यविमोक्षणेन ।
अश्रूण्यकृत्रिमगिरामभिषङ्गजाता
न्यानन्दजैर्विपरिवर्तयिताविवेकः ॥ १३ ॥

इति वदन्तौ निष्क्रान्तौ ।

॥ शुद्धविष्कंभः ॥

ततः प्रविशति विवेकस्सुमतिश्च ।

विवेकः—देवि समाश्वसिहि समाश्वसिहि परप्रयुक्त पाटच्चरभयापाने
दनेन विरक्तिविष्णुभक्ती त्वत्सकाशंप्रापिते ।

धिगिति-॥ वासवस्य शंभल्याः कुट्टिन्याः सुरवेश्यायाः इत्यर्थः नयनयोरालोलं चंचलमालोकितं कटाक्षं धिक् द्विरुक्तिरनादरादतिशयं सूचयति सदाटंकारेण साडंबरं गर्वं मन्मथकार्मुकं मदनचापं पंचमस्य पंचमस्वरस्य पाठकान् पठनपरान् परभृतान् पिकान् शृंगारागमः कामशास्त्रमेवरंगमण्टपः नृत्तशाला तत्र नटीं मोहेन्द्रस्य महामोहराजः वीरश्रियं वीर्यार्जितां श्रियं धिक्परैः महामोहमतप्रधानैरन्यैः किंसाध्यं-किमित्यर्थः ॥ १२ ॥

अत्रचायमर्थो निष्पन्न इत्याह—

निर्जित्येति-॥ विवेकः अमरेन्द्र इव मोहं असुरेन्द्रं व्यस्तरूपकमिदं निर्जित्य बद्धस्य संसारपाशेन नियन्त्रितस्य पुरुषस्य विमोक्षणेन विमोचनेन अकृत्रिमगिरां श्रुतीनां अभिषंगेन परिभवेन जातान्यश्रूणि आनन्दजैरश्रुभिः विपरिवर्तयिता विनिवर्तयिता शोकाश्रूणां आनन्दाश्रुत्व हेतुर्भविष्यतीत्यर्थः ॥ १३ ॥

॥ शुद्धविष्कंभः ॥

सुमत्या दत्तहस्त इत एवाभिसमेतीति सूचितस्य विवेकस्य प्रवेशमाह तत इति-।

सुमतिः-(दीर्घंनिश्वस्य) * णाहतहवि अज्जवि किंहोज्जत्ति तरलहिअआ किंभणामि पच्चवण आरिणोखु राअद्दोसाओ ओसरं पेक्खदि

विवेकः-भीरु माभूदिह मनोदौर्बल्यं किमस्माकमपिसंनिधौरागद्वेषयोरवकाशः ।

अपिच,

अनुचितपदवीभिश्चिन्तयित्वाप्रयाता
न्यलमलमतिमात्रैरथ्यबाले विषादैः ।
उपनिषदमुदारामुद्वमन् क्वापिलक्ष्ये
शरणमुपगतान्नस्त्रायतेशार्ङ्गधन्वा ॥ १४ ॥

सुमतिः-(सविषादं संस्कृतमाश्रित्य) आर्यपुत्र,

सर्गेषु प्रतिसंचरेषु बहुशस्स्वर्गेतथादुर्गतौ
जाग्रत्स्वप्नसुषुप्ति मुग्धि मरणावस्थासुदुस्थासु च ।

---

* नाथ, तथापि अद्यापि किं भवेदिति तरल हृदया किं भणामि प्रच्छन्नचारिणौ खलुराग द्वेषावसरं प्रेक्षेते ।

समाश्वासः कुत इत्यत आह परेति-।

परप्रयुक्तयोः परेणशत्रुणा महामोहेन प्रेषितयोः पाटच्चरयोः तस्करयोः रागद्वेषयोः अपनोदनेन निरसनेन मनोदौर्बल्यं माभूत्कुत इत्यत आह किंमस्माकमिति-।

हेत्वन्तरमाह-

अनुचितेति-॥ हे बाले अनुचितपदवीभिः स्वर्गनरकादिमार्गैः निरतिशयानन्दलक्षणपरमपुरुषचरणसरोजपरिचर्योचितस्य पुरुषस्य स्वर्गादि पदव्योनुचिता एव ताभिः प्रयातानि यातायातानि चिन्तयित्वा अतिमात्रैरधिकैः विषादैरलं विषादो न कार्य इत्यर्थः क्वापि लक्ष्ये अर्जुनरूपे क्वचिद्विषये उदारां निरतिशय पुरुषार्थरूपमोक्षप्रदामुपनिषदं गीतोपनिषदमुद्वमनुपदिशन् शार्ङ्गधन्वा शार्ङ्गं धनुर्यस्यस शरणमुपगतान् शरणागतानः अस्मान् त्रायते रक्षति । अतस्ते मनोदौर्बल्यं माभूदितिभावः ॥ १४ ॥

विषादातिशयेन स्वस्वभावं विस्मृत्य संस्कृतभाषया सुमतिर्वदति आर्यपुत्रेति ।

सर्गेष्विति-॥ सर्गेषु सृष्टिषु प्रतिसञ्चरेषु प्रलयेषु स्वर्गे दुर्गतौ नरके दुस्थासुदुःखरूपासुजाग्रदाद्यवस्थासु च दुःख्यन्दुःखमनुभवन् प्रस्तरवद्भवन् सुखाद्य-

दुःख्यन् प्रस्तरवद्भवन् बहुपशुःसुःख्यन्नसौ देहभृद्
दग्धादग्धसजीवितद्रुमदशादीनोदरीदृश्यते ॥१५॥

अपिच,

विचित्रजवविश्वकृद्विहृतिमारुतप्रेरणा
विभक्त भवितव्यताविपिनसिन्धुविष्फूर्तिभिः ।
जटालवृजिनाविलेजवनयौवनास्वादने
जरामरणभीषणेजगतिजन्तुरावर्त्यते ॥ १६ ॥

विवेकः–(सानुशयं) देवि सत्यमिदमितः पूर्वं, अद्यखलु अपुनरावर्त्तनी-
मारुरुक्षतः पुरुषस्य चिरकालसंचितपुण्यसंचयविशेषमाकर्णय-

पातत्रासनिरीक्षणप्रशमितस्वर्वासदुर्वासना
पुंसस्संप्रतिशेमुषीनिरवधिंपुष्णातितृष्णांपरे ।

नुभवाभावात् पाषाणकल्पोभवन् बहुपशुः हिताहितविवेकापायात् पशुसमः सुख्य न्सुखमनुभवचसौ देहभृत् दग्धश्चादग्धश्च सजीवितो यो द्रुमः तस्य दशया दीनः शोच्यः दरीदृश्यते क्वचित्प्रदेशे दग्धः प्रदेशान्तरे पत्रपल्लवाद्युपेतः अतएव अन्तरार्द्र तरुर्यथा शोच्योभवति तथायमपि पुरुषोतिशोच्यो दृश्यतइति हृदयं ॥ १५ ॥

पुनरपि तदवस्थामेवाह अपिचेति–॥

विचित्रेति–॥ विचित्रः जवो यस्यास्सा तथा साचासौ विश्वकृद्विहृतिश्च भगवल्लीलासैव मारुतस्तस्यप्रेरणया विभक्तायाः भवितव्यतायाः विपिनजालं तदेव सिन्धोः समुद्रस्य विष्फूर्तिभिः जटालानि परस्परानुबद्धानि वृजिनानिपापानि तैरा-विले संक्षुब्धे जवनं वेगवत् अस्थिरं यौवनस्यास्वादनं यस्मिन् तस्मिन् जरामरणाभ्यां भीषणे एतद्द्वयोपादान मन्येषां रोगादीनामप्युपलक्षणं जगति आवर्त्यते पुनः पुनः आवर्त्य मानाः क्रियते ॥ १६ ॥

अपुनरावृत्तिं पुनरावृत्तिर्नविद्यते यस्यां तां वर्त्तनीं पदवीमारुरुक्षतः आरोढुमि च्छतो मुमुक्षोरित्यर्थः चिरकालसंचितेन पुण्यसंचयेन परिणतां तमेवाह–

पातेति–॥ पातः पतनं तस्मा त्त्रासः भयं तस्य निरीक्षणेन स्वर्गेपि पात-भीतस्य क्षयिष्णोर्नास्ति निर्वृतिः इत्युक्तेः स्वर्गे वसतोपि पातभयमस्तीत्यवगम्यते तदवलोकनेन प्रशमिता स्वर्वासदुर्वासना स्वर्गवास दुर्वासना यस्यास्सा तथा पुंसःशे-मुषी बुद्धिर्निरवधिं तृष्णां परे सर्वाधिके पुंसि पुष्णाति वर्धयति भतिकल्मलं बुद्धि-

अर्थित्वे मतिकश्मलप्रचलितेप्येवंप्रतिष्ठापिते
सामर्थ्यंचसमाधिसीम्निनियतावस्थंव्यवस्थाप्यते १७

अपिच,

प्रतिक्षिप्तावद्यप्रवरगुणनिर्धारणभुवा
परप्रेम्णाजुष्टोभवभृदधुना भाग्यवशतः ।
अभिन्नास्वादानामम‍ृतलहरीणामिवधियां
विकल्पंविज्ञाताविधिपवनवैषम्यजनितम् ॥ १८ ॥

अयंचपरमपुरुषचरणारविन्दमकरन्दमुधुकरो वृन्दारकनगरमपिनरकमिव परं निश्चेष्यति ।

अत्रच,

भवपथकथारागेभग्नेगतागतचिन्तया
परमपुरुषप्रेप्सालाभेतदद्भुतबोधनात् ।

चांचल्यं अक्षयंहवै चातुर्मास्ययाजिनस्सुहृदंभवति इत्यादिश्रवजनितमतिक्षोभो प्रचलितेप्यर्थित्वे एवं स्वर्गपातत्रासनरीक्षणेन प्रतिष्ठापिते सति समाधिसीम्नि सामर्थ्यं च नियतावस्थं नियता निश्चला अवस्था अवस्थानं यस्य तत्तथा व्यवस्थाप्यते अनेनास्य मुमुक्षा समाधौ सामर्थ्यं च सिद्धमिति द्योत्यते ॥ १७ ॥

उपायानुष्टानं च भविष्यतीत्याह प्रतिक्षिप्तेति–॥

प्रतिक्षिप्तेति–॥ प्रतिक्षिप्तानिनिरस्तानि अवद्यानि दोषा येषां ते प्रतिक्षिप्तावद्याः हेयप्रतिभटा इत्यर्थः तेचते प्रवरगुणाश्चेति कर्मधारयः प्रवरगुणाः कल्याणगुणाः तेषां निर्धारणेन निश्चयेन भवतीति निर्धारणभूः तेन परप्रेम्णा परस्मिन् ब्रह्मणि प्रेम्णा भक्तिरूपेन भाग्यवशतः अधुना जुष्टो भवभृदभिन्नः एकरूपः आस्वादः भोगरसः यासांतासां अमृतलहरीणां अमृतप्रवाहानामिव भोग्यभूतानां धिया ज्ञानानां विधिः ध्यायीत उपासीतेत्यादिरूपः स एव पवनः तस्य वैषम्येण भेदेन जनितं विकल्पभेदं विज्ञाता ज्ञास्यति नानाशब्दादिभेदादिति सूत्रकारेणोक्तं विद्यानां नानात्वं ज्ञास्यतीतिभावः ॥ १८ ॥

इतः परमस्य स्वर्गाभिलाषो न भविष्यतीत्याह अयंचेति–। उक्तं ह्येतत्

एते वै निरयास्तात स्थानस्य परमात्मनः । इति

अथमिदानीं सिद्धां साध्यां सत्त्वसंवेत्याह अत्रचेति–॥

गुणगणभिदासंभेदाभ्यामुपस्कृतविग्रहे
क्षममिहपरंविद्यावर्गेविमोहनिवर्तनम् ॥ १९ ॥

इह च मोहप्रशमनंदिङ्मात्रेणोदाहरामि

समानामुक्तिश्चेन्नखलुघटतेसाधनभिदा
नचेत्स्वर्गन्यायस्तरतमतयान्याभिमतया ।
प्रमाणप्रागल्भ्यप्रणिधिमवधूयप्रलपता
मतिक्षीबः क्षोभस्स्वमतिविहतेरेवनिहतः ॥ २० ॥

एवमपि ये मुह्यन्तितेमुह्यन्त्येव नखलुसहस्रैरपि सलिलकुम्भैर्बलिभुजः प्रक्षाल्यमानाधवलत्वतांप्रतिपद्यन्ते दुर्वादिगर्वसर्वस्वनिर्वापकैस्सर्वज्ञबुद्धिवेदिभिर्वर्णितं निर्विशङ्कमखिलमधिगम्यसर्वेश्वरंनिर्विशन्तिसन्तः—

भवेति—॥ गतागतचिन्तया जायस्वम्रियस्वगतागतं कामकामालभन्ते इत्यादि प्रमाण बलादस्य पुरुषस्य गतागत चिन्तया भवपथः संसारमार्गः तस्य कथाप्रसंगः तद्विषये रागे भग्ने सति तस्य परमपुरुषस्याद्भुतमाश्चर्यरूपं यद्गुणशीलादिकं तस्य बोधनात् ज्ञानात् परमपुरुषप्रेप्सायाः परमात्मप्राप्तीच्छायाः लाभेसति गुणानामानन्दादीनां गणस्य भिदासंभेदाभ्यां भिदाभेदः अनुपसंहारः संभेदः उपसंहारः ताभ्यामुपस्कृत विग्रहे उपस्कृत स्वरूपे विद्यावर्गे विमोहनिवर्तनं परं क्षमं युक्तं विमोहः भ्रमः तन्निवर्तनमेव कर्तुं युक्तमितिभावः ॥ १९ ॥

अत्रपूर्वपक्षिणोयमभिप्रायः मुक्तिस्तावदेका वा उतानेका आद्ये कल्पे साधन बहुत्वं नस्यात् एकेनैव साध्यसिद्धौ साधनान्तराणां वैयर्थ्यं स्यात् द्वितीये स्वर्गस्येव मुक्तेरपि तारतम्यं स्यादिति एतद्दूषयितुमनुवदति—

समानेति—॥ मुक्तिः तत्तद्विद्याभिः साध्यामुक्तिः समाना एकाचेत् साधन भिदा साधनानामुपकोसलविद्या सद्विद्या दहरविद्यादीनां भेदः नघटते खलु वैयर्थ्यात् इत्यर्थः एका नचेत् अन्याभिमतयामीमांसकाभिमतयातरतमतया स्वर्गन्यायः प्रसज्जेतेति शेषः परिहरति प्रमाणेति—। प्रमाणानां प्रागल्भ्यं धाष्ट्यं तद्विषयं प्रणिधिं चिन्तामवधूयापहाय प्रलपतामिति उक्तप्रकारेण क्षीबैरज्ञैः कृतः क्षोभः स्वमतिविहतेः मुक्तेरेकत्वे साधन बहुत्वस्य वैयर्थ्यात् साधन बाहुल्येन स्वर्गस्येवास्यामुक्तेरपि बहुत्वमंगीकरणीयमिति या स्वमतिः तस्याः निरञ्जनः परमं साम्यमुपैतीत्यादि प्रमाण बलात् विहतेरेवहेतोः निहतः प्रतिक्षिप्तः ॥ २० ॥

सुमतिः—(सश्लाघं) * णाह, पडिट्ठाविम्हि दाणिंपमाणप्पणअपेसलेन तुम्ह भासिएण, पडिबुद्धजण संभावणिज्जेपमाण उत्तन्दणिरिक्खणंमिसमब्भहिअदरिद्दं खुतुह माहप्पं, दाणिं क्खि ।

कप्पारम्भपअण्डतण्डवकला कीलन्तकालान्दअ
क्खोहुव्वेलकवन्द सिन्धुलहरी धूअन्तचन्दप्पहं ।
एक्कक्खरणिअणिब्भरसुहासन्दोहसन्तोसिआ
आमेल्लन्दि भुअङ्गिआतुह जसम्वेलन्तसेलन्दरे ॥ २१ ॥

* नाथ प्रतिष्ठापितास्मि इदानीं प्रमाणप्रणयपेशलेन युष्मत् भाषितेन प्रतिबुद्धजनसम्भावनीये प्रमाणवृत्तान्तनिरीक्षणे समाधिकदरिद्रं खलु तवमाहात्म्यं ।

इदानीं किल ।

कल्पारम्भ प्रचण्डताण्डवकला क्रीडमानकालान्तक
क्षोभोद्वेलकपर्दसिन्धुलहरी धूयमानचन्द्रप्रभं ।
एकैकाक्षर निर्यन्निर्भरसुधासन्दोहसन्तोषिता
आम्रेडन्ति भुजङ्गिकास्तवयशोवेलान्तशैलान्तरे ॥

अतीन्द्रियेष्वर्थेषु श्रुतमेव प्रामाण्याद्धयाश्रुतमेव कल्पनीयमिति शुद्धन्त्येवेति—।

किमुक्तं मोक्षोनिवार्यतामित्यत्राह न खल्विति—।

अतएव अर्थस्थितिरित्याह दुर्वादीति—।

दुर्वादिनां गर्वसर्वस्व निर्वापकैः निवर्तकैः सर्वं जानातीति सर्वज्ञाबुद्धिर्येषां तैः निर्वर्णितं निष्कृष्यवर्णितं सर्वेश्वरं निर्विशङ्कमधिगम्यनिर्विशन्ति ।

नाथप्रतिष्टापितास्मीत्यादि-प्रतिबुद्धाः ज्ञानिनः तेच तेजनाश्च तैस्संभावनीये प्रमाणानां वृत्तान्तः प्रवृत्तिस्तस्य निरीक्षणे समाधिकाभ्यां दरिद्रं रक्षितं ।

कल्पारंभेति—॥ कल्पस्य प्रलयस्यारंभेप्रचण्डमुद्धतं यत्ताण्डवं तस्य कलया विद्यया क्रीडन् यः कालान्तकः रुद्रः तस्य क्षोभेण उद्वेलाउत्कूलाकपर्दे; तस्य जटाचूडे या सिन्धुर्गंगा तस्यालहरीभिः धूयमानस्य चन्द्रस्य प्रभेव प्रभा यस्य तत्तव यशः एकैका क्षरेभ्य निर्यान्ति निर्भरानिबिडा च या सुधा तस्यास्सन्दोहैः निष्यन्दः सन्तोषिताः आनन्दिता भुजङ्गिकाः वेलान्तेषु समुद्रतीरान्तेषु येशैलाः तेषामन्तरे आम्रेडन्ति पुनः पुनः गायन्तीत्यर्थः ॥ २१ ॥

(विद्यामाहात्म्यमनुचिन्त्यसहर्षरोमाञ्चं) ।

*जम्भाअन्त दइच्चमद्दणदआ सल्लो असोतस्सिणी
वी ईसीअलसाहुसुद्धसुहआसोहन्तिविज्जा इमा ।
जाणङ्किं विभवग्गिदाविअ जणो घेत्तूणचिन्ताणिअं
मुत्तिंपेक्खइहत्थमज्झणिहिअं मोहंमिसन्तेविअ॥२२॥

विवेकः—किमुच्यते, अवरोपितप्रायः खलु पुरुषस्य चिन्ताभारः अपि चास्यसंसारदोषदर्शनसातत्यसमुत्थितादपि परब्रह्मदिदृक्षासं रम्यजृम्भितं परमवैराग्यमुपधानीभवति ।

तथाहि ।

निषिद्धं विद्यार्थादधिकमपि काम्यञ्चविजहत्
परप्रीत्यैकर्मप्रतिनियतमादायमुदितः ।

* जृम्भमाणदैत्यमर्दनदयास्वर्लोक स्रोतस्विनी
वीचीशीतलसाधुशुद्ध सुभगाशोभन्तेविद्याइमाः ।
यासां किमपि भवाग्नितापितजनोगृहीत्वा चिन्तानीतां
मुक्तिं प्रेक्षतेहस्तमध्यनिहितां मोहेसत्येव ॥

जृंभमाणेति—॥ जृंभमाणदैत्यमर्दनदयैव स्वर्लोकस्रोतस्विनी तस्यावीचय इव शीतलाः साधुसम्यक्शुद्धाः पावन्यः सुभगाः सुखावहाः विद्याः शोभन्ते यासां मध्ये कामपि विद्यां भवाग्निना संसाररूपवह्निना तापितो जनः गृहीत्वा स्वीकृत्य चिन्तानीतां चिन्तया समाधिना आनीतां मुक्तिं मोक्षे शान्ते सत्येव हस्तमध्यनिहितां प्रेक्षते करतलगतां मन्यत इत्यर्थः ॥ २२ ॥

अवरोपितप्रायः प्रायेणावरोपितः खलु संसारस्य दोषाणामल्पत्वास्थिरत्वानर्थावहत्वादीनां दर्शनानि ज्ञानानि तेषां सातत्यमविच्छेदः तस्मिन् समुत्थितादपि वैराग्यात् परब्रह्मदिदृक्षायां संरंभेण जृंभितं वैराग्यमस्योपधानी भवति उपकरणंभवति । उक्ताद्वैराग्यादयमतिशयः चिह्नइत्याह—।

निषिद्धमिति—॥ निषिद्धं शास्त्रैरिति शेषः विद्यार्थात् विद्यानिष्पत्तिरेवार्थो प्रयोजनं यस्य तस्मादधिकं कर्म काम्यंकर्मच विजहत्त्यजन् परस्यभगवतः प्रीत्यै प्रतिनियतं कर्म नित्यनैमित्तिकरूपमादायानुष्ठीयात इव मुदितः शुभे शुभाश्रयभूते ब्रह्मणि अद्वैव

शुभश्रद्धा दुग्धोदधि नवसुधोल्लासललिते
समासावाधातुं त्वरयतिमुनिस्सम्प्रतिमनः ॥ २३ ॥

अपिच ।

विलक्षोपक्षिप्तं विषयरसगन्धर्वनगर
प्रशंसायाथात्थ्यं प्रणिदधतिचित्तेपितनुभृत् ।
मयादत्तेहस्तेमतिकलुषमुल्लंघ्यतरसा
परब्रह्मैकान्तीभवजलनिधिं गोष्पद्यति ॥ २४ ॥

सुमतिः—(सविमर्शं) * तहवि पिआमहप्पमुहे महाजोइजणे वासणादापिअविसअरसबलिसमोहिए णिसाअरगहणकोदूहलप्पसारिअकरस्सबालिसस्सविअ अहं उण कस्सविमोक्खे।होज्जन्ति विअलिआसंसं वीलिअं विअ मह माणसं ।

---

* तथापि पितामहप्रमुखे महायोगिजने वासनादापित विषयरसबलिशमोहिते निशाकरग्रहणकौतूहलप्रसारितकरस्यबालिशस्येव कथं पुनः कस्यापिमोक्षो भवेदिति विगलिताशंसंव्रीलितमिवमेमानसं ।

दुग्धोदधिः तस्य नवायाः सुधायाः उल्लास उद्भव इवललिते समाधौ मन आधातुं त्वरयति ॥ २३ ॥

विलक्षेति—॥ विलक्षेण लज्जया उपक्षिप्तमन्वितं यथा भवति तथा विषयेषु शब्दादिषु रसः प्रीतिः स एव गन्धर्व नगरं तस्य प्रशंसायाः याथार्थ्यं सत्यत्वं चित्ते प्रणिदधत्यपि तनुभृत् जीवः मया हस्ते दत्तेसति तरसा झटिति मतिकलुषं चित्तकालुष्यमुल्लंघ्य परब्रह्मणि एकान्तीसन्भवजलनिधिं संसाराब्धिं गोष्पदयति गोष्पदवन्मनुत इत्यर्थः ॥ २४ ॥

वासनयादर्शितः विषयरस एव बलिशंमत्स्यबन्धनं तेन मोहिते सति निशाकरग्रहणकुतूहलेन प्रसारितकरस्य बालिशस्येव विगलित आशंसः आश्वासो यस्यतत्तथा । यथा चन्द्रग्रहणापेक्षयाप्रसारित करस्य बालस्य तत्प्राप्तिर्नभवति तथैवास्य मोक्षलाभोपि न स्यादिति मानसाश्वासो मम नास्तीतिभावः ॥

साहं तपश्चरिष्यामि गर्भमाधातुमर्हसि ।
[1]तत्र मे शक्रहन्तारं पुत्रं त्वं जनयिष्यसि ॥ ३ ॥
तस्यास्तद्वचनं श्रुत्वा मारीचः कश्यपस्तदा ।
प्रत्युवाच महातेजा दितिं परमदुःखिताम् ॥ ४ ॥
एवं भवतु भद्रं ते शुचिर्भव तपोधने ।
जनयिष्यामि भद्रं ते शक्रहन्तारमीप्सितम् ॥ ५ ॥
[2]पूर्णे वर्षसहस्रे त्वं शुचिर्यदि भविष्यसि ।
[3]पुत्रं त्वं शक्रहन्तारं मत्तो वै जनयिष्यसि ॥ ६ ॥
एवमुक्त्वा महातेजाः पाणिना[4]संममार्ज ताम् ।
[5]संस्पृश्य चोक्त्वा स्वस्तीति जगाम तपसे मुनिः ॥७॥
[6]गते तस्मिन् रघुश्रेष्ठ दितिः परमहर्षिता ।
[7]उदक्प्रस्रवणे देशे तप आतिष्ठदुत्तमम् ॥ ८ ॥
[8]चरन्त्यास्तु तपस्तस्याः परां सन्नतिमास्थितः ।
परिचर्यां स्वयं शक्र[9]श्चकारात्यन्ततत्परः ॥ ९ ॥

---

1. जनयिष्यसि पुत्रं त्वं शक्रहंतारमाहवे ॥ G. 5. जनयिष्यसि पुत्रंत्वं etc. 2. For this Sl. B. 6. पूर्णे वर्षसहस्रेतु शुचिर्यदि भविष्यसि । पुत्रं त्रैलोक्यहंतारं मत्तस्त्वं जनयिष्यसि ॥ 3. This line is wanting in G., but P. has it. 4. G. 6. स ममार्ज etc. but P. has संममार्ज etc. 5. B. 7. (a)तामालभ्य ततः स्वस्ति इत्युक्त्वा तपसे ययौ ॥ (a) V. समालभ्य स्वभवनं जगाम स महान् ऋषिः ॥ 6. For this Sl. B. 8. गते तस्मिन्नरश्रेष्ठ दितिः परमहर्षिता । कुशप्लवं समासाद्य तपस्तेपे सुदारुणं ॥ 7. G. 8. उदकप्रवणे etc., but P. has उदक् प्रस्रवणे etc., 8. For this Sl. B. 9. तपस्तस्यां हि(a)कुर्वत्यां परिचर्यां चकार ह । सहस्राक्षो नरश्रेष्ठ परयागुणसम्पदा ॥ (a) V. & S. कुर्वन्त्यां etc. 9. G. 9. श्चकारो

[1]समित् कुशं [2]मूलफलं पुष्पमग्निं तथा जलम् ।
प्रयत्नवानाजहार तस्याः काले पुरन्दरः ॥ १० ॥
[3]गात्रसंवाहनं कुर्वन् श्रमापनयनं तथा ।
शक्रः सर्वेषु [4]कालेषु दितिं परिचचार ह ॥ ११ ॥
[5]गते वर्षसहस्रे तु दशोने रघुनन्दन ।
दितिः प्रीता सहस्राक्षमिदं वचनमब्रवीत् ॥ १२ ॥
[6]प्रीता तेऽहं [7]सहस्राक्ष दशवर्षाणि पुत्रक ।
अवशेषाणि भद्रन्ते द्रष्टासि भ्रातरन्ततः ॥ १३ ॥
[8]तमहं त्वत्कृते [9]पुत्र समाधास्ये [10]यथा तथा ।
सौभाग्येणैव सहितस्त्वं हि राज्यमवाप्स्यसि ॥ १४ ॥
[11]एवमुक्त्वा ततः शक्रं विश्वस्ता शक्रसन्निधौ ।

त्वत्यतत्परः 1. For this Sl. B. 10. अग्निं कुशां काष्ठमपः (a)फलंमूलं तथैव च । न्यवेदयत्सहस्राक्षो यच्चान्यदपि काङ्क्षितं ॥(a)V. फलमूलं etc. 2. P. फलंमूलं etc. 3. For this Sl. B. 11. गात्रसंवाहनैश्चैव श्रमापनयनैस्तथा । शक्र etc. 4. P. कार्येषु etc. 5. For this Sl. B. 12. पूर्णे वर्षसहस्रे(a)सा दशोने रघुनन्दन । दितिः परमसंहृष्टा सहस्राक्षमथाब्रवीत् ॥ (a) तु etc. 6. For this Sl. B 13. तपश्चरंत्या वर्षाणि दश वीर्यवतांवर । अवशिष्टानि भद्रं ते भ्रातरं द्रक्ष्यसे ततः ॥ 7. G. 12. महावीर्य etc. but. P has सहस्राक्ष etc. 8. For this Sl. B. 14. (a)यमहं त्वत्कृते पुत्र तमाधास्ये जयोत्सुकं । त्रैलोक्यविजयं पुत्र सह भोक्ष्यसि विज्वरः ॥ (a) V. तमहं त्वत्कृते पुत्रं etc. 9. P. पुत्रं etc. 10. G. 13. जयोत्सुकं ; but P. has यथा तथा. Before the following Sl. of our text B (15) reads: याचितेन सुरश्रेष्ठ पित्रा तव महात्मना । वरो वर्षसहस्रान्ते मम दत्तः सुतं प्रति ॥ 11. For this Sl. B. 16.(a)इत्युक्त्वा च दितिस्तत्र प्राप्ते मध्यं दिनेश्वरे । निद्रयापहृता देवी पादौ कृत्वाथ शीर्षतः ॥ (a) V. एवमुक्त्वादितिः etc.

[1]कृतपादा शिरःस्थाने दितिः सुष्वाप राघव ॥ १५ ॥
[2]दृष्ट्वा तामशुचिं शक्रः पादतः कृतमूर्धजाम् ।
कृतपादां शिरः स्थाने[3]मुमोद च जहास च ॥ १६ ॥
[4]तस्याः शरीरं विवृत्तं प्रविश्य बलसूदनः ।
बिभेद सप्तधा गर्भं वज्रेण शतपर्वणा ॥ १७ ॥
[5]एकैकं चैव[6]गर्भाङ्गं पुनश्चिच्छेद सप्तधा ।
विस्फुरन्तं बलाद् राम रुदन्त[7]ञ्चार्त्तया गिरा ॥ १८ ॥
[8]भिद्यमानस्तदा गर्भः कुक्षौ वज्रेण वज्रिणा ।
रुरोद सुस्वरं राम ततो दितिरबुध्यत ॥ १९ ॥
[9]मा[10]रोदीरिति तं शक्रः प्ररुदन्तमभाषत ।
बिभेद चैनं वज्रेण रुदन्तमपि वासवः ॥ २० ॥
[11]नहन्तव्यो नहन्तव्य इति तं दितिरब्रवीत् ।
निर्ययौ च ततः शक्रो मातुर्वचनगौरवात् ॥ २१ ॥

---

1. Before this line of this Sl. G. (15) reads the additional line: निद्रयापहृता देवी मध्यं प्राप्ते दिवाकरे, which however is wanting in P. 2. For this Sl. B. 17. दृष्ट्वा तामशुचिं शक्रः पादयोः कृत मूर्द्धजां । शिरः स्थाने कृतौ पादौ जहास च मुमोद च ॥ 3. P. मुमुदे etc. 4. For this Sl. B. 18. तस्याः शरीरविवरं प्रविवेश पुरंदरः । गर्भं च सप्तधा-राम चिच्छेद परमात्मवान् ॥ 5. This Sl. is wanting in B. 6. G. 18. गर्भांशं etc. 7. P. ञ्चार्तभाषया । 8. For this Sl. B. 19. भिद्यमानस्ततो गर्भो वज्रेण शतपर्वणा । etc. 9. For this Sl. B. 20. मारुदो मारुदश्चेति गर्भं शक्रोऽभ्यभाषत । बिभेद च महातेजा रुदंतमपि वासवः ॥ 10. G. 20. रोधी etc. but P. has रोदी etc. 11. For this Sl. B. 21. (a)नहंतव्यं नहंतव्यमित्येव दितिरब्रवीत् । निष्पपात ततः शक्रो मातुर्वचनगौरवात् ॥ (a) V. has नहंतव्यो नहंतव्य इत्येवं

[1]प्राञ्जलिश्चाब्रवीदेनां विनिःसृत्याग्रतः स्थितः ।
अशुचिर्देवि सुप्तासि [2]पादयोः कृतमूर्धजा ॥ २२ ॥
लब्ध्वा तदन्तरञ्चाहं मद्विनाशार्थमाहितम् ।
गर्भं ते हतवान् देवि तन्मे त्वं क्षन्तुमर्हसि ॥ २३ ॥

आदि काण्डे दितिगर्भभेदः ॥

XLVIII.

[3]एकोनपञ्चाशत्तया भिन्ने गर्भे ततो दितिः ।
सहस्राक्षं दुराधर्षमुवाच भृशदुःखिता ॥ १ ॥
[4]ममापराधाद् गर्भोऽयं बहुधा विदलीकृतः ।
नापराधोऽस्ति देवेश तवात्रात्महितैषिणः ॥ २ ॥
[5]एवं गते[6]ऽपि दुर्वाचः प्रियं मे कर्त्तुमर्हसि ।
इमे ते सप्तकाः सप्त मरुतो नाम विश्रुताः ॥ ३ ॥
[7]चरन्त्वाज्ञाकराः [8]शक्र वातस्कन्धेषु सप्तसु ।

---

etc. 1. For this, and the following Sl. B. 22. and 23. प्राञ्जलिर्वज्रसहितो दितिं शक्रोऽभ्यभाषत । अशुचिर्देवि सुप्तासि पादयोः कृतमूर्धजा ॥ तदंतरमहं लब्ध्वा शक्रहंतारमाहवे । (a)अभिंदं सप्तधा देवि तन्मे त्वं क्षंतुमर्हसि ॥ (a) S. has अच्छिदं etc. 2. P. पादतः etc. 3. G. 1. एकोनपञ्चाशद्धा तु भिन्ने etc. For this Sl. B. XLVII. 1. सप्तधा तु कृते गर्भे दितिः परमदुःखिता । सहस्राक्षं दुराधर्षं वाक्यं सानुनयाब्रवीत् ॥ 4. For this Sl. B. 2. ममापराधाद् गर्भोऽयं सप्तधा शकलीकृतः । नापराधो हि देवेश तवात्र बलसूदन ॥ 5. For this Sl. B. 3. प्रियं त्वत्कृतमिच्छामि मम गर्भविपर्यये । मरुतां सप्तसप्तानां स्थानपाला भवन्तु ते ॥ 6. G. 3. ऽपिशक्रत्वंप्रियं etc., P. पुत्र वधः प्रियं etc. 7. For this Sl. B. 4. वातस्कंधा इमे सप्त चरंतु दिवि पुत्रक । मारुता इति विख्याता दिव्यरूपा ममात्मजाः ॥ 8. G. 4. सप्त etc.

सहैभिर्मम पुत्रैस्त्वं मरुद्भिर्जहि शात्रवान् ॥ ४ ॥
[1]ब्रह्मलोके चरन्त्वेक इन्द्रलोके तथापरे ।
दिक्षु चैतासु सर्वासु विचरन्तु तवाज्ञया ॥ ५ ॥
दिव्यमूर्त्तिधरा भूत्वा मरुतोऽमृतभोजनाः ।
तवैवाज्ञाकराः शक्र कुरुष्वैतद्वचो मम ॥ ६ ॥
[2]तस्यास्तद्वचनं श्रुत्वा शक्रः शक्तिमतांवरः ।
उवाच प्राञ्जलिर्वाक्यमेवमदित्विति राघव ॥ ७ ॥
त्वत्कृतेनैवनाम्ना ते भविष्यन्ति तवात्मजाः ।
ख्याता मरुत इत्येवं दिव्यरूपा ममाज्ञया ॥ ८ ॥
[3]सर्वमेतद्यथाऽऽत्थ त्वं करिष्येऽहमशेषतः ।
अमृतप्राशिनः पुत्रा इमे ते सहिता मया ॥ ९ ॥
एतेषां यस्तु भुञ्जीत द्विजश्चान्द्रायणं चरेत्।
इदं च कामतः। अकामतस्तु तप्तकृच्छ्रमेवात्रापि ज्ञेयम्।
चण्डालादिस्पृष्टस्य स्नानं विना भोजने पैठीनसिः।
चण्डालपतितामेध्यैःशुनखैः कुष्ठिनांतथा।
संस्पृष्टस्तु यदा भुङ्क्ते तप्तकृच्छ्रं समाचरेद् ॥

इति। अत्रामेध्या म्लेच्छादयः सर्वे निन्दिता गृह्यन्ते। अस्य स्पर्शेत्वहोरात्रोपोषितस्य पञ्चगव्याशनम्।

स्नानार्हस्तु यदा स्नानमकृत्वाऽश्नाति वै द्विजः।
अहोरात्रोषितः स्नातः पञ्चगव्येन शुध्यति ॥

इति स्मरणात्। चण्डालाद्युच्छिष्टभोजने त्वापस्तम्बः।

अन्त्यानां भुक्तशेषन्तु भक्षयित्वा द्विजातयः।
चान्द्रं कृच्छ्रं तदर्द्धं च ब्रह्मक्षत्रविशां विधिः।

अंगिराः।

चण्डालपतितादीनामुच्छिष्टान्नस्य भक्षणे।
चान्द्रायणं चरेद्विप्रः क्षत्रः सांतपनं चरेत्।
षड्रात्रं च त्रिरात्रं च वर्णयोरनुपूर्वशः ॥

इति। सांतपनं सप्ताहसाध्यं ज्ञेयम्। इदन्तु स्वतः प्रवृत्तस्य। बलात्कारेण भोजनस्य तु विशेषमाहापस्तम्बः।

बलाद्दासीकृता ये तु म्लेच्छचण्डालदस्युभिः।
अशुभं कारिताः कर्म गवादिप्राणिहिंसनम्।

उच्छिष्टमार्जनं यत्र तथा तस्यैव भोजनम् ।
खरोष्ट्रविड्वराहाणामामिषस्य च भक्षणम् ।
तत्स्त्रीणां च तथा संगस्ताभिश्च सह भोजनम् ।
मासोषिते द्विजातौ तु प्राजापत्यं विशोधनम् ।
चान्द्रायणं त्वाहिताग्नेः पराकस्त्वथवा भवेत् ।
चान्द्रायणं पराकं च चरेत्संवत्सरोषितः ।
संवत्सरोषितः शूद्रो मासार्द्धं यावकं पिबेत् ।
मासमात्रोषितः शूद्रः कृच्छ्रपादेन शुध्यति ।
ऊर्ध्वं संवत्सरात्कल्प्यं प्रायश्चित्तं द्विजोत्तमैः ।
संवत्सरैस्त्रिभिश्चैव तद्भावं स नियच्छति ।
ह्रासो न विद्यते तस्य प्रायश्चित्तैर्दुरात्मन इति ।

अत्र बलाद्दासीकरणमेव प्रायश्चित्तनिमित्तं यच्छ्वयोगाद्दासीकरणनिर्वाहकं चाशुभकर्मकारणं तत्प्रपञ्चः श्वगवादिप्राणिहिंसादिस्तेन तदभ्यासेऽपि प्रायश्चित्तनिमित्तस्यैकत्वान्न प्रायश्चित्ताधिक्यम् यथा ब्रह्मवधनिर्वाहकाणां प्रहारादिव्यापाराणां बहुत्वेऽपि निमित्तैकत्वादेकमेव नैमित्तिकमिति । अत्र सर्वत्र प्रायश्चित्तानन्तरं पुनरुपनयनं कार्यम् । तच्चाग्रिमाध्याये स्वयमेव वक्ष्यति ।

एवं विप्रस्यामेध्यादिभोजनप्रायश्चित्तमुक्त्वा क्षत्रियादीनां तदाह ॥

तथैव क्षत्रियो वैश्योऽप्यर्द्धं चान्द्रायणं चरेत् ॥
शूद्रोऽप्येवं यदा भुङ्क्ते प्राजापत्यं समाचरेत् ॥ २ ॥

ब्राह्मणस्य चान्द्रायणविधानाद्वैश्यस्य च तदर्द्धविधानान्मध्यवर्त्तिनः क्षत्रियस्य पादोनं चान्द्रायणमिति गम्यते । तदेव च तथैवेत्यतिदेशेनावगमितम् । उपदिष्टादतिदिष्टस्याल्पत्वात् । शूद्रोऽप्येवममेध्यादि यदा भुङ्क्ते तदा प्राजापत्यं कुर्यात् । इदं च कामतः । अकामतस्तु आपस्तम्बः ।

चण्डालान्नं यदा भुक्तं ब्राह्मणाद्यैः प्रमादतः ।
प्रायश्चित्तं कथं तत्र वर्णे वर्णे विधीयते ॥
चान्द्रायणं चरेद्विप्रः क्षत्रः सांतपनं चरेत् ।
षड्रात्रं च त्रिरात्रं च वर्णयोरनुपूर्वशः ॥

इति । एतेन

भुक्त्वाऽतोऽन्यतमस्यान्नममत्या तु त्र्यहं क्षिपेत् ।
मत्या भुक्त्वा चरेत्कृच्छ्रं रेतो विण्मूत्रमेव च ॥

इतिसामान्यमनुवचनं शूद्रविषये स्पष्टं व्यवस्थापितम् ॥

एवं चतुर्णामपि वर्णानां व्रतं निरूप्य तदेव कर्त्तव्यमाह ।

पञ्चगव्यं पिबेच्छूद्रो ब्रह्मकूर्चं पिबेद्द्विजः ॥
एकद्वित्रिचतुर्गा वा दद्याद्विप्राद्यनुक्रमात् ॥ ३ ॥

पञ्चानां गव्यानां समाहारः पञ्चगव्यं वक्ष्यमाणलक्षणममन्त्रकमेव शूद्रः पिबेत् । तदेव वक्ष्यमाणविधिविशिष्टं ब्रह्मकूर्चं द्विजो विप्रादिः पिबेत् । अनन्तरं विप्राद्यनुक्रमेणैकद्वित्रिचतुर्गा दद्यात् । विप्र एकां क्षत्रियो द्वे वैश्यस्तिस्रः शूद्रश्चतस्र इति अनडुत्साहित्यापेक्षया वा शब्दः । तथा च बृहत्पराशरः ।

अगम्यागमने चैव मद्यगोमांसभक्षणे ।
शुद्ध्यै चान्द्रायणं कुर्यान्नदीं गत्वा समुद्रगाम् ।
चान्द्रायणे ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ।
अनडुत्सहितां गां च दद्याद्विप्रेषु दक्षिणाम् ॥

इति । कामकृतनिमित्तविहितचान्द्रायणसमभिव्याहारात्तत्रैवानडुत्सहितं गोदानम् । अकामकृते तु गोमात्रदानमिति व्यवस्था

विप्रस्य शूद्राद्यन्नभोजने प्रायश्चित्तमाह ॥

शूद्रान्नं सूतकान्नं च अभोज्यस्यान्नमेव च ॥
शङ्कितं प्रतिषिद्धान्नं पूर्वोच्छिष्टं तथैव च ॥ ४ ॥
यदि भुक्तं तु विप्रेण अज्ञानादापदापि वा ॥
ज्ञात्वा समाचरेत्कृच्छ्रं ब्रह्मकूर्चं तु पावनम् ॥ ५ ॥

शूद्रस्वामिकमन्नं शूद्रान्नं सूतककालीनमन्नं सूतकान्नं न जननमरणाशौचान्नं तत्र व्रतविशेषस्य वक्ष्यमाणत्वेन पौनरुक्त्यापातात् । अभोज्यस्य कदर्यादेरन्नं शङ्कितम्, भोज्याभोज्यतया संदिग्धम्, प्रतिषिद्धमनर्चितादि

पूर्वोच्छिष्टं भुक्तार्द्धावशिष्टमन्नं विप्रेण यद्यज्ञानादापदा चान्तरालाभेन-वा सकृद्भुक्तं तदा ब्रह्मकूर्चं वक्ष्यमाणलक्षणं पावनं शोधकं चरेदभ्यासे तत्समसंख्यतया तदेवाभ्यसेन्मत्या सकृद्भोजने तु त्रिरात्रमुपवसेज्ज्ञात्वा-भ्यासे तु कृच्छ्रं चरेत्तदेतत्स्पष्टमाह प्रजापतिः ।

ब्राह्मणस्यैव शूद्रान्नमभोज्यं परिकीर्तितम् ।
सकृद्भुक्त्वा तथाऽज्ञानाद्ब्रह्मकूर्चं सकृत्पिबेत् ॥
अभ्यासे च तदभ्यस्येदाममन्नमगर्हितम् ।
मत्या त्रिरात्रं कुर्वीत कृच्छ्रमभ्यासतश्चरेद् ॥

इति । सूतकान्नलक्षणमाह वृद्धवसिष्ठः ।

सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।
सचैलं च भवेत्स्नानं सूतकान्नं च वर्जयेत् ।
तदपि पक्वमेव । शृतमन्नं विवर्जयेद् ॥

इतिषड्त्रिंशन्मतात् । तत्र प्रायश्चित्तमाह हारीतः ।

आशौचान्नं सूतकान्नं सरोषं वापि संस्कृतम् ।
शङ्कितं प्रतिषिद्धान्नं विद्विषोऽन्नमथापि च ॥
यदि भुञ्जीत विप्रस्तु प्रायश्चित्तं ध्रुवं भवेत् ।
प्राशयेत्पञ्चभिर्मन्त्रैः पञ्चगव्यं पृथक् पृथक् ।
एतेन शुध्यते विप्रो ह्यन्यैश्चाभोज्यभोजनैः ॥

इति । समन्त्रकपञ्चगव्यविधानं ब्रह्मकूर्चमेव शब्दान्तरेणाह । इद-मकामतः सकृद्भोजने अन्यत्र प्रजापत्युक्तएव विशेषो बोध्यः । पूर्वोच्छिष्ट-भोजने तु ब्रह्मकूर्चसमानत्वमेव मुक्तं स्मृत्यन्तरे ।

स्वमुच्छिष्टं तु यो भुङ्क्ते यो भुङ्क्ते भुक्तभाजने ।
एवं वैवस्वतः प्राह भुक्त्वा सांतपनं चरेद् ॥
इति । अभोज्यान्नान्याह याज्ञवल्क्यः ।
कदर्यबद्धचौराणां क्लीबरङ्गावतारिणाम् ।
वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणाम् ।
चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषाम् ।

क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टभोजिनाम् ।
अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम् ।
शस्त्रविक्रयिकर्मारतन्तुवायश्ववृत्तिनाम् ।
नृशंसराजरजककृतघ्नवधजीविनाम् ।
चैलधावसुराजीवसहोपपतिवेश्मनाम् ।
पिशुनानृतिनोश्चैव तथा चाक्रिकवन्दिनाम् ।
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा ।

इति । एवमन्येऽपि स्मृत्यन्तरादनुसंधेयाः । एते च सर्वे ब्राह्मणा एव तत्तद्वृत्त्युपजीवनाभोज्यान्ना नत्वन्ये । अत एव बृहस्पतिः । भोज्यान्नान् परिगणय्यान्ते ।

कर्मस्वेतेषु यो मोहाद्ब्राह्मणो वर्त्तते सदा ।
प्रायश्चित्तेऽपि चरिते परिहार्यो भवेत्स हि ।
एते ब्राह्मणचण्डालाः सर्वे ब्रह्महताः किल ।
तथा दैवे च पित्र्ये च वर्जितास्तत्त्वदर्शिभिः ॥

इत्युपसंहृतवान् । एषामनुतापे प्रायश्चित्तमप्याह स एव ।

एतेषामेव सर्वेषां प्रत्यापत्तिं तु मार्गताम् ।
भैक्षान्नमुपयुंजानो द्विजश्चान्द्रायणं चरेद् ॥

इति । एषामन्नभोक्तुरपि प्रायश्चित्तमाह स एव ।

एतेषां ब्राह्मणो भुक्त्वा दत्वा कृत्वा प्रतिग्रहम् ।
प्राजापत्येन शुध्येत्तु तस्मात्पापाच्च संशयः ॥

इति । प्रतिषिद्धान्नमप्याह याज्ञवल्क्यः

अनर्चितं वृथामांसं केशकीटसमन्वितम् ।
शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितम् ।
उदक्यास्पृष्टसंघुष्टं पर्यायान्नं च वर्जयेत् ।
गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टं च कामतः ॥

इति । एवमन्यदपि उदाहार्यम् । अत्रान्नमिति सामान्योपादानेऽपि पक्वमेव ज्ञेयम् ।

१ पर्याचान्तमित्यपिपाठः ।

अभोज्यानां तु सर्वेषां भुक्त्वान्नमुपसंस्कृतम् ॥

इत्यङ्गिरःस्मरणात् । न त्वाममन्नमगर्हितमिति वचनात्

यत्तु

आमं वा यदि वा पक्कं शूद्रान्नमुपसाधयेत् ।
किल्बिषं भजते भोक्ता यश्च विप्रः पुरोहितः

इत्यंगिरसैवोभयविधमपि निन्दितम् । तदाहिताग्निविषयम् ।

आहिताग्निस्तु यो विप्रः शूद्रान्नं प्रतिगृह्य तु ।
भुङ्क्ते तामसतां याति तिर्यग्योनिं च गच्छति ॥

इति तस्यैवोपक्रमात् । चकारेण समुच्चिते बिडालाद्युच्छिष्टे तथैवेत्यनेनोक्तं प्रायश्चित्तमतिदिश्यते । तदाह संवर्त्तः ।

बिडालमूषकोच्छिष्टे पञ्चगव्यं पिबेद्द्विजः ।
श्वकाकोच्छिष्टगोच्छिष्टभक्षणे तु त्र्यहं पिबेद् । इति ॥

एवमुच्छिष्टस्याभोज्यत्वे क्वचिद्विशेषमाह ।

बालैर्नकुलमार्जारैरन्नमुच्छेषितं यदा ॥
तिलदर्भोदकैः प्रोक्ष्य शुध्यते नात्र संशयः ॥ ६ ॥

बाला अत्र पूर्णपञ्चवर्षाः

ऊनैकादशवर्षस्य पञ्चवर्षात्परस्य च ।
इतिस्मरणात् । तच्चूनस्य नोच्छिष्टापादकत्वम् ॥
अतो न्यूनतरस्यास्य नापराधो न पातकम् ॥ इति
बालैरनुपरिक्रान्तं नित्यं मेध्यमितिस्थितिः ॥

इतिस्मरणात् । नकुलमार्जारौ प्रसिद्धौ बहुवचनान्मूषकग्रहणम् । तैरुच्छेषितमुच्छिष्टीकृतमन्नं तिलदर्भयुतैरुदकैः प्रोक्षितं शुध्यतीत्यत्र संशयो नास्ति । अप्रोक्षितभोजने तु पूर्वोक्तमेव प्रायश्चित्तम् ।

अन्योच्छिष्टाशने उशनाः । ब्राह्मणोच्छिष्टाशने तु प्राणायामशतं कुर्यात् । क्षत्रियोच्छिष्टाशने प्राणायामसहस्रम् । वैश्योच्छिष्टाशने सहस्रं प्राणायामाः । मतिपूर्वं प्राजापत्यमतिकृच्छ्रं कृच्छ्रातिकृच्छ्रं च शूद्रोच्छि-

च्छाशने सप्तरात्रं यवागूपानं मतिपूर्वं चेत्पराक एवं द्विजात्युच्छिष्टभोजने शूद्राणां चेति । सहभोजने त्वाह यमः ।

भुक्त्वा सह ब्राह्मणेन प्राजापत्येन शुध्यति
भूभुजा सह भुक्त्वाचं सप्तरात्रेण शुध्यति
शूद्रेण सह भुक्त्वाचं चान्द्रायणमथाचरेद् ।
इति । मात्रादिभिः सह भोजने तु वृद्धयमः ।
माता वा भगिनी वापि भार्या बालाश्च योषितः ।
न ताभिः सह भोक्तव्यं भुक्त्वा चान्द्रायणं चरेद् ।

इति ॥

उच्छिष्टभोजने ।

यद्येकोऽपि त्यजेत्पात्रं शेषमन्नं न भोजयेत् ॥ ७ ॥

एकस्यां पङ्क्तावुपविष्टानां विप्राणां सहैककालमेव भोजने प्रवर्त्तमाने केनापि निमित्तेन यद्येकोऽपि भोजनपात्रं त्यक्त्वोतिष्ठेत्तदा शेषमन्नं स्वस्वपात्रस्थितमन्यैरपि विप्रैर्न भोज्यं पङ्क्तेरुच्छिष्टत्वादिति ॥

तत्र प्रायश्चित्तमाह ॥

मोहाद् भुञ्जीत यस्तत्र पङ्क्तावुच्छिष्टभोजनम् ॥
प्रायश्चित्तं चरेद्विप्रः कृच्छ्रं सातपनं तदा ॥ ८ ॥

यो विप्रो मोहात्पूर्वोक्तनिषेधाज्ञानात् तस्यामेव पङ्क्तावुच्छिष्टभोजनस्तद्भोजनपात्र उपविष्ट एव भुञ्जीत स द्व्यहसाध्यं विप्रः कृच्छ्रं सातपनं चरेत् ।

तथा च स्मृत्यन्तरे ।

यस्तु भुङ्क्ते द्विजः पङ्क्तावुच्छिष्टायां कदा च न ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥ इति ॥

पेयूषादिभोजने प्रायश्चित्तमाह ॥

पेयूषं श्वेतलशुनं वृन्ताकफलगृञ्जनम् ॥
पलाण्डुवृक्षनिर्यासान् देवस्वकवकानि च ॥ ९ ॥

उष्ट्रीक्षीरमविक्षीरमज्ञानात् भुञ्जते द्विजाः ॥
त्रिरात्रमुपवासेन पञ्चगव्येन शुध्यति ॥ १० ॥

पेयूषोऽभिनवं पयः दृद्‌ं सन्धिन्यनिर्दशावत्सास्यन्दिनीयमसूपय सामुपत्तलणम् ।

सन्धिन्यनिर्दशावत्सागोपयः परिवर्जयेत् ।

इतियोगिस्मरणात् । स्यन्दिनीयमसूसंन्धिनीनां वेति गौतमस्मरणाच्च । तच्च सन्धिनीविशेषानुपादानाद्गोज्यपयसां अजामहिषीणां ज्ञेयम् । अत एव वसिष्ठः । गोमहिष्यजानामनिर्दशानामिति यमे निषेधादेव तद्विकाराणां दध्यादीनामपि निषेध एव । श्वेतलशुनं रसोनः श्वेतः सूक्ष्मः कलिकामयकन्दनालः । श्वेतमिति विशेषणं रक्तव्यावृत्त्यर्थं तेन· तत्रेदं प्रायश्चित्तम् वृन्ताकं श्वेतं कृष्णं च ॥

वृन्ताकं श्वेतवृन्ताकं मूलकं कमूलकम् ।
अलाबुं वर्तुलालाबुं शियुकं रक्तशियुकमिति ॥

देवलस्मरणात् । एतेनैकपक्षमाश्रित्य श्वेतशब्दस्य लशुनवृन्ताकाभ्यामन्वयो निरस्तः ।

नालिकाशणच्छत्राककुसुम्भालाबुविड्भवान् ।
कुम्भीकन्दकवृन्ताकङ्कोविदारांश्च वर्जयेत् ॥

इतिसामान्यश्रवणाच्च । यद्यपि पलाण्डुं श्वेतवृन्ताकं कुसुम्भं वनकंटकमित्यादिविशेषस्मरणं तत्तस्यापि निषेधाय नतु तस्यैवेति । पृथग्निषेधबलादेव चोपसंहार न्यायोऽपि निरस्तः । गृञ्जनं लशुनानुकारी लोहितसूक्ष्मकन्दः । पत्रविशेषो वा कण्ठशुध्यर्थं गायकोपभुज्यमानरसाः । मूलविशेषो वा गाजरापरपर्यायः । पलाण्डुः स्थूलकन्दनालो लशुनानुकारी वृत्तनिर्यासा लोहिताः वृत्तच्छेदसम्भवास्तु लोहिता अपि अत एव मनुः ।

लोहितान्वृत्तनिर्यासान् व्रश्चनप्रभवांस्तथा ॥

इति । लोहितग्रहणाद्धिङ्गुकर्पूरादीनामनिषेधःदेवस्वं देवेभ्यो दत्तं गन्धपुष्पनैवेद्यादिव्यतिरेकेण ।

शङ्खोदकं हरेर्भुक्तं निर्माल्यं पादयोर्जलम् ।
चन्दनं धूपशेषश्च ब्रह्महत्यापहारकम् ॥

इति तेषां ग्राह्यतास्मरणात् । कवकानि छत्राकाणि शिलीन्ध्रापरपर्यायाणि उष्ट्राः क्षीरमव्याः मेष्याः क्षीरं अवीग्रहणं द्विस्तनीमात्रोपलक्षणं तेन स्त्रैणादेरपि ग्रहणम् ।

औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकम् ॥

इतियोगिस्मरणात् । एतानि पेयूषादीनि यद्यज्ञानाद्विजा भुञ्जते तदा त्रिरात्रमुपोष्य चतुर्थेऽहनि पञ्चगव्यं पीत्वा शुध्यन्तीति । छान्दसो वचनव्यत्ययः । तदाह यमः ।

लशुनं च पलाण्डुं च गृञ्जनं कवकानि च ।
चतुर्णां भक्षणं कृत्वा तप्तकृच्छ्रेण शुध्यति ॥

इति । चतुरहसाध्यतप्तकृच्छ्रप्रतिपादकत्वादस्य मूलसमानार्थत्वमेव । विष्णुरपि । व्रश्चनामेध्यप्रभवांश्च लोहितान्वृक्षनिर्यासान्, सेलुं च वृथाकृसरसंयावपायसापूपशष्कुलींश्च देवानां हवींषि च, गोऽजामहिषीवर्जं सर्वपयांसि च, अनिर्दशाहेतान्यपि च, स्यन्दनीसन्धिनीयमसूविवत्सायाः क्षीरं च, अमेध्यसूपश्च, दधिवर्जं केवलं सर्वभुक्तानि, ब्रह्मचारी श्राद्धाशने त्रिरात्रमुपवसेत् । इति । कवकानिचेति चकारादलाबुकिंशुकोदुम्बराणां ग्रहणम् । तदाह कूर्मः ।

अलाबुं किंशुकं चैव भुक्त्वाप्येतद्व्रतं चरेत् ।
औदुम्बरन्त्वकामेन तप्तकृच्छ्रेण शुध्यति ॥

इति । एवमन्येषामपि स्वभावदुष्टानां भक्षणे तप्तकृच्छ्रमाह प्रचेताः ।

संसर्गदुष्टं यच्चान्नं क्रियादुष्टमकामतः ।
भुक्त्वा स्वभावदुष्टं च तप्तकृच्छ्रं समाचरेत् ॥

इति । इदं चाकामतः सकृद्भक्षणे । कामतो भक्षणे तु कामत, इत्यनुवृत्तौ याज्ञवल्क्यः ।

पलाण्डुं विड्वराहं च छत्राकं ग्रामकुक्कुटम् ।
लशुनं गृञ्जनं चैव जग्ध्वा चान्द्रायणं चरेत् ॥

इति । कामतोऽत्यन्ताभ्यासे पातित्यमेव । तथा च मनुः ।

छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम् ।
पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेन्नरः ॥

इति । अकामतोऽभ्यासे सान्तपनं यतिचान्द्रायणं वा ।

अमत्यैतानि षट् जग्ध्वा कृच्छ्रं सान्तपनं चरेत् ।
यतिचान्द्रायणं चापि शेषेषूपवसेदहः ॥

इति । कामतो वृन्ताकादिभक्षणे प्राजापत्यम् । तदाह यम ।

खट्वावार्ताककुम्भीकल्कस्रवनप्रभवाणि च ।
भूतृणं शिग्रुकं चैव सुखण्डं कवकानि च ।
एतेषां भक्षणं कृत्वा प्राजापत्यं चरेद् द्विजः ॥

इति । कामतो निषिद्धक्षीरभोजने शङ्खः ।

अनिर्दशाया गोक्षीरं माहिषं चाजमेव च ।
पीयूषं च विवत्सायाः स्यन्दिन्या यमसोस्तथा ॥
सन्धिन्यमेध्यक्षीरं च भुक्त्वा पक्षव्रती भवेत् ।
क्षीराणि यान्यपेयानि तद्विकाराशने बुधः ॥
सप्तरात्रव्रतं कुर्याद्यावकं कामतो द्विजः ॥

इति । द्विजग्रहणाद्ब्रह्मदपेयन्तस्यापि संग्रहः । तथा च स्मृत्यन्तरम् ।

क्षत्रियश्चापि वृत्तस्थो वैश्यः शूद्रोऽथ वा पुनः ।
यः पिबेत्कपिलाक्षीरं न ततोऽन्योऽस्त्यपुण्यकृत् ॥

इति । अत्र सर्वत्रापि व्रतान्ते पुनरुपनयनं कार्यम् ! तथा च शातातपः ।

लशुनं गृञ्जनं जग्ध्वा पलाण्डुं च तथा शुनी ।

उष्ट्री च महिषी अनिर्दशाहा पैठीनसिरपि अव्युष्ट्रीमहिषीक्षीरपाने तप्तकृच्छ्रः पुनरुपनयनमिति ॥

गोमांसातिरिक्तमांसभक्षणे प्रायश्चित्तमाह ।

मण्डूकं भक्षयित्वा तु मूषिकामांसमेव च ॥
ज्ञात्वा विप्रस्त्वहोरात्रं यावकान्नेन शुध्यति ॥ ११॥

मण्डूको भेकः मूषिका आखुस्तन्मांसं चकारादुक्तपक्षिमांसं च भक्षयित्वा अनन्तरं ज्ञात्वा विप्रो यावकान्नेनाहोरात्रं परिकल्प्य शुध्यति भक्षणानन्तरं ज्ञात्वेतिवदता भक्षणमज्ञानादेवोक्तं भवति । अन्यथा ज्ञानपूर्वकभक्षणे त्वेकरात्रप्रायश्चित्तविरोधोऽज्ञानकृतभक्षणे प्रायश्चित्ताभावश्चापद्येत । तथा च विष्णुः । तित्तिरिकपिञ्जललावकवर्त्तमहारवर्जं सर्वपक्षिमांसाशने त्वहोरात्रमिति । कामतो भक्षणे त्रिरात्रम् ।

तदाह याज्ञवल्क्यः ।

अनुपाकृतमांसानि विड्जानि कवकानि च ।
क्रव्यादपक्षिदात्यूहशुकप्रतुदटिट्टिभान् ॥
सारसैकशफान् हंसान्सर्वांश्च ग्रामवासिनः ।
कोयष्टिप्लवचक्राह्वबलाकाबकविष्किरान् ॥
वृथाकृसरसंयावपायसाऽपूपशष्कुलीः ।
कलविङ्कं सकाकोलं कुररं रज्जुदालकम् ॥
जालपादान् खञ्जरीटानज्ञातांश्च मृगद्विजान् ।
चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च ॥
मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ।

इति । एतेन बकबलाकाहंसप्लवचक्रवाककारण्डवग्रहचरकपोतपारावतचाषचटककाकपादोलूकशुकसारटिट्टिभमद्गुरचाषभासजालपादनक्रकलविंकविकृतमत्स्यक्रव्यादमेध्यानां भक्षणे पञ्चगव्यं पिबेत्त्रिरात्रमित्यौशनसं स्वविषये व्यवस्थापितम् । अभ्यासादौ स्मृत्यन्तरोक्तद्वादशरात्राद्यूह्यम् ॥

ननु शूद्रान्नभोजनवत्क्षत्रियाद्यन्नभोजनेऽपि प्रायश्चित्तं कुतो नोच्यते राजान्नं तेज आदत्त इत्यादिनिषेधस्य तत्रापि तुल्यत्वादित्यत आह ।

क्षत्रियश्चापि वैश्यश्च क्रियावन्तौ शुचिव्रतौ ॥
तद्गृहे तु द्विजैर्भोज्यं हव्यकव्येषु नित्यशः ॥ १२ ॥

शुचि अभग्नं व्रतं वेदाध्ययनाङ्गं ब्रह्मचर्यं ययोस्तौ क्रियाग्निहोत्रादिका इत्यादिस्तद्वन्तौ ब्रह्मचर्यपूर्वकाधीतवेदानुष्ठाननित्यनैमित्तिकश्रौतस्मार्त्तक्रियौ यौ क्षत्रियवैश्यौ तद्गृहे हव्यकव्येषु दैविकपैतृककर्मसु नित्यशो नित्यं क्रियमाणेषु द्विजैर्विप्रैर्भोज्यम्भोक्तव्यमिति । विशेषणद्वयोपादानबलादेव निषेधस्यातद्विधक्षत्रियादिविषयत्वं प्रपञ्चयति । अत एव चतुर्विंशतिमते । तत्र प्रायश्चित्तमप्यभिहितम् ।

सहस्रं तु जपेद्देव्याः क्षत्रियस्यान्नभोजने ।
तथोपवासं वैश्यस्य सहस्रं सार्द्धमेव च इति ॥ १२ ॥

कस्य चिच्छूद्रान्नस्य प्रतिप्रसवमाह ।

घृतं क्षीरं तथा तैलं गुडं स्नेहेन पाचितम् ॥
गत्वा नदीतटे विप्रो भुञ्जीयाच्छूद्रभोजनम् ॥ १३ ॥

अगव्यमपि घृतादि शूद्रसबन्धि भोज्यं द्रव्यं विप्रो भुञ्जीयात्परन्तु नदीतीरादौ गत्वा नतु क्षत्रियादिगृहेष्विव तद्गृह एव स्थित्वेति स्नेहेन घृतादिना पाचितमित्यत्र स्नेहस्यैव साधकतमत्वावगमाज्जलादिपरिहारेण स्नेहपक्वं स्नेहशब्दोपादानेन सस्नेहं चदुग्धादिपक्वं चाभ्यनुज्ञायते । तथाशब्देन कन्दूपक्वादेरपिग्रहणम् । अत एव देवलः ।

कन्दूपक्वं स्नेहपक्वं पायसं दधिसक्तवः ।
एतान्यशूद्रान्नभुजो भोज्यानि मनुरब्रवीत् ॥

कन्दूर्भ्राष्टशाला । सुमन्तुरपि ।

गोरसं श्चैव सक्तुं च तैलं पिण्याकमेव च ।
अपूपान्भक्षयेच्छूद्राद्यच्चान्यत्पयसा कृतम् ॥

इति । आपस्तम्बोऽपि ।

आममन्नं मधु घृतं धानाः क्षीरं तथैव च ।
गुडमांसरसा ग्राह्या निवृत्तेनापि शूद्रतः ॥

चतुर्विंशतिमतेऽपि ।

आरनालं तथा क्षीरं कांदुकन्दधिसक्तवः ।
स्नेहपक्कं च तक्रं च शूद्रस्यापि न दुष्यति ॥
आरनालं काञ्जिकाम् । तत्र विशेषमाहांगिराः ।
अशृतं वारनालं च कटुकाः सक्तवस्तिलाः ॥
फलानि पिण्याकमथो ग्राह्यमौषधमेव च ।

इति । अशृतमशृतधान्यप्रकृतिकम् ॥ १३ ॥

घृतादिभोजनाय वर्ज्यावर्ज्यौ शूद्रौ विविनक्ति ।

मद्यमांसरतं नित्यं नीचकर्मप्रवर्तकम् ॥
तं शूद्रं वर्जयेद्विप्रः श्वपाकमिव दूरतः ॥ १४ ॥
द्विजशुश्रूषणरतान्मद्यमांसविवर्जितान् ॥
स्वकर्मनिरतान्नित्यं तान् शूद्रान्न त्यजेद् द्विजः ॥१५॥

यः शूद्रो नित्यं क्रयविक्रयाशनादिभिर्मद्यमांसयोस्तथा नीचानां प्रतिलोमजानां यानि कर्माणि च अविकृन्तनादीनि तत्प्रवर्तकस्तं श्वपाकमिव दूरत एव विप्रो वर्जयेत् । ये पुनर्द्विजसुश्रूषेरत मद्यमांससम्बन्धेन विशेषतो वर्जिताःस्वकर्मणि पाकयज्ञादौ नित्यम विरतवितरां तत्परास्तान् शूद्रानुक्तघृतादिभोजने द्विजो न परिहरेत् । अत्र वचनद्वयेऽप्येकवचनबहुवचनाभ्यां मद्यादिरतस्यैकस्यापि न प्रतिगृह्णीयात्स्वकर्मरतानां बहूनामपि प्रतिग्रहे न दोष इत्युक्तं भवति ॥

प्रतिवर्णं सूतकान्नभोजने प्रायश्चित्तमाह ।

अज्ञानाद्भुञ्जते विप्राः सूतके मृतकेऽपि वा ॥
प्रायश्चित्तं कथं तत्र वर्णे वर्णे विनिर्दिशेत् ॥ १६ ॥

गायत्र्यष्टसहस्रेण शुद्धिः स्याच्छूद्रसूतके ॥
वैश्ये पञ्चसहस्रेण त्रिसहस्रेण क्षत्रिये ॥ १७ ॥
ब्राह्मणस्य यदा भुङ्क्ते द्वे सहस्रे तु दापयेत् ॥
अथवा वामदेव्येन साम्नैवैकेन शुध्यति ॥ १८ ॥

यदि विप्रा जननमरणाशौचयोरज्ञानाद्भुञ्जते तदा तेषां विप्राणां तत्तद्वर्णनिमित्तं प्रायश्चित्तं कथं स्यादित्याशङ्क्याह शूद्रसूतके गायत्र्यष्टसहस्रेण शुद्धिः स्यात् । अष्टानां सहस्राणां समाहारोऽष्टसहस्रं गायत्र्या अष्टसहस्रं गायत्र्यष्टसहस्रं तेन एवमुत्तरत्रापि । सूतकिनः शूद्रस्यान्नं विप्रो भुक्त्वाऽष्टसहस्राणि गायत्रीर्जपेत् वैश्यस्य पञ्चसहस्राणि क्षत्रियस्य त्रीणि सहस्राणि ब्राह्मणस्य द्वे सहस्रे इति अथवा सूतकिब्राह्मणान्नभोजने वामदेव्येनैकेन साम्नैव शुध्यति कया नश्चित्र आभुवदूतीत्यस्यामृच्युत्पन्नं साम वामदेव्यं तस्य सकृज्जपेनैव शुद्धिरिति । कामकृते त्वाह गर्गः ।

शावे च सूतके चैवामत्या भुक्त्वैन्दवं चरन् ।
मत्याभ्यासे तथा कुर्यात्कृच्छ्रं चान्द्रायणोत्तरम् ॥
त्र्यहं वा कामतः कुर्यादभ्यासे कृच्छ्रमेव च ।
द्विगुणं त्रिगुणं चैव चतुर्गुणमथापि वा ॥
क्षत्रविट्शूद्रजातीनामाशौचे परिकीर्तितम् ।
सवर्णानां तु सर्वेषां विप्रवन्निष्कृतिः स्मृता ।
क्रमाद् वृद्धं क्रमाद्धीनं हीनजात्युत्तमेष्वपि ॥

इति । तत्राकामतो ब्राह्मणसूतकान्नभोजने विहितस्त्र्यहो द्विसहस्रगायत्रीजपसमान एव कृच्छ्रचतुर्थांशरूपत्वात् । इदं च प्रायश्चित्तमाशौचान्ते कर्तव्यम् । तथा च विष्णुः । ब्राह्मणादीनामाशौचे यः सकृदेवान्नमश्नीयात्तस्य तावदेवाशौचं यावत्तेषाम्, आशौचापगमे प्रायश्चित्तं कुर्यादिति । तथाऽशौचादिश्राद्धभोजनेऽपि प्रायश्चित्तमुक्तं चतुर्विंशतिमते ।

प्राजापत्यं नवश्राद्धे पादोनं चाद्यमासिके ।
त्रैपक्षिके तदर्द्धं स्यात्पादो द्वैमासिके ततः ॥

पादोनं कृच्छ्रमुद्दिष्टं षण्मासे त्र्याब्दिके तथा ।
त्रिरात्रं चान्यमासेषु प्रत्यब्दं चेदहः स्मृतम् ॥
चान्द्रायणं नवश्राद्धे पादोनं मासिके स्मृतम् ।
त्रैपक्षिके सान्तपनं कृच्छ्रं मासद्वये स्मृतम् ॥
क्षत्रियस्य नवश्राद्धे व्रतमेतदुदाहृतम् ।
वैश्यस्यार्द्धाधिकं प्रोक्तं क्षत्रियस्य मनीषिभिः ॥

शूद्रस्य तु ।

नवश्राद्धे भवेदर्द्धं प्राजापत्यं तु सर्वदा ।
सङ्कल्पितेषु भुक्त्वा तु त्रिरात्रं क्षपयेदिति ॥
ब्रह्मचारिणां श्राद्धभोजने यमः ।
मासिकादिषु योऽश्नीयादसमाप्तव्रतो द्विजः ॥
त्रिरात्रमुपवासोऽस्य प्रायश्चित्तम्विधीयते ।
मधुमांसं च योऽश्नीयाच्छ्राद्धे सूतक एव च ॥
प्राजापत्यं चरेत्कृच्छ्रं व्रतशेषं समापयेद् ।
इति । अनुक्तविशेषे, तूशनाः ।
दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग् द्विजः ॥
ततः सन्ध्यामुपासीत शुध्येच्च तदनन्तरम् ।

इति । संस्काराङ्गश्राद्धभोजने तु व्यासः ।

निवृत्ते चूडहोमे तु प्राङ्नामकरणात्तथा ।
चरेत्सान्तपनं भुक्त्वा जातकर्मणि चैव हि ॥
स्वतोऽन्येषु च भुक्त्वान्नं संस्कारेषु द्विजोत्तमः ।
नियोगादुपवासेन शुध्यते निन्द्यभोजने ॥

इति । धौम्योऽपि ।

ब्रह्मौदने च सोमे च सीमन्तोन्नयने तथा ।
जातश्राद्धे नवश्राद्धे भुक्त्वा चान्द्रायणं चरेत् ॥ इति ॥ १८ ॥

पुनरपि कस्य चिच्छूद्रान्नस्य प्रतिप्रसवमाह ॥

शुष्कान्नं गोरसं स्नेहं शूद्रवेश्मन आहृतम् ॥
पक्वं विप्रगृहे भुक्तं भोज्यं तन्मनुरब्रवीत् ॥ १९ ॥

शुष्कमाममचं तण्डुलादि गोरसो दध्यादि घृतं क्षीरमित्यत्रोक्तस्यापि पुनरुपन्यासो गव्यत्वप्राप्त्यर्थः। स्नेहो नवनीतादि घृततैलयोः प्रागुक्तेः। एतत्सर्वं शूद्रगृहादानीय यदि विप्रगृहे पक्कं भवति तदा भोज्यमिति मनुराह। तत्र विशेषः अभुक्तमिति। यदि शूद्रगृहादानीयमानाकुम्भा-चादेर्मध्याच्छूद्रैः कमपि कौतुकादिना भुक्तं न भवेत्तदेव तद्विप्रगृहपक्कमपि भोज्यं नान्यथेति। तदाह प्रजापतिः। आममन्नमगर्हितमिति। सुमन्तु-रपि। गोरसं चैवपक्कं चेदित्यादि विशेषः प्रागेव निरूपितः॥

आपदि शूद्रान्नभोजने प्रायश्चित्तान्तरमाह।

आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि॥
मनस्तापेन शुध्येत द्रुपदां वा शतं जपेत्॥ २०॥

यद्यापत्काले विप्रः शूद्रगृहे अकामाद्भुञ्जीत तदा मनस्तापा-त्किं मयेदं निषिद्धमाचरितं धिङ्मामित्याद्यनुशयाच्छुध्येत। कामतो भोजने द्रुपदां गायत्रीं याजुषीं द्रुपदादिवमुमुचान इत्येतां शतवारं जपेदिति मनस्तापद्रुपदयोः शोधकत्वमाह योगीश्वरः।

पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः॥ इति॥
द्रुपदानामगायत्री यजुर्वेदे प्रतिष्ठिता॥ इति॥

वैदिकावैदिकविषयत्वेनास्य शूद्रान्नं सूतकान्नं चेत्यस्य च व्यवस्था करणीया॥ २०॥

शूद्रेष्वन्यानपि भोज्यान्नानाह॥

दासनापितगोपालकुलमित्रार्द्धसीरिणः॥
एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्॥२१॥

दासादयः षट् वक्ष्यमाणलक्षणाः शूद्रेषु भोज्यान्नाः॥

तत्र दासन पितयोर्लक्षणमाह॥

शूद्रकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः॥
असंस्काराद्भवेद्दासः संस्कारादेव नापितः॥ २१॥

तन्निषेधः सुलभ इति । एतेन नियमपक्षमनूद्य तच्छेष-पक्षं दूषयित्वा परोपस्थितिपक्षस्यैव भाष्ये समर्थित-त्वात् तच्छेषपक्षेऽपि दूषणोद्धारस्तु शब्दकौस्तुभे स्पष्टीकृ-तोऽस्माभिरिति परेषां रिक्तं वच इत्यवगन्तव्यम् ॥

मिदचोऽन्त्यात्—।

अत्र सूत्रेऽन्त्यादचः परो मिदिति प्राचोक्तवृत्तौ चाच इति निर्द्धारणे षष्ठी न तु पञ्चमी जातौ चैकव-चनम् । तथा चाचां मध्येऽन्त्यादित्यर्थः । तेनाच इति वृत्तावन्त्यादिति समानाधिकरणा पञ्चमीत्यभि-मानेन शे मुचादीनामित्यादावव्याप्त्यभिधानं प्रत्युक्तम् । यत्त्वभक्तत्वे त्रपूणीत्यत्र दीर्घो न स्यादित्यनूद्य तत्तदा-दिग्रहणं स्यादिनुमर्थमिति वार्त्तिकेनैव दूषितप्राय-मिति व्याख्यातृवचनदूषणम् । तन्न परादित्वे वहंलिह इत्यादावनुस्वारादि न स्यादत एवाभक्तत्वपक्षोऽप्युपेक्ष्यः । त्रपूणीत्यादावनान्तत्वादङ्गस्य दीर्घाप्रसङ्गश्चेति व्याख्या-तृग्रन्थस्तत्र च परादित्वदूषणेनाप्युपपत्तेरुक्तदोषनि-रासादिति । यत्त्वादेः परस्येति सूत्रं विवृण्वता प्राचा पञ्च-मीनिर्देशेनेत्याद्युक्तं तदसम्बद्धमिति केचित् । तन्न परत्वानुवादेन यस्य यत् कार्यं तत्तस्यादेरित्येव सूत्रार्थः परत्वानुवादश्चोत्परस्यात इत्येतद्विषयो न । तन्नात इति

स्थानिनिर्देशात् । किन्तु तस्मादित्युत्तरस्येति परिभाषो-पस्थितोत्तरत्वविषय इति स्पष्टप्रतिपत्तये पञ्चमीनिर्देशे-नेत्यादि प्राचो वचनं कथमसम्बद्धमिति तच्चिन्त्यम् ॥

इति परिभाषाप्रकरणम् ।

इको यणचि ।

यत्तु इक्यणोर्यथासंख्यत्वाभावोपपादनाय षट्ष-ष्टिरिको यणः सप्त भाव्यमानत्वेन सवर्णाग्राहकत्वेऽपि गुणानामभेदकत्वेनानुनासिकानामपि यवलानां ग्रह-णादिति । तत्र गुणानामभेदकत्वपक्षे कथं सप्तत्वे अनुनासिकयवलग्रहणं हेतुरिति चिन्त्यम् । इग्य-णोर्यथासङ्ख्यत्वोपपादनं यथासङ्ख्यसूत्रोपन्यासप्रयो-जनमित्यादीनां दीर्घाद्युपस्थानोपायश्च प्रक्रियाप्रदीपा-दवसेय इति ॥

अनचि च ।

अत्र वा द्वे इत्यनुवृत्त्यैव सिद्धे त्रिप्रभृतिष्विति त्रिसूत्री व्यर्थेति केचित् । तत्र दीर्घादाचार्याणामि-त्यस्य नित्यत्वात् कथं वैयर्थ्यम् । न चाचार्यग्रहणेनास्य वैकल्पिकत्वम् । तस्य पूजार्थत्वात् । अत एव नादिनी-त्यत्रानचिचेति शरोचीत्यत्राचो रहाभ्यामिति प्राप्तिः काशिकायामुक्ता । त्रिप्रभृतिष्वति सूत्रद्वये द्वित्वप्राप्ति-

मनुग्राद्य दीर्घादाचार्याणामित्यत्र अनचि चेति प्राप्ति-
र्हरदत्तेनोद्भाविता । तस्य न्यायमाश्रित्य उन्नीयते ।
त्रिप्रभृतिष्विति सूत्रद्वयं वैकल्पिकनिषेधविधायकम् ।
तत्र प्राप्त्युद्भावनं नावश्यकम् । विकल्पस्याप्राप्तिविषय-
स्यापि सम्भवात् । नित्यनिषेधे तु तदुद्भावनमावश्यक-
मिति । एवञ्च त्रिप्रभृतिष्विति सूत्रमावश्यकम् । अन्य-
था राष्ट्रमित्यादौ दीर्घात् परस्य द्वित्वं न स्यात् । न
चास्त इत्यत्र माधवेन द्वित्वकरणात् कथमिदमिति वा-
च्यम् । तस्य माधवग्रन्थस्यात एव प्रकाशे दूषितत्वात् ।
आत्वा रथमित्यत्र प्रातिशाख्यभाष्ये द्वित्वप्रवर्तनं च
छान्दसत्वेन निर्वाह्यम् । वाक्क् वाक् इत्यत्र भाष्योदा-
हृतद्वित्वनिर्वाहश्च दीर्घादाचार्याणामित्यत्रानचीत्य-
स्य हलीत्यर्थकस्यानुवृत्तेरित्यादि प्रक्रियाकौमुदीप्रका-
शादवसेयम् । एतेन दीर्घादाचार्याणामिति सूत्रे
आचार्यग्रहणं पूजार्थमित्यभिप्रेत्य वाक् वाक्क इति भाष्यो-
दाहृतविकल्पे उपपत्तिचिन्तायां क्लेशो मुधैव । पूजार्थ-
ताया: प्रामाणिकैरनुक्तेरित्यादि परास्तम् । यत्तु स्थानि-
वत्सूत्रे धात्वङ्गेत्याद्युदाहरणाभ्ययस्याङ्गपदाभ्यां पृथगुप-
न्यासवैयर्थ्यं दूषणोपन्यसनं तत् कौस्तुभे स्वयमेव गोब-
लीवर्दन्यायेन समाहितत्वादनादेयम् ॥

संयोगान्त—।

यत्तु यस्त्वाहुर्वार्त्तिककृतो वचनं प्रत्याख्यानप्रकारद्व-यन्तु भाष्यकृत इति तन्निर्मूलम्। मतभेदे प्रमाणाभावा-दिति। तन्न। भाष्ये तु संयोगान्तलोपे धुरो लोटो ना-स्तीति समर्थितमिति कातन्त्रपरिशिष्टोक्तेरेव मानत्वा-त्। धुडिति हि सत्युच्यते। यदपि काव्यं कलत्रं शात्वं ष्वाचक्षाणः काव् कलत् शाल्। अथवित्यनूद्य तत्र संयो-गान्तलोपो दुर्लभः। आद्यपक्षद्वयैकरूप्यार्थं पूर्वपूर्वम-न्तरङ्गं परं परं बहिरङ्गमित्यल्लुपणिलोपयोरसिद्धत्वात्। वान्तयोः क्विपि क्वौ विधिं प्रत्यस्थानित्वादूठो दुर्वार-त्वात् विचि लोपो व्योरित्यस्य प्रसङ्गाच्च। गिरिवेश्म-यतेस्तु क्विपि यणः प्रतिषेधार्थं वचनारम्भपक्षे गिरि-वेडित्युचितम्। प्रत्याख्यानपक्षे तु मान्तमेवेति। तदप्य-सत्। स्कन्दयतेः स्कन्नित्यादि न पदान्तसूत्रस्थकैयटे-न कुस्मयतेः कूरिति बहिरङ्गापचाभिप्रायेण माधवेन च स्वग्रन्थेन विरोधात् पूर्वपूर्वमित्याद्युक्त्यौ हतत्वात्। विचि काव्यशब्दात्क्विपि संयोगान्तलोपस्यासिद्धत्वाद्यलो-पेऽल्लोपादेः स्थानिवत्वाभावे ऽपि शाल्वशब्दे तदभावा-ल्लोपो व्योरित्यस्यासम्भवाच्च। अत एव काव्यशाल्वशब्द-यो वैषम्यात् तद्द्वन्द्व क्लिष्टत्वमिति चिन्त्यमिति प्रकाशकृ-

द्भिरुक्तम्। वस्तुतो हलन्त्यमिति सूत्रोक्तभाष्यादिबलात्
स्वयं गिरिवेडित्यत्र फलभेदस्वीकारेण च नेह पचाणामै-
करूप्यमित्युक्तोक्तेराश्रयणन्निर्मूलमेवेत्यास्तां तावत्। सु-
ध्युपास्य इत्यत्र पुनर्द्वित्वे लोपविकल्पेऽन्यतरद्वित्वेऽनुभय-
द्वित्वे च नव इति प्रक्रियाकौमुद्यां प्रकाशकृद्भिर्धस्य जश्त्वे
दस्य द्वित्वं धस्यैव वेत्युक्त्वाऽन्ते धकारयकारोभयद्वित्वे उभ-
योः पुनर्द्वित्वे लोपविकल्पेऽन्यतरद्वित्वे अनुभ-
यद्वित्वे च नव रूपाणि। तथा हि। एकधं
त्रिधा। एकयं द्वियं त्रियं च। एवं द्विधं त्रिधं
चेति। न चान्तरङ्गे द्वित्वे बहिरङ्गस्य यणोऽसिद्धत्वम्।
त्रैपादिकेऽन्तरङ्गे बहिरङ्गपरिभाषा न प्रवर्तत इति
विसर्जनीयसूत्रे भाष्यकैयटयोर्व्यवस्थापितत्वादित्युक्तम्।
अत्र केचित्। एकस्यां व्यक्तावेकं लक्षणं सकृदेव प्रव-
र्तत इति एकः पूर्वपरयोरिति सूत्रे भाष्ये सिद्धान्तित-
त्वात् कथं पुनर्द्वित्वप्रवृत्तिरन्यथा द्वित्वानन्त्यापत्तेः।
न च झरो झरीति हलो यमामिति च लोपेन निर्वाह-
स्तस्य वैकल्पिकत्वात्। किञ्चैवं सति सर्वस्य द्वे इति
द्वित्वमपि पुनः पुनः प्रवर्तेत। अत एव लिटि धातो-
रिति सूत्रे ऽनभ्यासग्रहणं भाष्ये प्रत्याख्यातम्। सन्नन्ता-
द्यङन्ताद्वा णिचि चङि द्वित्वाभावार्थं तदिति कैय्य-
टादिभिरुक्तम्। तत्र प्रकाशोक्तप्रथमपक्षे तावन्न दोषः।

पूर्वत्रासिद्धमद्वित्व इति जशोऽसिद्धत्वाभावाज्जशि कृते टकारस्य द्वित्वमिति व्यक्तिभेदात् पुनर्द्वित्वप्रवृत्तेः । अत एव संयन्तेत्यादौ परसवर्णयकारद्वित्वे भाष्यकृता षट् सन्त इत्यत्र टकारद्वित्वं रामादित्यत्र जश्त्वे वाऽवसान इति चर्त्वे द्वित्वे च रूपचतुष्टयं भवतोदाहृतम् । तत्सिद्धये च पूर्वत्रासिद्धीयमद्वित्व इत्युपन्यस्तम् । असिद्धत्वमभ्युपेत्य प्रवृत्तद्वित्वपक्षे ऽष्टाष्टमिकद्विर्वचनस्य स्थाने द्विर्वचनत्वे स्थान्यादेशव्यक्त्योश्च भेदाद्यकारादिद्वित्वस्य पुनः प्रवृत्तौ बाधकाभावात् । एकः पूर्वपरयोरिति सूत्रे भाष्ये सकृत्प्रवृत्त्यभिधानं चानवधाननिबन्धनम् । तत्राधानादिशास्त्रदृष्टान्तेन क्वचिदेवैकस्मिन् प्रयोगे अनुष्ठापकत्वं स्यान्न प्रयोगान्तर इत्याशङ्क्य ज्योतिष्टोमादिशास्त्रदृष्टान्तेन प्रयोगान्तरेऽपि गुणादिप्रवृत्तेरेव सिद्धान्तितत्वान्न तु सकृच्छास्त्रप्रवृत्तेः । आनन्त्यापत्तिरपि प्रकृते न दोषः । स ह्यनन्तकार्यसहितप्रयोगस्याशक्यत्वाच्छास्त्रकर्तव्यस्य परिनिष्ठितप्रयोगस्याभावात्तच्छास्त्रस्यानुष्ठापकत्वापत्त्या दोषः । प्रकृते च सा नास्ति द्वित्वस्य वैकल्पिकत्वेन यावच्छक्तिद्वित्वसहितप्रयोगस्य परिनिष्ठितत्वेन तेनैव शास्त्रस्य कृतार्थत्वात् । लिटि धातोरिति द्वित्वस्य तु नित्यत्वादानन्त्यापत्तेः क्वचिद्विश्रान्तौ कल्पनीयायां लाघवात् प्रथमप्रवृत्तावेव विश्रा-

न्तिकल्पनाद्व्यासग्रहणं प्रत्याख्यातम्। अत एव सर्वस्य द्वे इत्यस्यापि न पुनः प्रवृत्तिः सकृत्प्रवृत्तेन द्वित्वेनाभीष्टार्थबोधाच्च। अत एव परेर्वर्जन इति वैकल्पिकस्याऽपि न पुनः प्रवृत्तिः। अयमत्र निष्कर्षः। लक्षणस्य पुनः प्रवृत्त्यप्रवृत्त्योर्व्यक्तिभेदाभेदावतन्त्रे किन्तु सकृल्लक्षणे प्रवृत्ते निमित्ताभावात् पुनरप्रवृत्तिः। क्वचिदानन्त्यात् क्वचिल्लक्ष्यानुरोधेन वक्ष्यादौ प्रथमपुरुषबहुवचनादिशास्त्रसंकोचस्यैव तत्र तत्र लक्षणस्यासकृत्प्रवृत्तिरिति सङ्कोचस्य च कल्पनात्। यथा सुध्युपास्य इत्यादाविको यणचीत्यादेः पुनरप्रवृत्तिः। रमाया इत्यादौ याट्शास्त्रादेः। अवोढुमित्यत्र ढत्वादीनामसिद्धत्वाद्धलन्तवृद्धौ ढादौ सहिवहोरित्योकारे च कृते प्रसक्तस्याऽपि हलन्तवृद्धिशास्त्रस्य। प्रकृते तूत्सर्गतः प्रवृत्तस्य द्वित्वशास्त्रस्य पुनः प्रवृत्तौ न किञ्चिद्बाधकम्। अत एवाऽसिद्धवत्सूत्रे युटो यणि सिद्धत्वविधायकत्वात्तिक्प्रत्याख्यानाय युड्विधानसामर्थ्यं वर्णयितुं न व्यञ्जनपरस्यैकस्यानेकस्य वा श्रुतौ विशेषोऽस्तीति भाष्यकृतोक्तेः। श्रुतिभेदपक्षेऽपि यणो मय इति द्विर्वचनाद्धलो यमामिति पक्षे यलोपविधानात् पक्षे यकारद्वयं भवत्येवेति नार्थो युटेति। तद्विधानसामर्थ्याद्यणेन भवतीति कैय्यटः। इदञ्च द्वित्वस्य पुनः प्रवृत्तावेव सङ्ग-

च्छते । अन्यथा युट्पक्षे द्वित्वे त्रियकारं रूपं तदभावे द्वियकारमिति कथं श्रुतिभेदपक्षे युड्विधानसामर्थ्यं पुनः प्रवृत्तौ तु युडभावेपि पुनर्द्वित्वप्रवृत्त्या त्रियकारमिति सामर्थ्यसङ्गतिरिति । प्रकाशे नवत्वोक्तिस्तु मूलकृदुदाहृतद्वित्वद्वयानुसारेणेति कृतं पल्लवितेन । यच्च । यदप्युक्तं त्रैपादिक इत्यादि । तदपि न । नार्कुटो नार्पत्य इत्यत्र विसर्गनिवारणाय इट्द्वेरसिद्धत्वस्य भाष्ये स्पष्टत्वादिति । तन्न । नार्कुट इत्यादौ विसर्गनिवृत्तेर्बहिरङ्गपरिभाषानिराकरणपूर्वकं वचनेनैव सिद्धिरिति पाश्चिकभाष्यार्थस्य कैय्यटेन करणात्तत्पक्षेणास्य ग्रन्थस्योपपत्तेः । त्रैपादिक इत्यस्य क्वाचित्कत्रैपादिकपरत्वेन बहिरङ्गत्वेन यणः प्रतिषेध इत्यस्य प्रत्याख्यानस्य सुवचत्वादिति । यत्तु कृष्णर्द्धिरित्यत्र त्रिधादिरूपवचनं ऋद्धेर्धकारस्य द्वित्वमिति । तद् झलाञ्जशीति जश्त्वोऽप्रतिहतप्रसरत्वःदुक्तन्यायेन जशः सिद्धत्वाच्चायुक्तम् ॥

झरो झरि—।

यत्तु प्राचो विकल्पानुवृत्तेरनुक्तेर्न्यूनतेति तन्न । मूलन्यूनतापरिहाराय तद्व्याख्यानेऽन्यतरस्यामित्यनुवर्तितत्वात् । कथमन्यथा गुरोरनृत इत्यत्र

देवदत्त इत्यत्र भवदुदाहरणे व्याख्याने ऽस्य एहीत्यादि-पूरणेऽपि मूले वाक्यानुदाहरणान्न न्यूनता। एवमेव दूरा-द्धूते चेति सूत्रे प्राचोक्तं कृष्ण एहीत्युदाहरणमपि प्रसी-देत्यादिपूरणेन व्याख्येयम्। यच्च यदपि व्याख्यातृभिः शरो-ऽचीति ज्ञापकमुपन्यस्य तत्संवादार्थं भाष्यमुपन्यस्तम्। अ-नुवर्तते हि विभाषा शरोऽचि यद् वारयत्ययं द्वित्वमिति तन्न। तदुत्तरभाष्ये एवोक्तज्ञापकस्य दूषितत्वात्। लोपस्य हि नित्यत्वेऽचोरहाभ्यामिति द्वित्वं लोपापवादः स्यात् तथा च शरोऽचीत्यस्य सार्थक्यं स्पष्टमेवेत्यादि। तत्र ज्ञा-पकमु न्यस्येऽप्यनुक्तोपालम्भः। इत्थं हि तेषां ग्रन्थः। विकल्पेनायं लोप इति काशिकादौ स्थितम्। तथा च भाष्यम्। अनुवर्तत इत्यादि। तथा च लोपस्य वैक-ल्पिकत्व एव भाष्यसंवादस्तेषामभिप्रेतो न तु शरो-ऽचीत्यस्य ज्ञापकत्वेऽपि तद्वाक्यनिविष्टत्वेन परं तल्लेखः। अत एव कैयटोऽपि लोपो विकल्पेनेत्याहेति लोपस्य वैकल्पिकत्वमात्रांश एव कैयटसंवादस्तैरुपन्यस्तः। यत्तु द्वित्वविधानाद्द्वावेव श्रिष्यत इत्यत्र लोपस्य वैक-ल्पिकत्वेन द्वित्वस्य चरितार्थत्वादिति दूषणं तत् तदाश-यानवबोधात्। अचो रहाभ्यामिति द्वित्वे द्वयोः श्रवणं न स्याल्लोपेनैकस्यापहारादित्याशङ्कायां द्वित्वविधाना-दिति ग्रन्थस्तदर्थश्च द्वित्वविधानसामर्थ्याल्लोपस्य वैक-

ल्पिकत्वात् पक्षे द्वयोः श्रवणमिति द्वित्वविधानं लोपस्य वैकल्पिकत्वज्ञानद्वारा द्वयोरेव शेषे हेतुरिति तदाशय इति । प्रादूहोढो । अत्र क्तान्तस्योढशब्दस्यार्थवतो ग्रहणं ज्ञापकमर्थवद्ग्रहणेनानर्थकस्येत्यत्रेति सीरदेवः । यत्तु नन्वेतदयुक्तम् । फणादिना राजिना साहचर्यात्तस्यैव षत्वार्थतया भ्राजिग्रहणस्योपक्षीणत्वादिति चेन्न । विभ्राट् विभ्रागिति हि रूपद्वयं साध्यम् । तच्च व्रश्चादिसूत्रे राज् इति पठित्वाऽपि सुसाधमेकस्य भ्राजतेर्ऋकारस्य प्रागपि दातुं शक्यत्वात् । भ्राजभासेति विकल्पस्यात्मनेपदमात्रफलकतायां वक्ष्यमाणत्वेन तत्स्थानेऽकारस्य सुपठत्वाच्चेति । तत्राशङ्का तावदतिनिर्दला ; अर्थवद्ग्रहणपरिभाषाभावे व्रश्चेति सूत्रेऽफणादिभ्राज्येकादेशस्यापि राजेः सत्वेन फणादेरेव ग्रहणमिति नियामकाभावेन तत्साहचर्येण फणादिभ्राजिग्रहणार्थं भ्राजिग्रहणमित्यस्यानाशङ्क्यत्वात् । भ्राजेः फणादेरेव ग्रहणमिति नियमेऽपि राजिग्रहणे फणादेर्ग्रहणासम्भवेन किन्तद्व्यावृत्तये राजिसाहचर्येण फणादेरेव भ्राजेर्ग्रहणार्थं भ्राजिग्रहणेनेति । राजिसाहचर्यात् फणादेर्ग्रहणमित्याकरग्रन्थास्त्वर्थग्रहणपरिभाषायां स्थितायामिति न तद्विरोधः । एवं च सूत्रधातुन्यासभङ्गेन समाधानमपि निष्फल-

म् । किंच राजृ इति सानुबन्धकनिर्देशे यङ्लुकि राराष्टीत्यादौ षत्वं न स्यात् । किन्त्वेवं भ्राजेर्ग्रहणं न स्यादकारस्य समुदायानुबन्धत्वादिति दिक् । यदप्युपसर्गेणैव धातोराक्षेपे सिद्धे इति प्रतीकमुपादाय तद्धेतुत्वेन व्याख्यायां यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसञ्ज्ञा इत्युक्तत्वादित्युपन्यसनं तदपि मुधा । उपसर्गाः क्रियायोग इति यथाश्रुतसूत्रादेव धातोराक्षेपसम्भवात् ।

एङि पररूपम् ।

अत्र प्रेजतीति मूलोदाहरणमभिप्रेत्य एजृ कम्पन इति प्रकाशः । कम्पनार्थस्यैजतेः परस्मैपदत्वादिति बोध्यम् । एवे च । अनियोगोऽवधारणभिन्ने सम्भावने तथा च ॥

अनवक्लृप्तौ यदा दृष्टः पररूपस्य गोचरः ।
एवस्तु विषयो वृद्धेर्नियमेऽयं यदा भवेत् ॥

इति श्लोकवार्त्तिकमिति प्रकाशः । तत्र वृत्तौ भवं वार्त्तिकम् । अध्यात्मादित्वाट्ठञ् बोध्यम् । तेन वार्त्तिकोक्ती रभसादिति केषाञ्चिदुक्तिः सैव रभसिकीति ध्येयम् । यत्तु शकन्ध्वादिष्वित्यत्र टिसञ्ज्ञासूत्रोदाहरणम् । तट्टिसञ्ज्ञाप्रयुक्तकार्याभावादनुचितम् ।

अव्यक्तानु—।

अत्वतः किं दकारान्ते मा भूदिति प्राचोक्त-प्रश्नोत्तरयोर्निरालम्बनत्वमिति । तन्नात इति न ह्रस्वाकारनिर्देशः । अतो गुण इत्यत एव तदनुवृत्तेरस्यानर्थक्यापत्तेः । नाम्रेडितस्येति ज्ञापकाच्च । तात्राकारनिर्देशे आम्रेडितनिषेधोऽकारस्य स एवान्त्य इति विकल्पोऽपि तस्यैव स्यादिति निषेधविकल्पयोरेकविषयत्वापत्तिरिति तकारान्तनिर्देशो वाच्यः । तत्र प्रतिपत्तिलाघवायाद इत्येव निर्देश्यमुदाहरणे च झलां जशोऽन्त इति जशि कृते ऽदःसम्भवात् । रोरुत्वन्यायेन च जशोऽसिद्धत्वाभावादिति प्रश्नाशयः । उत्तरस्य जश्त्वं विना अदकारान्तमनुकरणं तत्र मा भूदित्यर्थः । एवंच तत्र पररूपस्य चरितार्थत्वाद्रोरुत्वन्यायाभावेन जशोऽसिद्धत्वात्तकारान्ते न स्यादिति द्रष्टव्यम् । तपरस्तत्कालस्येत्यत्र दकारप्रश्लेषपक्षे त्वद इति निर्देशे ऽपि ह्रस्वाकारपरत्वसम्भवात्तन्निवृत्तये उक्तायुक्त्यनुसन्धानावश्यकत्वे प्रतिपत्तिलाघवस्याभाव इत्यपि द्रष्टव्यमिति कथं प्रश्नोत्तरयोर्निरालम्बनत्वमिति । यदपि यत्तु व्याचख्युः । अतो गुण इत्यतोऽत इत्यनुवर्त्य शब्दाधिकारात् सिद्धमिति प्रश्नः । यदा जश्त्ववशाद्दा-

न्तत्वं तदापि स्यात् पुनरट्ग्रहणे तु तान्तत्वस्य विवक्षणा-न्नेत्युत्तरमिति। तच्चिन्त्यम्। जश्त्वशास्त्रस्यासिद्धत्वेन पर-रूपस्यैव प्रवृत्तेः । नाम्रेडितस्येति निषेधे पटत्पटदितीत्युदाहरणस्यासम्बद्धत्वापत्तेश्च । तत्र हि भवदुक्तरीत्या प्राप्तिरेव नास्ति दान्तत्वादिति तदपि न। जश्त्वशास्त्र-स्यासिद्धत्वेऽपि पुनरट्ग्रहणेन जश्त्वाविषयतात्पर्येण पररूपाप्राप्तेः। अत एव व्याख्यातृभिरत इत्यनुवृत्तेऽपि यदा अच्छब्दस्य जश्त्ववशाद्दान्तत्वं तदापि स्याज्जश्त्व-स्यासिद्धत्वाद्भवत्ययमच्छब्द इति प्राप्नोति । पुनरट्ग्रह-णेन त्वत इत्यस्य विशेषणात्तान्तत्वविवक्षार्थान्न भवि-ष्यतीत्युक्तम्। तत्र दान्तत्वमित्यस्य सम्भाव्यत इति शेषः । अन्यथा दान्तत्वे जश्त्वासिद्धत्वोक्तिरसंभाविनी स्यात् । तान्तत्वस्य विवक्षार्थादित्यस्य जश्त्वाविषय-विवक्षार्थादित्यर्थः । अन्यथा पुनरट्ग्रहणाभावेऽपि तान्तत्वविवक्षासम्भवात् पुनरट्ग्रहणेन तु इत्यसम्बद्धं स्यात्। अत एव हरदत्तोऽपि पटदितीत्यत्र पररूपमा-शङ्क्य काशिकायामभिहितं दकारान्तानुकरणमेत-दिति प्रतीकमुपादाय तकारान्तानुकरणे रूपमेवैतन्न स्यादपदत्वे जश्त्वाभावाद्यथा पटिति करोतीत्याह । पटत्पटदित्यन्त्यपररूपविकल्पे ऽभावोदाहरणम् । तत्र द्वितीयादृग्रहणासंबन्धइत्यस्य व्याख्यातृभिरेवोक्तत्वात् ।

भन्त्यपररूपनिषेधोदाहरणन्तु पटत्पटेतीति नाम्रेडि-तेति दूषणस्याप्ययुक्तत्वात् । अत्रैकाचो नेत्यस्य श्रदि-तीति कथमुदाहरणमिति तु चिन्त्यम् ॥

अकः—।

अत्राकोऽकि दीर्घ इत्येव सुवचमिति केचित् । यथा-संख्यसम्बन्धेनैवासवर्णव्यावृत्तिरिति तेषां भावः । तच्चि-न्त्यम् । तथा सति ऋति ऋ वेत्यादिवार्त्तिके स्वयमुप-न्यस्ते दधि ऋकार इत्यादावतिप्रसङ्गवारणायाधिकस्य सवर्णग्रहणस्य सूत्रे चाकोत्यस्य करणेऽतिगौरवात् ॥

सर्वत्र विभाषा गोः ।

अवङ् स्फोटायन—।

अत्र हे चित्रगो इत्यादाववङ्प्रकृतिभावयोरभावाय स्थानिवत्त्वनिषेधस्वीकारावश्यकत्वात् तेनैव चित्रग्वग्र-मित्यादावपि तयोरप्रवृत्तौ यत् कैश्चिदेङ इति तद-र्थमनुवर्तिं तन्निष्फलम् । न चैङनुवृत्तौ लाघवकत्वा-च्चित्रगो इत्येङस्तयोरप्रवृत्तौ स्थानिवत्त्वनिषेधो नावश्य-क इति वाच्यम् । आदेच इत्यत्र चेतेत्यादिलाक्षणिकस्ये-वो वारणफलकस्योपदेशग्रहणस्य वर्णग्रहणे लक्ष-णप्रतिपदोक्तपरिभाषाया अप्रवृत्तिज्ञापकत्वात् । अ-

न्यथा चक्रे इत्यादिप्रतिपदोक्त एवैङः पदान्तादित्यादि प्रवर्तेत न हरे इत्यादौ । अन्यत्र स्वयमपि तथाभ्युपगमाच्च । न च गोः पूर्वत्व इति वार्त्तिके पूर्वरूप एव स्थानिवद्भावनिषेधस्योक्तत्वेन पूर्वरूपमेवानिष्टमिति प्रतीयते न त्ववङ्प्रकृतिभावाविति कथं तयोरप्रवृत्तये स्थानिवत्त्वनिषेध आवश्यक इति वाच्यम् । एवमप्येङनुवृत्तिप्रयोजनानुक्तेः । चित्रग्वग्रमिति वार्त्तिकोदाहरणे भाष्योक्ते एङः पदान्तादतीति पूर्वरूपस्याज्विधित्वेन तदप्रवृत्तये वार्त्तिकस्यासम्भवनीयत्वेन तत्पूर्वरूपपदस्य पूर्वरूपबाधकावङ्प्रकृतिभावपरत्वाच्च । न चैवमपि सर्वत्र विभाषेति सूत्रस्यैव भाष्ये उदाहरणात् प्रकृतिभावपरत्वे ऽपि पूर्वरूपस्यावङ्परत्वे किं मानमिति कुतोऽत्रङोऽनिष्टत्वमिति वाच्यम् । एवमप्येङनुवृत्तेर्निष्फलत्वस्यापरिहारात् । न चावङ्सूत्रे ऽवक्तव्यः स्वरसिद्ध्यर्थमिति वार्त्तिककृता गवाग्रमिति बहुव्रीहौ गोशब्दौकारस्योदात्तस्यावङ् कदाचिदन्तो दात्तोऽपि स्यादित्यगागमोऽवङ्समानरूपबाधक उक्तः भाष्ये च तत्प्रत्याख्यानायाद्युदात्तोऽवङ् निपात्यत इत्युक्तम् । एवं च चित्रग्वग्रमित्यत्रावङो रूपभेदात् स्वरसिद्धिमात्रस्याग्युक्तिप्रयोजनोक्तिः कथं वार्त्तिककृतः सङ्गच्छताम् । कथं चाद्युदात्तनिपातनमात्रेण

तत्प्रत्याख्यानं भाष्यकृत इति तत्रावङोऽनिष्टत्वात्तन्निवृ-त्तये ऽवङ्विधाने एङनुवृत्तिः। चित्रगोऽग्रमित्यत्र त्ववङ-दुष्टत्वे किं बाधकमिति नावङि स्थानिवत्त्वनिषेध इति वाच्यम्। आद्युदात्तनिपातने हि अक्रमानस्वरः साध्यः स चावङ्स्वीकारे न सिध्यति । अक्यामन्त्रितस्वरेणाद्यु-दात्तत्वादवङि गकाराकारस्य सति शिष्टोदात्तत्वादिति स्वरभेदात् । न च गवाच इत्यादावङ आद्युदात्तत्वस्य श्रवणं मा भूदिति तस्योपदेशिवद्भावो वाच्य इति समासान्तोदात्तादिवामन्त्रिताद्युदात्तादपि प्रागवङ्-स्वरप्रवृत्तौ पश्चादामन्त्रितस्वरे स्वरभेदाभाव इति वाच्य-म्। उपदेशिवद्भावेन हि समकालप्रवृत्तिकस्य परत्वेन प्रथमं प्राप्तस्य समासस्वरस्य प्रागप्रवृत्तिः क्रियत इति कैयटादिभिर्व्याख्यातत्वात् समासान्तोदात्तत्वेन न बाध्यत इति वामनोक्तेरन्तरङ्गाबाधेनोपपत्तौ तद्बाधकल्पन-स्यान्याय्यत्वाच्च । अन्तरङ्गस्य प्रथमप्राप्तस्यामन्त्रित-स्वरस्यावङः स्वरात् प्राक्प्रवृत्तौ बाधकाभावात्। तस्मा-दुक्तोदाहरणेऽवङ्प्रकृतिभावयोरनिष्टयोरभावः स्थानि-वत्त्वनिषेधेनैव साध्य इति तद्विधाने एङनुवृत्तिर्निष्फ-ला । अत एव माधवेन चित्रग्वग्रमित्यत्र स्थानिवत्त्वा-भावेनैव तयोरप्रवृत्तिरुक्तेत्यलम् । यच्चावङ्सूत्रे मदा-न्ते किं गवीति प्रत्युदाहृत्य गवे इति प्रत्युदाहरण-

ऽयुक्तं पररूपेणाप्येतत्सिद्धेरित्युक्तम् । तत्तदाशयानवबोधात् । न हि गवे इति ङयि सिद्धं रूपं तदाशयविषयः किन्तु ङावापाद्यम् । तथा च ङी गवे इति स्यादित्यध्याहारेण प्रत्युदाहरणवाक्यार्थः । गवीति प्रत्युदाहरणमपि अत्रावङ् मा भूदिति अध्याहारेणैव योजनीयम् । अन्यथा ऽनन्वयात् । प्रायशश्च प्रत्युदाहरणवाक्येष्वध्याहारेणैव योजनमित्यलम् । यत्तु सर्वत्र विभाषेति प्रकृतिभावस्तूक्ता प्लुतप्रगृह्या इत्यतः पूर्वमथ प्रकृतिभाव इति वचनम् । तदनवधानात् । दूराद्धूते च गुरोरनृत इत्येतत्सूत्रद्वये यद्वक्तव्यं तत्करोत्करोतीति सूत्रे उक्तम् ॥

ईदूदेत्-।

अत्र द्विवचनान्तं प्रगृह्यमिति प्राचः प्रवाद इति केचित् । तन्न । द्विवचनमित्येव प्रायशः पाठात् । अत एव ईदूद्द्विवचनस्य विशेषणं तेन च तदन्तविधिरित्याह । ईदूदेदन्तमितीति प्रकाशः । द्विवचनान्तमिति पाठेऽपि इहान्तशब्दः स्वरूपवाची । अन्तं स्वरूपे ना न स्त्री शेषेऽन्तिके त्रिषु इति मेदिनीकोशात् । तेन च द्विवचनशब्दस्य कर्मधारयः । तेन कुमार्योरगारमित्यादावनतिप्रसङ्गात् । सुप्तिङन्तमि-

त्यन्तग्रहणेन संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणाभा-वेऽपि चत्वभावाच्चेति ॥

ॐ।

यत्त्वस्यानुनासिकत्वे यद्येतन्नू इत्यत्रानुनासिकार्थं कृतं यरोऽनुनासिक इत्यत्रानुनासिकग्रहणं प्रमाणम्। अन्यथा यरो यमि यम्वेत्येवावक्ष्यदिति। तन्न। एवं हि निर्देशे यथासंख्यप्रतीतौ एतन्मुरारित्यत्रानु-नासिको न स्यात्। अत्र हि जातिपक्षाश्रयणस्यावश्य-कत्वेनैतन्नयनमित्यादौ चरितार्थोऽयं चतुर्मुख इत्यादा-विवेहापि न प्रवर्तते। अनितेः क्विपि सम्बुद्धौ आन् चिनोति इत्यत्र नश्छव्यीति रुत्वे अत्रानुनासिक इति पूर्वस्यानुनासिके यद्येतनांश्चिनोतीत्यत्रानुनासिको न-स्याच्चेति ॥

मय उञः-।

मयः परादिति पञ्चम्यन्तस्योञ्विशेषणत्वे उञ इति षष्ठ्यभावादुञः स्थानित्वदुर्घटत्वादिति केचित्। तन्न। मय गताविति धातोः प्रत्याहारस्य च मयः सम्भवात् प्रकृते कतरो मय् गृह्यत इत्यतो मञ्विशेषणत्वेन परादित्यस्य प्राप्तं कथनात्।

पं पकारं राति ददाति ग्राहयतीति तदर्थात् प्रत्याहा-रग्रहणमिति प्राचो भावादुञ् इत्यस्य षष्ठ्यन्तत्वे बाध-काभावात् । प्रत्याहारग्रहणे हेतुश्च बहुविषयसंग्रह इति दिक् ॥

इत्यच्सन्धिः ।

यरोऽनु–।

यत्तु यत्तु प्राचा मयटि नित्यं पठितं यच्च हल-न्तप्रकरणे षण्मां षड्णामित्युदाहृतम् । यच्च यरोऽनुनासिक इति वानुनासिक इति व्याख्यातं तत्सर्वं प्रत्यये भाषायां नित्यमिति भाष्यविरोधादुपेक्ष्य-मिति केचित् । तन्न । मयटीत्यस्य प्रत्ययमात्रोपलक्ष-णत्वात् । षड्णामिति स्थितिप्रदर्शनम् । परिनि-ष्ठितं च षण्मामिति व्याख्यातत्वात् । एवंच वानुनासिक इति प्राचो व्याख्यानं चिन्त्यमिति प्रकाशकृद्भिरेवोक्त-मिति प्राचोक्तौ तद्व्याख्यातुरुक्तौ च न कश्चित् क्षुद्रोप-द्रवः। अत्र यचि भं तसौ मत्वर्थ इति संहितापाठे तसा-विति तात् पूर्वं दकारं प्रश्लिष्य भत्वेन ककुद्मन्त इत्यत्र नानुनासिक इति समादधुः । यत्तु दकारप्रश्लेषे क्षुन्-मानित्यादावतिप्रसङ्ग इति तत्तुच्छम् । क्षय इति

मतुपो मस्य वत्वावश्यंभावान्मन्मानिति रूपस्यैवासिद्धेः ॥

उदः स्थास्त—।

सकारस्य पूर्वसवर्णस्तकार इति हरदत्तमाधवादयः। यद्यपि महाप्राणत्वघटितान्तर्यंवांस्थकार इहोचितस्तथाप्युदः परस्य छन्दः सस्य पूर्वसवर्णविधायकस्य दोरेवेति वार्त्तिकस्योत्कन्दो रोग इति भाष्यस्योदाहरणे थकाराश्रवणान्महाप्राणत्वाघटितमान्तर्यमिह पूर्वसवर्णनियामकमिति सामान्यतो ज्ञाप्यत इति तेषां भावः। उक्तोदाहरणे थकारश्रवणं सन्दिग्धं ज्ञापकञ्चोत्कन्द इत्युदाहरणविशेषमात्रविषयकमिति वादिनाम्मते तु सस्य थ इति मतं हरदत्तादिभिरन्येत्वित्यनेनोपन्यस्तमिति। एवञ्च सकारस्य तकार इति प्राचां ग्रन्थाः प्रत्युक्ता इति निरस्तम्। यदपि चयो द्वितीयाः शरीत्यस्योपन्यसनं तदतिरभसादिति। तन्न। अन्ये तु द्विथकारं रूपमाहुरित्युक्त्वा न चैतदप्रामाणिकम्। चयो द्वितीयाः शरि पौष्करसादेरिति सत्वे थकारश्रुतेरवर्जनीयत्वादिति हि प्रकाशकृद्भिरुपन्यस्तम्। तत्र रामस्ये पूर्वसवर्णतकारस्यासिद्धत्वं शर्परत्वाभावो वा हेतुः स्यात् स च न सम-

वति । उदस्तकारस्य थकारः पूर्वसवर्णतकारस्य च झरो झरीति लोप इति द्वियकारकं रूपमिति तद-भिप्रायात् । न चोदस्तस्य चर्त्वभूतस्य थकारं प्रत्य-सिद्धत्वं चयो द्वितीया इत्यस्य काशिकायां भवत्-स्वित्युदाहरणस्योदाहृतत्वेन थं प्रति चर्त्वस्य नमुने इत्य-सिद्धत्वाभावात् । नादिन्याक्रोश इत्यत ऊर्ध्वमुद इत्यतः पूर्वं चयो द्वितीया इत्यस्य भाष्ये पाठात्तस्य च काशिकोदाहरणोपष्टम्भाच्च उत्तरदेशत्वकल्पनाच्चेति ॥

शश्छोऽटि ।

तत् शिव इत्यत्र जश्त्वे कृते इति प्रक्रियाकौमुदी क्विबन्ततनोतिनिष्पन्नताच्छब्दपरत्वेन प्रकाशे व्या-ख्याता तेन न दान्तस्य जश्त्वोपन्यासवैयर्थ्यदोषः । न चैवमपि चर्त्वमुपन्यस्य चुत्वोपन्यासो विरुद्धः । चुत्वं प्रति चर्त्वस्यासिद्धत्वादिति केचित् । तन्न । तथोप-न्यासे चर्त्वचुत्वक्रमस्याविवक्षितत्वात् । कथमन्यथा भवतोऽपि कृत्वमुपन्यस्य चुत्वचर्त्वोपन्यासः सङ्गच्छता-म् । चुत्वपोमन्यन्त इत्युक्त्या अगतिकगतिकस्येहाप्या-श्रयणे प्रमाणाभाव इत्यस्वरसः प्रकाशित इति न कश्चित् क्षुद्रोपद्रवः ॥

डः सि धुट्।

धुटश्चर्त्वेन तकारः। यत्तु तस्य चयो द्वितीया इति पक्षे थ इति तन्न। चर्त्वस्यासिद्धत्वादिति केचित्। तन्न। उदः स्थेत्यत्रोक्तदूषणग्रस्तत्वात्। अत एव धुटि कृते चर्त्वं तस्य पूर्ववत् पक्षे थ इति हरदत्तः। अत एव प्रक्रियालाघवार्थं तुग्व्येव विधेये धुट्करणं वैचित्र्यार्थमिति प्रकाशोक्तं सङ्गच्छते। न सङ्गच्छते च तत्र चयो द्वितीया इति पक्षे थकारापत्तिदूषणं धुट्पक्षे थकारस्येष्टत्वात्। असङ्गतं च धुडभावपक्षे षट् सन्त इत्यत्र टस्य ठो नेति। तत्रापि पक्षे ठस्येष्टत्वादिति॥

नश्च।

नकारात् परस्य सस्य धुड् वेत्याचार्याः। यत्तु अधिकृतपदविशेषणं न इतीति तदन्तविधिना नकारान्तादिति विवरणम्। तत्र पदानुवृत्तौ प्रयोजनं चिन्त्यम्। यदि तु ङमो ह्रस्वादित्यादौ तदनुवृत्त्यनुरोधेनेहापि तदनुवृत्तिरिति तदा ङ्णोः कुक् टुक् शरि डः सि धुट् इत्यत्रापि तदनुवृत्त्यावश्यकत्वे ङकारणकारयोरिति डात् परस्येति च विवरणानौचित्यात्। कथं तर्हि शि तुगित्यत्र नस्य पदान्तस्येति प्रक्रियाकौमुदीति चेत्।

तत्र पदान्तग्रहणरहितपाठस्यैव प्रायशो दर्शनात् क्वचित्कृतथापाठेऽपि अपदान्तनकारस्यानुस्वारेण भाव्यमिति पदान्तस्यैव तुगितिव्युत्पादनमात्रपरत्वेनाधिकृतपदग्रहणाविवरणात्। अत एव नकारान्तस्येति न विवृतम्। नश्चेत्यत्रापि कुतो नैवं व्युत्पादितमिति चेन्न। एकजातीयस्यार्थस्यैकत्र व्युत्पादनेनैवान्यत्र तदवगमात्। न चैवं ममापि नकारान्तादिति व्युत्पादनमिति वाच्यम्। पदाधिकाराभावे न इत्यस्य विशेषणत्वाभावेन तदन्तविवरणासाङ्गत्यं स्यादिति। पदाधिकारलभ्यस्य तदन्तविवरणस्यान्यत्रापि तदन्तोपलक्षणत्वे तु कथंचित् समाधानेऽपि पदादित्यनुक्तेर्न्यूनतेति बोध्यम्॥

शि तुक्।

अत्र तुकः पूर्वान्तत्वात् कुर्वन्त्च्शेते इत्यत्र पदान्तस्येति णत्वनिषेधो न स्यादिति पूर्वपक्षे स्तोः श्चुना श्चुरित्यत्र स्तोः श्चुनेति योगविभागे णो नेत्यनुवर्त्य श्चुना योगे स्तोर्णत्वनिषेध इति समाधानम्। एवं नश्चेत्यत्र धुटः परादित्वे कुर्वन् सीदतीत्यत्र पदान्तस्येति णत्वनिषेधः प्रयोजनमिति प्राचां ग्रन्थः। तत्र बहिरङ्गपरिभाषया गतार्थमिदमुभयमिति प्रकाशः

कार्यकालपक्षमाश्रित्येति बोध्यम् । यत्तु तत्र त्रैपादिकेऽन्तरङ्गे परिभाषेयं न प्रवर्त्तत इति सुध्युपास्य इत्युदाहरणे स्वोक्त्या सह विरोध इति । तन्न । तत्र त्रैपादिक इत्यस्य क्वाचित्कत्रैपादिकपरत्वेन व्याख्यानेनाविरोधादिति । सञ्छम्भुरित्यत्र ॥

अछौ अचछा अचश्चा अशाविति चतुष्टयम् ।
रूपाणामिह तुक्छत्वचलोपानां विकल्पनात् ॥

इति केचित् । तत्र चयो द्वितीया इति छत्वविकल्पनाद्रूपद्वयष्ट्द्विर्बोध्या ॥

ङमः—।

अत्र लाघवात् । ङमो ह्रस्वादचि द्वे इति सूत्रयणीयम् । कुर्वन्नास्ते इत्यादौ तु बहिरङ्गस्य द्वित्वस्यासिद्धत्वेन पदान्तस्येति णत्वनिषेधसंभवात् । राज्ञ इत्यादौ त्रैपादिकेऽन्तरङ्गे यथोद्देशपक्षाश्रयणेन बहिरङ्गपरिभाषाऽप्रवृत्तिस्वीकारेऽपि नार्कुट इत्यादौ त्रैपादिके विसर्जनीय इवात्र णत्वनिषेधे लाघवानुरोधेन कार्यकालपक्षाश्रयणे तत्प्रवृत्तिस्वीकारौचित्यादिति प्रकाशकृतः । अत्रेदं तावदवधेयम् । नित्यग्रहणस्य विस्पष्टार्थत्वेन करणाकरणे न्यासद्वयेऽपि तुल्येऽवशिष्टभागेऽर्द्धमात्रालाघवायोक्तप्रतिपत्तिगौरवसहनं न सहृ-

दयचमत्कारकारि। तस्मान्मात्रालाघवाय द्वे अचि ह्रस्वान्ङम इति सूत्रयणीयम्। यत्तु परमदण्डिनावित्यादौ अन्तर्वर्त्तिविभक्त्या पदत्वान्नुट् स्यादिति। तन्न। नुटो नलोपं प्रत्यसिद्धत्वेन नलोपापादनस्यैवोचितत्वादिति। अत्रानुनासिकः अनुनासिकात् पर इति सूत्रयो रोः पूर्वस्येति रोः पूर्वस्मादिति चोक्त्वा व्याख्यानेऽपि रुग्रहणस्योपलक्षणत्वमनुक्त्वा समो लोपे केषांचिदनुनासिकानुस्वारयोरूपमानवधानात्। संपुंकानामिति। यत्तु पुंस्कोकिल इत्यादावव्युत्पत्तिपक्षे षत्वप्राप्तौ संपुङ्कानामिति स इति तन्न। पुंमुक्सोःषत्वप्रतिषेधात्। सति हि सत्रचने तेनैव षत्वनिवृत्तौ पुनः षत्वनिषेधोऽनर्थकः। तदभावे तु तस्यावश्यकत्वादिति। न चैवमपि पुंस्त्वमित्यादौ ह्रस्वात्तादौ तद्धित इति षत्वनिवृत्त्यर्थमयं सकारः स्यादिति वाच्यम्। कृतेऽपि सकारे तस्य विसर्गः। डुकःत्यनुरोधेन विसर्जनीयस्थानिकत्वात् विसर्जनीयस्थानिकस्येदुदुपधस्येति षस्य निवृत्तावपि कृस्यादिति सस्थानिकस्यानिवृत्तेः। का तर्हि पुंस्त्वमित्यादौ षत्वाभावाय गतिरिति चेदियम्। इदुदुपधस्येत्यत्र पुंमुक्सोः प्रतिषेध इति वचने पुंग्रहणं नैतत्षत्वनिवृत्त्यर्थं सकारविधानादेव तन्निवृत्तेः सिद्धत्वादिति ह्रस्वादिति षत्वनिवृत्त्यर्थं तस्मात् पुंस्त्वमि-

५॥

त्यादौ वाचनिकी षत्वनिवृत्तिरिति । इदमेवाभिसन्धाय ह्रस्वात्तादाविति सूत्रे पुंसःप्रतिषेधः पुंस्त्वं पुंस्त्वेति हरदत्तो व्याजहार। तस्य भाव इति सूत्रे पुंस्त्वमिति भाष्योदाहरणन्तु न षत्वाभावज्ञापकम्। अनुस्वारपक्षे ह्रस्वात् परत्वाभावेन षत्वाभावे तदुदाहरणासंभवात् । वस्तुतस्तु समादीनां रोर्विसर्जनीयस्य वा सविधानापेक्षया तेषां साक्षात्सविधानमुचितम्। तच्चैवं समः सुटीत्यत्र सकारान्तरप्रश्लेषात् समः सकारो विधीयते स एव पुमः खयीत्यत्रानुवर्त्तते कानाम्रेडित इत्यत्र च मण्डूकप्लुत्येति। न चैवं कानः सस्य रुप्रकरणबहिर्भावात्ततः पूर्वस्य कथमनुनासिकादि । अनुनासिकानुस्वारयोस्तावत्पर्यन्तमधिकृतत्वात्। एवं सति कान एव रोः सवचनारम्भोऽपि संपुमोर्वचनानर्थक्यात्त्र कांस्कानित्यस्य कस्कादित्वे तु तदर्थमपि न सवचनारम्भ इति॥

पुमः—।

इह व्याघातो नेति केचिदिति प्रक्रियाग्रन्थो यथानिर्बाधस्तथा तत्प्रदीपादवधेयम्॥

कुप्वोः—।

यत्तु प्राचा विकल्प इत्युक्तम्। तन्न ⌣क⌣पाभ्यां-

मुक्तौ सत्वप्रसङ्गादिति । सोऽयमनुक्तोपालम्भः । चाद्वि-सर्ग इत्येव पाठात् क्वाचित्के तथा पाठे ऽपि चानुकृष्टे विसर्गे ≍क≍पयोर्विकल्पः फलतीत्यर्थः ॥

कस्का—।

≍क≍ पयोरपवाद इति केषांचिद् ग्रन्थे विसर्जनीयस्य चेति शेषः । न च कस्कादेराकृतिगणत्वात् संस्कर्तैत्यस्यापि कस्कादित्वादेव सत्वं कुतो नेति वाच्यम् । वचनेन कस्कादित्वकल्पनेन वा सकारकरणे विशेषाभावात् । संस्कर्तैत्याद्यर्थं समः सवचनस्यावश्यकत्वाज्ञेत्यवधेयम् ॥

इति हल्सन्धिः ।

यत्तु सोऽपदादाविति सूत्रेऽपदाद्योः कुप्वोरितिमूलप्रतीकमुपादायोक्तं सूत्रे तु व्यत्ययेनैकवचनम् । यदि तु खर्विशेष्यते ऽपदादौ खरीति तदा यथाश्रुतं साधु । किन्तु खरीति मण्डूकप्लुत्याऽनुवर्त्यमिति क्लेश इति । तन्न । खरीत्यनुवृत्तावपि कुप्वोरिति न समानाधिकरणं भिन्नवचनत्वादिति षष्ठ्यन्त वाच्यम् । षष्ठ्यर्थस्यान्तर्गतत्वं तथा च कुप्वन्तर्गतेऽपदादौ खरीत्यर्थः फलितस्तथा च खरीत्यननुवृत्तावपि का क्षतिर्यतो मण्डूकप्लुतिक्लेशः स्यात् । एवं खर्विशेष्यतेऽपदादौ खरीत्युक्तेद-

णमप्यनुचितमिति चिन्त्यम् । अत एव कुप्वोः ≍क≍पौ चेति सूत्रे कुप्वोरिति षष्ठी व्याख्याताचार्यैः । सप्तम्यां हि सत्यामपदादावित्यत्र व्यत्ययाश्रयणापत्तेरिति । इदुदुपधस्य चाप्रत्ययस्येति प्रत्ययस्य यो विसर्जनीयो न भवतीत्याकरः । अप्रत्ययस्येति समानाधिकरणं विसर्जनीयविशेषणमित्यन्ये । तन्न । सर्पिष्करोतीत्यत्रेसुसोःसामर्थ्ये इति वैकल्पिकषत्वप्रवृत्तावपि तिष्ठतु सर्पिः पिब त्वमुदकमित्यत्रेदुदुपधस्येति नित्यषत्वप्रसङ्गात् । न चेष्टापत्तिः । आकरमते प्युणादीनामव्युत्पत्त्याश्रयणे तथा स्वीकारादिति वाच्यम् । व्युत्पत्त्याश्रयणे दोषतादवस्थ्यात् । इसुसोरित्यत्र सर्पिष्करोतीत्युदाहरणेन व्युत्पत्तिपक्षस्यैवात्राकरस्वीकृतत्वानुमानात् । अन्यथेदुदुपधस्येति षत्वस्येष्टत्वे कस्कादिषु सर्पिष्कुण्डिकाशब्दोऽसमासे व्यपेक्षाविरहेऽपि षत्वार्थ इति स्वग्रन्थविरोधः । अपि च इणः ष इति सूत्रे सर्पिष्पाशमित्याद्युदाहरणासङ्गतेः । इदुदुपधस्येत्यनेनैव षत्वसिद्धेरित्यलम् ॥

इति विसर्गसन्धिः ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्य
स्नेहपूर्त्तः प्रथमो विन्दुः सत्सम्प्रदायाचार्यपं॰स्वामिश्रीराममिश्रशास्त्रि-प्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥=)
स्नेहपूर्त्तिसहितो वेदार्थसंग्रहः	३॥।)
शास्त्रदीपिका	८।)
सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टचन्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजपं॰दामोदर-शास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥।)
तथा उत्तरार्द्धम्	८॥।)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	६॥)
श्रीतिङन्तार्णवतरणिः	६)
दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता	॥=)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता ..	५॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय-मुक्तावल्याख्यया टीकया सहिता	॥)
सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम्	॥)
तत्त्वमुक्ताकलापः–सर्वार्थसिद्धियुतः, बोधायनीयार्यसिद्धान्तानुसारी विशिष्टाद्वैतब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्किककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः	५॥=)
वेदान्तसिद्धान्तमुक्तावली, आर्थर्वेनिस्साहबकृताङ्गलभाषानुवादयुता ..	१॥।)
काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः	२॥)
अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः	१२)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम्	॥)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदीपाख्यटीकया सहित	१॥)
तार्किकरक्षा वरदराजविरचिता तत्कृतसारसंग्रहाख्यव्याख्यासहिता श्रीकोलाचलमल्लिनाथसूरिकृतटीकया विभूषिता पं॰ विन्ध्येश्वरीप्रसादद्विवेदिना परिशोधिता ।	३=)
खण्डनोद्धारः श्रीवाचस्पतिमिश्रविरचितः । श्रीहर्षकृतस्य खण्डनखण्डखाद्यस्य समाधानरूपः । पं॰ विन्ध्येश्वरीप्रसादद्विवेदिना तथा श्रीवामाचरण-भट्टाचार्येण शोधितः ।	२।)

CONTENTS.

All Communications, remittances etc., etc.

To be Addressed to :—

MANAGER,

E. J. LAZARUS & Co.,

MEDICAL HALL PRESS, BENARES CANT.

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

Nos. 9-12] Sept-Decr. 1910. [VOL. XXXII.

BENARES:

PRINTED BY A. C. CHAKRAVARTY AT THE MAHAMANDAL
SHASTRA PRAKASAK SAMITI PRESS,

AND

PUBLISHED BY ALOPI PRASAD FOR E. J. LAZARUS & CO.,
BENARES CANT.

Price Rs. 9 per annum.

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता पं·श्रीरामशास्त्रिणा संशोधिता	१।)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधित	।=)
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	७)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणाङ्ग्लदेशीयभाषायामनूदिता	६)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणाङ्ग्लदेशीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	५)
शाश्वतधर्मदीपिका,	५)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	३।)
श्रौतपदार्थनिर्वचनम्	४)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीरामकोल्लूरशास्त्रि-संशोधिता	४)
काव्यप्रदीपः, पं· रामशास्त्रिभागवताचार्येण परिशोधितः	३॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	७॥)
श्रीभाष्यस्य प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं·श्रीराममिश्र-शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः	८॥।)
श्रीभाष्यस्य प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा	८)
श्रीभाष्यस्य तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा	४॥)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	३॥।)

कतमशब्दौ सिद्धतः। समर्थौ सङ्गतार्थौ समानार्थावेकार्थावित्यर्थः। तौ सुबन्तेन सह समस्येते षसो भवति। कदा चानयोः समानार्थत्वं यदा जातिप्रश्ने तौ व्युत्पाद्येते तदा तयोः समानार्थत्वम्। कतरश्च स गार्ग्यश्च कतरगार्ग्यः। कतमगार्ग्यः। कतरकठः। कतमकठः। वृद्धंचरणैः सहेति जातिवाचित्वम्। समर्थाविति किम्। कतरो भवतोर्देवदत्तः। द्रव्यप्रश्नोऽयम्। समर्थग्रहणं हि कतरस्यैव विशेषणं डतरस्याविशेषेण विधानान्न कतमस्य। डतमस्य जातिप्रश्न एव तैर्विधानात्। अतः कतमो भवतां देवदत्त इति व्यावृत्त्युदाहरणमत्रानुपपन्नम्। कतरकतमयोः प्रश्ने विहितयोः सविधिना न गार्ग्यादेर्विशेष्यव्यवस्थेति वचनम्॥

क्षेपे किम्॥ ५९॥

क्षेपः कुत्सा। यो हि यदर्थस्तस्य तदर्थाननुष्ठानं क्षेपः। किमेतत् क्षेपे गम्ये सुबन्तेन समस्यते षसो भवति। को नाम राजा किंराजा। यो न रक्षति। न स्वति किम इति सान्तप्रतिषेधः। किंसखा। योऽभिद्रुह्यति। किङ्गौः। यो न वहति। गोरहृदुपीति सान्ते टे प्राप्ते न स्वति किम इति प्रतिषेधः। सर्वत्र स्वकार्याभावात् क्षेपः। क्षेप इति किम्। को राजा पाटलिपुत्रे। किमिति योगविभागः। तेन संज्ञायां शुकादिभिः सह किंशब्दः समस्यते षसो भवति। किंशुकः पलाशः। किंशुलुकः पर्वतः। किंपुरुषो मयुः। किन्नरः स एव। किञ्जल्कः पुष्परेणुः। किङ्किरातः। किंवदन्तीत्यादयः सिद्धाः॥

पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः॥ ६०॥

पोटादीनामितरेतरयोगो द्वन्द्वः । पोटादिभिः सहैकाश्रये जातिः समस्यते षसो भवति । विशेषणस्य परनिपातार्थ आरम्भः । जातिद्वारेण यः शब्दो द्रव्ये वर्त्तते स इह जातिशब्दोऽभिप्रेतः । इभ्या च सा पोटा च इभ्यपोटा । इभ्येति जातिशब्दः । स्त्री भूतवा राज्यपालनार्थं या पुंवेषेण युज्यते सा पोटा । यापि गर्भ एव दास्यं गता साऽपि पोटा । स्त्र्युक्तपुंस्केत्यादिना पुंवद्भावे प्राप्ते जातिश्चेति प्रतिषिद्धे पुंवद्यजातीयदेशीय इति पुंवद्भावः । एवमार्य पोटा । युवतिस्तरुणी । इभ्ययुवतिः । क्षत्रिययुवतिः । अग्निश्च स स्तोकश्च तदग्निस्तोकम् । दधि च तत् कतिपयञ्च दधिकतिपयम् । स्तोककतिपयशब्दावेकार्थौ । सकृत्प्रसूता गृष्टिः । गौश्च सा गृष्टिश्च गोगृष्टिः । धेनुरभिनवप्रसवा । गोधेनुः । वशा वन्ध्या । गोवशा । वेहत् गर्भघातिनी । गर्भधारिणीत्यन्ये । गोवेहत् । महता वत्सेन या दुह्यते सा बष्कयिणी । गोबष्कयिणी । प्रवक्ता उपाध्यायः । कठप्रवक्ता । कठश्रोत्रियः । अध्यापकोऽध्येता । कठाध्यापकः । कठधूर्तः । बुद्धिमानित्यर्थः । धूर्तग्रहणमिहाकुत्सार्थम् । अथवा आश्रयिषु कुत्सितेषु तद्भवति । आश्रयेषु तु कुत्स्येषु इदम् । ब्राह्मणधूर्तः क्षत्रियधूर्त इति यदा हि ब्राह्मणत्वमाश्रयि कुत्स्यते तदा तेनैव सिद्धं सविधानम् । यदा तु तद्युक्तो देवदत्तः कुत्स्यते तदर्थमिदम् । जातिरिति किम् । देवदत्तः प्रवक्ता । देवदत्तशब्दस्याजातिवचनत्वादवृत्तिः । जातेर्विशेष्यायाः पूर्वनिपातार्थ आरम्भः ।

चतुष्पाद्गर्भिण्या ॥ ६१ ॥

जातिरिति वर्तते । चत्वारः पादा यस्याः सा चतु-

ष्पाद्गवादिजातिः । सुसंख्यादेरित्यकारस्य खम् । चतुष्पाज्जातिर्गर्भिणीशब्देन सहैकाश्रये समस्यते षसो भवति । गौश्च सा गर्भिणी च गोगर्भिणी । अजगर्भिणी । पुंवद्यजातीयदेशीय इति पुंवद्भावः । चतुष्पादिति किम् । ब्राह्मणी गर्भिणी । जातिरित्येव । कालाक्षी गर्भिणी । स्वस्तिमती गर्भिणी । चतुष्पदः संज्ञैषा । न तु जातिः । विशेष्यस्य पूर्वनिपातार्थं वचनम् ॥

प्रशंसोक्त्या ॥ ६२ ॥

जातिरिति वर्तते । उच्यते इत्युक्तिः शब्दः । प्रशंसाशब्देन सह जातिवाचि सुबन्तं समस्यते षसो भवति । गौश्च स प्रकाण्डश्च तत् गोप्रकाण्डम् । प्रशस्तो गौरित्यर्थः । एवमश्वप्रकाण्डम् । गोमतल्लिका । अश्वमचर्चिका । गोकुमारी । गोतल्लजकः । अभिधाः जातिरित्येव । देवदत्ता कुमारी ॥

युवा खलतिपलितवलिनजरद्भिः ॥ ६३ ॥

खलति पलित वलिन जरदित्येतैरैकाश्रयैर्युवशब्दः समस्यते षसो भवति । युवा खलतिः युवखलतिः । युवतिः खलती युवखलती । युवा पलितः युवपलितः । युवतिः पलिता युवपलिता । वलयोऽस्य सन्ति वलिनः । पामादित्वान्नः । युवा वलिनः युववलिनः । युवतिर्वलिना युववलिना । जृषोऽतृ इति अतृत्ये कृते जरदिति भवति । युवा जरन् युवजरन् । युवतिर्जरती युवजरती । मृद्ग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् । पुंवद्यजातीयदेशीय इति पुंवद्भावात् तिशब्दस्य निवृत्तिः ॥

व्यतुल्याख्या अजात्या ॥ ६४ ॥

न्यान्तास्तुल्याख्याश्च अजातिवाचिना सह समस्यन्ते षसो भवति । परनिपातः फलम् । भोज्यञ्च तदुष्णञ्च भोज्योष्णम् । भोज्यलवणम् । पानीयशीतम् । हरिणीयपूर्णो घटः । तुल्याख्याः । तुल्यश्च स श्वेतश्च स तुल्यश्वेतः । सदृशश्वेतः । तुल्यमहान् । सदृशमहान् । अजात्येति किम् । भोज्य ओदनः । तुल्यो वैश्यः । इह तुल्यसन्निति पूज्यत्वाभावात् परत्वाद्धानेन सः । इह कथमेकाश्रया वृत्तिः । कृष्णसारङ्गः । लोहितसारङ्गः । कृष्णशबलः । लोहितशबलः । यदि सारङ्गादिशब्दा जातिवचना जातेः कथञ्चिद्द्रव्यादभिन्नत्वमित्येकाश्रयत्वमस्ति ततो विशेषणलक्षणः सः । अथ पूर्वोत्तरपदयोर्वर्णविशेषवाचित्वं तत्रापीच्छातो विशेषणविशेष्यभावः । कृष्णश्वेतः । श्वेतकृष्णः ॥

कुमारः श्रमणादिभिः ॥ ६५ ॥

कुमारशब्दः श्रमणादिभिः सह समस्यते षसो भवति । कुमारशब्दो मृत् । स्त्रीलिङ्गैरुत्तरपदैः स्त्रीलिङ्गः । अध्यापकादिभिरुभयथा समस्यते । कुमारी श्रमणा कुमारश्रमणा । कुमारी प्रव्रजिता कुमारप्रव्रजिता । कुमारश्च स अध्यापकश्च स कुमाराध्यापकः । कुमारा अध्यापिका कुमाराध्यापिका । श्रमणा प्रव्रजिता कुलटा गर्भिणा तापसी बन्धकी दासी एते स्त्रीलिङ्गाः । अध्यापक अभिरूपक पटु मृदु पण्डित कुशल चपल निपुण ॥

मयूरव्यंसकादयश्च ॥ ६६ ॥

मयूरव्यंसकादयश्च शब्दा गणपाठादेव निपातिताः

षसंज्ञा भवन्ति । विशिष्टावंसावस्य व्यंसः । इवार्थे कः । व्यंसको मयूरो मयूरव्यंसकः । छत्रव्यंसकः । कम्बोजमुण्डः । यवनमुण्डः । एतेषु परनिपातः प्रयोजनम् । एहीडादयोऽन्यपदार्थे । एहीडमिति यत्र कर्मणि एहि यवैरिति एहीडं यहियवं वर्तते । एहिवाणिजेति यस्यां क्रियायां सा एहिवाणिजा । प्रेहिवाणिजा । एहिस्वागता । अपेहिस्वागता । एहिद्वितीया । अपेहिद्वितीया । प्रोहकटमस्यां प्रोहकटा । प्रोहकर्दमा । उद्धमचूडा । आहरचेला । आहरवसना । आहरवितताभित्प्रलवणा । उद्धर उत्सृजेति यस्यां सा उद्धरोत्सृजा । उद्धमविधमा । उद्धरविसृजा । उत्पतनिपता । उत्पचनिपचा । आख्यातमाख्यातेन सिद्धं ऽप्यसातत्यार्थं वचनम् । उदक्च अवाक्च उच्चावचम् । उच्चैश्च नीचैश्च उच्चनीचम् । आचितञ्चोपचितञ्च आचोपचम् । आचितपराचितस्य आचपराचम् । निश्चितप्रचितस्य निश्चप्रचम् । अकिञ्चनम् । स्नात्वाकालकः । पीत्वास्थिरकः । भुक्त्वासुहितः । प्रोष्यपापीयान् । उत्पत्यपाकला ज्ञाता । निपत्यरोहिणी जाता निषण्णश्यामा जाता । अपेहिप्रघसा वर्तते । इहपञ्चमी । इहद्वितीया । जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति । जहि जोडमित्याह जहिजोडः । उज्जहिजोडः । जहिस्तम्बः । बहुलमिति किम् । पचौदनम् । आख्यातमाख्यातेन सातत्ये । अश्नीतपिबता वर्तते । पचतभृज्जता । खादतमोदता । खादाचामाः आहारविवसा । आहारनिष्किरा । अविहितलक्षणं सन्निधानमिह द्रष्टव्यम् । तेन शाकप्रधानः पार्थिवः शाकपार्थिवः । कुतपसौश्रुतः । अजातौल्वलिः । घृतरौढीयाः ।

ओदनपाणिनीया इत्येवमादि सिद्धम् । चकारोऽवधारणार्थः । परमो मयूरव्यंसकः । वृत्त्यन्तरं न भवति ।

काला मेयैः ॥ ६७ ॥

कालवाचिनः शब्दा मेयैः परिच्छेद्यैः सह समस्यन्ते षसो भवति । मेयैरिति सम्बन्धात् काला मानवचना गृह्यन्ते यद्यपि मुख्यं मानत्वं व्यवहारकालस्य मासादेर्न सम्भवति तथापि वचनात् परिछेदहेतुत्वमात्रम् । साधर्म्यमुपादायोपचारात् कालः परिमाणम् । मासादयो जातादेः संबन्धिनीमादित्यगतिं परिच्छिन्दन्तीति जातस्यापि परिच्छेदहेतव उच्यन्ते । एकाश्रय इति निवृत्तम् । मासो जातस्य मासजातः । संवत्सरजातः । तासापवादोऽयम् । काला इति बहुवचननिर्देशः किमर्थः । द्वे अहनी जातस्य द्व्यन्हजातः । त्रिपदोऽपि षसो यथा स्यात् । हृदर्थद्युसमाहारे इत्यवयवषसे राजाहःसखिभ्यष्ट इति टः । एभ्यो-न्होऽन्ह इति अन्हादेशः । यदा द्वयोरन्होः समाहार इतिविग्रहस्तदा न समाहार इत्यन्हादेशप्रतिषेधः सिद्धः । द्व्यहो जातस्य द्व्यहजातः । त्र्यहजातः ।

नञ् ॥ ६८ ॥

नञ् सुपा सह समस्यते षसो भवति । अब्राह्मणः । अधर्मः । असर्वज्ञः । अगौः । नेयं पूर्वपदार्थप्रधाना वृत्तिरलिङ्गासंख्यत्वप्रसङ्गात् । किञ्च पूर्वपदप्रधानो हस उक्तः । अमक्षिकमिति । अन्यपदार्थप्राधान्ये तु अवर्षा हेमन्त इत्यत्र प्रादेशादि प्राप्नोति । अस्तूत्तरपदार्थप्रधानेयं वृत्तिः । यद्येवमगामानयेत्युक्तेऽगोमात्रस्यानयनं स्यात् । अथ स्वयमेव निवृत्तिपदार्थको गोशब्दः स नञा केवलं द्योत्यते । एवं

सति न कस्यचिदानयनं स्यात् । नायं दोषः । द्वाविह गोशब्दौ । प्रवृत्तपदार्थको निवृत्तपदार्थकश्च । सारूप्यात्तयोर्भेदापरिज्ञाने निवृत्तपदार्थकस्य द्योतनार्थं नञः प्रयोगः प्रतिषेधे सत्युत्तरपदार्थसदृशो वृत्त्यर्थो जायते । नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिरिति वचनात् । अन्यपदार्थे तु परत्वाद्बसो भवति । अशालिको देशः । अकारो नञोऽनित्यत्र विशेषणार्थः । वामनपुत्रादिष्वनादेशो मा भूत् ।

गुणोक्त्येषत् ॥ ६९ ॥

उच्यते इत्युक्तिः शब्दः । गुणशब्देन सह ईषच्छब्दः समस्यते षसो भवति । ईषत्कडारः । ईषत्पिङ्गलः । ईषद्विकटः । ईषदुन्नतः । ईषत्पीतः । हृदुत्पत्तिः प्रयोजनम् । गुणोक्त्येति किम् । ईषत्कारकः । ईषद्गार्ग्यः । जात्येकार्थसमवायिक्रियागुणापेक्षया जातेरपि वृद्धिह्रासौ ।

ता ॥ ७० ॥

तान्तं सुबन्तेन सह षसो भवति । मोक्षमार्गः । स्वर्गसुखम् । राजपुरुषः ।

कृति ॥ ७१ ॥

कृत्प्रयोगे या ता तदन्तं सुपा सह षसो भवति । न प्रतिपदमिति प्रतिषेधं वक्ष्यति । तस्यायं पुरस्तान्निरासः । इध्मनां व्रश्चनः इध्मव्रश्चनः । पलाशसातनः । अविलवनः । श्मश्रुकर्त्तनः । करणे युट् । कर्त्तृकर्मणोः कृतीति ता ।

याजकादिभिः ॥ ७२ ॥

याजकादिभिश्च सह तान्तं समस्यते षसो भवति। पूर्वेण प्राप्तः तृजकाभ्यां कर्त्तरीति प्रतिषिद्धः पुनरनेन षसः। देवानां याजको देवयाजकः। साधूनां पूजकः साधुपूजकः। याजक पूजक परिवारक परिवेषक स्नापक अध्यापक उद्धर्त्तक उत्सादक होतृ भर्तृ रथगणक पत्तिगणक।

न प्रतिपदम् ॥ ७३ ॥

प्रतिपदंविहिता या ता तदन्तं न समस्यते।शेषलक्षणां तां मुक्त्वा सर्वान्या ता प्रतिपदविधानम्। सर्पिषो ज्ञानम्। पयसो ज्ञानम्। ज्ञो स्वार्थे करण इति ता। इहापि धर्मानुस्मरणम्। धर्मचिन्तनमिति। स्मर्थदयेशाङ्कर्मणि इत्यनेन शेषलक्षणा तानूद्यते। वनस्वामी। वनेश्वरो विद्यादायाद इत्येवमादिषु स्वामीश्वरादिसूत्रे चकारेण शेषलक्षणा ता समुच्चीयते।

निर्द्धारणे ॥ ७४ ॥

निर्द्धारणे या ता तदन्तं न समस्यते। जातिगुणक्रियाभिः समुदायादेकदेशस्य निष्कृष्य धारणं पृथक्करणं निर्धारणम्।क्षत्रियो मनुष्याणां शूरतमः। श्यामा नारीणां दर्शनीयतमा।कृष्णा गवां सम्पन्नक्षीरतमा। धावन्तोऽध्वगानां क्षिप्रतमाः। क्षत्रियादिशब्देन सह वृत्तिर्न भवति। यतश्च निर्द्धारणमिति चकारेण शेषलक्षणायास्तायाः समुच्चयः। प्रतिपदविधानत्वे हि पूर्वेणैव सिद्धः प्रतिषेध इतीदमनर्थकं स्यात्। इह पुरुषेश्वर इति शेषलक्षणा ता विवक्षिता न निर्द्धारणलक्षणा।

डद्गुणात्तृप्तार्थसत्तव्यैकद्रव्यैः ॥ ७५ ॥

डदन्त गुणार्थं तृप्तार्थ सत्संज्ञं तव्य एकद्रव्य इत्येतैः सह तान्तं न समस्यते । तस्य पूरणे डडित्यतः प्रभृति तमटष्टृकारेण डदिति प्रत्याहारः । चक्रधराणां पञ्चमः । तीर्थङ्कराणां षोडशः । बलदेवानां नवमः । समुदायसमुदितसम्बन्धे शेषलक्षणा ता । गुणार्थः । बलाकाया शौक्ल्यम् । काकस्य कार्ष्ण्यम् । कण्टकस्य तैक्ष्ण्यम् । गुणगुणिसम्बन्धे ता । एङि पररूपमित्यत्र परस्य रूपं पररूपमिति वृत्तिपदं ज्ञापकं यो गुणद्वारेण पूर्वं द्रव्ये वृत्तौ भवत्यन्ते गुणमाह तेन गुणशब्देनेह प्रतिषेधः। यस्तु सर्वदा गुणवचनस्तेन वृत्तिर्भवत्येव । हस्तिरूपम् । कपिञ्जरसः । चन्दनगन्धः । अग्निस्पर्शः । गुणशब्देनेह लोकप्रसिद्धा रूपरसगन्धस्पर्शा गुणा अभिप्रेताः । ततस्तद्विशेष्यैरयं प्रतिषेधः । तेन यत्नगौरवं सूत्रलाघवं करणपाटवं वचनप्रामाण्यं गोविंशतिरित्येवमादिषु न प्रतिषेधः । वृषलस्य धार्ष्ट्यमित्यत्र वृत्तेरनभिधानम् । तृप्तार्थः । फलानां तृप्तः । सक्तूनां पूर्णः । फलानां सुहितः । सक्तूनां प्रीतः । तृप्त्यर्थे तूपसंख्यानमिति ता । सदिति सतृसानयोः संज्ञा । चोरस्य द्विषन् । कर्तृकर्मणोः कृतीति कर्मणि ता प्राप्ता नञ्झित्येत्यादिना प्रतिषिद्धः । द्विषः शतुर्वा वचनमिति ता। इह तु शेषलक्षणा ता । देवदत्तस्य कुर्वन् । देवदत्तस्य कुर्वाणः । तव्यः । देवदत्तस्य कर्तव्यम् । जिनदत्तस्य कर्तव्यम् । अत्रापि व्यस्य वा कर्तरि इति शेषलक्षणा ता। तव्येन केचिद्विकल्पमिच्छन्ति । देवदत्तकर्तव्यम् । एकं द्रव्यमस्य एकद्रव्यम् । राज्ञः पाटलिपुत्रकस्य । शुकस्य मारविदसौ आचार्यस्य श्रीदत्तस्य । पूर्व-

निपातस्यानियमः प्रसज्येत विशेषणादिसूत्रे इतिशब्दोऽस्ति तेन नीलस्योत्पलस्य नीलोत्पलस्येति । गुणगुणिसंबन्धे सविधिर्भवति। एकद्रव्येण गुणगुणिविवक्षा नास्तीति विशेषणवृत्तिरपि न भवति । झिना प्रतिषेधो वक्तव्यः । देवदत्तस्य साक्षात् । देवदत्तस्योपरि ॥

कर्मणि च ॥ ७६ ॥

चकारोऽवधारणार्थः । कर्मण्येव या ता विहिता तदन्तं सो न भवति । आश्चर्यो गवां दोह अगोपालकेन । रोचते मे ओदनस्य भोजनं देवदत्तेन । साधु खलु पयसः पानं जिनदत्तेन । युडिति नभावे युट् । कर्तृकर्मणोःकृतीत्युभयत्र तायां प्राप्तायां द्विप्राप्तौ पर इति कर्मण्येव भवति । कर्तरि तु भा । कर्मण्येवेति किम् । इध्मव्रश्चनः ॥

कर्तरि क्तेन ॥ ७७ ॥

कर्तरीति ताया विशेषणम् । कर्तरि या ता विहिता तदन्तं क्तान्तेन सो न भवति । अस्मिन्नास्यते स्म इदमेषामासितम् । इदमेषां यातम् । इदमेषां भुक्तम् । तयोरेव भावकर्मणोः क्ते प्राप्ते धिगत्यर्थाच्च अधिकरणे वाभ्यर्थाचेति अधिकरणे क्तः । अधिकरणस्योक्तत्वात् । इदमित्येतस्मादीप्रास्तिमिङैकार्थे वा इति वैव भवति । कर्तृकर्मणोः कृतीति ता प्राप्ता न झित्तलोकेत्यादिना प्रतिषिद्धा क्तस्याधिकरण इत्यनेन एषामिति कर्त्तरि ता । एवं राज्ञां बुद्धः राज्ञां पूजितः मतिबुद्धिपूजार्थाच्चेत्यनेन वर्तमाने काले क्तो नियम्यते । स चेह कर्मणि कारके विहितः कर्तृकर्मणोः कृतीति कर्तरि ता प्राप्ता नभ्क्तित्यादिना प्रतिषिद्धा भवतीत्यनेन सूत्रेण

प्रत्यवस्थाप्यते । अथ यदा सकर्मकेभ्योऽधिकरणे क्त-स्तदा कर्तृकर्मणोरनुक्तत्वात् क्तस्याधिकरण इत्यनेन या ता कर्तरि तस्या प्रतिषेधः सिद्धः कर्मणि या ता तस्याः कथं वृत्तिप्रतिषेधः । इदमोदनस्य भुक्तमिति । नैष दोषः । कर्मणि चेति वर्तते तेनह कर्त्तरि कर्मणि च ता क्तान्तेन समस्यते । इह शेषलक्षणा ता । छात्रहसितम् ।

तृजकाभ्यां योगे ॥ ७८ ॥

कर्तरि या ता तदन्तेन सो न भवति । तृचैव कर्त्तुरु-क्तत्वात् । तद्योगे कर्तरि ता नास्ति । तृज्ग्रहणमुत्तरा-र्थम् । भवत आसिका । भवतः शायिका । भवतोऽग्रेगा-मिका । पर्यायार्हर्णोत्पत्तौ वुणिति भावे स्त्रीलिङ्गे वुण् । कर्तृकर्मणोः कृतीति कर्तरिता । कर्तरीत्यंव । इक्षुभ-क्षिकां मे धारयसि । पूर्ववद्वुण् । अत्रेक्षुशब्दात् कर्मणि ता कृतीति तासः । म इति सम्प्रदानमेतत् ।

कर्तरि ॥ ७९ ॥

कर्तरि यौ तृजकौ ताभ्यां सह तान्तं न सो भवति । अपां स्रष्टा । पुरां भेत्ता । वज्रस्य भर्ता । याजकादिषु पतिपर्यायो भर्तृशब्दः । यवानां लावकः । सक्तूनां पायकः । कर्तरीति शक्यमकर्तुं तृचोऽकस्य च कर्तरि विधा-नात् । न त्वकस्य भावेऽपि विधानमस्ति । सत्यम् । तद्योगे कर्तरि विहितायास्तायाः पूर्वेण वृत्त्यभावः सिद्धः साम-र्थ्यादिह कर्तरि विहितस्याकस्य ग्रहणम् । तदेतत्कर्तृ-ग्रहणं ज्ञापकं पूर्वप्रतिषेधो नित्य अयमनित्यस्तेन तीर्थ-कर्तारमर्हन्तमित्येवमादि सिद्धम् । तृनन्तेन वा साधनं कृतेति सः ॥

क्रीडाजीविकयोर्नित्यम् ॥ ८० ॥

नेति निवृत्तम् । तृचः क्रीडाजीविकयोरसम्भवा-न्नानुवृत्तिः । क्रीडायां जीविकायाञ्च तान्तमकेन सह नित्यं षसो भवति । क्रीडायां । उद्दालकपुष्पभञ्जिका । भावेखुवि-षये वुण् । कर्तृकर्मणोः कृतीति कर्मणि ता । जीविकायां । दन्तलेखकः । नखलेखकः । अवस्करसूदकः । क्रीडायां कृतीति विकल्पः प्राप्तः । जीविकायां कर्तरीति प्रतिषेधः प्राप्तः । क्रीडायां आरम्भादेव नित्यत्त्वं सिद्धं नित्यग्रहणं जीविकार्थमुत्तरार्थञ्च ॥

तिकुप्रादयः ॥ ८१ ॥

तिसंज्ञा कुशब्दः प्रादयश्च समर्थेन नित्यं षसो भवति । ऊरीकृत्य । ऊरीकृतम् । पटपटाकृत्य । प्रादिसाहच-र्यात् कुशब्दो भिसंज्ञो गृह्यते । कुत्सितो ब्राह्मणः कुब्राह्मणः । ईषन्मधुरं कामधुरम् । क्रियायोगे गिस्तिरिति प्रादयोऽपि क्रियायोगे तिसंज्ञा अक्रियायोगार्थं प्रादिग्रहणम् । स्वती पूजार्थकम् । शोभनः पुरुषः सुपुरुषः । अतिपुरुषः । अतिशयेन स्तुतं सुस्तुतम् । अतिक्रमेण स्तुतमतिस्तुतम् । दुः पापाद्यर्थे । पापः पुरुषो दुःपुरुषः । कृच्छ्रेण कृतं दुःकृतम् । आङीषदा-द्यर्थे । ईषत्कडार आकडारः । क्रियायोगे आबद्धमाभरणम् । प्रादय एवमात्मका यत्र क्रियापदं प्रयुज्यते तत्र क्रिया-विशेषमाहुः । यत्र न प्रयुज्यते तत्र ससाधनां क्रिया-माहुरिति । प्रादयो गताद्यर्थे च व्या । प्रगत आचार्यः प्राचार्यः । वृत्तिविषये प्रशब्दो गतशब्दस्यार्थं ससाध-नमभिधत्ते । एवं प्रवृद्धो गुरुः प्रगुरुः । प्रपितामहः । सङ्गतार्थः समर्थः । अत्यादयः क्रान्ताद्यर्थे इपा । अति-

क्रान्तः खट्वामतिखट्वः । उत्क्रान्तो वेलामुद्वेलः । अवादयः क्रुष्टाद्यर्थे भया । अवक्रुष्टः कोकिलया अवकोकिलः । परिणद्धो वीरुद्भिः परिवीरुत् । पर्यादयो ग्लानाद्यर्थे अपा । परिग्लानोऽध्ययनाय पर्यध्ययनः । उद्युक्तः संग्रामाय उत्संग्रामः । पर्यादिराकृतिगण इत्येके । अलंकुमारिः । निरादयः क्रान्ताद्यर्थे कया । निःष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः । अपगतः शाखाया अपशाखः । लक्षणादिष्वर्थेष्वनभिधानादवृत्तिः । वृत्तं प्रति विद्योतते ।

वागमिङ् ॥ ८२ ॥

वाक्संज्ञममिङन्तं समर्थेन नित्यं षसो भवति । कुम्भं करोतीति कुम्भकारः । सरलावः । अमिङिति किम् । एधानाहारको व्रजति । वुण्मौ क्रियायां तदर्थायामिति वुण् । अमिङिति प्रतिषेधवचनं ज्ञापकमनयोर्योगयोः सुप्सुपेति नाभिसंबध्यते । एवञ्च सत्येतल्लब्धं तिवाकारकाणां प्राक् सुबुत्पत्तेः कृद्भिः सविधिरिति । इह माषवापिणी । व्रीहिवापिणी स्त्री । कृदन्तेन वृत्तौ मृदन्तस्येति णत्वं सिद्धम् । अन्यथा सुबुत्पत्तिः स्त्रीत्येन बाध्यते । अश्वक्रीती च प्रयोजनम् । यदि सुबुत्पत्तेः प्राक् तिवाकारकाणां कृता वृत्तिः । अदःकृत्य तमोपह राजश्रित इत्यत्र पूर्वस्य पदकार्यं न स्यात् । कायाः स्तोकादेरित्येवमादि अनुब्विधानं चानर्थकं क्वचिदेव ङीविधिणत्वादिविषये ज्ञापकात् सिद्धिः ।

ङिनाऽमैव ॥ ८३ ॥

पूर्वेण सिद्धे नियमोऽयम् । ङिसंज्ञकेनामन्तेनैव वागमिङ् षसो भवति । स्वादुङ्कारं भुङ्क्ते । लवणंकारं

भुङ्क्ते । स्वाद्वर्थेषु वाक्षु स्वादुमि णमिति णम् भवति । स्वादुमिति निर्देशात्त्यसन्नियोगे मान्तता निपात्यते ॥ अमैवेति किम् । कालो भोक्तुम् । समयो भोक्तुम् । काल-समयवेलासु तुम्वेति तुम् । आरम्भादेव नियमः सिद्धः । ज्ञिनैवेति विपरीतावधारणे व्यावर्त्यं नास्तीत्येवकारः किमर्थः । अमैव यत् सह निर्दिष्टं वाक्संज्ञं तस्य वृत्ति-र्यथा स्यात् । अमा चान्येन च यत् सहानिर्दिष्टं तस्य मा भूत् । अग्रे भोजं गच्छति । अग्रे भुक्त्वा । प्रथमम्भोजम् । पूर्वंभोजम् । वाग्रेप्रथमपूर्वे इति क्त्वाणमौ विहितौ । ज्ञिनेति विस्पष्टार्थम् । व्यावर्त्याभावात् ॥

वा भादि ॥ ८४ ॥

उपदंशो भायामित्यतः प्रभृति वाक्संज्ञं भादीत्यु-च्यते । वाक्संज्ञानि अमा सह वा समस्यन्ते षसो भवति । मूलकोपदंशं भुङ्क्ते । मूलकेनोपदंशं भुङ्क्ते । उपदंशो भायामिति णम् । पार्श्वोपपीडम् । पार्श्वेनोपपीडं पार्श्वे उपपीडं शेते । ईपि चोपपीडरुधकर्ष इति णम् । अमन्तेनेत्येव । पर्याप्तो भोक्तुम् । पर्याप्तिवचने अलमर्थे इति तुम् । एवकारो नानुवर्तत्ते तेन भादिषु यदमा सह निर्दिष्टं वाक्संज्ञं यदमा चान्येन च सह निर्दिष्टं तदपि समस्यते । उच्चैःकारमाचष्टे उच्चैःकारं ज्ञाविति निष्ठोक्तौ कृञः क्त्वाणमाविति णम् ॥

क्त्वा ॥ ८५ ॥

क्त्वान्तेन सह वा भादि समस्यते षसो भवति । उच्चैःकृत्याचष्टे । उच्चैः कृत्वा । भादीत्येव । प्रदेशान्तर-

वाचो वृत्तिर्न भवति । अलं कृत्वा । खलु कृत्वा । अग्रे भुक्त्वा ॥

अन्यपदार्थेऽनेकं वम् ॥ ८६ ॥

वानिर्दिष्टं सुब्ग्रहणमनुवर्तते । भानिर्दिष्टं निवृत्तम् । अन्यस्य पदस्यार्थे वर्तमानमनेकं सुबन्तं वसंज्ञकः सो भवति । चित्रगुः । लम्बकर्णः । दर्शनीयरूपः । अन्यग्रहणं किम् । स्वपदार्थे वसो मा भूत् । लम्बश्च स कर्णश्च स लम्बकर्णः । पदग्रहणं किम् । अन्यवाक्यार्थे मा भूत् । अर्थग्रहणं किमर्थम् । यावता शब्दे कार्यस्यासम्भवादर्थे कार्यं विज्ञास्यते । अन्यपदार्थस्य ये लिङ्गसंख्ये ते यथा स्यातामित्येवमर्थम् । बहुयवं कुलम् । बहुयवा भूमिः । बहुयवौ । बहुयवाः । वाविभक्त्यन्ते अन्यपदार्थे वृत्तिर्न भवत्यनभिधानात् । अनेकग्रहणं बहूनामपि प्रापणार्थम् । सामानाधिकरण्याभावेऽपि वसो भवति । कण्ठेकालः । उरसिलोमा । उच्चैर्मुखो देवदत्तः । अस्तिक्षीरा गौः । ज्ञीनामसंख्यत्वादसामानाधिकरण्यमिहाभिधानाभावान्न भवति।पञ्चभिर्भुक्तमस्य।सामानाधिकरण्येऽप्यनभिधानम्। पञ्च भुक्तवन्तोऽस्य । नपा निर्देशः किमर्थः । उन्मत्तगङ्गम् । लोहितगङ्गम् । खावन्यपदार्थ इति हस एव भवति । इह वीरपुरुषको ग्राम इति परत्वाद्धसः षसस्य बाधकः । शस्त्रीश्यामा देवदत्तेत्येवमादिषु यश्चैकाश्रय इति प्रकृतमस्ति तेन वसस्य बाधः । प्रादयो गताद्यर्थे वया इत्येवमादि वार्त्तिकवचनं प्रमाणम् । तेन निष्कौशाम्बिरित्येवमादिषु वसो न भवति । ईबुपमानपूर्वस्य युखं वक्तव्यम् ।

उदरे स्थितो मणिरस्य उदरेमणिः । षे कृति बहुलमिति ईपोऽनुप् । उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः । उपमानावयवत्वादुष्ट्रोऽप्युपमानम् । इह केशचूड़ः सुवर्णालङ्कारो देवदत्तः इति केशसम्भारे केशशब्दः । सुवर्णविकारे सुवर्णशब्दो वर्तते । सङ्गतार्थः समर्थ इति निर्देशादेवं जातीयस्य वा सुखं द्रष्टव्यम् । प्रपतितपर्णः । प्रपर्णः । अविद्यमानभार्यः । अभार्यः ।

संख्येये संख्यया भ्यासन्नादूरसंख्यम् ॥ ८७ ॥

सख्येये या संख्या वर्तते तया भ्यि आसन्न अदूर इत्येतानि संख्या च वसो भवति । अनन्यार्थार्थं वान्तेऽप्यन्यपदार्थे प्रापणार्थञ्च । समीपे दशानामिमे उपदशाः । उपविंशाः । समीपप्राधान्ये तु हसः । आसन्ना दशानामिमे आसन्नदशाः । आसन्नविंशाः । अदूरदशाः । अदूरचत्वारिंशाः । द्वौ वा त्रयो वा इमे द्वित्राः । त्रयो वा चत्वारो वा इमे त्रिचतुराः । नक्तिसुपत्रिभ्यश्चतुर इति अस्त्यो निपात्यते । त्रिर्दश इमे त्रिदशाः । वृत्त्यैवाभ्यावृत्तेरुक्तत्वात् सुचोऽप्रयोगः । संख्यासंज्ञाविधानेऽधिकशब्दस्यापि संख्यात्वमुक्तम् । अधिका दशानामिमेऽधिकदशाः । संख्येय इति किम् । अधिका विंशतिर्गवाम् । संख्ययेति किम् । पञ्च पदार्थाः । भ्यासन्नादूरसंख्यमिति किम् । पार्थिवाः पञ्च ॥

दिशो ऽन्तराले ॥ ८८ ॥

दिक्छब्दाः सुबन्ता अन्तरालवचने वसंज्ञकः सो भवति । अन्तराल एव यथा स्यादिति नियमार्थ आरम्भः ।

विवेकः—अयि भीरु अवधारितपरमार्थोपि किंपचानमानसेवकिं पुनरप्यतिशङ्कसे शृणुष्वचैतत् ।

विषमधुबहिष्कुर्वन्धीरोबहिर्विषयात्मकं
परिमितरसस्वात्मप्राप्तिप्रयासपराङ्मुखः ।
निरवधिमहानन्दब्रह्मानुभूतिकुतूहली
जगति भविता दैवात्कश्चिज्जिहासितसंसृतिः॥२५॥

निस्संशयः खलु पटुभिरपिविटपमारोहद्भिरप्राप्तानां पचेलिमानां फलानामयतमानस्यापिसुकृतपरिपाकेन पान्यजनस्यपुरतः परिपातः ।

अपि च ।

विवित्सति यदिस्वयं किमपि सूरिसेव्यं पदं
कृतस्ययदिनिष्कृतिर्यदिकरिष्यते नाहितं ।

किंपचानं क्षुद्रं मानसं यस्या सा तथा एतद्वक्ष्यमाणं शृणु । किंतदित्यत आह विषेति—॥ बहिर्विषयाश्शब्दादयः तदात्मकं तत्स्वरूपं विषमधु विषसंसृष्टमधु अत्यल्पसुखंमनर्थावहं चेति हृदयं बहिष्कुर्वन् नसेवमानः अनेन पशुपुत्रादिकमैहिकमामुष्मिकं स्वर्गादिकं च त्याज्यमिति प्रत्यपादि परिमितरसस्य भगवदपेक्षया शेषत्वपारतन्त्र्याद्यनुभवमहानन्दरसविधुरस्य स्वात्मनः प्राप्तौ प्रयासाद्यत्नात्पराङ्मुखः परावृत्तः निरवधिः अवधिरहितः महानन्दो यस्यां तस्यां ब्रह्मानुभूतौ कुतूहली इच्छावान् जिहासितत्यक्तुमिष्टा संसृतिः संसारो येन स तथा कश्चित्पुरुषः दैवाज्जगति भविता ॥ २५ ॥

दैवादित्युक्तमेव सदृष्टान्तमाह निस्संशयइति । दृष्टान्तबलेनास्य सामर्थ्ययत्नादिकर्माकिंचित्करं भगवत्कृपैव तत्प्राप्तिहेतुरिति व्यक्तं विवित्सादिसंभवे मुक्तिस्सेत्स्यतीत्याह अपिचेति ।

विवित्सतीति—॥ किमप्यवाङ्मनसगोचरं सूरिसेव्यं नित्यमुक्तानुभाव्यं

यत्र पूर्वे साध्यास्सन्ति देवाः ।

सदापश्यन्ति सूरयः ॥

इत्यादि श्रुतेः पदं स्थानं स्वयं यदि विवित्सति लब्धुंवाञ्छति कृतस्य पापस्येति शेषः निष्कृतिः प्रायश्चित्तं यदि क्रियते यदि अहितं प्रातिकूल्यं करिष्यते नयदि निसर्ग-

निसर्गसुहृदीश्वरो यदिहलक्ष्यमन्वीक्षते
किमत्रपरमुच्यते किमितिनात्मविन्मुच्यते॥ २६ ॥

सुमतिः—

* णाह जंएव्वं तुए दिण्णहत्थो संसारसाअरं अइलङ्घेइपुरुसोमे ताकहंदवदहणपज्जलिअपस्सजुअलदारुअरगअव्वकीडो सारमेअगण परिगओव्व सारंगोममीरणंदोलणडोलाअन्तपोओदरगओव्वसंजत्तिअसत्थो महप्पवाहमज्झणिरोहसंभंतणअणोव्व जंबुओ विसहरपरिगहिअ घरघुंतहिअओव्व कुडुम्बिअणो वियडअरभङ्गसंभमसंखुहिअगंगाअडवेपंतसंहणणोव्वसाहिमण्डलो राहवसरणिअरक्खोहिअरअणाअरमज्झटिओव्वमच्छसंघाओ सध्धसगहिओ होइ ।

---

* नाथ यद्येवंत्वयादत्तहस्तस्संसारसागरमतिलंघतेपुरुषः तत्कथं दवदहन प्रज्वलितपार्श्वयुगलदारुदरगत इवकीटः सारमेयगण परिगतइव सारङ्गः समीरणान्दोलन डोलायमान पोतोदरगत इव सांयात्रिकसार्थः महाप्रवाहमध्यनिरोधसंभ्रान्तनयन इव जम्बुकः विषधरपरिगृहीतगृह घूर्णमानहृदय इव विकटतरभङ्गसंभ्रमसंक्षुभितगङ्गातटप्रवेपमानसंहननं इव शाखिमण्डलः राघवशरनिकरक्षोभित रत्नाकरमध्यस्थित इवमत्स्यसंघातः साध्वसगृहीतो भवति ।

सुहृत्स्वभावसुहृत् सुहृदं सर्वभूतानामिति स्मृतेः ईश्वरः भगवान् लक्ष्यं व्याजमन्वीक्षते यदि आत्मवित् परावरतत्वयाथात्म्यवेदी किमिति न मुच्यते कुतो हेतोर्नमुच्यते मुच्यतएवेत्यर्थः । अत्रास्मिन्नर्थे परमन्यत्किं किंवोच्यते न किंचिद्वक्तव्यमिति भावः ॥ २६ ॥

दव दहनेन वन वह्निना प्रज्वलितं पार्श्वयुगलं यस्य तस्य दारुणः उदरमभ्यन्तरं गतः कीटः कृमिविशेष इव सारमेयाणां शुनां गणेन परिवृत्तः सारंगः हरिणः समीरणेनान्दोलनं चालनं तेन डोलायमानस्य पोतस्योदरगतः सांयात्रिकाणां पोतवणिजां सार्थस्समूहः महतः प्रवाहस्य मध्ये निरोधेन संभ्रान्ते नयने यस्य स तथा जंबुकः फेरुः विषधरेण सर्पेण परिगृहीते गृहे घूर्णमानं हृदयं यस्य स तथा कुटुंबि पुत्रपौत्रादि समेतो जनः विकटतरमतिशयेन विशालं यस्यतटं तस्यभंगे पातने यस्संभ्रमस्तेन संक्षु

विवेकः-भद्रे पाण्डित्यमपि निर्विण्णबाल्येन तिष्ठसि यन्मोक्ष्यमाणमपिमुक्तमिव अभिमन्यसे पश्य पश्य ।

वर्णितगुणप्रकर्षावर्णाश्रमनियमदेशकालमुखाः ।
अनवहितमानसानां भवन्तिनित्यं भयोदयस्थानम् ॥२७॥

अन्येषुतुविशेषंबोधयामि

भयाभयस्थान विशेषवेदिनः
प्रमादमुक्तस्यपरीक्ष्यकारिणः ।
परानुभूतिप्रतिबन्धशंकया
भयानुबन्धोप्यभयायकल्पते ॥ २८ ॥

भितायाः गंगायास्तटेवेपमान संहननः कंपमानशरीरः शाखिनां वृक्षाणां मंडलषण्डः. साध्वसेन भयेन गृहीतोभवति ।

पाण्डित्यं निर्विण्णबाल्येतिष्ठासेदिति । कुत एतदुक्तमित्यत आह **यदिति**- मोक्ष्यमाणस्यप्रामादिकाकृत्य करणादिसंभावनयाभिव्यज्यतइति । जानत्यपि अजानातीव भाषसे इति भावः । मुक्तस्य हि भयाभावः **अथसोभयंगतोभवतीति** श्रुतेः

अत्राभिप्रेतमर्थं विशदयति-

वर्णित इति-॥ वर्णितः प्रशंसिता गुणस्य मुक्तिसाधनस्वस्य प्रकर्ष अतिशयो येषां ते तथावर्णाः ब्राह्मणादयः आश्रमाः ब्रह्मचर्यादयः नियमाः धर्माः देशाः श्रीरंगादयः कालाः उत्तरायणादयः एते मुखानि प्रधानाः येषां ते देहादयः अनवहितमवधानरहितं मानसं येषां तेषां पुंसां भयोदयस्य भयोत्पत्तेः स्थानं भवति ॥२७॥

अन्येष्ववहितमानसेषु विशेषं बोधयामि । को विशेष इत्यत आह

भयेति—भयस्थानं काम्यं कर्म अस्य भयस्थानत्वं स्वफलानुभवद्वारामुमुक्षावैकल्यजनकत्वं अभयस्थानं नित्यनैमित्तिकादिकं कर्म इदं च भगवदाज्ञारूपत्वेनानुष्ठातृपुंसदनुग्रहहेतुत्वादभयस्थानं तयोर्विशेषं वेदितुं शीलमस्यास्तीति विशेषवेदी तस्य प्रमादैरनवधानैर्मुक्तस्य परीक्ष्य कारिणः उदर्कविचारपूर्वकं नित्यनैमित्तिकमात्रानुष्ठातुः परानुभूतेः परमात्मानुभूतेः प्रतिबन्धशंकया भयानुबन्धः भयानुवृत्तिरप्यभयाय मोक्षाय कल्पते समर्थोभवति भयानुबन्धः प्रमादराहित्यमापादयन् मोक्षाय भवतीति भावः ॥ २८ ॥

आमोक्षाच्च विदुषोपि निरनुबन्धभीतिरिति नभःप्रसूनसौरभास्वादः ।

दिग्देशकाल करणाकरणादिरूपे
देहादिके च हितसाधनभावयोग्ये ।
दुष्कर्मपङ्क्तिमनुचिन्तयतोविचित्रां
किन्तद्यदस्यपुरुषस्यनभीतिहेतुः ॥ २६ ॥

सुमतिः—* एव्वं किल सव्वंवि जइ भअट्ठाणं ताकहं णिब्भअ णिप्पाअणिज्जं पणिहाणंसंपज्जइ ।

विवेकः–भद्रे संयगनुयुक्तं भवत्या, अस्ति खलु सूक्ष्मं किंचित् तदपि प्रतिपद्यामेवत्वां बोधयामि प्रतिसन्धीयतामिदं तावत् ।

---

* एवं किल सर्वमपि यदि भयस्थानं तत्कथं निर्भयनिष्पादनीयं प्रणिधानं संपद्यते ।

अत्र केचिचविभेति कुतश्चनेति श्रुतेः ब्रह्मवेदनानन्तरं विदुषोभयं न भवतीति वदन्ति तदनूद्य दूषयति आमोक्षादिति—॥

विदुषा ब्रह्मज्ञानवतः आमोक्षादाशरीरवियोगान्निरनुबन्धनिर्हेतुकाभीतिर्न खल्विति वचनं नभःप्रसूनसौरभास्वादः अत्यन्तासंभावितइत्यर्थः कुत एवमुच्यत इत्यत आह

दिग्देशेति—॥ दिशः प्राच्यादयः देशाः कुण्डीरचोलादयः कालाः वसन्तादयः करणं नित्यनैमित्तिक कर्मणामकरणं काम्यकर्मणां आदिशब्देन समयाचारो गृह्यते एवंरूपे देहादिके च अत्र आदिशब्द इन्द्रिय वाची हितसाधनभावस्य मोक्षसाधनत्वस्य योग्ये विचित्रां दुष्कर्मपंक्तिं अनुचिन्तयतः अस्य पुरुषस्य यद्भीतिहेतुर्नभवति तत्किं न किमपीत्यर्थः । मोक्षसाधनतया प्रतीतेषु दिगादिषु दुष्कर्मवशात्कदा किंभविष्यतीति सर्वभय जनकं भवतीति भावः ॥

कालेष्वपि च सर्वेषु दिक्षुसर्वासुचाच्युत ।
शरीरे च यतौचापि वर्ततेमे महद्भयं ॥ इत्युक्तेः ॥ २६ ॥

प्रतिपद्यं ज्ञातमेवप्रतिसन्धीयतां अनुसर्यताम् ।

सुमतिः—* आणावेदु अय्यउत्तो ।

विवेकः—

प्रवृद्धमतिकश्मलप्रलयपावकप्रक्रियां
विमुच्य भगवत्कृपांवृजिनसिन्धुकुक्षिंभरीं ।
कदध्वपरिवर्त्तिभिर्यदिहकर्मनिर्मीयते
तदस्तुलवणाकरे लवणसेतुराधित्सितः ॥ ३० ॥

यः पुनरनन्यभावेन भगवदनुकम्पामालम्बते तस्यतुतादृशीं सिद्धि-मवधारय ।

विविक्तनिखिलस्थितिर्विषयवृत्ति निर्वेदवान्
विरक्तिपरिरम्भणग्लपितसर्वदुर्वासनः ।
निवृत्तिपथजांघिको निभृतचित्तवृत्तिः परं
प्रपद्यमुरभित्पदं भवमतीत्यसंसिध्यति ॥ ३१ ॥

* आज्ञापयत्वार्यपुत्रः ।

प्रवृद्धेति—॥ प्रवृद्धं अधिकं यन्मतिकश्मलं मतिकालुष्यंतस्य प्रलयपावकस्य कालानलस्यप्रक्रियां प्रकारं तन्नाशकरीमित्यर्थः वृजिनानि पापानि एव सिन्धुस्समुद्रः तेनकुक्षिंभरीं उदरभरणां कुर्वाणां पापापहन्त्रीमितियावत् भगवत्कृपां विमुच्यकदध्वसु-दुर्मार्गेषु स्वर्गादि साधनेषु प्रवृत्तिभिर्यत्कर्मनिर्मीयतेतत् लवणाकरे आधित्सितः आधातुमिष्टः लवणसेतुः लवणैः कृतस्सेतुरस्तु समुद्रे चिकीर्षितलवण सेतुरिव स्वयं नश्यतीति भावः ॥ ३० ॥

एवं भगवत्कृपावैधुर्य्येप्रणिधानाभावं प्रतिपाद्य तदालम्बने भगवत्प्राप्ति पर्य्यन्ता-सिद्धिर्भविष्यतीत्याह यःपुनरिति—॥

अनन्यपरात्मनोन्यो न विद्यते यस्मिन् सोनन्यः

तेन भावेन तत्तादृशीं इत्यत्र तच्छब्द स्वरूपपरः तादृक्शब्दः स्वभावपरः तां तादृशीं च सिद्धिमवधारया विविक्तदेश सेवित्वादिभिः समाधिसिद्धिः फलसिद्धिश्च-भविष्यतीत्याह—

विविक्तेति—॥ विविक्ते एकान्ते निखिलास्थितिः स्थितिशब्दः गमन शयना-दीनामप्युपलक्षकः अनेन विविक्तदेशसेवित्वं सूच्यते विषयेषु शब्दादिषु यावृत्तिः वर्त्तनं तदनुभवः तस्यां निर्वेदवान् विरक्तेः वैराग्यस्य परिरंभणेन संश्लेषेण ग्लपिता शान्ता सर्वा दुर्वासना यस्य सतथा निवृत्ति पथे निवृत्तिधर्मे जाङ्घिकः जङ्घालः तदेकसंचारी

सुमतिः—*जुत्तं एदं तहवि पच्चक्खिअपरमत्थं तुमं एव्वपरिपुच्छं-मणिम्मलगुरुसआसणिद्धारिअणिअमंतहिअआणं णिट्ठाविअणिहिलपडिपक्खाणं णिस्सेसपसमिअणिज्जरघरवासरसवासणाणं अणालक्खिअदोसगन्धमङ्गलैक्कताण महुमहणचलणसेवामहाणंदलाहलंपडाणं अप्पमाअपरिगहिअ णिउत्ति धम्माणं असम्भाविअपच्चूहाणं वि महापुरुसाणं केण उण विणिवाएण मोक्खोवाओ सिग्घंणसंपज्जइ।

विवेकः—प्रिये इदमपिते महामतिभिरवधारणीयमतिगहनमभिदधामि यत्तत्सनकसनन्दनसनत्कुमारनारदशाण्डिल्यप्रभृतयः परमैकांतिनः प्रतिपादयन्तिआकर्ण्यताम् एतदवहितया भवत्या—

तिमिङ्गिल तिमिङ्गिलो गिलतितद्गिलस्तन्तथा
तमप्यथ च तद्गिलस्तदिहपश्यकर्मक्रमे।

---

*युक्तमेतत् तथापि प्रत्यक्षित परमार्थं त्वामेव परिपृच्छामिनिर्मलगुरुसकाशनिर्धारितनिगमान्तहृदयानां निष्ठापितनिखिलप्रतिपक्षाणां निश्शेषप्रशमितनिर्जरगृहवासरसवासनानामनालक्षितदोषगन्धमङ्गलैकतानमधुमथनचरणसेवामहानन्दलाभलंपटानां अप्रमादपरिगृहीत निवृत्तिधर्माणां असम्भावित प्रत्यूहानामपिमहापुरुषाणां केन पुनर्विनिपातेन मोक्षोपायः शीघ्रं न सम्पद्यते।

निभृता निश्चला चित्तवृत्तिः मनोव्यापारो यस्यसतथा परं सर्वोत्तरं मुरभित्पदं भगवत्स्थानं प्रपद्य भयमतीत्य न बिभेति कुतश्चनेति श्रुतेः संसिध्यति संसिद्धो भवति सिद्धभगवत्साम्यः भविष्यतीत्यर्थः॥ ३१॥

निष्टापिताः प्रणाशिताः निखिलाः प्रतिपक्षा। यैस्तेषां निश्शेषं यथाभवति तथा प्रशमिता निर्जरगृहे स्वर्गे वासरसेवासना येषां ते तथा अनालक्षितः दोषगन्धो ययोस्तौ तथा मंगलानामेकताने मधुमथन चरणौ तयोस्सेवायां यो महानन्दरसः तस्य लंपटानामुत्सुकानामप्रमादेनावधानेन परिगृहीतो निवृत्तिधर्मो यैस्तेषां विनिपातेन विघातेन मोक्षोपायभक्तिः प्रपत्तिर्वा शीघ्रं न संपद्यते फलप्रदो न भवति।

अतिगहनमति रहस्यं। प्रभृति शब्देन शुक शौनकादयो गृह्यन्ते।

तिमिमिति—॥ तिमिङ्गिलः शतयोजनायतमत्स्यग्रसनसमर्थोमत्स्यः तिमिं शतयोजनायतं मत्स्यं गिलति ग्रसति किल तथा तद्गिलस्तद्ग्रसकः तं गिलति तद्गिलः ति-

समस्तवृजिनोदधिग्रसनडम्भकुंभोद्भवे
निवृत्तिमपि धर्ममत्त्यनघतत्वविन्निग्रहः ॥ ३२ ॥

अन्यदप्येतादृशमवधारयेथाः ।

प्रथितंपातकिवर्गंकृतघ्नएकोहिकृत्स्नमतिशेते ।
तमिमंक्रियमाणघ्नस्तमपिदुरात्माकरिष्यमाणघ्नः ॥३३॥

सुमतिः–(विचिन्त्य,) * इदृणाम णिस्समब्भहिअमाहप्पस्स पडि-बुद्धअणणिग्गहस्स पहावो दस्सिओ अस्स उण णाह किं णास्थि परिहारो ।

विवेकः–अस्तितु कश्चिदेकः यदिहपुनस्तत्प्रसादनं ;

तथा हि ।

तोयोज्झनेन परितापमुपेत्यजन्तु
स्तोयेनजीवतिपुनः क्रमयोजितेन ।

---

* इतिनाम निस्समाभ्यधिकमाहात्म्यस्य प्रतिबुद्धजननिग्रहस्य प्रभावो दर्शित अस्य पुनर्नाथ किंनास्ति परिहारः ।

मिङ्गिलगिलगिलः तं तिमिङ्गिलगिलं गिलति इह लोके कर्मक्रमे कर्मपरंपरायां तत्ति मिगिरणादिकं पश्य एवमनघस्य तत्वविदः ब्रह्मविदइत्यर्थः निग्रहः कोपः तद्विषय पचारजन्मा तद्रोषः समस्तानि च तानि वृजिनानि च तान्येवोदधिः तस्यग्रसने डिंभकुंभोद्भवं बालागस्त्यं समस्तपापहरमपि निवृत्तिधर्मम् अत्ति नाशयति ब्रह्मविद पचारेण प्रतिबद्धफला विद्या भवतीति भावः ॥ ३२ ॥

उक्तं निवृत्तिधर्मादपि ब्रह्मविदपचारस्य प्राबल्यं दृष्टान्तेन दृढयितुमाह अन्यदपीत्यादिना— ॥

दृष्टान्तान्दर्शयति–

प्रथितमिति—॥ अत्र यथा पातकिवर्गात्कृतघ्नस्य कृतघ्नात् क्रियमाणघ्नस्य तस्मात्करिष्यमाणघ्नस्य प्राबल्यं तथा सकलपातक निवर्त्तकादपि निवृत्तिधर्मात् ब्रह्म-विदपचारस्य प्राबल्यमिति भावः ॥ ३३ ॥

इति नाम निस्समाभ्यधिकमाहात्म्यस्य प्रतिबुद्धजन निग्रहस्य प्रभावोदर्शितः तत्प्रसादनं तस्य ब्रह्मविदप्रसादनं ।

तत्प्रसादनत्वपरिहारत्वं दृष्टान्तेन उपपादयति–।

तोयोज्झनेनेति—॥जन्तुः मत्स्यः तोयोज्झनेन तोयस्य उज्झनेन त्यागेन

तद्वन्महत्त्यजनतस्तमसिप्रविष्ट
स्तत्संश्रयेण भजतेपरमार्थदृष्टिम् ॥ ३४ ॥

अपि च।

बहुजन्मसुकृतसिद्धं ब्रह्मविदपचारदूरगंपुरुषं।
अभिसरतिनित्यरक्ता सत्वरमपवर्गसाधिनीविद्या॥३५॥

सा च।

परभक्तिरप्रकम्प्यानिवृत्तिधर्मानुबन्धिगुणबन्धैः।
भवजलधि पोतपात्री जातावृद्धिं दिनेदिनेभजते ॥३६॥

सुमतिः-(सविमर्शं) *जुत्तं एदं जइ दुण्णिवारणिअइबलणिम्मिआअपक्कणिस्सेसकसाअस्स मोक्खपक्खणिक्खे व जोग्गा अणिममहिम-

---

* युक्तमेतत् यदि दुर्निवारनियति बल निर्मिता अपक्वनिःशेषकषायस्य मोक्ष-

---

परितापमुपेत्य क्रमेण योजितेन तोयेन पुनर्जीवति तद्वत्महत्यजनतः तमसि अज्ञाने प्रविष्टः जनः तत्संश्रयेण तस्य ब्रह्मविदः संश्रयणेन परमार्थदृष्टिं यथार्थज्ञानं भजते यथा मत्स्यः तोयत्यागेन तप्तः पुनरपि जलेनैव जीवति एवं तत्वविदो नियदात् अज्ञानमासाद्य मोमुह्यमानो जनः तत्प्रसादेनैव प्रतिबुद्धोभवतीति भावः ॥ ३४ ॥

तस्य समाधिसिद्धिश्चभवतीत्याह अपिचेति–।

बह्विति—॥ बहुषु जन्मसु कृतैस्सुकृतैस्सिद्धं निर्मलचित्तब्रह्मविद्विषयापचारस्य दूरगं दूरेवर्तमानं अपवर्गसाधिनीविद्या नित्यरक्ता नित्यमनुरक्तासती सत्वरमभिसरति अत्र।

जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः।
नराणां क्षीणपापानां कृष्णेभक्तिः प्रजायते॥

इत्यादिकमनुसन्धेयं ॥ ३५ ॥

निष्पचायाविद्याया दिने दिने वृद्धिश्चभव तीत्याह साचेति—॥

परभक्तिरिति—॥निवृत्तिधर्मानुबन्धिनः ये गुणाश्शमदमादयः रज्जवश्च तत्कृतबन्धैः अप्रकम्प्या तयैव भवजलधेः संसारसागरस्य पोतपात्री पोतरूपपात्री जातासाविद्या परभक्तिरूपा सती दिने दिने वृद्धिं भजते ॥ ३६ ॥

गरिमलहिमवसित्तणोसित्तणसित्तणपत्तिपाअम्मपमुहापरमपुरुसत्थसिद्धिसाहणजोअन्तराआणहोन्ति ।

विवेकः—सत्यं देवि दुर्जयाएतेदुरन्तवैरिणो योगान्तरायाः त देवां संभवे परिहरणादपि सम्भवस्यैव परिहरणेन निष्प्रत्यूहा भवति नैश्रेयसीसिद्धिः—

ततः प्रविशति भूर्जपत्रभूषितोत्तमांगो दूतः—

दूतः—साञ्जलिबन्धं—

राजन् अयमहमस्मिदेवस्यमहाराजस्यमहामोहस्य दृष्टिपथमनुक्रन् सर्वत्राप्रतिहतगतिः सवृतिसत्योनाम दूतः तदभिवादये सावरोधं भवन्तं।

विवेकः—(स्वगतं) किन्निमित्तमयमुपागतः ।

(प्रकाशं) अस्यानवृत्तिमपहायापरिमितायुर्भूयाः

दूतः—उत्तमाङ्गादवतारितं दरविकसिताञ्जलिकोशनिहितं भूर्जपत्रमुपदर्शयन्, इदंकिल महाराजचतुर्दशभुवनचक्रचक्रवर्त्तिनो द्वापर मन्त्रिनिर्द्धारितं निखिलकार्यस्यदुर्मतिमतप्रतिष्ठितस्य देवस्य महामो

पत्तनिक्षेपयोग्या अणिमगरिमलघिमवशित्वेशित्वप्राप्तिप्राकाम्यप्रमुखाः परमपुरुषार्थसिद्धिसाधनयोगान्तराया न भवन्ति ।

अपक्वाः अदग्धाः निःशेषाः कषायाः मनोमलानि यस्य तस्य पुरुषस्येति शेषः । मोक्षपक्षेविक्षेपस्य योग्याः परमपुरुषार्थस्य भगवत्प्राप्तिरूपस्य सिद्धेः साधनभूतस्य योगस्यान्तराया न भवन्ति ।

यदि एतेषां संभवेसति परिहरणादपि संभवस्यैव ।
परिहरणेन यथा संभवो नस्यात्तथा प्रयतनेन ॥

संवृतिसत्यः अपरमार्थसत्यः असत्येषु वस्तुषु सत्यत्व बुद्धेरभिमानिदेवताविशेषः । एष एव योगाचारेण संवृतिसत्य इति व्यवह्रियते । प्रच्छन्नबौद्धास्तुव्यावहारिक सत्य इति वदन्ति । सावरोधं सस्त्रीकं ।

अस्यानेष्वपरमार्थवृत्तिषु वृत्तिं वर्त्तनमपहाय दरविकसिते अञ्जलिकोशे पद्मकोशाकारे अञ्जलौ महितं चतुर्दशभुवनानां । चक्रवर्त्तिनः सार्वभौमस्य । द्वापरयुगाभिमानी सएव मन्त्री सहि कलेराप्तत्वात् महामोहस्य मन्त्री तेन निर्धारितं निश्चितं अखिलं कार्यं यस्य तस्य ।

हस्य लोभनाम्नागणिकेन लिखित्वात्वदर्थं प्रेषितमन्तरङ्गेणमया उपह्व तमलंघनीयंशासनं ।

विवेकः–सानादरावहित्थं, भद्र अस्माकमप्यभिमतः खल्वसि-तदिह उपह्वरे त्वमेववाचय ।

दूतः—यदादिशति महाराज इति विनयनिभृतं वाचयति ।

एतत्कामादिमान्यस्य महामोहस्यशासनं ।
संसारह्रासभीतानां स्वर्गिणामपिसंमतं ॥ ३७ ॥

विवेकः–(अपवार्य) (सान्तर्हासं) देवि किं वयमपि शासनीय्यादु-रात्मनो महामोहस्य परचित्तवेदनार्थमिहवाचिकन्तावच्छ्रोतव्यं भद्र ततस्ततः–

दूतः–परोपास्तिश्रद्धावधिकमतिवृत्तंयदिहते ।
तदैश्वर्यप्राप्त्यै भवतु बहुमन्येमहितदा ॥

विवेकः–(अवज्ञां नाटयन्) प्रिये आकर्णितः किलायं भित्तुपाद-प्रसरण न्यायः अथवा स्वाभाव्यमेव शवमुष्टिवद्गृहीतग्राहिता महामो-हस्य ।

सुमतिः—* एव्वं एदं ।

---

* एवमेतत् ।

दुर्मतिमते प्रतिष्ठितस्यानादरावहित्थाभ्यां सहितं यथा भवति तथा तस्याभि मतस्त्वं सत्यत्वेन । उपह्वरे एकान्ते ।

एतदिति—एतत्कामादि मान्यस्य आदि शब्देन क्रोधलोभादयो गृह्यन्ते संसा रस्य ह्रासात् क्षयात् भीतानामैहिकभोग प्रवणानां स्वर्गिणामपि ॥ ३७ ॥

परेषां मोहादीनां चित्तवेदनार्थमभिप्राय ज्ञापनार्थं ।

परेति—परस्य ब्रह्मण उपास्त्यै उपासने याश्रद्धा आदरः सा अवधिः काष्ठा यस्य तत्तथा ते यदतिवृत्त अतिलंघ्य वर्त्तनं अनुचिताचरण मिति यावत् तत् ऐश्वर्य प्राप्त्यै भवतु । परोपास्त्यिः ऐश्वर्य प्राप्तये च भवति ।

विवेकः—ततः ।

दूतः—अतिक्रान्तावस्मद्भ्रुकुटिनटनारम्भसमय ।
प्रदीप्तक्रोधादिप्रतिभटनिरुद्धोनभवसि ॥ ३८ ॥

विवेकः—प्रिये स्वधर्मनिरतानस्मान् प्रति सोयमाशीर्वादः अयि मोहदूत किमस्तिशेषंवाचकस्य ।

दूतः—अस्ति किञ्चिदात्मीयबलाध्यक्षकामक्रोधवैभवविषयम् ।

विवेकः—अस्तु को दोषः शृणुमस्तावत् ।

दूतः—विश्वाधिकोविलयमेष्यतिकस्यभूम्ना
वीरः प्रसिद्धमहिमा विबुधेषुकामः ।
क्रोधोदितं यदनुभाववशेनशम्भोः
शृङ्गारशीतलमभून्नयनं तृतीयम् ॥ ३९ ॥

चतुर्विधाभजन्तेमां जनास्सुकृतिनोर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥

इत्यत्र तथा दर्शनात् । तदा बहुमन्येमहि ॥ ३८ ॥

अयं भिक्षुपादप्रसरण न्यायः आकर्णितः । अनुपदतः भिक्षुर्हि कुटुंबिनां गृहेषु पादमेकं किंचित्प्रसार्यते: कवाटेन द्वारपिधाने क्रियमाणे पादो निष्पीडत इत्याक्रुश्य पुनः कवाटे अपहृते अन्यमपि चरणं तत्रनिधायान्तः प्रविष्ट इति तद्वदत्रापि किंचिदवकाशेदत्ते सर्वाक्रमणसंरंभः । पक्षान्तरं अथवेति स्वाभाव्य स्वाभाव्य एवशवमुष्टेः सवस्य मुष्टिरिव गृहीतग्राहिता गृहीतस्य वस्तुनो ग्राहकत्वमेतत् ।

अतिक्रान्तेति—अतिक्रान्तो मच्छासनातिलंघने सत्यां अस्माकं भ्रुकुट्या नटनारंभ समये प्रदीप्ताः तेजिष्टाः ये क्रोधादयः तएव प्रतिभटाः तैर्निरुद्धस्त्वभवसि नश्यसि ॥ ३८ ॥

एतमेवार्थमन्यथा योजयन्ति स्वधर्मेति स्वधर्मः पुरुषमोक्षणरूपः तस्मिन्निरतानस्मान् प्रत्याशीर्वादः निरुद्धो न भवसि जीवितो न भवसीति ।

आत्मीयस्य बलस्याध्यक्षा ये क्रोधादयः ते विषयाः यस्य तद्विषयं ।

विश्वेति—विश्वस्मात् जगतो अधिका विबुधेषु देवेषु प्रसिद्धमहिमोकामः कस्यभूम्ना महिम्ना विलयमेष्यति न कस्यापीत्यर्थः शंभोः क्रोधोदितं क्रोधेन विकसितं तृतीयं नयनं यदनुभाववशेन यद्वैभववशेन शृंगारेण शृंगाररसेन शीतलं सुभगं अर्धनारीश्वरस्य ललाटनेत्रे अर्धस्य गौरीनेत्रतया तृतीयं नयनस्य शृंगारशीतलत्वं ॥ ३९ ॥

अपि च ।

कामोसौसमवर्त्तताग्र इतिहि ब्रूते समीचीश्रुतिः
कामादेवजगज्जनिस्थितिलयैराद्यः पुमान्क्रीडति ।
निष्कामोपि सकाम एवलभते निश्रेयसंदुर्लभं
कामः कस्य वशेकृएषभुवने कामस्यनस्याद्वशे ॥ ४० ॥

सुमतिः—*महाराज किं तुस्नेहिं विदुज्जयो मअरलञ्छणो ।

विवेकः—देवि मिथ्यादृष्टिप्रियस्यमोहस्य प्रलपिते किं प्रत्युच्यते अवशिष्टमपि निशामयामः—

दूतः—यदि कुप्यतिकोपाय न कोपमतिवर्त्तते ।
अकोपविषयं कोपं कथं कश्चिद्विजेष्यते ॥ ४१ ॥

तदिदमुभयतः पाशारज्जुः ।

सुमतिः—†णाह णं कामादो विकोवो दुज्जयो जेणकामजअम्मि विसअं कालणं होइ ।

---

* महाराज किं युष्माभिरपि दुर्जयोमकरलाञ्छनः ।

† नाथ ननु कामतोपि कोपो दुर्जयो येन कामजयेपि स्वयं कारणं भवति ।

पुनरपि कामवैभवमाह अपिचेति—

कामइति—असौ कामः अग्रे समवर्ततेति समीचो समीचीन श्रुतिर्ब्रूते हीति प्रसिद्धौ । अत्र कामस्तदग्रे सव्यवर्तनाधीति श्रुतिरभिप्रेत आद्यः सर्वकारणभूतः पुमान् नारायणः कामादिच्छयैव जगज्जनिस्थितिलयैः क्रीडति । अत्र सोकामयत वहुस्यां प्रजायायेति इत्यादि का श्रुतयोनुसंधेयाः निष्कामोपि पुरुषः दुर्लभं निश्रेयसंतस्मिन् सकाम एव लभते मोक्षेच्छाया अभावे तत्प्राप्त्यसंभवात् एवं भूतः कामः कस्यवशे न कस्यापि भुवने कामस्यवशे यो नस्यादेषकः न कोपीत्यर्थः ॥ ४० ॥

मिथ्यादृष्टेः मिथ्याज्ञानस्य प्रिय इष्टः तस्य प्रत्युच्यते प्रत्युत्तरं दीयते ।

यदिति—॥ कोपाय कुप्यति यदि सकोपं नातिवर्तते अकोपः कोपाभावः विषयो यस्य तं कोपं ममकोपोमाभूदित्यकोपं इत्यर्थः कश्चित् कथं विजेष्यते न कश्चित्केनापि प्रकारेण विजेष्यत इत्यर्थः ॥ ४१ ॥

विवेकः—प्रिये स्थानक्रोधो न खलु दोषाय योसौ कामादिनिरसनार्थतया परमार्थवेदिभिः प्रशंस्यते (दूतमवलोक्य) दूतश्रुतमिहश्रोतव्यं ब्रूहिमद्वचनाद्युष्मत्स्वामिनं ।

अप्राणितमहामोहमनङ्गीकृतमन्मथं ।
विधूतप्रतिघंलोको विवेकं बहुमंस्यते ॥ ४२ ॥

दूतः—साधयाम्यहमिति द्वित्रिपदमतिक्रम्य स्वगतं ।

सुप्तप्रबोधनसमुत्सुकया सुमत्या
पत्न्या सहाचरित विश्वहितं विवेकं ।
जेतुं कएव जगति प्रभवेत्तथापि
स्वामीनियोजयतिमोह इति स्वयन्नः ॥ ४३ ॥

(प्रकाशं) महाराज 'त्यजेदेकं कुलस्यार्थे' इति ।
नीतिंनातिवर्तेथाः इति निष्क्रान्तः ।

सुमतिः—* अय्यउत्त जइ मुत्तिसाहणसज्जो पुरुसो मोहपउत्तेहिं

*आर्यपुत्र यदि मुक्तिसाधनसज्जः पुरुषो मोहप्रयुक्तैः कामक्रोधलोभ मदमत्सरप्रभृतिभिरभिभूयते एतावान् तवपरिश्रमोविफलो भविष्यति ।

उभयतः पाशवद्दुयेपि पाशः बन्धनरज्जूः कोपोमाभूदिति कोपजयेपि कोपवशत्वं तदभावेपि तद्वशत्वं स्यादेवेति भावः ।

स्थाने कामादिजये तदेव विशदयति योसाविति ॥

अप्राणतेति—॥ अप्राणितः प्राणविहीनः संहृतइत्यर्थः महामोहो येन तं अनंगीकृतः मन्मथः येन तं विधूतः निरस्तो प्रतिघः क्रोधो येन तं विवेकं लोको बहुमंस्यते । महामोहादिप्रतिपक्षध्वंसिनं मां लोको बहुमन्यते तदेववरं नतुबहुमन्येमहि तदेति त्वत्कृतं बहुमानमिति भावः ॥ ४२ ॥

सुप्तेति—॥ सुप्तस्य प्रकृतिसंसर्गवशात् संकुचितज्ञानस्य प्रबोधनसमुत्सुकया आर्यं स्वपत्न्या सहाचरित मनुष्ठितं विश्वस्यहितं येन तं विवेकं जेतुं जगति क एव प्रभवेत् कोपिनप्रभवेदेव । एवं सति 'तूष्णीं स्थातव्यमित्यत आह—स्वामीति—। नः अस्मान् ॥ ४३ ॥

त्यजेदेकमित्यादेः अयं आशयः । पुरुषस्य एकस्य मोचणे कुलद्वयं नश्यति यमोचणे कुलद्वयं जीवति अतः कुलद्वयजीवनाय एकं पुरुषं त्यजेदिति ।

कामक्कोहलोहमग्गमच्चरप्पहुदीहिं अहिहूअइ एआवंदो तुस्स परिस्समो विअलोहोइ–

विवेकः-देवि मैवं मन्वीथाः आशंसेथाः पुनश्शोभनमेव ।

अय्यन्तैरवधारिते भगवतिक्षिप्तेविरोधभ्रमे
सांगोपाय विभागसंभृतमतिः संप्रत्यसौ साधकः ।
कामक्रोधनिशातकण्टकमिलत्कालुष्यपङ्कच्छटा
निर्मुक्तेन सुशीतलेनच पथानिश्रेयसंप्राप्स्यति ॥४४॥

(नेपथ्ये) दिव्यवैतालिकौ विजयतां देवः–

प्रथमः–

रम्या यामवती पदार्पणपटी रागाब्धिवेलोद्गति
श्रोताजन्मकदम्बधूलिविततिश्शृङ्गार चूडाजपा ।

शोभनाशंसनप्रकारमाह अय्यन्तैरिति ॥

अय्यन्तैरिति ॥ भगवति नारायणे अय्यन्तैः वेदान्तैः अवधारिते सर्वकारण तया निश्चिते सति अनेनकारणाध्याया उक्तः । विरोधभ्रमेप्रधानपरमाणवादि कारणत्ववादिनीभिः कपिलादिस्मृतिभिः ब्रह्मैककारणत्ववादिवेदान्तानां विरोधस्स्यादिति यो विरोधभ्रमः तस्मिन् क्षिप्तेसति विरोधज्ञानस्य भ्रमत्वं कपिलादि स्मृतीनां पुरुषप्रणीतानां दोष संभावनया पौरुषेय त्वे वे न्तानां नित्यनिर्दोषतया च अनेनाविरोधाध्यायार्थसूचितः । असौ साधकः पुरुष) सांगानां साधन सप्तक सहितानामुपायानां विद्यानां विभागे भेदे संभृतमतिः परिपूर्णमतिस्सन् अनेन साधनाध्यायार्थ संगृहीतः । कामक्रोधावेव निशातकण्टकौ ताभ्यां मिलत्यत्कालुष्यं मतिभ्रमः तदेव पंकच्छटा ताभ्यां निर्मुक्तेन परित्यक्तेन शीतलेन च पथा अर्चिरादिमार्गेण निश्रेयसं अपवर्गं प्राप्स्यति । अनेन फलाध्यायार्थस्संक्षिप्तः ॥ ४४ ॥

एवं मुक्त्युपायायारंभमुक्त्वाप्रतिपक्षस्य सौप्तिकसंनाह समय सूचनं निशामुखवर्णन व्याजेन वैतालिकाभ्यां विशदयति नेपथ्ये इत्यादिना ॥

देवो विजयतामिति वैतालिकौ वन्दिनावाहतुरिति शेषः । अथ तयोः कश्चिद्वदति । स एव प्रथमः ।

रम्येति–॥ रम्या मनोज्ञा यामवत्याः रात्रेः पदार्पणपटी चरण न्यासोचिता

संमोहद्विपशोणबिन्दुपटलीसंध्याजरीजृम्भते
प्रत्यग्दिग्वनितापयोधरतटीकाश्मीरपङ्कद्युतिः ४५॥

द्वितीयः—

दिनाधिपविनाकृतिव्यसनखिन्नसंध्यावधू
विधूतकबरीभरप्रसरकौतुकापादकम् ।
विशृङ्खलकलिन्दजाजलतरङ्गभङ्गावली
मलीमसमिदन्तमोजगदशेषमाचूषति ॥ ४६ ॥

विवेकः—(कर्णं दत्वा) देवि दिवाभीतप्रायस्यास्मत्प्रतिपक्षस्य सौप्तिक मचाह समयं सूचयतः प्रायेणास्वतोऽवियातवादिनौ वैतालिकौ संपश्यतां भवती

प्रकाशस्सङ्कोचं भजतिजगतस्सीदतिरवौ
तमिस्राविष्फूर्तिस्स्थगयतिमुखं शक्रहरितः ।

कौसुम्भपटीराग एव अब्दिः तस्या वेलाया लहर्या उद्गतिः उद्गमनमनुरागस्य रक्तवर्ण कविसमय सिद्धं चेतो जन्मनः कामस्यकदंबधूलीनां कदंबपुष्परजसां विततिः मन्मथेन वकीर्यमाणा कदम्बधूलिविततिरित्यर्थः शृंगारस्य शृंगाररसस्य चूडाजपाकुसुम जात संमोह एव द्विपः तस्य शोणबिन्दूनां सिन्दूरबिन्दूनां पटलीपंक्तिः प्रत्यग्दिगेव वनिता तस्याः पयोधर तट्योः यत् काश्मीरं कुंकुमं तस्य द्युतिः प्रभा सन्ध्या सन्ध्यारागः जरीजृम्भते ॥ ४५ ॥

दिनेति—॥ दिनाधिपस्य सूर्यस्य विनाकृतेः वियोगात् व्यसनं क्लेशः तेन खिन्नायाः सन्ध्याया एव वध्वाः विधूतस्य बद्धान्मुक्तस्य क बरीभरस्य केशपक्षस्य प्रसटः वष्फूर्त्तिरिति यत् कौतुकं तस्यापादकं निष्पादकं विशृङ्खलस्य निर्निरोधस्य कलिन्दजा जलस्य यमुना जलस्य तरंग भंगानां वीचीभेदानां आवलीव मलीमसं नीलं इदं दृश्यमानं तमः अशेषं जगत् आचूषति आवृणोतीत्यर्थः ॥ ४६ ॥

दिवाभीताः उलूकाः तत्प्रायस्य तत्तुल्यस्य सौप्तिकं सुप्तिसमयसंहारः तस्मिन् संनाहस्य समुचितं सर्वं सूचयतः स्वतः स्वभावादेवावियातवादिनौ धृष्टतयावदतौ ॥

प्रकाशेति—॥ रवौसीदति अस्तंगतेसति जगतः प्रकाशः संकोचं भजति तमिस्रायाः अन्धकारस्य विस्फूर्त्तिः शक्रहरितः प्राच्याः स्थगयति विधत्ते विशवमवस्कन्द-

अवस्कन्दन्विश्वंसुमुखिमधुनासाकमधुना
विधत्तेदुर्दान्तोविविधमपनोतं रतिपतिः ॥ ४७ ॥

अपि च ।

अश्रान्तसन्ततिभिराभरण प्रकाशै
राम्रेडयन्त्यइव मङ्गलदीपभासः ।
अन्तःपुरंतिलकयन्तिसमंसमन्ता
दारात्रिकं मृगदृशोनियमंविधातुं ॥ ४८ ॥

तदहमिहसान्ध्यम् नियममनुपाल्य परब्रह्मप्रवणमानसं पुरुषमभिरक्षामि, भवत्यपि क्षान्तिशान्त्यादि परिजनसेविता मङ्गलाचरण सौधमधिरुह्य मत्प्रत्यागमन प्रतीक्षावर्तेथाः ।

इति सुमत्या सहनिष्क्रान्तः—

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
संकल्पसूर्योदये भक्त्युपायारम्भोनामतृतीयोंकः ॥
श्रीमते भगवते भाष्यकारायम हादेशिकायनमः ।
श्रीमते निगमान्त महादेशिकायनमः ॥

न्योडयन् रतिपतिरधुनामधुनासाकं विविधमपनीतमन्याय्यं विधत्ते अकृत्य करणादिकं कारयति ॥ ४७ ॥

अश्रान्तेति–॥ अश्रान्ता अविरता सन्ततिः परंपरा यासां ताभिः आभरणप्रभाभिः मंगल दीपानां मंगलार्थमारोपितानां दीपानां भासः किरणाः आम्रेडयन्त्य इव वर्धन्त्य इव स्थिताः आरात्रि नीराजनरूपं नियमं विधातुं मृगदृशः समं युगपदन्तःपुरं समन्तात्तिलकयन्ति अलंकुर्वन्ति सायन्तन समये दीपा नारोप्य तत्तद्देवतानीराजनविधानाय संचरन्त्यस्स्त्रियः अन्तःपुरस्य अलंकारभूताभवन्तीतिभावः ॥ ४८ ॥

अनुपाल्य अनुष्ठायेत्यर्थः । मंगलाचरणसमुचितं सौधमधिरुह्यमत्प्रत्यागमने प्रतीक्षादृष्टिर्यस्यासा तथोक्ता ।

॥ इति प्रभावल्यां तृतीयोङ्कः ॥

LI

ततः प्रागुत्तरां गत्वा[1] दिशं रामः सलक्ष्मणः ।
विश्वामित्रं पुरस्कृत्य यज्ञ[2]वाटं ददर्श ह ॥ १ ॥
[3]तं रामो मुनिशार्दूलं दृष्ट्वा यज्ञमभाषत ।
अहो समृद्धिर्यज्ञस्य जनकस्य महात्मनः ॥ २ ॥
बहूनीह सहस्राणि नानादेशनिवासिनाम् ।
[4]दृश्यन्ते ब्राह्मणानाञ्च नानाभाषाविचारिणाम् ॥३॥
[5]देशः परीक्ष्यतां ह्यद्यो वत्स्यामो यत्र वै वयम् ।
इति रामवचः श्रुत्वा विश्वामित्रो महामनाः ॥ ४ ॥
[6]निवेशमकरोद्देशे विविक्ते सलिलप्लुते ।
विश्वामित्रमृषिं प्राप्तं श्रुत्वा[7]थ मिथिलेश्वरः ॥ ५ ॥
[8]शतानन्दं पुरस्कृत्य पुरोहितमकल्मषम् ।
ऋत्विग्भिः सहितश्चान्यैरादायार्घ्यं त्वरान्वितः ॥ ६॥
[9]विश्वामित्राय सत्कृत्य ददौ मन्त्रपुरस्कृतम् ।

1. B. L. 1. रामः सौमित्रिणा सह. 2. B. 1. वाटमुपागमत्. 3. For this Sl. B. 2. रामस्तु मुनिशार्दूलमुवाच सहलक्ष्मणः । साध्वी यज्ञसमृद्धिर्हि जनकस्य etc. 4. B. 3. ब्राह्मणानां महाभाग वेदाध्ययनशालिनां ॥ G. 3. समागतानां विप्राणां देशभाषा (a) धिकारिणां ॥ (a) P. विचारिणां. 5. Before this Sl. of our text G. 4. has the line : दृश्यन्ते ब्राह्मणानां च वासा प्रकरथाः कृताः । For this Sl. B. 4-5. ऋषिवाटाश्च दृश्यन्ते शकटीशतसंकुलाः । देशो विधीयतां ब्रह्मन् यत्र वत्स्यामहे वयं ॥ रामस्य वचनं श्रुत्वा विश्वामित्रो महामुनिः । 6. For this Sl. B. 5-6. निवासमकरोद्देशे विविक्ते सलिला(a)न्विते ॥ विश्वामित्रमनुप्राप्तं श्रुत्वा नृपवरस्तदा । (a) V. युते. 7. P. च etc. 8. For this Sl. B. 6-7. शतानन्दं पुरस्कृत्य पुरोहितमनिन्दितः ॥ ऋत्विजोऽपि महात्मानस्त्वर्घ्यमादाय सत्वरं । 9. For this Sl. B. 7-8. प्रत्युज्जगाम सहसा विनयेन समन्वितः ॥ विश्वामित्राय धर्मेण

प्रतिगृह्य स तां पूजां जनकान्मुनिसत्तमः ॥ ७ ॥
[1]पप्रच्छानामयं चैव यज्ञसामृद्ध्यमेव च ।
तांश्चैवान्यान् मुनीन् सर्वानागतान् सपुरोहितान् ॥८॥
[2]यथा न्यायं यथायोगं पर्यपृच्छदनामयम् ।
अथ राजा मुनिश्रेष्ठं कृताञ्जलिरभाषत ॥ ९ ॥
[3]आसने भगवन् क्लृप्ते उपवेष्टुमिहार्हसि ।
जनकेनैवमुक्तोऽथ विश्वामित्रो महामुनिः ॥ १० ॥
निषसाद ततश्चैनं स राजा मन्त्रिभिः सह ।
उपविष्टमुपेत्येदं कृताञ्जलिरभाषत ॥ ११ ॥
[4]अमृतस्येव संप्राप्तिरद्य मे भगवन् मुने ।
अद्य यज्ञसमृद्धिर्मे सफला दैवतैः कृता ॥ १२ ॥
[5]अद्य यज्ञफलावाप्तिर्ममाभ्यागमनात्तव ।
धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे त्वं महामुने ॥१३॥
[6]यज्ञस्यावभृथं पुण्यं द्रष्टासि सपदानुगः ।

ददौ धर्म्मपुरस्कृतं । प्रतिगृह्य तु तां पूजां जनकस्य महात्मनः ॥ 1. For this Sl. B. 9. पप्रच्छ कुशलं राज्ञो यज्ञस्य च निरामयं । स तांश्चाथ मुनीन् पृष्ट्वा सोपाध्याय पुरोधसः ॥ 2. For this Sl. B. 10. यथार्हमृषिभिः सर्वैः समागच्छत्प्रहृष्टवत् । अथ राजा etc. 3. For this, and the following Sl. B. 11. and 12. आसने भगवानास्तां सहैभिर्मुनिपुंगवैः । जनकस्य वचः श्रुत्वा निषसाद महामुनिः ॥ पुरोधा ऋत्विजश्चैव राजा च सहमंत्रिभिः । आसनेषु यथान्यायमुपविष्टाः समन्ततः॥ 4. For this Sl. B. 13. दृष्ट्वा स नृपतिस्तत्र विश्वामित्रमथाब्रवीत् । अद्य etc.॥ 5. For this Sl. B. 14. अद्ययज्ञफलं प्राप्तं भगवद्दर्शनान्मया । धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनि पुंगव ॥ 6. For this Sl, B. 15. यज्ञोप(a)सदने ब्रह्मन् प्राप्तोऽसि मुनिभिः सह । द्वादशाहं तु ब्रह्मर्षे (b)दीक्षामाहुर्मनीषिणः ॥ (a) V. and S. सदनं

द्वादशाहं च शेषं मे यज्ञस्याहुर्द्विजातयः ॥ १४ ॥
[1]ततो भागार्थिनो देवानिह द्रष्टुस्युपागतान् ।
उष्यतामिह मत्प्रीत्या सहैभिर्ब्रह्मवादिभिः ॥ १५ ॥
एतान्यहानि सुसुखं ततो यास्यथ सत्कृताः ।
एतौ च मुनिशार्दूल कुमाराविव पावकी ॥ १६ ॥
[2]काकपक्षधरौ कस्य किमर्थं चाभ्युपागतौ ।
व्यूढोरस्कौ[3]महाबाहू खड्गतूणधनुर्धरौ ॥ १७ ॥
अश्विनोः सदृशौ रूपे[4]कस्येमौ प्रियदर्शनौ ।
किमर्थं सुकुमाराङ्गावध्वानं संश्रितावुभौ ॥ १८ ॥
[5]बालाविवानवद्याङ्गौ श्रोतुं कौतूहलं मम ।
तस्यैतद्वचनं श्रुत्वा जनकस्य महात्मनः ॥ १९ ॥

---

etc. (b) V. शेषमाहुर्मनस्विनः । S. दीक्षामाहुर्मनस्विनः 1. For this, and the following Sl. B. 16 and 17. ततो भागार्थिनो देवान् द्रष्टुमर्हसि कौशिक । इत्युक्त्वा मुनिशार्दूलं प्रहृष्टवचनस्तदा ॥ पुनस्तं परिपप्रच्छ प्रांजलिः प्रयतो नृपः । इमौ कुमारौ भद्रंते देवतुल्यपराक्रमौ ॥ 2. For this, and the following Sl. B. 18 and 19. गज(a)तुल्यगती वीरौ शार्दूलवृषभोपमौ । (b) अश्विनाविवरूपेण समुपस्थितयौवनौ ॥ यदृच्छयेव गां प्राप्तौ देवलोकादिवामरौ । (c) कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा मुने ॥ (a) V. सिंहगती etc. (b) Before this line V. and S. read : पद्मपत्रविशालाक्षौ खड्गतूणीधनुर्धरौ । (c) Before this line V. and S. read : पुण्डरीकविशालाक्षौ वरायुधधरावुभौ । बद्धगोधांगुलित्राणौ खड्गवन्तौ महाद्युती ॥ 3. G. 18. दीर्घभुजौ etc. but P. has महाबाहू. 4. G. 18 कस्यातिप्रिय etc. 5. For this, and the following two slokas, B. 20—24. वरायुधधरौ वीरौ कस्य पुत्रौ महामुने । भूषयंताविमं देशं चन्द्रसूर्याविवांबरम् ॥ परस्परस्य सदृशौ प्रमाणेंगितचेष्टितैः । काकपक्षधरौ वीरौ (a) श्रोतुमिच्छामि तत्त्वतः ॥ (b) तस्य तद्वचनं श्रुत्वा जनकस्य महात्मनः । न्यवेदयदमेयात्मा पुत्रौ दशरथस्य तौ ॥ सिद्धाश्रमनिवासं च राक्षसानां बधं तथा । (c) तत्रागमनमव्यग्रं विशालायाश्च

न्यवेदयन्महात्मानौ सुतौ दशरथस्य तौ ।
तच्चागमनमव्यग्रं राक्षसानां च तं बधम् ॥ २० ॥
सिद्धाश्रमनिवासं च विशालस्य च दर्शनम् ।
[1]अहल्यादर्शनञ्चैव गौतमस्य च सङ्गमम् ॥ २१
गौतमस्य च [2]शापान्ते अहल्यायाश्च दर्शनम् ।
रामस्य धनुषश्चैव जिज्ञासार्थमुपागमम् ॥ २२ ॥
[3]इति सर्वं महातेजा जनकाय महात्मने ।
निवेद्य विरराामाथ विश्वामित्रो महामुनिः ॥ २३ ॥

॥ आदि काण्डे जनकदर्शनम् ॥

LII.

तस्यतद्वचनं श्रुत्वा विश्वामित्रस्य धीमतः ।
हृष्टरोमा[4] भृशं भूत्वा शतानन्दो महातपाः ॥ १ ॥
गौतमस्य सुतो ज्येष्ठस्तपसा द्योतितप्रभः ।
[5]रामसंदर्शनं प्राप्य विस्मयं परमं ययौ ॥ २ ॥
[6]संनिषण्णावुभौ दृष्ट्वा सदृशौ रामलक्ष्मणौ ।
शतानन्दो मुनिश्रेष्ठं विश्वामित्रमभाषत ॥ ३ ॥

दर्शनं ॥ अहल्यादर्शनं चैव गौतमेन समागमं । महाधनुषि जिज्ञासां कर्तुमागमनं तथा॥ (a) V. कुमाराविवपावकौ. (b) Before this Sl. V. has रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारकौ । प्रकाशय कुलमस्माकं मामुद्धर्तुमिहागतौ ॥ (c) V. तच्चा etc. G. 19. देवाविवा etc. but P. has बालाविवा etc. 1. This line is wanting in G. 2. G. 22. शापान्तमहल्या etc. 3. B. 25. एतत् सर्वं etc. 4. B. LI. 1. महातेजाः &c. 5. B. 2. रामसंदर्शनादेव परं विस्मयमागतः॥ 6. For this Sl. B. 3. एतौ निषण्णौ संप्रेक्ष्य शतानंदो नृपात्मजौ । सुखासीनौ

[1]अपि त्वया मुनिश्रेष्ठ मम माता[2]तपस्विनी ।
दर्शिता राजपुत्रस्य रामस्यास्य महात्मनः ॥ ४ ॥
[3]अपि रामाय मे माता पूजार्हाय महात्मने ।
पूजां कृतवती सम्यगहल्या भृशदुःखिता ॥ ५ ॥
[4]अपि रामाय कथितं यथावृत्तं पुरातनम् ।
मम मातुर्महाबुद्धे दैवेन [5]यदनुष्ठितम् ॥ ६ ॥
[6]अपि कौशिक माता मे संगता गुरुणा पुनः ।
शापाग्निदग्धा पित्रा मे रामदर्शननिर्मला ॥ ७ ॥
[7]अपि प्रीतेन मनसा गुरुर्मे कुशिकात्मज ।
पूतां दीर्घेण तपसा मातरं मेऽभ्यनन्दत ॥ ८ ॥
[8]अपि मे गुरुणा ब्रह्मन् पूजितोऽसि यथार्हतः ।
इहागतो महातेजाः पूजां प्राप्य महात्मनः ॥ ९ ॥
तच्छ्रुत्वा वचनं तस्य विश्वामित्रो[9]महायशाः ।

मुनिश्रेष्ठं विश्वामित्रमथाब्रवीत् ॥ 1. For this Sl. B. 4. अपि ते मुनिशार्दूल मम माता यशस्विनी । दर्शिता राजपुत्राय तपोदीर्घमुपागता ॥ 2. G. 4. यशस्विनी. 3. For this Sl. B. 5. अपि रामे (a)महातेजा मम माता यशस्विनी । वन्येनोपाहरत् पूजां पूजार्हे सर्वदेहिनां ॥ (a) V. महाभागा &c. 4. For this Sl. B. 6. अपि रामाय कथितं यद्वृत्तं तत्पुरातनं । मम मातुर्महातेजो(a)दैवेन दुरनुष्ठितं ॥ (a) S. दैवेन &c. 5. P. दुरधिष्ठितं. 6. For this Sl. B. 7. अपि कौशिक भद्रं ते गुरुणा मम संगता । मम माता मुनिश्रेष्ठ रामसंदर्शनादितः ॥ 7. This Sl. is wanting in B. 8. For this Sl. B. 8 and 9. अपि मे गुरुणा रामः पूजितःकुशिकात्मज । इहागतो महातेजाः पूजां प्राप्य महात्मनः ॥ अपि शांतेनः मनसा गुरुर्मे कुशिकात्मज । इहागतेन रामेण पूजितेनाभिवादितः ॥ 9. B. 10.

प्रत्युवाच शतानन्द[1] वाक्यं वाक्यविशारदः ॥ १० ॥
[2]नातिक्रान्तमिदं ब्रह्मन् यत्कार्यं तत्कृतं मया ।
सङ्गता गुरुणा पत्नी भार्गवेनेव रेणुका ॥ ११ ॥
तच्छ्रुत्वा वचनं तस्य विश्वामित्रस्य धीमतः ।
[3]शतानन्दस्ततो राममिदं वचनमब्रवीत् ॥ १२ ॥
[4]स्वागतं ते रघुश्रेष्ठ दिष्ट्या प्राप्तोऽसि मे [5]प्रभो ।
विश्वामित्रेण सहित इमं यज्ञं महात्मनः ॥ १३ ॥
[6]अचिन्त्यधर्मकर्मायं ब्रह्मर्षिरमितद्युतिः ।
विश्वामित्रो महातेजा [7]यश्च ते परमो गुरुः ॥ १४ ॥
नास्ति धन्यतरो राम त्वदन्यो भुवि कश्चन ।
[8]यस्य ते हितकामोऽयं विश्वामित्रस्तपोनिधिः ॥ १५ ॥
[9]श्रूयताञ्च पुरावृत्तं कौशिकस्य महात्मनः ।
यद्वीर्यो यत्प्रभावोऽयं यद्योगश्च महायशाः ॥ १६ ॥

महामुनिः । 1. B. 10. वाक्यज्ञो वाक्यकोविदं ॥ 2. For this Sl. B. 11. नातिक्रांतं मुनिश्रेष्ठ यत्कर्त्तव्यं कृतं मया । संगता मुनिना &c. ॥ 3. B. 12. शतानंदो महातेजा रामं वचनमब्रवीत् ॥ 4. For this Sl. B. 13. स्वागतं ते नरश्रेष्ठ दिष्ट्या प्राप्तोऽसि राघव । विश्वामित्रं पुरस्कृत्य महर्षि(a)मपराजितं ॥ (a)V. मभिपूजितं. 5. P. विभो. 6. For this Sl. B. 14. अचिंत्यकर्म्मा तपसा ब्रह्मर्षिरमितप्रभः । विश्वामित्रो महातेजा(a)वेत्स्येनं परमां गतिं ॥ (a) v. वेत्स्येनं &c. For the first line of this Sl. of our text G. 14. has अचिन्त्यो ह्येव धर्म्मात्मा राजर्षिरमितद्युतिः ॥ 7. P. ऋषीणां परमो &c. 8. B. 15. गोप्ता कुशिकपुत्रस्ते येन तप्तं महत्तपः ॥ 9. For this Sl. B. 16. श्रूयतां चाभिधास्यामि कौशिकस्य महात्मनः । यथाबलं यथातत्त्वं तन्मे निगदतः शृणु ॥

[1]राजाभूदेष धर्मात्मा दीर्घकालमरि[2]न्दम ।
धर्मज्ञश्च क्रियावांश्च प्रजानां पालने रतः ॥ १७ ॥
[3]पितामहसुतस्त्वासीत् कुशनाभः स धार्मिकः ।
कुशनाभसुतस्त्वासीद् गाधिर्नाम महीपतिः ॥ १८ ॥
[4]तस्यपुत्रो महातेजा विश्वामित्रो[5]महातपाः ।
विश्वामित्रस्तु धर्मात्मा पालयन्मेदिनीमिमाम् ॥ १९ ॥
[6]वर्षायुतानि दिव्यानि राजा राज्यमकारयत् ।
धर्मज्ञश्च क्रियावांश्च प्रजानां पालने रतः ॥ २० ॥
[7]एवं पालयतो राम राज्ञस्तस्य महात्मनः ।
अष्टौ संजज्ञिरे पुत्राः ख्यातवीर्यपराक्रमाः ॥ २१ ॥
तान्राजवंशप्रथितान् प्रतिष्ठाप्य स वीर्यवान् ।

* * * * * * * * ॥

---

1. For this Sl. B. 17. राजासीदेष धर्मात्मा दीर्घकालमरिंदमः। धर्मज्ञः कृतविद्यश्च प्रजानां च हितेचरतः ॥ 2. G. 17....न्दमः, but P. has न्दम. 3. For this Sl. B. 18-19. प्रजापतिसुतस्त्वासीत्कुशो नाम महीपतिः। कुशस्य पुत्रो बलवान् कुशनाभः सुधार्म्मिकः ॥ कुशनाभसुतस्त्वासीद् गाधिरित्येव विश्रुतः। G. 18-19 पितामह सुतस्त्वासीत्कुशो नाम(a)महीपतिः। कुशस्य पुत्रो बलवान् कुशनाभः सुधार्म्मिकः ॥ कुशनाभसुतस्त्वासीद् गाधिर्नाम(b)महामतिः ॥ (a) P. महायशाः. (b) P. महीपतिः. 4. For this Sl. B. 19-20. गाधेः पुत्रो महातेजा विश्वामित्रो महामुनिः ॥ विश्वामित्रो महातेजाः पालयामास मेदिनीं ॥ 5. G. 19. महामुनिः. 6. For this Sl. B. 20. बहुवर्षसहस्राणि राजा राज्यमकारयत् ॥ G. 20. वर्षायुतान्यनेकानि &c, The 2nd line of this Sl. of our text is wanting in G. 7. This, and the following Sl. are wanting in B. and

कदाचित् [1]स महातेजा योजयित्वा [2]षडङ्गिनीम् ।
अक्षौहिणीपरिवृतःपरिचक्राम मेदिनीम् ॥ २१ ॥
[3]सरितः पर्वतांश्चैव वनानि नगराणि च ।
विचरन् क्रमशो राजा आजगाम महायशाः ॥ २२ ॥
वसिष्ठस्याश्रमपदं [4]ब्रह्मस्थानमनुत्तमम् ।
नानामृग[5]समाकीर्णं सिद्धचारणसेवितम् ॥ २३ ॥
[6]ब्रह्मर्षिगणसंकीर्णं देवर्षिगण[7]पूजितम् ।
तपश्चरणसंसिद्धैरग्निकल्पैर्महात्मभिः ॥ २४ ॥
सततं[8]संकुलं श्रीमद्ब्रह्मकल्पै[9]र्महाव्रतैः ।
अब्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशनैस्तथा ॥ २५ ॥
[10]फलमूलाशनैर्दान्तैर्जित[11]क्रोधैर्जितेन्द्रियैः ।
[12]संप्रक्षालैरश्मकुट्टैर्दन्तोलूखलिभिस्तथा ॥ २६ ॥
ऋषिभिर्वालखिल्यैश्च जपहोमपरायणैः ।
[13]वसिष्ठस्याश्रमपदं ब्रह्म[14]स्थानमनुत्तमम् ॥ २७ ॥

G. 1. B. 21. तु &c 2. B 21....वरूथिनीं. 3. For this Sl. B. 22. नगराणि च राष्ट्राणि सरितश्च महागिरीन् । (a)आश्रमान् क्रमशो राजा विचरन्नाजगाम ह ॥ (a)V. आश्रमात् &c. 4. B. 23 and G. 23. नानापुष्पफलद्रुमं. V. नानापक्षिलताद्रुमं. S. नानापुष्पलताद्रुमं. P. agrees with our text. 5. B. and G. 23. गणाकीर्णं &c. 6. This line is wanting in G., but P. has it. 7. B. 25. सेवितं. 8. P. कुशलं &c. 9. B. 26. र्महात्मभिः. 10. G. 25. फलमूलाशिभिः &c. 11. B. 27. दोषैः &c. 12. G 26. प्रक्षालनै &c., but P. has संप्रक्षालै &c., This line is wantiug in B. 13. Between the two lines of this Sl. of out text B. 28. has the line अन्यैर्वैखानसैश्चैव समंतादुपशोभितं । 14. B. 28. लोकमिवापरं.

[1]अपश्यज्जयतांश्रेष्ठो विश्वामित्रो महा[2]मनाः ॥२८॥

आदि काडे बालचरिते शतानन्दवाक्यम् ।

LIII

[3]वसिष्ठन्तु तदा तस्मिन्नाश्रमे मुनिसत्तमम् ।
[4]स दृष्ट्वा परमप्रीतो विश्वामित्रो महाबलः ॥ १ ॥
प्रणतो विनयाद्वीरो वसिष्ठं जपतां वरम् ।
[5]स्वागतञ्च तथेत्युक्त्वा वसिष्ठेन महात्मना ॥ २ ॥
[6]आसनं तस्य विधिवत् प्रदिष्टं जगतीपतेः ।
उपविष्टाय च तदा विश्वामित्राय धीमते ॥ ३ ॥
[7]वृष्यामग्र्यां मुनिवरः फलमूलमुपाहरत् ।
प्रतिगृह्य[8]च तां पूजां वसिष्ठाद्राजसत्तमः ॥ ४ ॥
[9]तमग्निहोत्रे शिष्येषु पप्रच्छ कुशलं ततः ।
विश्वामित्रो महातेजा वनस्पति[10]गणे तथा ॥ ५ ॥
[11]सर्वत्र कुशलञ्चोक्त्वा वसिष्ठो मुनिसत्तमः ॥
सुखोपविष्टं राजानं विश्वामित्रं महातपाः ॥ ६ ॥
[12]अपृच्छ[13]ज्जपतां श्रेष्ठो गाधेयं ब्रह्मणःसुतः

---

1. B. 29. ददर्श &c. 2. B. 29. बलः 3. This line is wanting in both B. and G. but P, has it. 4. B. LII. 1. तं &c. 5. B. 2. स्वागतं तव चेत्युक्तो etc. G. 2. स्वागत च तवेत्युक्त्वा &c.. but P. agrees with our tsxt. 6. B. 2. आसनं चास्य भगवान् वसिष्ठो व्यादिदेश ह ॥ 7. B. 3, यथान्यायं मुनि &c. 8. B. 4 and G. 4. तु तां &c. 9, B. 4. तपोऽग्निहोत्रशिष्येषु कुशलंपर्यपृच्छत ॥ 10. B. 5. गणे तदा. G.5. गणेस्तथा, but P. has गणे तथा. 11. B. 5. सर्वत्र कुशलं प्राह वसिष्ठो राजसत्तमं ॥ 12. B. 6. पप्रच्छ जपतां श्रेष्ठो वसिष्ठो ब्रह्मणः सुतः ॥ 13. G. 6. जयतां श्रेष्ठं

कच्चित्ते कुशलं राजन् कच्चिद्धर्मेण रञ्जयन् ॥ ७ ॥
प्रजाःपालयसे नित्यं राजवृत्तेन [1]धार्मिक ।
कच्चित्ते [2]सुभृता भृत्याः कच्चित्तिष्ठन्ति शासने ॥ ८ ॥
कच्चित्ते विजिताः सर्वे रिपवो रिपुसूदन ।
[3]कच्चिद्बलेषु कोशेषु मित्रेषु च परन्तप ॥ ९ ॥
कुशलन्ते नरव्याघ्र [4]पुत्रपौत्रे नराधिप ।
सर्वत्र कुशलं राजा वसिष्ठं [5]प्रत्युवाच ह ॥ १० ॥
विश्वामित्रो महातेजा [6]स्तमथो विनयान्वितः ।
[7]कृत्वा तु सुचिरं कालं धर्मिष्ठां तां कथां तदा ॥ ११ ॥
मुदा परमया [8]युक्तावभिनन्द्य परस्परम् ।
ततो वसिष्ठो भगवान् कथान्ते [9]मुनिसत्तमः ॥ १२ ॥
विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव ।
आतिथ्यं कर्तुमिच्छामि बलस्यास्य महाबल ॥ १३ ॥
तव चैवाप्रमेयस्य यथार्हं [10]प्रतिगृह्यताम् ।
सत्क्रियां [11]प्रतिगृह्णातु भवानिह मयोद्यताम् ॥ १४ ॥
राजंस्त्वमतिथिश्रेष्ठः पूजनीयः प्रयत्नतः ।
एवमुक्तो वसिष्ठेन विश्वामित्रो [12]महीपतिः ॥ १५ ॥

गाधिजं etc. but P. agrees with our text. 1. G. 7. धार्मिकः, but P. has धार्मिक. 2. B. 8. संभृता &c. 3. P. कच्चिद्बले च कोशे च &c. 4. G. 9. पुत्रपौत्रेषु चानघ; B 9. and P. पुत्रपौत्रे तथानघ. 5. B. 10. प्रत्युदाहरत्. 6. G. 10. स्तमतो &c., but P. has स्तमथो &c. B. 10. वसिष्ठं(a)विनयान्वितं ॥(a)V. विनयान्वितः. 7. B. 11. कृत्वा तौ सुचिरं कालं धर्मिष्ठौ ताः कथास्तदा । 8. B. 11. युक्तौ प्रीयेतां तौ &c. 9. B. 12. रघुनन्दन. 10. B. 13. संप्रतीच्छ मे. 11. B. 14. च्छि भवानेतां प्रतीच्छतु मया कृतां. 12. B. 15. महामुनिः, V. महामतिः (a better reading).

कृतमित्यब्रवीद्राजा [1]पूजानेनैव सत्कृता ।
फलमूलेन [2]भगवंस्तव यद्विद्यते प्रभो ॥ १६ ॥
पाद्येनाचमनीयेन भगवद्दर्शनेन च ।
[3]सर्वथैव महातेजः पूजार्हेणास्मि पूजितः ॥ १७ ॥
[4]गमिष्यामि नमस्तेऽस्तु मैत्रेणेक्षस्व चक्षुषा ।
एवं[5]ब्रुवन्तं राजानं वसिष्ठः पुनरेव[6]तु ॥ १८ ॥
[7]न्यमन्त्रयदमेयात्मा पुनः पुनरुदारधीः ।
बाढमित्येवगाधेयो वसिष्टं प्रत्युवाच ह ॥ १९ ॥
यथाप्रियं भगवतस्तथास्तु मुनिपुंगव ।
[8]एवमुक्तो महातेजा वसिष्ठो जपतां वरः ॥ २० ॥
आजुहाव ततः प्रीत्या[9]कल्मषां धूतकल्मषः ।
एह्येहि शवले क्षिप्रं शृणु[10]चैव वचो मम ॥ २१ ॥
सबलस्यास्य राजर्षेः कर्तुं व्यवसितो[11]ह्यहम् ।
भोजनेन महार्हेण सत्कारं [12]तद्विधत्स्व मे ॥ २२ ॥
[13]यस्य यस्य यथा कामः षड्रसेष्वभिवाञ्छितः ।

---

1. G. 15 पूजा चानेन मे कृता B. 15. पूजा वाक्येन मे त्वया. 2. B. 16. विद्यते यत्तवाश्रमे. 3. B. 17 सर्वथा च महाप्राज्ञ पूजार्हेण सुपूजितः ॥ 4. B. 17. नमस्तेऽस्तु गमिष्यामि &c., but V and S have गमिष्यामि नमस्तेऽस्तु &c. 5. S. ब्रुवाणं &c. 6. B. 18. हि. 7. B. 18. न्यमंत्रयत धर्मात्मा &c. 8. B. 20. एवमुक्तस्तथा तेन &c. 9. G. 20. कामदां धूतकल्मषां; P. कल्माषां धूतकल्मषः; B. 20. कल्माषीं धूतकल्मषां. 10. B. 21. चापि &c. 11. B, 21....स्म्यहं. 12. B. 22. संविधत्स्व. 13. B. 22. यस्य यस्य यथाकामं षड्रसेष्वभिपूजितं ॥

तत्सर्वं कामधुग् [1]दिव्यमभिवर्षेह मत्कृते ॥ २३ ॥
[2]रसैरन्नेन पानेन चोष्यलेह्येन सत्वरम् ।
कुरु राज्ञोऽस्य शबले परमातिथ्यसत्क्रियाम् ॥ २४ ॥

इत्यार्षे रामायणे आदिकाण्डे बालचरिते शतानन्द-
वाक्ये विश्वामित्रनिमन्त्रणम् ।

LIV.

एवमुक्ता वसिष्ठेन शबला शत्रुसूदन ।
विदधे कामधुक् कामान् यस्य [3]यस्य यदीप्सितम् ॥१॥
[4]इक्षून् मधु च लाजांश्च मैरेयञ्च वरासवम् ।
पानानि च महार्हाणि भक्ष्यांश्च विविधांस्तथा ॥२॥
[5]रसाढ्यानोदनस्यापि राशीन् पर्वतसन्निभान् ।
मृष्टान्नानि तथापूपान् दधिकुल्यास्तथैव च ॥ ३ ॥
[6]नाना स्वादुरसानाञ्च षड्रसानामितस्ततः ।
भाजनानि सुपूर्णानि [7]गौडानाञ्च सहस्रशः ॥ ४ ॥

---

1. G. 23. दिव्ये अभि(a)वर्षेह &c. (a) P. वर्षंच &c. B. 23. दिव्ये अभि वर्ष कृते मम. 2. For this Sl. B. 23 रसेनान्नेन(a) पानेन लेह्यचोष्येण संयुतं ॥ अन्नानां निचयं सर्वं सृजस्व शबले त्वर ॥ (a)V. पेयेन &c. 3. B. LIII. 1. यस्येप्सितं यथा. 4. B. 2. इक्षून्मधूंस्तथा लाजान्मैरेयांश्च वरासवान् । पानानि-च महार्हाणि भक्ष्यांश्चोच्चावचानपि ॥ 5. G. 3. चोष्याढ्यमोदनस्यापि &c. P. चोष्यढ्यस्यौदनस्यापि &c.; B. 3. उष्णाढ्यस्यौदनस्यात्र राशयः पर्वतोपमाः । मृष्टान्यन्नानि(a) सूपांश्च दधिकुल्यास्तथैव च ॥ (a) S. सूपाश्च &c. 6. B. 4. नानास्वादुरसानां च खांडवानां तथैव च । (a) भोजनानि सुपूर्णानि गौड़ानि च सहस्रशः ॥ (a)V. भाजनानि &c. 7. G. 4. गौड़ानि च &c., but P. has गौड़ानाञ्च &c.

सर्वमासीत् सुसन्तुष्टं हृष्टपुष्ट[1]जनाकुलम् ।
विश्वामित्रबलं राम[2]वसिष्ठेनाभितर्पितम् ॥ ५ ॥
[3]यस्य यस्य यथा कामस्तस्य तस्य तथा तथा ।
अभिवर्षति कामैाघैः शबला शत्रुसूदन ॥ ६ ॥
[4]एवमस्य बलं सर्वं सर्वकामाभिपूजितम् ।
[5]विश्वामित्रस्य राजर्षेर्हृष्टपुष्टं [6]तथाभवत् ॥ ७ ॥
सान्तःपुरजनो राजा सब्राह्मणपुरोगमः ।
[7]सामात्यमन्त्रिसहितः सभृत्यबलवाहनः ॥ ८ ॥
युक्तः परेण हर्षेण वसिष्ठमिदमब्रवीत् ।
पूजितोऽहं त्वया ब्रह्मन् [8]पूजनार्हेण कामद ॥ ९ ॥
श्रूयतामभिधास्यामि वाक्यं वाक्यविशारद ।
गवां शतसहस्रेण दीयतां शबला मम ॥ १० ॥
रत्नं हि भगवन्नेतद् [9]रत्नभागी च पार्थिवः ।
तस्मान्मे शबलां देहि ममैषा धर्मतो द्विज ॥ ११ ॥
एवमुक्तस्तु भगवान् वसिष्ठो मुनि[10]सत्तमः ।
विश्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिम् ॥ १२ ॥

---

1. B. 5. जनायुतं 2. B. 5. वसिष्ठेन सुतर्पितं. 3. This Sl. is wanting in B. 4. This line also, is wanting in B. 5. For this, and the following line, B. 6. विश्वामित्रो हि राजर्षि हृष्टपुष्टस्तदाभवत्। सांतःपुरवरो राजा सब्राह्मणपुरोहितः॥ 6. G. 7. तदा &c. 7. For this, and the following line. B. 7. सामात्यो मंत्रिसहितः सभृत्यः पूजितस्तदा। युक्तः परमहर्षेण &c. ॥ 8. B. 8. पूजार्हेण सुसत्कृतः। 9. B. 9. रत्नहारी &c.. 10. B. 10. पुंगवः.

नाहं शतसहस्रेण नापि कोटिशतैर्गवाम् ।
राजन् दास्यामि शबलां राशिभी रजतस्य वा ॥ १३ ॥
न परित्यागमर्हेयं मत्सकाशादरिन्दम ।
शाश्वती [1]शबलेयं मे कीर्तिरात्मवतो यथा ॥ १४ ॥
[2]अत्र हव्यं च कव्यं च प्राणयात्रा तथैव च ।
आयत्तमग्निहोत्रं च [3]बलिहोमन्तथैव च ॥ १५ ॥
स्वाहाकारवषट्कारौ विद्याश्च विविधास्तथा ।
[4]आयत्ता ह्यत्र राजर्षे सर्व एते न संशयः ॥ १६ ॥
सर्वमेतद्धि सत्यं ते ममपुष्टिकरं सदा ।
कारणैर्बहुभी राजन् न दास्ये[5]नन्दिनीं तव ॥ १७ ॥
वसिष्ठेनैवमुक्तस्तु विश्वामित्रोऽ[6]ब्रवीद्वचः ।
संरब्धतरमत्यर्थं वाक्यं वाक्यविशारदः ॥ १८ ॥
[7]सुवर्णकत्तान् ग्रैवेयान् सुवर्णाङ्कुशभूषणान् ।
ददामि कुञ्जरांस्तेऽहं सहस्राणि चतुर्दश ॥ १९ ॥
हैरण्यानां रथानां च [8]श्वेतानां वै चतुर्युजाम् ।
ददामि ते शतान्यष्टौ [9]किङ्किणीशतघोषिणाम् ॥२०॥

---

1. B. 13. शबला मह्यं &c. 2. B. 13. अस्यां &c. 3. B. 14. and G. 14. बलिर्होमस्तथैव च; but P. has बलिहोमन्तथैव च. 4. For this and the following line B 15. आयत्तमत्र राजर्षे सर्वमेतन्न संशयः । सर्वस्वमेतत्सत्येन मम तुष्टिकरी तथा ॥ 5. B. 16. शबलां &c. 6. B. 16. ब्रवीत्तदा. 7. For this Sl. B. 17-18. हैरण्यकक्षग्रैवेयान् सुवर्णांकुशभूषितान् ॥ ददामि कुंजराणां ते सहस्राणि &c. 8. B. 18. श्वेताश्वानां &c. 9. B. 19. किंकिणीकविभूषितान्.

हयानां देशजातानां कुलजानां महौजसाम् ।
सहस्रमेकं दश च ददामि तव सुव्रत ॥ २१ ॥
नानावर्णविभक्तानां वयःस्थानां तथैव च ।
ददाम्येकां गवां कोटिं[1] दीयतां शबला मम ॥ २२ ॥
[2]एवमुक्तः स भगवान् विश्वामित्रेण धीमता ।
नैव दास्यामि शबलामिति राजानमब्रवीत् ॥ २३ ॥
एतदेव हि मे रत्नमेतदेव हि मे धनम् ।
एतदेव हि सर्वस्वमेतदेव [3]च जीवितम् ॥ २४ ॥
दर्शश्च पौर्णमासश्च यज्ञाश्चैवाप्तदक्षिणाः ।
एतदेव हि मे राजन्[4] क्रियाश्च विविधास्तथा ॥ २५ ॥
[5]एतन्मूलाः क्रियाः सर्वा मम राजन् न संशयः ।
बहुना किं प्रलापेन न दास्ये कामदोहिनीम् ॥ २६ ॥

इत्यार्षे रामायणे बालचरिते शतानन्दोपाख्याने
वसिष्ठविश्वामित्रसंवादः ।

LV.

[6]कामधेनुं वसिष्ठोऽसौ न तत्याज यदा मुनिः ।
ततोऽस्य शबलां राजा विश्वामित्रस्तदा[7]नयत् ॥ १ ॥

1. B. 21. शबला दीयतां &c. Between this, nnd the next Sl. of our text. B. (21-22) यावदिच्छसि रत्नानि हिरण्यं वा द्विजोत्तम ॥ तावद्ददामि ते सर्वं दीयतां शबला मम । 2. For this Sl. B. 22-23. एवमुक्तस्तु भगवान् विश्वामित्रेण(a)धीमतः ॥ नदास्यामीति शबलां प्राह राजन् कथंचन । (a) V and S. धीमता. 3. B. 24.and G. 24. हि &c. 4. B. 25, विविधाश्च क्रियास्तथा. 5. B. 25. अतो मूलाः &c. 6. For this Sl. B. LIV. 1. कामधेनुं वसिष्ठोऽपि यदा न त्यजते मुनिः तदाऽस्य शबलां राम विश्वामित्रोन्वकर्षत ॥ 7. G. LV. 1. हरत्.

नीयमाना तु शबला[1] तेन राज्ञा महात्मना ।
[2]ध्यायन्ती चिन्तयामास[3] रुदती शोकविह्वला ॥ २ ॥
परित्यक्ता वसिष्ठेन किमहं सुमहात्मना ।
याहं राज[4]भृतैर्दीना[5] ह्रियेय परमदुःखिता ॥ ३ ॥
किं मयापकृतं[6] तस्य महर्षेर्भावितात्मनः ।
यन्मामनागसं[7] शिष्टां भक्तां त्यजति धार्मिकः ॥ ४ ॥
इतिसंचिन्तयित्वा तु निःश्वस्य च पुनः पुनः ।
[8]प्रययावथ वेगेन वसिष्ठं प्रति राघव ॥ ५ ॥
[9]निर्धूय तान् राज[10]भृतान् शतशोऽथ सहस्रशः ।
जगामानिलवेगा सा पादमूलं महात्मनः ॥ ६ ॥
[11]गत्वा च रुदती शोकादिदं वचनमब्रवीत् ।
वसिष्ठस्याग्रतः स्थित्वा[12] हम्बारवविराविणी ॥ ७ ॥
भगवन् किं परित्यक्ता त्वयाहं ब्रह्मणः सुत ।
[13]यन्मां राजभृता[14] एते नयन्ति त्वत्सकाशतः ॥ ८ ॥

---

1. B. 2. राम &c. 2. B. 2. दुःखिता चिंतयामास(a)रुदतो शोककर्शिता ॥ (a) V रुदंती &c. 3. G. 2. रुदन्ती, but P. has रुदती. 4, G. 3. भटै &c. but P. has भतै &c. 5. B. 3 (a) ह्रियेय भशदुःखिता. (a)V. and S. ह्रियेयं &c. 6. P. कर्म्म &c. 7. G. 4. स्विष्टां &c, but P. has शिष्टां &c., B. 4. दृष्ट्वा &c. 8. G. 5. प्रययौ साथ &c. For this line B. 5. जगाम वेगेन तद-वसिष्ठं परमौजसं ॥ 9. B. 6. निर्धूय तांस्तदा भत्यान् शतशः शत्रुसूदन-जगामानिलवेगेन etc. ॥ 10. G. 6. भत्यान् etc. 11. For this Sl. B. 7. शबला सा रुदंती च क्रोशंती चेदमब्रवीत् । वसिष्ठस्याग्रतः स्थित्वा रुदंती मेघनि-स्वना ॥ 12. G. 7. हम्भा etc. 13. B. 8. यस्माद्राजभटा मां हि नयंते त्वत्सका-शतः ॥ 14. P. यचेते etc..

पर्णेनान्यत्रादृष्टस्यापि द्वित्वादिनाश इव द्रव्यविनाशो ऽपि तस्य हेतुत्वात् । न चैवं ज्ञानस्य नियतक्षणसत्ता न स्यादिति वाच्यम् । घटादिवद्वृत्तेरपि द्रव्यत्वाद्यावद्विनाशकारणासमवधानमवस्थानस्येष्टत्वात् । ननु वृत्तेः कार्यद्रव्यत्वे कथं तस्यात्मवृत्तित्वमिति चेदात्मन्यध्यासादिति ब्रूमः । तस्मात्प्रत्यक्षानुमानसिद्धं वृत्तिरूपं ज्ञेयात्मकं ज्ञानमेकमन्यच्चाहङ्कारतद्वृत्तितदभावानुसन्धानान्यथानुपपत्तिप्रमेयमिति सिद्धम् ।

स चानुभवो ऽनादिः ।

ननु वृत्तेर्द्रव्यत्वे समवायिनाशाद्वा तन्नाशः स्यान्निमित्तनाशाद्द्रव्यनाशादर्शनादिति चेन्न । कारणत्रैविध्यानङ्गीकारेणोपादानातिरिक्तकारणमात्रस्य निमित्तत्वात्प्रारब्धकर्मनाशे शरीरनाशदर्शनाच्चेत्यभिप्रेत्याह । न चेति । कारणत्रैविध्यमङ्गीकृत्यापि गुणनाशवद्द्रव्यनाशस्याप्यन्यत्रादृष्टं निमित्तविनाशजन्यं क्वचिदगत्याङ्गीकर्त्तव्यमित्याह । कारणान्तरेति । एवं तर्हि धारास्थले यावदिन्द्रियसंयोगमेकस्यैव ज्ञानस्य स्थायित्वापत्तिरित्याशङ्क्याह । न चैवमिति । वृत्तेर्द्रव्यत्वे स्पर्शशून्यात्मनस्तदाश्रयत्वायोगादृष्टत्वानुपपत्तिरिति चोदयति । ननु वृत्तेरिति । वास्तवाधारत्वस्यात्मन्यभावादवास्तवस्य च जगन्मात्राधिष्ठाने तस्मिन्ननुपपत्त्यभावादिति परिहरति । आत्मनीति । वृत्तितत्साक्षिरूपज्ञानद्वयनिरूपण-

मुपसंहरति । तस्मादिति । जानामीत्यनुभवः प्रत्यक्षप-दार्थः । इन्द्रियसंयोगे सत्यजायमानेत्यादिप्रयोगो ऽनुमा-नपदार्थः । साक्षिरूपज्ञानस्यात्माभेदसिद्धये कार्यत्वमपा-करोति । स चानुभव इति । कार्यत्वे प्रमाणाभावादिति शेषः ॥

रूपादिविषयप्रकाशानां प्रागभावप्रतियोगित्वादेरनु-भूयमानत्वात्तत्र मानाभावो ऽसिद्ध इति चोदयति । स्यादेतदिति ।

(अनुभवस्यानादित्वे पूर्वपक्षः) स्यादेतत्, द्रक्ष्यामि श्रोष्यामि चेति प्रागभावप्रतियोगित्वं विज्ञानानामनुभूयते । विद्यमानप्रागभावप्रतियोगित्वस्यैव लृडर्थ-त्वात् । तदेव च कार्यत्वं ज्ञानमुत्पन्नमिति चोत्पत्तिः । न चानुभवोत्पत्तौ कारणाभावः । चक्षुराद्यन्वयव्यतिरेकानुविधानादनुभवस्यैत-स्यैव तत्कारणत्वात् ॥

लृट तशब्दस्य भविष्यदर्थत्वात्तत्प्रयोगमूलानुभव स्यापि स एवार्थ इत्यभिप्रेत्याह । विद्यमानेति । अनु-भवस्य प्रागभावप्रतियोगित्वे ऽपि कथं कार्यत्वमित्यत आह । तदेव चेति । स्पष्टमेवोत्पत्तिरप्यनुभूयत इत्याह । ज्ञानमुत्पन्नमिति । उत्पादकाभावादुत्पाद्यनुभवो भ्रम इत्याशङ्क्याह । न चानुभवेति ॥

ननु यथा गुरुमते रूपं नष्टमित्याद्यनुभवस्य तत्सम्ब-न्धविषयत्वमेवमत्रापीत्यत आह । न चैतत्सर्वमिति ।

नचैतत्सर्वं ज्ञानविषययोः सम्बन्धस्येति वाच्यम् । सम्बन्धो हि विषयचैतन्येन तादात्म्यं, संयोगो वा । नाद्यः तस्य तदुत्पत्तिसमकालोत्पत्तिकत्वात् । स्थिते ऽपि विषयज्ञाने कादाचित्कत्वादिप्रतीतेः । न हि कश्चित्तटस्थः संस्तदात्मतां गच्छति, युतसिद्धत्वात् । नापि द्वितीयः घटादेः स्वोत्पत्त्यनन्तरमेवाकाशेनेव चैतन्येनापि संयुक्तत्वात् । चैतन्यघटयोः क्रियापूर्वसंयोगे च निश्चले घटे क्रियावतश्चैतन्यस्य परिच्छिन्नत्वादिप्रसङ्गात् । अस्तु तर्हि वृत्तिविषया कादाचित्कत्वादिप्रतीतिरिति चेन्न । वृत्त्यतिरिक्तस्फुरणेऽपि किञ्चित्कालसम्बन्धित्वादिप्रतीतेः । अन्यथान्धादेरपि रूपादिगोचरकृतिप्रसङ्गात् । न चाविद्यावृतं स्फुरणं न कृतिहेतुरविद्याया एव तत्प्रतिबन्धकत्वादिति वाच्यम् । तथापि सर्वदा व्यवहारप्रसङ्गात् । स्फुरणात्मकाविद्यानिवृत्तेस्तव मते सर्वदा सत्त्वात् । स्फुरणं कार्यं, अनित्यभावत्वात्, ततो नानादिरनुभव इति ॥

ज्ञानज्ञेययोः सम्बन्धस्य तादात्म्यरूपत्वे तस्य सम्बन्धिना सहैवोत्पत्तिनियमादागन्तुकत्वन्न स्यादित्याह । नाद्य इति । तर्हि विषयेण सहैवोत्पद्यतां तत्राह । स्थिते-

ऽपीति। नन्वसंसृष्टसम्बन्धिद्वये स्थित एव पश्चान्निमित्तान्त रात्तादात्म्यं किं न स्यादित्यत आह । न हि कश्चिदिति। युतसिद्धसम्बन्धस्य संयोगत्वपक्षे किं संयोगजः संयोग उत कर्मजः । आद्ये घटादेः स्वावयवचैतन्यसंयोगात्स्वचैतन्यसंयोगस्य स्वस्थितिक्षण एव सिद्धत्वात्तदर्थं चक्षुराद्यपेक्षा न स्यादित्याह।नापि द्वितीय इति । द्वितीये तु चैतन्यकर्माधीनः संयोगो निश्चले विषये वक्तव्यस्तथा च प्रत्यक्षचैतन्यस्य मध्यमपरिणामित्वकार्यत्वादिप्रसङ्ग इत्यभिप्रेत्याह । चैतन्यघटयोरिति । ननु स्फुरणव्यतिरिक्तवृत्तेः साधितत्वात्तद्विषयमेतत्सर्वमिति चोदयति । अस्तु तर्हीति । इदानीं न स्फुरतीति प्रतीतेः स्फुरणस्याप्यनियतत्वमित्याह । न वृत्त्यतिरिक्तेति। स्फुरणनित्यत्वे वाधकमाह । अन्यथेति। अन्धादेः प्रतिबन्धकसत्त्वान्न कृतिरित्याह । न चाविद्येति । तव मते आरोपिताभावस्याधिष्ठानमात्रत्वादन्धादेः प्रतिबन्धकाभावस्य सत्त्वाद्रूपाद्युपादानं स्यादित्याह। तथापीति। अनित्यत्वे प्रत्यक्षमुक्त्वा कार्यत्वे ऽनुमानमाह । स्फुरणमिति ॥

स्फुरणोत्पादकानिरूपणान्न तस्यानित्यत्वादेकं प्रामाणिकमिति दूषयति । न तद्धेतोरिति ।

(तदुत्तरम्) न तद्धेतोरनिरूपणात् । न तावच्चक्षुरादिस्फुरणहेतुः । वाह्यमात्रगोचरचक्षुरादेरहमर्थसाधारणस्फुरणाहेतुत्वात् । ज्ञानधाराकालीनस्फुरणस्य युगपदनेकज्ञानाजनकचक्षुराद्यजन्यत्वाच्च । अत एव चक्षुराद्यन्वयव्यतिरेक-

योर्वृत्तिविषयत्वम् । नापि मनः । असाधारण-प्रमाकरणसहकृतस्यैव मनसो ज्ञानहेतुत्वात् ॥

किं तत्र बाह्येन्द्रियं हेतुरुत मनः किं वोभयम् ? आद्ये त्रिपुटीप्रत्यक्षत्वस्य निरासेनाहमर्थस्फुरणं न स्यादित्याह। न तावदिति। धाराविषयकस्य स्फुरणस्याभावापत्तेस्तत्तद-नुसन्धानं च न स्यादित्याह। ज्ञानधारेति। क्व तर्हि बाह्येन्द्रि-योपयोग इत्यत आह। अत एवेति। द्वितीयं दूषयति। नापीति। मनसोऽकरणत्वादन्यदसाधारणं कारणं वक्तव्यं तदान्तरज्ञाने न सम्भवतीत्याह। असाधारणेति ॥

तृतीयं शङ्कते नन्विति।

मानसं स्फुरणमपि (बाह्यसाधकम् ।)

ननु बाह्यविषयेतथा, आन्तरज्ञानं मन एव जनयिष्यतीति चेन्न । घटादिस्फुरण-स्याप्यहमर्थस्फुरणाभिन्नस्य बाह्यगोचरत्वात् । स्फुरणाभेदश्च धर्मिग्राहकमानसिद्धो घटाद्य-परोक्ष्यान्यथानुपपत्तिसिद्धश्च । वक्ष्यते च विस्तरेण । किञ्च स्फुरणस्यापि मनो जन्यत्वे ऽनुसन्धेयज्ञानसमानकालीनत्वानुपपत्तिर्ज्ञानद्व-यस्यैागपद्यायोगात् । ततश्च ज्ञानकादाचित्क-त्वाद्यनुभवो वृत्तिविषयो न तु तत्साक्षिस्फुर-णविषयः । जन्यज्ञाने ऽनुव्यवसायस्य विषय-त्वयोः स्वप्रकाशत्वस्य च निरासेनादिज्ञानं

विना ज्ञानमुत्पन्नं कादाचित्कमित्यादिप्रतीत्यनुपपत्तेश्च। न च स्फुरणस्य कादाचित्कत्वानभ्युपगमेऽन्धस्यापि रूपादिप्रवृत्तिप्रसङ्ग इति वाच्यम्। किं स्फुरणविरहो वृत्त्या गृह्यते स्फुरणेन वा। नाद्यः केवलवृत्तेर्जडतया तदभावाव्यवस्थापकत्वात्। न द्वितीयः। स्फुरणैक्यस्योक्तत्वाद्वक्ष्यमाणत्वाच्च॥

बाह्यविषयज्ञाने मनःसहकृतं चक्षुरादिहेतुरहमर्थादिस्फुरणे मन एव हेतुरित्यर्थः। बाह्यान्तरविषयस्फुरणाभेदे सत्येवं स्यान्न च सोऽस्ति प्रमाणाभावादिति दूषयति। न घटादीनि। अभेदश्च लाघवानुगृहीतानुसन्धानाद्यनुपपत्त्यादिप्रमाणसिद्ध इत्याह। स्फुरणाभेदश्चेति। अनुभवैकत्ववादे चेदं निरूपयिष्यते इत्याह। वक्ष्यत इति। मनसः करणत्वमङ्गीकृत्यापि स्फुरणस्य तज्जन्यत्वं न सम्भवतीत्याह। किञ्चेति। स्फुरणोत्पत्त्यसम्भवादनित्यत्वाद्यनुभवस्तदविविक्तवृत्तिविषय इत्याह। ततश्चेति। नित्यानुभवानङ्गीकारे ज्ञानोत्पत्त्यादिरेव न सिध्येदनुव्यवसायादेर्निरस्तत्वादित्याह। जन्यज्ञान इति। स्फुरणनित्यत्वे चोक्तं बाधकमपवदति। न च स्फुरणस्येति। किमन्धादेः प्रवृत्त्यापादनेन स्फुरणाभावः सिसाधयिषित उत प्रवृत्त्यभावस्य गतिःपृच्छते। आद्ये तद्ग्राहकं विकल्पयति। किमिति। वृत्तेश्चक्षुरादितुल्यतया तन्मात्रेण नाभावसिद्धिरित्याह। नाद्य इति। स्फुरणभेदाभावान्न द्वितीयोपीत्याह। न द्वितीय इति॥

स्फुरणभेदमङ्गीकृत्यापि किं स्फुरणकादाचित्काभावः प्रतियोगिनैव गृह्यते उतान्येनेति विकल्प्याद्ये अभावप्रतियोगिनोर्यौगपद्यासम्भवान्न तेन तद्ग्रह इत्याह । तद्भेदेपीति ।

(स्फुरणभेदेऽपि न स्वार्थसिद्धिः ।) तद्भेदेऽपि न तावत्प्रतियोगिस्फुरणेन तदभावग्रहः । तस्य स्वाभावकालेऽसत्त्वात् । स्वसत्ताकाले च स्वाभावस्य विरहात् । नाप्यन्येन । स्वयम्प्रकाशस्फुरणस्य स्फुरणान्तरागोचरत्वात् । घटस्फुरणकालीनतदितरस्फुरणाभावानुभवस्य कादाचित्कत्वे स्फुरणद्वययौगपद्यप्रसङ्गाच्च । तदानीं तदितरस्फुरणाभावानुभव एव नेति वाच्यम् । अग्रे तत्प्रतिसन्धानदर्शनात् । तस्माद्वृत्तिविरह एव भेदाग्रहात्स्फुरणविरहत्वेनानुभूयते । अबोध एव वान्धादेः । सत्यपि नित्यस्फुरणे तदावरणस्यैव प्रतिबन्धकत्वान्न प्रवृत्तिः । आत्मैवाविद्यानिवृत्तिरिति मते तस्याः सदा सत्त्वे ऽप्यारोपिताविद्याया अपि सत्त्वेन व्यवहारानुदयात्प्रतिबन्धासहकृततदभाव एव हि कार्यानुकूलः । अन्यथा मण्याद्यन्योन्याभावे ऽपि कार्यं स्यात् । न

चात्मारोपितविद्याविरोधी तस्मिन्सत्यपि तदनुभवात् । अभावस्य स्वसमानसत्ताकप्रतियोगिविरोधित्वाच्च ॥

द्वितीये प्रतियोगिग्रहाभावे ऽभावग्रहायोगात्तस्यापि ग्रहो वाच्यः, स च नोपपद्यते स्वप्रकाशस्फुरणस्य स्फुरणान्तरागोचरत्वादित्याह । नाप्यन्येनेति । न च विशिष्टं तत्स्फुरणविषय इति वाच्यम् । तस्य वृत्तिविषयत्वे ऽपि स्फुरणाविषयत्वादिति भावः । किञ्च घटस्फुरणकाले तदितरस्फुरणाभावो ऽनुभूयते न वा । आद्ये स्फुरणद्वये यौगपद्यमसम्भवीत्याह । घटस्फुरणेति । द्वितीये तदभावानुसन्धानानुपपत्तिरित्याह । न च तदानोमिति । कस्तर्ह्येतावन्तं कालं नास्फुरदित्यनुभवविषय इत्याशङ्क्यैतावन्तं कालमहमिह नासमिति ज्ञानस्य देहाभाव इव स्फुरणतादात्म्यापन्नवृत्त्यभाव एव विषय इत्याह । तस्माद्वृत्तिविरह इति । अविद्यायाः स्फुरणाभावत्वात्सैव वा विषय इत्याह । अबोध एव वेति । गतिःपृच्छत इति कल्पस्योत्तरमाह । अन्धादेः सत्यपीति । तर्ह्यात्मरूपाविद्यानिवृत्तेरपि सत्त्वाद्व्यवहारः स्यादित्यत आह । आत्मैवेति । तत्रापपत्तिमाह । प्रतिबन्धेति । प्रतिबन्धकालान्यकालीन एव तदभावः प्रतिबन्धकार्यानुकूल इत्यर्थः । प्रतिबन्धकालीनस्य तदभावस्यानुकूलत्वे बाधकमाह । अन्यथेति । न च संसर्गाभाव एवानुकूल इति वाच्यम् । प्रागभावाद्यनुगतसंसर्गाभावत्वस्यैकस्याभावात् । प्रतियोगिविरहात्मन एव प्रतिबन्धकाभावस्य कार्यानुकूलत्वोत्पत्ति-

प्रतिबन्धकदशायां तदभावाच्चेति भावः । नन्वात्मनोऽविद्यानिवृत्तिरूपत्वेऽविद्याग्रस्ततत्समानकालत्वं तदाश्रितत्वं च विरुद्धमित्याशङ्क्य समानसत्ताकत्वाभावान्न विरोध इत्याह । न चात्मेति ॥

नास्फुरदित्यनुभवस्य वृत्त्यभावविषयत्वेनोक्तेरनित्यत्वमसिद्धमित्याह । तदसदिति ।

(अनित्यभावत्वादित्यनुमानमसत् ।) यच्चानुमानमनित्यभावत्वादितितदसत् । विशेषणासिद्धेः । साक्षिज्ञानस्य च पक्षत्वे बाधः । तद्धेतुत्वनिरूपणस्योक्तत्वात् । वृत्तेः पक्षत्वे सिद्धसाधनम् । एतेन हेतुव्यावृत्तौ ज्ञानमपि व्यावर्तते, अकारणककार्यानुत्पत्तेः । ज्ञानं सहेतुकमेवेति नियमविरोधाच्चेति परास्तम् । कारणव्यावृत्त्या हि कार्य्यमेव व्यावर्तते न त्वकार्यमतिप्रसङ्गात् । नापि ज्ञानस्य सहेतुकत्वनियमः अप्रयोजकत्वात् । उक्तप्रतिकूलतर्कपराहतत्वात् । तस्माच्चक्षुराद्यन्वयव्यतिरेकाभ्यां कादाचित्कत्वानुभवाच्च रूपादिविषयान्तःकरणवृत्तिर्जायते, चक्षुरादिकं च तत्रैव कारणं, तत्साक्ष्यनुभवस्तु न कादाचित्कत्वानुभवगोचरो, न वा चक्षुराद्यन्वयव्यतिरेकानुविधायीति नित्योऽयम-

नुभवः, अनादिभावत्वादात्मवत्, व्यतिरेकेण, घटवद्वा । न चाविद्यायां व्यभिचारः । भावविलक्षणायां तस्यां हेतोरभावात् ॥

किं साक्षिज्ञानं पक्षः, वृत्तिज्ञानं वा । उभयथाप्यनुपपत्तिरित्याह । साक्षीति । स्फुरणस्य नित्यत्वादकारणककार्योत्पत्तिदोषो ऽपि परास्त इत्याह । एतेनेति । स्फुरणं सहेतुकं जैवज्ञानत्वाद्वृत्तिज्ञानवदित्याशङ्क्याह । नापीति । जैवज्ञानत्वं जीवसमवेतज्ञानत्वं चेदसिद्धिः, जीवव्यवहारहेतुभूतज्ञानत्वं चेज्जीवस्वरूपज्ञानस्यापि तदुपपत्तेरप्रयोजकत्वमीश्वरज्ञाने व्यभिचारश्चेत्यर्थः । कारणस्यासम्भवादप्ययुक्तमिदमित्याह । उक्तेति । प्रसाधितस्फुरणानादित्वमुपसंहरति । तस्मादिति । अनादेरप्यनुभवस्याविद्यावदनित्यत्वाशङ्कायामाह । नित्योऽयमिति । परमतानुसारेणान्वयदृष्टान्तः व्यतिरेकदृष्टान्तःस्वमतेनेति दृष्टव्यम् । सत्यत्वस्य भावत्वस्याविद्यायामभावान्न तत्र व्यभिचार इत्याह । न चाविद्यायामिति ॥

उक्तानुमानस्य प्रतिकूलतर्कपराहतिं शङ्कते । स्यादेतदिति ।

(अनुकूलतर्कपराहतमनित्यभावत्वादित्यनुमानम् ।) स्यादेतत्, स्फुरणस्य नित्यत्वे कथमहङ्काराद्यनुसन्धानं संस्कारस्यानित्यज्ञानजन्यत्वनियमात् । न चाहमाकारवृत्तिविनाशात्संस्कार इति वाच्यम् । तस्या घटज्ञानधारा-

कालेऽनुदयात् । तथा सति ज्ञानद्वययौगपद्यप्रसङ्गात् । न चान्यकालीनात्मविषयवृत्त्यान्यकालीनात्मानुसन्धानं भवति । न चान्यविषयवृत्त्या तत्कालीनात्मसंस्कारो युज्यते तस्याः स्वविषय एव संस्कारजनकत्वादिति चेत् ।

दुःखयहमासमित्यादिप्रत्ययस्य संस्कारजन्यत्व वाच्यम्, संस्कारश्चाहमर्थज्ञानस्य नित्यत्वे ऽनुपपन्नस्तत्स्वरूपस्यैव संस्कारत्वादित्यर्थः । चैतन्यस्य नित्यत्वे ऽप्यहमिति वृत्तिविनाशात्संस्कार इत्याशङ्क्य घटधाराकालीनाहमर्थे सापि न सम्भवतीत्याह । न चाहमाकारेति । अस्तु तर्हि धारोपरमानन्तरमहमाकारवृत्तिनाशात्तत्संस्कार इत्याशङ्क्य तेनापि धाराकालीनात्मस्मरणानुपपत्तिरित्याह । न चान्येति । तर्हि घटधारयैव तत्कालीनाहमर्थसंस्कार उत्पद्यतामित्यत आह । न चान्यविषयेति ।

घटविषयवृत्त्यैवाहमर्थविषयः संस्कारो जायत इति वक्तुं संस्कारविषयत्वे ऽनतिप्रसक्तं प्रयोजकमाह । न यद्वृत्तीति ।

(अनतिप्रसक्तं संस्कार साधकम् ।)

न, यद्वृत्त्यवच्छिन्नचैतन्ये यत्प्रकाशते तद्गोचर एव वृत्त्या संस्कारो जन्यते न तु वृत्तिगोचर एवं स्वजनकानुभवे प्रकाशमानत्वप्रयुक्तत्वात्संस्कारगोचरत्वस्य । अन्यथा वृत्तिगोचरसंस्कारस्यापि ततो ऽनुदयप्रसङ्गात् । वृत्तेर्वृ-

त्यगोचरत्वात् । वृत्त्यन्तरस्याप्यनुव्यवसायनिरासेन निरस्तत्वात् । तथा च वृत्तिरूपेण विकसितान्तःकरणाभिव्यक्तचैतन्यप्रतिभास्यत्वादहमर्थवृत्तितद्विषयाणां तदुत्पन्नसंस्कारस्यापि तत्तितयगोचरत्वं युज्यते । न चान्तःकरणमात्राभिव्यक्तचैतन्यादेवाहमर्थप्रतिभासम्भवान्न वृत्तिमदन्तःकरणाभिव्यक्तचैतन्यं तत्साधकमिति वाच्यम् । अन्यप्रतिभास्यस्याप्यन्यप्रतिभास्यत्वाविरोधात्पूर्वज्ञानप्रतिभासस्याप्यन्यज्ञानेन विषयीकरणात् ॥

यद्वृत्त्यवच्छिन्नचैतन्यप्रयुक्तसंशयाद्यगोचरत्वं यावतां तद्वृत्तिनाशजसंस्कारस्तावतामित्यर्थः । एवकारार्थमयोगव्यवच्छेदमाह । न त्विति । वृत्तेर्जडतया स्वतःसंस्काराऽनाधायकत्वात्तदवच्छिन्नप्रकाशप्रयुक्तः संस्कारस्तत्र प्रकाशमानमात्रविषयो न तु विषयतयैव प्रकाशमानविषय इत्याह । स्वजनकेति । स्वयूथ्यान्प्रति विपक्षे बाधकमाह । अन्यथेति । अस्तु तर्हि वृत्तावपि स्वविषयवृत्त्यन्तरेण संस्कार इत्याशङ्क्यानवस्थाप्रसङ्गान्नैवमित्याह । वृत्त्यन्तरेति । तथापि कथं घटज्ञानादहमर्थस्य वृत्त्यभिव्यक्तचैतन्यभास्यत्वमेवासिद्धं स्वजन्ये तदभावे संस्कार इत्यत आह । तथा चेति । चैतन्यप्रतिभास्यत्वादिति । तत्प्रयुक्तसंशयाद्ययोग्यताकत्वादित्यर्थः । अहमर्थस्य वृत्त्यभिव्यक्तचैतन्यभास्यत्वमेवासिद्धं स्वजन्ये तदभावे ऽपि तत्प्रतिभासादि-

त्याशङ्क्य त्वग्ग्राह्यस्य चक्षुर्ग्राह्यत्ववदविरोध इत्याह । न चान्तःकरणेति ॥

एवमप्यहंत्वप्रकारकस्मृतित्वेनुपपत्तिः, संस्कारमूलवृत्तावहंत्वस्याप्रकारत्वादित्याशङ्कामपवदति । न चेति ।

न च तत्प्रकारकस्मृतौ तत्प्रकारकानुभवः कारणं, घटादिवृत्तिश्च नाहंत्वप्रकारिकेति ततो नाहमर्थस्मृतिः स्यादिति वाच्यम् । फलबलात् क्वचिदन्याकारानुभवादन्याकारस्मृतिकल्पने बाधकाभावात् । अननुभूततत्तागोचरस्मृतिवत् गुरुमते ज्ञानगोचरस्मृतिवत्, अस्मन्मते वृत्तिगोचरस्मृतिवच्च वृत्तिमदन्तःकरणावच्छिन्नस्फुरणस्याप्यहमर्थतद्गतवृत्तिसंशयविरोधित्वेन तद्गोचरस्मृतिजनकत्वे तद्गोचरसंशयविरोधिज्ञानत्वस्यैवतन्त्रत्वात्। न तु तद्विषयज्ञानत्वं तत्प्रकारकज्ञानत्वं वा तन्त्रम् । संशयादपि स्मृतिप्रसंगात् । केचित्त्वहमाकारा वृत्तिरस्तु तया चाहमर्थगोचरस्मृतिः । न च ज्ञानयौगपद्याऽनुपपत्तिः । शिरःपादाद्यवच्छेदेनापर्यायोत्पन्नसुखदुःखदर्शनं न समवायिप्रदेशभेदेन युगपद्वृत्तिद्वयस्याविरुद्धत्वात् । न चैवं घटज्ञानधारा-

कालेऽप्यहंशब्दोल्लेखप्रसङ्गः । ज्ञाने शब्दोल्लेखस्यानियतत्वात् । अनुसन्धानस्य तदानीमपि तत्कल्पकस्य सत्त्वात् ॥

यद्यपि वृत्तिं प्रत्यप्रकारत्वेऽप्यहंत्वस्य तदभिव्यक्तसाक्षिणं प्रति प्रकारत्वात्तन्मूला स्मृतिस्तत्प्रकारिका युक्ता तथापि स्मृत्यनुभवयोः समानप्रकारकत्वनियमोऽपि नास्तीत्याह। फलबलादिति। तत्तेदन्तयोरखण्डधर्मत्वमते नाननुभूततत्तेत्युक्तम्। किञ्च स्मृतिजनकज्ञाने तत्समानप्रकारकत्वं कुत्रापि नापेक्षितं किं तु तद्विषयसंशयादिविरोधिज्ञानत्वमेवेत्याह । वृत्तिमदिति । एवकारव्यावर्त्यमाह। न तु तद्विषयेति। तत्र हेतुमाह। संशयादिति। ननु निश्चय एव स्वसमानप्रकारकस्मृतिहेतुरिति चेत्। किं निश्चयत्वं जातिरुत संशयविरोधिज्ञानस्वरूपत्वम् । नाद्यः साक्षात्त्वेन साङ्कर्यात् । द्वितीये स्मृतिसमानप्रकारकत्वं व्यर्थम्, तद्गोचरसंशयविरोधिज्ञाने सति तत्प्रकारकत्वाभावेन स्मृत्यभावादर्शनादित्यभिप्रायः । इदानीं घटज्ञानधाराकालेऽप्यहमाकारवृत्त्यङ्गीकारे बाधकाभावात्तत एव तत्संस्कारोऽवृत्तेर्वृत्त्यन्तरविषयत्वेऽनवस्थापातात्स्वाभिव्यक्तचैतन्ये भासमानत्वमात्रेण स्वजन्यसंस्कारविषयत्वमिति वृद्धानां मतं दर्शयति । केचित्त्विति। समवायिप्रदेशेति। चक्षुराद्यवच्छिन्नाहङ्कारदेशे घटाकारवृत्तिः हृदयावच्छिन्ने चाहमाकारवृत्तिरित्यर्थः। ननु घटधाराकाले ऽहंशब्दोल्लेखाभावान्न तदाकारवृत्तिरित्यत आह। न चैवमिति। वृत्तिसाधकस्याहमिति व्यवहारस्य

तदानीमभावात्कथं तत्सिद्धिरित्याशङ्क्याह । अनुसन्धानस्येति ॥

अहमाकारवृत्त्यङ्गीकारे ऽहमर्थस्य कर्तृतया तन्निर्वर्तकत्वाद्गुणत्वं तज्जन्यफलशालित्वेन कार्यत्वात् प्राधान्यं चेति विरुद्धरूपद्वयापत्तिरित्याशङ्क्याह । न चेति ।

न च कर्तृकर्मविरोधः । अन्तःकरणस्य वृत्त्यधीनफलभागित्वाभावेन वृत्तिं प्रत्यकर्मत्वात् ।

(अहमाकारावृत्तिर्न ज्ञानम् ।) वस्तुतस्त्वहमाकारा वृत्तिर्न ज्ञानम् । स्मृत्यतत्कारणजन्यत्वात्कारणान्तरकल्पने च गौरवात् । ननु मनस्तत्करणमिति चेन्न । मनसस्तदाश्रयस्य तदुपादानतयाऽन्तःकरणत्वात् । अपरोक्षव्यवहारस्तस्या लिङ्गाद्यजन्यत्वात् । लिङ्गादिप्रतिसन्धानशून्यस्याप्यहमित्यनुसन्धानदर्शनात्केवलसंस्कारस्य स्मृतिमात्रहेतुत्वात् । अनुसन्धानहेतुवृत्तिकालीनात्मनःपूर्वमननुभूतत्वात् । अहमर्थगोचरप्रत्यभिज्ञायाश्च तत्रांशे संस्कारजन्यतया ज्ञानत्वात् । अभेदावच्छेदेन ज्ञाने परोक्षत्वापरोक्षत्ववत्प्रमात्वाप्रमात्ववच्च ज्ञानत्वाज्ञानत्वयोरप्यविरोधात् ॥

अहमर्थस्यानावृतत्वेन वृत्तिफलाविद्यानिवृत्तिशालित्वाभावान्न कर्मत्वमित्याह । अन्तःकरणस्येति । अहमर्थस्याकर्मत्वे ऽन्यस्यापि कर्मणोभावादहमाकारवृत्तेर्ज्ञानत्वमेव न स्यादकर्मकज्ञानायोगादित्याशङ्क्येष्टापत्तिरित्याह । वस्तुतस्त्विति । किञ्च ज्ञानत्वे प्रत्यक्षाद्यन्यतमेन भवितव्यम् । न च तदुपपद्यते । प्रमाणषट्काजन्यत्वादित्याह । क्लृप्तेति । तर्ह्यन्यदेव किञ्चित्प्रमाणमस्तीत्यत आह । करणान्तरेति । मनोजन्यत्वात्प्रत्यक्षमेवेति शङ्कते । ननु मन इति । मनसो वृत्तिमात्रं प्रत्युपादानत्वान्न क्वापि करणत्वमित्याह । न मनस इति । यदवोचाम मनसो ऽकारणत्वादिति तदितर एव सिद्धमिति द्रष्टव्यम् । अस्तु तर्हि लिङ्गादिजन्यत्वमित्याशङ्क्य तथात्वे ऽपरोक्षव्यवहारहेतुत्वं न स्यादित्यभिप्रेत्याह । अपरोक्षेति । लिङ्गादिज्ञानाभावेप्यहमिति प्रतीतेर्न तर्ह्यन्यत्वमित्याह । लिङ्गादीति । तर्हि संस्कार एव तत्र करणमित्याशङ्क्य तथात्वे ऽनुभवत्वं न स्यादित्याह । केवलेति । पूर्वानुभवाभावादहमर्थसंस्कारो ऽपि न सम्भवतीत्याह । अनुसन्धानेति । कथं तर्हि सोहमिति प्रत्यभिज्ञाया ज्ञानत्वमित्याशङ्क्य तस्या अपि तत्तांश एव ज्ञानत्वं न त्वहमर्थांश इत्याह । अहमर्थेति । एकत्र ज्ञानत्वाज्ञानत्वे विरुद्धे इत्याशङ्क्य गुरुमते प्रत्यभिज्ञायां परोक्षत्वापरोक्षत्ववद्वैशेषिकादिमते तद्भ्रमे प्रमात्वाप्रमात्ववदंशभेदेन तयोर्न विरोध इत्याह । अंशभेदेति ॥

अहमाकारवृत्तेरज्ञानत्वे ततोर्थप्रकाशो न स्यादिति चोदयति । कथन्तर्हीति ।

also, for the same reason, be regarded as being for the benefit of others.' "

To the the above we make the following reply: What we mean is, not that the expression being 'for the benefit of others,' the Inference also is so, but that the 'five-membered' sentence is for the benefit of others; and in as much as that sentence, through the cognition that it affords of the 'inferential indicative,' becomes the cause or basis of Inference, it is *inferential* in its character.

Obj: Thus too, the inferential character will have to be attributed to that sensuous perception which affords cognition of the 'inferential indicative.' "

Reply: It will not have to be thus attributed; as in the case of sensuous perception we do not find any known word employed.

Note—(1) '*Anvitābhidhāna-vāda*'—The sense of this theory which was propounded by Prabhākara may be thus summarised: The first recognition of the conventional denotation of a word is obtained only from *usage*. This usage can be only in form of the younger man carrying out the instructions of the elder. This instruction is conveyed by means of a sentence, and never by means of a single word. The denotations of the words composing a sentence are necessarily related to one another. Hence it must be admitted that the recognition of the conventional meaning of a word appears only with regard to certain objects, such as are related to certain other objects. Thus then, this relationship being cognised by direct denotation, there can be no need of admitting of a distinct verbal process in the form of *Tātparya* or Import, as representing the meaning of a sentence as apart from the parts composing it.

(2) *Abhihitānvayavāda*. This theory is held by Kumarila Bhatta and others. The sense of this view is that each word of a sentence denotes its own specfie meaning and then on account of the threefold cause—of (1) *Ākānkshā*, 'Requirement,' (2) *Yogyatā*, 'Capability,' and (3) *Sannidhi*, 'Proximity,'—there follows a recognition of the relationship among these words. And thus this recognition of the *relationship*, which would constitute the 'meaning of the sentence,' cannot be regarded as denoted directly by the words themselves. which can be accepted only to bring about the cognition of the meaning of the sentence, through processes other than that of Direct Denotation; and to this may be given the name of 'Tātparya,' 'Import.'

The author next proceeds to describe the five 'members' of the sentence spoken of above—

Text (113): *These members are*—(1) *Pratijnā*, '*Declaration*' *Proposition to be proved* (2) *Apadeça*, *Statement of the inferential indicative or* '*middle term*,' (3) *Nidarçana*, '*Statement of the Major Premiss*,' (4) *Anusandhāna*, '*Statement of the Minor Premiss*,' *and* (5) *Pratyāmnāya*, '*Reiteration of the Conclusion*'.

Of these (1) *the Conclusion is the statement of what is to be proved by means of the Inference, and which is not incompatible with facts. That is to say, it consists in the mere statement of the* '*subject*' *endowed with the property sought to be proved, with a view to point out the substratum of the* '*indicative.*' *As an example of this we have the proposition* '*Wind is a substance.*' (IX—ii—1),

The qualification '*not incompatible, &c.*' *serves the purpose of excluding such propositions as may be contrary to* (1) *Sense-cognition*, (2) *Inference*, (3) *Scriptures regarded as trustworthy by the speaker*, (4) *that which would involve a self-contradiction*, ; *e. g. the proposition* '*Fire is not hot,*' *would be contrary, to sense-cognition* (1); (2) *that* '*ākāça is dense would be contrary to Inference*; (3) *that* '*the Brāhmana ought to drink wine*' *would be* '*contrary to scriptures*'; *and that* '*the effect is ever existing*' *would, for the Vaiçēshika, be contrary to his own theory*; *and* (4) *that* '*word is not expressive*' *would involve a self-contradiction.* (III—i—15).

Commentary.

The word '*punaḥ*' is put in simply by way of ornamentation of speech. Having named the 'members' he states the

definition of the 'conclusion,' and then proceeds to explain that definition. The object which is qualified by the property sought to be proved, is the 'object to be inferred,' also called the '*paksha,*' 'subject' or 'Minor term ;' and the mere statement of this, without the mention of any reasoning, is what is called '*Pratijnā,*' 'Conclusion.' As has been declared by the learned—'the statement constitutes the *pratijnā*, and its subject is the 'paksha.'

Obj : "If mere statement of the proposition, without any reasonings, were the *pratijnā*, then as it would not in any way contribute towards the provingof what is to be proved, it should not deserve being mentioned in the statement of an inferential argument ; as say the *Bauddhas* : 'The *hētu* or the inferential indicative, is that which indicates what is capable (of being indicated) ; and the assertion of the minor term, being incapable (of proving anything), is not capable of proving what is to be proved, even indirectly by the mere mention of what is sought to be proved."

In view of this objection the author has added—'*apadēçavishayam &c.*' the '*apadēça*' is the *hētu*, the inferential indicative, the 'middle' term ; and the conclusion is stated for the purpose of making the 'minor' term the subject, the substratum of the 'middle' term ; as wherever that middle term may be used for the purpose of proving what is to be proved, it is always known to exist in the 'subject' of the conclusion. Further, as the 'inferential indicative' is invariably found to inhere in a certain 'subject,' until this subjeet is mentioned, the 'indicative,' being without substratum, would not be operative; and the indicative being inoperative, what is sought to be proved could not be proved ; hence in as much as the *Pratijñā* serves the purpose of pointing out the 'subject,' it helps by bringing up that which is the substratum of the 'indicative ;' and thus by supplying the substratum for the 'indicative,' it makes this latter operative, and thus becomes a necessary accessory towards the proving of what is sought to be proved. To this

effect, the *Nyāyabhāshya* says: 'If there were no *pratijñā*, the indicative &c. being without substratum would not be operative.'

[Page 235.] *Obj*: "The substratum of the 'indicative' is learnt from the *Upanaya* (and hence the statement of the *Pratijñā* cannot be a necessary factor.)"

Reply:—This is not right; as until there is a statement of the *Pratijñā*, the *Upanaya* also is inoperative. What the *Upanaya* does is to point out the capability of the 'indicative' to qualify the 'subject;' and the person seeking knowledge does not, in the very first instance, require the 'indicative' (or the means of proof); but in as much as it is the most important factor in what is to be proved, when this latter is sought after, the 'indicative' also is sought after for the purpose of proving it; and the capability of this indicative is sought after at the end of all; and hence it becomes necessary first of all to put forward the statement of what is to be proved; and the capability of the indicative does not come to be mentioned first; as at that time it is not wanted.

Obj.:—"The assertion *of the 'subject' being qualified by the property sought to be proved* is self-contradictory; as that which is not yet known (and is sought to be learnt by means of the Inference) cannot serve as a qualification."

Reply:—True; that which is not known cannot be a qualification; but the 'property to be proved' is already known as existing in (qualifying) the *Sapaksha* (the *arrow* in the case in question); and it is put forward in the *Pratijñā* with a view to point out the fact of its qualifying the 'subject,' to the person who denies such qualification. It is for this reason that this 'subject' has the real character of the '*paksha*,' the 'minor' term; specially as even though by itself it is already well known, yet as it is not so well known as qualified by the property sought to be proved, it becomes capable of being pointed out in that character (i. e. as qualified by that

property). Thus too have we the fact of the 'indicative' being a property of the 'subject.' For instance, (in the case of the argument 'Word is evanescent because it is *caused*)' if it were mere *evanescence* by itself (and not as qualifying, *word*) that was sought to be proved, then the 'causedness' qualifying the word could not be a property of the 'subject'; while this discrepancy ceases when the 'evanescence' *of the word* is made the object of to be proved. This has been thus stated by the great teachers: 'This consists in both—the *indicative* and the *indicated*; without either of the two, it would be the *indicated*, and not the *indicative*.'

An instance of *Prātijñā* is next cited : '*Wind is a substance*' ;—in this we have the statement of the conclusion in the above form, wherein *wind* is spoken of as qualified by the character of 'substance,' which is sought to be proved for the benefit of one who, while knowing the wind, does not know that it is a substance.

He proceeds to explain the sense of the . qualification '*avirodhi*,' '*not incompatible*' *&c.* That which the debater wishes to prove is the '*sādhya*'; and it often happens that by mistake he may often wish to prove something that may be contrary to well-recognised facts of sense-perception; and hence if the *Prātijñā* were defined only 'as the particular statement of what is to be proved,' then the character of '*Pratijñā*' would apply even to such statements as would be contrary to well-recognised facts of sense-perception &c.; as a matter of fact nowever no such statement can ever be a *Pratijñā* ; because such a statement would be impossible to prove; and it is with a view to preclude such statements that the author has added the qualification in question. And thus the definition of *Pratijñā* comes to be that it is *the statement of such object to be proved by inference as is not incompatible with well-recognised facts of sense-preception &c.*; and when any object to be thus proved is not found to be so compatible then its statement is not *Pratijñā*.

The sense of all this is that the character of the real *sādhya* does not depend upon the mere whim of the debater; it belongs only to that which *deserves* proof; and that alone is the '*paksha*' the 'subject' or the 'minor term;' and others are only *false pakshas.*

Examples of incompatibility with facts of sense-perception &c:—(1)'*Fire is not hot*'—'not hot' means a negation of heat; and what is negatived is that which is known, and not what is absolutely unknown; as a matter of fact however *heat* can not be found anywhere else except in fire; and the cognition of heat in fire is not *inferential*; as when there is no sensuous cognition, Inference is not operative. And if what is known by sensuous cognition is sought to be negatived by an inference which can be based only upon a fact of sense-perception, then such an inference, being opposed to the fact of Sense-perception, would be set aside by it; because of the objective having been taken up by the sensuous cognition.

Question:—"What do you mean by the objective being *taken up.*"

Answer:—What is meant by the objective of Inference having been taken up by the sensuous cognition is that this latter indicates the object in a manner contrary to that indicated by the former.

Question:—"What happens to the Inference when its objective has been thus taken up?"

Answer:—It cannot appear at all. That is to say, when the sensuous cognition, which appears before any inference on the subject, being of a character that does not make it negatived or mistaken,—has pointed out the *heat* of the fire,—and this heat being thus taken up by this Sensuous Cognition, there can be no correct cognition of the *absence of heat* in it. Any 'reason' that may be brought forward in support of such a 'conclusion' will be set aside by the very fact of its being brought forward to support such an absurd conclusion,

being incapable of bringing about any rightful cognition thereof, on account of its incompatibility with sensuous cognition ; As has been declared—'In a case of opposition between sensuous and inferential cognitions, there can be no room for the latter ; as before the very foundation of the latter came into existence, the objective is taken up by the former.'

Obj.:—"As there is mutual contradiction between the said *Negativing* (of Inference) on the one hand, and the invariable concomitance (on which the Inference is based) on the other —that which is invariably concomitant cannot have any negation (cannot be negatived)."

Reply :—If by 'invariable concomitance' here you mean the tripartite character of the argument, then it is not impossible for it to be negatived ; as for instance, we find in the argument —'fire is not hot, because it is caused.' If however you mean 'invariable concomitance' to consist in that tripartite argument whose objective is not negatived ; and to hold that invariable concomitance is not negatived,—then we quite agree with you. But it is for the purpose of indicating the fact of the objective not being negatived that the author has added the qualification of *compatibility with facts of sense-cognition &c.*

Question :—"To what does incompatibility with sense-cogntion &c. pertain ? Does it pertain to the 'subject' or to the 'reason'? It cannot pertain to the 'subject;' as this always retains its character ; nor can it pertain to the 'reason;' as the 'reason' is always capable of proving its own objective ; and as for other objectives, all things would be equally incompetent. So the incongruousness must pertain to the propounder of the argument ; as it is he who brings forward the Reason for proving something that does not form its objective."

Answer :— If the 'incongruity' be meant to consist in— (1) the absence of the *capability of being cognised* of the fact put forward in the conclusion to be proved, (2) in the pro-

pounding of the argument in support thereof, and (3) the absence of capability (to prove),—then it would apply to the objective (i. e. the 'subject'—to which the first form of the incongruity would apply) and to the instrument (*i.e.* the 'Reason' to which the third form would apply) (as well as to the propounder who would be amenable to the second form).

That 'Ākāça is dense' would be contrary to Inference: that very means of knowledge whereby *Ākāça* is cognised always proves its *eternality* and *nonpartite character*; hence to assert that it has its constituents densely packed would be contrary to the Inference pertaining to the very form of the 'subject.'

That the Brāhmaṇa should drink wine would be contrary to scriptures. The meaning of this proposition would be that wine-drinking by the Brāhmaṇa is not sinful. In support of this conclusion 'milk' would be brought forward as the corroborative 'instance.' And the non-sinful character of *milk-drinking* is cognisable by means of the scriptures consisting of Çrutis and Smṛtis; and hence the same scriptures that would prove the *non-sinful* character of *milk-drinking* would also prove the *sinful* character of *wine-drinking*; and thus the declaration of the propriety of wine-drinking for the Brāhmaṇa would be contrary to the means of knowledge pertaining to the instance brought forward in its support.

If the *Vaiçeshika* were to make the declaration that the effect exists before it is produced by the cause, he would be contradicting his own philosophical tenets. The *Vaiçeshika* engages in all discussions, resting upon the authority of the *Vaiçeshika* philosophy. And if he were to make the above declaration, it would be contrary to the *Vaiçeshika* theory that prior to its production by the cause the effect has no existence.

That the word is not expressive would involve a self-contradiction. If the word is not expressive of meaning,

then it would be impossible to make use of any *words* to express the idea that *words* are not expressive. If such words are used to this effect, then by this very use would the expressiveness of words become admitted; and hence the said declaration would be self-contradictory.

Objection : "The 'scripture' being nothing more than the statement of truths cognised by means of sensuous and inferential cognitions, a contradiction of it would only be a contradiction of sensuous and inferential cognitions; and the expressiveness of words being only an inference based upon concomitance (of the word and the meaning expressed by it), a negation of this expressiveness would only be a contradiction of Inference; and such being the case, why should the author have made separate mention of the contradiction of 'scriptures' and 'self-assertion'.?"

Reply : Scriptures are often found to be based upon mere semblance of truth; as we find in the case of the scriptures of the Buddha and others. And if the Buddha were to declare that all things are not momentary, what he would be contradicting would be his own scriptures, and not any truth (of perception or inference). As for one's own assertion that too may some times be based upon an untruth; and hence its contradiction need not necessarily involve a contradiction of, truths (of perception or inference).

Text (114) : The 'Apadēça' consists in the statement of the 'inferential indicative.' That which is concomitant with the 'subject' of inference, being known to be so concomitant at all times, and with all individuals of the class to which the 'subject' belongs,—and which, at all times, is never concomitant with the contradictory of that subject,—has been spoken of as the 'inferential indicative'; and it is the statement or putting forward of this that constitutes 'apadēça.' As for instance,

(in the same argument) the assertion—'because wind has an action and is endowed with certain qualities.' Here we find that 'action' and 'quality' exist in the 'subject' (the wind), and the latter in all individuals of the class to which it belongs, and the former not in all of them; and both of these are never found in anything that is 'not substance.' Hence the statement as to the presence of these in wind constitutes the 'apadēça' (in the argument cited). (IX. ii. I).

Commentary.

Of the declaration that 'wind is a substance,' the *apadēça* consists in the assertion 'because it has action,' which puts forward the 'inferential indicative'; and so also is the mention of 'presence of qualities,' which is another 'inferential indicative.' The author has cited these two instances, in order to show that the character of 'hētu,' 'reason' or 'inferential indicative' belongs to such a thing as exists only in a part of the *sapaksha* (*i. e.* in the case in question the '*sapaksha*' consists of all such substances as are known to be active; and 'action' is found only in a certain part of this class, *i. e.* all substances are not always active; but action can never exist apart from a substance), as well as to that which pervades over the whole of it (*i. e.* one quality or another is *always* present *in all* substances).

The author shows that the aforesaid definition of the 'inferential indicative' applies to the instances cited. 'Presence of qualities' belongs to the 'subject,' as also to all members of the class 'substance' to which that subject belongs, and which is the '*sapaksha*'; and 'presence of action' while belonging to the subject, belongs only to some members of the class 'substance'; *i.e.* to those substances alone that have material bodies; and yet both of these—'action' and 'quality'—are never found in anything that is *not a substance*, which 'non-

substance' would be the '*vipaksha*' (that wherein the inferential indicative is universally acknowledged to be non-existent). And the putting forward of both of these by means of the assertion—'because it has action,' or 'because it has qualities'—constitutes what is known as '*apadēça*,' or the Reason for the Declaration, being as it is free from all discrepancies of reasoning.

Text (115): By this it is implied that such statements as are either (1) 'asiddha' (unknown, unproved), or (2) 'viruddha' (contrary), or (3) 'sandigdha' (doubtful), or (4) 'anadhyavasita' (unascerruined), have not the character of the true 'reason' (or 'indicative').

(1) *Of these the 'unknown' is of four kinds—(a) 'unknown to both,' (b) 'unknown to one of the two,' (c) unknown in the form wanted, and (d) 'the unknown—subject-of-inference.' (a) The 'unknown to both' is that which is not known to both the arguer and the person to whom the argument is presented; e g., the argument—'sound is evanescent, because it is made up of parts.' (b) As an example of the 'unknown to one of the two,' we have—'sound is evanescent because it is an effect.' (c) We have the 'unknown in the form wanted' when what is meant to be indicated is fire by the presence of smoke, but what is put forward as the 'reason' is steam, which is not known in the form of smoke. (d) We have the 'unknown—subject-of-inference' in the argument—'Darkness in an earthy substance, because it is black in colour.'*

(2) *That which, while not subsisting in the subject of inference, does not subsist in any individual of the same class, and subsists in its contradictories,—is what is known as the 'viruddha,'*

'contrary' reason, as it proves something quite contrary to the desired conclusion; as an example of this we have the reasoning—'This animal is a horse, because it has horns.'

(3) *That which, while subsisting in the object of inference, subsists in things of the same kind as that as well as in those of other kinds, is what is known as 'sandigdha,' 'Doubtful;' as it creates a doubt in the mind; e. g, 'this animal is a cow, because it has horns.' Some people hold that when in any subject there is a collision of two 'contrary' indicatives explained above, there arises a doubt; and this is another kind of the 'Doubtful' reason; as for example in regard to the mind we find that the two reasons—(1) 'because it has motion' and (2) 'because it cannot be felt by touch'—are put forward as indicative of its corporeal and non-corporeal character respectively.*

Objection: "*This would be a case of the 'asādhāraṇa' reason; because the two reasons cannot reside together either in the 'subject' or in its contradictory,—just like 'non-visibility' and 'perceptibility.'*"

Reply: *We shall explain later on that for this very reason the reasoning in question is what is known as the 'anadhyavasita,' 'unascertained.'*

Objection: "*In the scriptures (the Sūtras) we find it mentioned in many places that two contrary cognitions constitute the cause of doubt.*"

Reply: *Not so; as doubts always arise from the dual perception of objects. That is to say, a Doubt is always produced by the perception of the dual character of an object; and when both factors of the duality would be of equal authority, they would*

contradict each other ; and as such would not give rise to any definite cognition ; but they could not be the cause of any doubt ; as a matter of fact, in the instance cited, there is no equality of authority in the two factors of the duality ; as one of the two conclusions of the inference would always be such as is denied by the scriptures; and hence this (that has been put forward as an instance of another kind of the 'doubtful' reason) would be only another kind of the 'contrary' reason.

(4) *That which subsists in the 'subject' of the inference, but not in any other object either of the same kind or any other, is one that is not recognised by either party ; and as such, giving rise to uncertainty, it comes to be known as the 'unascertained' reason ; as for instance—'the effect is an entity, because it is produced. This is implied in the sūtra—'aprasiddhónapadēçaḥ.'*

Objection : *"This distinctive feature has been spoken of in the scriptures as the cause of doubt ; and the reason for this is that the distinctive feature of a thing serves to distinguish it from like as well as unlike objects (and hence the 'unascertained,' comes within the sūtra that speaks of the 'sandigdha,' and not within that which speaks of the 'aprasiddha' ('unknown')."*

Reply : *Not so ; because of the meaning (of the sūtra) being different. That is to say, (the author of the sūtra having made the declaration that there arises a doubt as to whether the audible object, sound, is a substance, or a quality or an action)'— the opponent has retorted that, in as much as the distinctive feature (of audibility) is found*

in sound alone, there can be no doubt; and to this the author of the sūtra has replied by pointing out that the distinctive feature of 'audibility' does not belong specifically to either the Substance alone, or to the Quality alone, or to Action alone; in fact, it is common among all these; as in each of these three (substance, quality and action) we find distinctive features that distinguish them from like as well as unlike objects; (and for this same reason, 'audibility' also would be a feature that would belong in common to substance, quality and action; and hence it would not give rise to a doubt); and thus what the sūtra has done is to point out (that in the said manner, 'audibility' might very well be regarded as leading to an uncertainty or doubt) and not that a distinctive feature becomes a cause or source of doubt. For, if it were not, then, there would be doubts with regard to all the six categories. For these reasons we conclude that Doubts always arise from the cognition of features common to more than one thing.

Commentary.

The above definition of *apadēça* serves to set aside such false "reasons" as the '*asiddha*' etc. The qualification 'concomitant with the subject of inference' shows that the *unknown* reason is not a true 'reason;' the qualification 'known to exist in an object of the same kind as the subject' shows that the '*contrary*,' and the '*unascertained*' are not true 'reasons'; and the qualification 'that which never exists in that which is the contradictory of the subject' sets aside the 'Doubtful' from the category of true 'reason.'

(1) Of the four false reasons, the author proceeds to describe the 'unknown.' The 'unknown' or '*asiddha*' is of

four kinds—(1) 'Unknown to both' etc. (1) The 'unknown to both' or '*ubhayāsiddha*' is that which is not known either to the propounder of the argument or to one for whose benefit the argument is put forward; as an example of this we have the reasoning—'sound is evanescent, *because it is made up of parts*'; as the fact of sound being made up of parts is not known either to the person putting forward the argument, or to his opponent.

(2) As an example of that which is 'unknown to one of the two' or '*Anyatarāsiddha*,' we have the reasoning—'Sound is evanescent, *because it is an effect*,' where though in reality (according to us) Sound has the character of an effect, yet this fact is not known or recognised by the *Mīmānsaka*, who denies the evanescent character of sound, and against whom the argument is brought forward; such a reason cannot establish any conclusion, until it has itself been proved (by some other reasoning),

(3) The 'unknown in the form wanted' or '*Tadbhāvāsidhha*' we have in the argument where the presence of *steam* is put forward as the reason for proving the *existence of fire*, which was really meant to be proved by the mention of the presence *of smoke*; as 'steam' is not known in the form or character of 'smoke.'

(4) The 'unknown subject of Inference' or '*anumēyāsiddha*' we have in the argument—'Darkness is an earthy substance, *because it is black in colour*;' where as a matter of fact there is no such substance as 'Darkness,' as what is perceived is mere blackness impressed upon some substance or other; consequently the reasoning that 'Darkness is an earthy substance because it is black in colour' affords an instance of the 'unknown-subject,' the '*anumeyāsiddha*' or '*āçrayāsiddha*;' the compound '*anumēyāsiddha*' is to be explained as *Bahuvrīhi*' 'that (reasoning) of which the subject (*anumēya*) is not known;, and as such though the proper form would have been '*asiddhānumēya*,' yet, in as much as the compound belongs to the

same class as '*āhitāgni*,' the precedence of the participial factor becomes a matter option (*vide* Pāṇini II. ii. 37). Just as the Reason is 'unknown to any one of the two' or 'unknown to both,' so in the same manner the 'unknown subject' also may be of two kinds—*i. e.*, unknown to one or both of the disputants. Secondly, just as the 'Reason is unknown' by one or both disputants either not knowing it, or having a doubtful knowledge of it, or having a mistaken idea of it,—so in the same three ways would the 'subject' also be 'unknown.' Thirdly, in the case of the 'Reason' we find that—(1) it is 'unknown to one disputant who is not uncertain about it, simply because he has no conception of it, while to the other disputant it is 'unknown' because of his having only a doubtful knowledge of it,—(2) or that to the former it is 'unknown' simply because he has no knowledge of it, while to the latter it may be 'unknown' on account of his having no right conception of it,—(3) or that to the former it is 'unknown' as he has no certain knowledge of it, while to the latter it is 'unknown' because of his having no knowledge of it,—(4) or that to the former it may be 'unknown' because of his having a mistaken knowledge of it, while to the latter it is 'unknown' because of his knowledge of it being uncertain; and all these diversities would be found in the case of the 'unknown subject' also.

As for the 'unknown' qualification' &c., these are included in the 'unknown to one or to both'; and hence our author does not mention them separately.

(2) The author proceeds to describe the 'contrary' false Reason: '*Contrary*, &c., &c.' Sometimes it may so happen that a man seeing a certain animal in the forest would infer thus: 'this animal is a horse because it has horns;' and in this case, we know that horns are, in reality, found to belong, not to any horse, but to animals other than the horse; *viz.*, the cow, the buffalo and the like; and by reason of this concomitance the *presence of horns* would prove something totally different from the 'horse'; hence proving something quite contrary

यो ब्राह्मणेन शूद्रकन्यायां समुत्पन्नस्स यदि यथोक्तजातकर्मादिभिः संस्कारैस्संस्कृतस्तदा तस्मादेव संस्काराच्चापित इत्युच्यते संस्काराभावे पुनर्दास इति ।

गोपाललक्षणमाह ।

क्षत्रियाच्छूद्रकन्यायां समुत्पन्नस्तु यः सुतः ॥
स गोपाल इति ख्यातो भोज्यो विप्रैर्न संशयः॥२३॥

क्षत्रियाच्छूद्रकन्यायामुत्पन्नः पुनः स गोपाल इति लोके ख्यातो नाम्ना वृत्त्या च प्रसिद्ध एवेति न संशयः स विप्रैर्भोज्यान्नो भवति । यद्यप्येतदनंतरकुलमित्रलक्षणं वक्तुमुचितं तथापि तस्यावयवसामर्थ्यादेव पितृपितामहादिमित्रस्य प्रतीयमानत्वादवचनेऽपि न न्यूनतेति । आचार्यस्तु वैश्याच्छूद्रकन्यायामुत्पन्नः कुलमित्रं तथैव च प्रक्रमादित्याह ॥

अर्द्धसीरिलक्षणमाह ॥

वैश्यकन्यासमुद्भूतो ब्राह्मणेन तु संस्कृतः ॥
सोऽत्यर्द्धिक इति ज्ञेयो भोज्यो विप्रैर्न संशयः॥२४॥

यो ब्राह्मणेन वैश्यकन्यायामुत्पन्नः स यथोक्तसंस्कारसंस्कृत एवार्द्धिक इतिज्ञेयः स विप्रैर्भोज्यान्न इत्यत्र संशय एव नास्ति । अर्द्धसीरिण एव संज्ञांतरप्रदर्शनाय शब्दान्तरेण निर्देशः । एतदनन्तरमात्मनिवेदकलक्षणं वक्तव्यं तदप्यवयवार्थस्य स्पष्टतया वाङ्मनःकर्मभिस्तवाहमिति वादिनमेवाचष्ट इति नोक्तम् । अत्राप्याचार्योऽर्द्धिकसाहचर्यात् क्षत्रियायां ब्राह्मणादुत्पन्नमात्मनिवेदकमाह । न चैषां शूद्रत्वोक्तिर्न युक्ता द्विजापत्यतया शूद्रादुत्कृष्टत्वात् । अस्तु वात्र कथंचिद्वैश्यायां ब्राह्मणादुत्पन्नस्य आर्द्धिकस्य तु द्विजत्वादत्यंतायुक्तैव तदुक्तिरितिचेत् । उच्यते । विजातीयकन्याविवाहस्य कलौ निषेधेनाऽनोढात्वादिविशेषानुपादानादनूढास्वेव तासु व्यवहारो व्यभिचारोत्पन्नतया तदुक्तिः ।

शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः ।

इतिस्मरणात् । कुण्डासुतासूत्पन्नानां योगिना निषादादिसंज्ञान्तराभिधानाच्च । नचैवं कुंडगोलकयोरब्राह्मण्यापत्तिरिष्टापत्तेः तत्कन्यास्वप्यनुढासु द्विजात्युत्पन्नानामपि शूद्रसधर्मत्वमेव । नच कलावस वर्णकन्यानामृतुव्यापत्तेऽपि गमननिषेधान्नापिताद्यनुत्पत्तेरेव भोज्यान्नता विवेको न संभवतीति वाच्यम् । पूर्वपूर्वयुगोत्पन्नानामप्यन्नानुवृत्त्यातिक्रान्तनिषेधेभ्योऽप्युत्पत्त्या वा विचारसंभवादिति ॥

यदन्नभोजने प्रायश्चित्तमुक्तं तेषां जलादिपानेऽपि तदाह ॥

भाण्डस्थितमभोज्यानां जलं दधि घृतं पयः ॥
अकामतस्तु यो भुङ्क्ते प्रायश्चित्तं कथं भवेत् ॥२५॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा उपसर्पति ।
ब्रह्मकूर्चोपवासेन योज्या वर्णस्य निष्कृतिः ॥२६॥

ये पूर्वमभोज्यान्नाः कदर्यादयो गणितास्तेषां भाण्डस्थजलदधिघृतपयसामन्यतममकामतो यो भुङ्क्ते तस्य प्रायश्चित्तं कथं स्यादित्याकांक्षायां ब्राह्मणादीनामन्यतम एवंविधो यः पर्षदमुपसर्पति तस्य च पर्षदा ब्रह्मकूर्चोपवासेन ब्रह्मकूर्चार्थमुपवासो ब्रह्मकूर्चोपवासस्तेन पूर्वेद्युरुपोष्य परेद्युराहारान्तरं परित्यज्य ब्रह्मकूर्चपानेन निष्कृतिः शुद्धिर्योज्या । तत्र कालविशेषमाह जाबालिः ।

चतुर्दश्यामुपोष्याथ पौर्णमास्यां विशेषतः ।
पञ्चगव्यं पिबेत्प्रातर्ब्रह्मकूर्चमिति स्मृतम् ॥

इति । देशमप्याह शातातपः ।

नदीतीरेषु गोष्ठेषु पुण्येष्वायतनेषु च ।

तत्र गत्वा शुचौ देशे ब्रह्मकूर्चं समाचरेद् इति ॥

शूद्रस्य विशेषमाह ॥

शूद्राणां नोपवासः स्याच्छूद्रो दानेन शुध्यति ॥
ब्रह्मकूर्चमहोरात्रं श्वपाकमपि शोधयेत् ॥ २७ ॥

शूद्राणामुपवासस्थानापन्नेन दानेन शुद्धिर्ब्रह्मकूर्चं तु समानमेव सर्वेषाम् । ननु

पञ्चगव्यं पिबेच्छूद्रो ब्राह्मणश्च सुरां पिबेत् ।
उभौ तौ तुल्यदोषौ हि पूयाख्यनरके गतौ ॥

इत्यत्रिणा शूद्रस्य पञ्चगव्यप्रतिषेधात्कथं तदनुवृत्तेरित्यत आह ब्रह्मकूर्चपानार्थमहोरात्रमुपवासः श्वपाकमपि शोधयेत्किं पुनः शूद्रमिति अत एव स्मृत्यन्तरीयं लिङ्गम् ।

स्त्रीशूद्रस्य तु शुध्यर्थं प्राजापत्यं समाचरेत् ।
पञ्चगव्यं च कुर्वन्ति स्नात्वा पीत्वा शुचिर्भवेत् ॥

इति । नचात्रेर्वचनविरोधस्तद्वस्य एव, तस्य प्रायश्चित्तानङ्ग-पञ्चगव्यप्राशनविषयत्वात् सुरापाननिषेधवत् ॥

ब्रह्मकूर्चद्रव्याण्याह ॥

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥
निर्दिष्टं पञ्चगव्यं तु पवित्रं पापशोधनम् ॥ २८ ॥

गोमूत्रादिपञ्चकं कुशोदकसहितं पञ्चगव्यं निर्दिष्टं तच्च पवित्रमतः पापानां शोधनं नाशनं भवति ॥

गोमूत्राद्युपादानगवीनां वर्णविशेषानाह ॥

गोमूत्रं कृष्णवर्णायाः श्वेतायाश्चैव गोमयम् ॥
पयश्च ताम्रवर्णाया रक्ताया गृह्यते दधि ॥ २९ ॥
कपिलायाः घृतं ग्राह्यं सर्वं कापिलमेव वा ॥

तत्तद्वर्णगवीनामसंभवे गोमूत्रादिपञ्चकमपि कापिलमेव ग्राह्यमितरत्स्पष्टार्थम् ॥

गोमूत्रादीनां परिमाणमाह ॥

मूत्रमेकपलं दद्यादङ्गुष्ठार्द्धं तु गोमयम् ॥ ३० ॥
क्षीरं सप्तपलं दद्याद्दधि त्रिपलमुच्यते ॥
घृतमेकपलं दद्यात्पलमेकं कुशोदकम् ॥ ३१ ॥

मूत्रं गोः पलं चतुःसौवर्णिकं पलं सुवर्णाश्चत्वार इति स्मरणात् पर्वद्वयात्मकस्याङ्गुष्ठस्यैकं पूर्वार्द्धमुच्यते तन्मात्रं गोमयम् । शेषं स्पष्टार्थम् । एतत्सर्वं यथोक्तपरिमाणं पलाशाद्यन्यतमपात्रे दद्यात्समानयेत् । तदाह प्रजापतिः ।

पलाशं पद्मपत्रं वा ताम्रं वाथ हिरण्मयम् ।
पात्रं गृहीत्वा तस्मिंस्तु पञ्चगव्यं समानयेत् ॥

इति । अशक्तं प्रति परिमाणान्तरमाह वृद्धपराशरः ।

गोमूत्रे माषकास्त्वष्टौ गोमयस्य तु षोडश ।
क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्तिताः ।
गोमूत्रवद्घृते ज्ञेयास्तदर्द्धञ्च कुशोदकम् ॥ इति ॥

गोमूत्रादिग्रहणे मन्त्रानाह ॥

गायत्र्यादाय गोमूत्रं गन्धद्वारेति गोमयम् ॥
आप्यायस्वेति च क्षीरं दधिक्रावूण्यस्तथा दधि॥३२॥
तेजोऽसिशुक्रमित्याज्यं देवस्यत्वा कुशोदकम् ॥
पञ्चगव्यमृचापूतं स्थापयेदग्निसन्निधौ ॥ ३३ ॥

गायत्र्यादिऋचा ग्रहणेन पूतं पवित्रं पञ्चगव्यमेकीकृत्याग्निसन्निधौ स्थापयेत् । यद्यपि तेजोऽसि देवस्यत्वेत्यनयोर्यजुष्ट्वादृचेति साधारणव्यपदेशो नोपपद्यते तथापि सृष्टीरुपदधातीतिवद् भूम्ना तत्सिद्धिरिति न दोषः । अनन्तरकर्तव्यमाह ।

आपोहिष्ठेति चालोड्य मानस्तोकेति मन्थयेत् ।

आपोहिष्ठेत्येकैव ऋक् ऋचेत्युपक्रमात् । तृचः इत्याचार्याः प्रायेण तथा विनियोगात् ॥

होमसाधनमाह ॥

सप्तावरास्तु ये दर्भा अच्छिन्नाग्राः शुकत्विषः ॥
एतैरुद्धृत्य होतव्यं पञ्चगव्यं यथाविधि ॥ ३४ ॥

सप्तप्रवरा येभ्यस्तेऽष्टादयोऽछिन्नाग्राः शुक्लत्विषो हरितवर्णा दर्भास्तैरुद्धृत्य यथाविधि वक्ष्यमाणमंत्रैस्तत्पञ्चगव्यं जुहुयात् । यत्तु

स्थापयित्वा तु दर्भेषु पलाशैः पत्रकैरथ ।
तत्समुद्धृत्य होतव्यं देवताभ्यो यथाक्रमम् ॥

इतिप्राजापत्यवचनबलात्पलाशपत्रेण होम इति व्याख्यातम् तत्पालाशो हरितो हरिदिति कोशादर्शननिबन्धनमिति मंतव्यम् । तथात्वे बहुवचनासंगतिः । तस्मात्पलाशैर्हरितैरित्यर्थोऽवगन्तव्य इति ॥

होममंत्रानाह ॥

इरावती इदंविष्णुर्मानस्तोके च शंवती ॥
एताभिश्चैव होतव्यं हुतशेषं पिबेद् द्विजः ॥ ३५ ॥

इरावती धेनुमती, इदं विष्णुर्विचक्रमे, मानस्तोकेतनये, शंवती शंशब्दोपलक्षिता शन्नोदेवीरभिष्ट इत्येषा शंवतीः पारयते तं च क्षिप्तिवचो यथा । अद्यावतं यमावतं ययेवेनमिशुवत इति वात्तचोत्तेप एताभिभिश्चकारादग्नये सोमायेति नाममंत्रेण सावित्र्या प्रणवेनाग्नये स्विष्टकृते वेत्येतैरपि तंत्रैर्हुत्वा हुतशेषं द्विजः पिबेत् । द्विजग्रहणं वक्ष्यमाणमन्त्रविषयनियमाय । स्त्रीशूद्रयोस्तूष्णीमेव भवति तथा च प्रजापतिः ।

अग्नये चैव सोमाय सावित्र्या च तथैवच ॥
प्रणवेन तथा हुत्वा स्विष्टकृता तथैवच ॥

इति ।

पानेतिकर्तव्यतामाह ॥

आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन तु ॥
उद्धृत्य प्रणवेनैव पिबेच्च प्रणवेन तु ॥ ३६ ॥

हस्तेनालोड्य यज्ञियकाष्ठेन निमथ्योभयाभ्यां हस्ताभ्यामुद्धृत्याशब्दं पिबेत् प्रतिक्रियं प्रणवावृत्तिः ।

ननु गोवधाद्युत्पन्नादृष्टरूपप्रत्यवायनिवृत्तिरस्तु प्रायश्चित्तेन अभो-

न्यभोजनादिषु त्वाहारपरिणामेनावयवोपचयरूपस्य दृष्टस्य कथं तेन निवृत्तिरित्यत आह ।

यत्त्वगस्थिगतं पापं देहे तिष्ठति देहिनाम् ॥
ब्रह्मकूर्चं दहेत्सर्वं प्रदीप्तोऽग्निरिवेन्धनम् ॥ ३७ ॥

भक्षितमभक्ष्यं यथा त्वगस्थ्यादिरूपेण परिणम्य देहिनां देहे पापमशुचिभूत्वा तिष्ठति तथा ब्रह्मकूर्चमपि पीतं तेन तेन रूपेण परिणतं सत्तत्तमवयवोपचयं दहतीति दृष्टद्वारैवास्य शोधकत्वं तत्र दृष्टान्तो यथाऽग्नेरिन्धनदहने नादृष्टमवान्तरव्यापारः किन्तु तत्संयोग एव तथा प्रकृतेपीति । अनेनाभक्ष्यभक्षणे ब्रह्मकूर्चपानमावश्यकमित्युक्तं भवति ।

नन्वेवं दशमूलीकषायपानवदस्यादृष्टरूपप्रत्यवायनिवर्तकत्वं स्यादित्यत आह ॥

पवित्रं त्रिषु लोकेषु देवताभिरधिष्ठितम् ॥

वरुणादिदेवताधिष्ठितत्वेन त्रिष्वपि लोकेषु प्रकारेषु दृष्टरूपदुष्टावयवनाशनादृष्टरूपप्रत्यवायनाशनापूर्वादृष्टजननरूपेषु पवित्रं सामर्थ्यमिति ।

ता देवता आह ॥

वरुणश्चैव गोमूत्रे गोमये हव्यवाहनः ॥ ३८ ॥
दध्नि वायुः समुद्दिष्टः सोमः क्षीरे घृते रविः ॥

गोमूत्रादीनां पञ्चानां वरुणादिपञ्च देवता अधिष्ठात्र्यो भवन्ति कुशोदकस्य तु कुशाधिष्ठातारो ब्रह्मविष्णुमहेशा एवाधिष्ठातारः अत एव ।

कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्द्दनः ।
कुशाग्रे शङ्करप्रोक्त इत्यभिधाय ।

शरीरेष्वथ तिष्ठन्ति कुशोत्थजलबिंदवः ।
तस्य नश्यन्ति पापानि गरुडेनेव पन्नगाः ॥

इत्यभिहितं विष्णुधर्मोत्तरे।
स्वोच्छिष्टजलपाने प्रायश्चित्तमाह॥

पिबतः पतितं तोयं भाजने मुखनिःसृतम्॥
अपेयं तद्विजानीयाद्भुक्त्वा चान्द्रायणं चरेत्॥३९॥

मुखसंयोजिते भाजनेऽपिबतः पुरुषस्य मुखान्निःसृतं तोयं यदि पतितं तर्हि तदपेयं विजानीयाद्भुक्त्वा चान्द्रायणं चरेत्। पीतावशिष्टजलपाने तु त्रिरात्रम् तदाह शंखः।

पीतावशेषितं पीत्वा पानीयं ब्राह्मणः क्वचित्।
त्रिरात्रं तु व्रतं कुर्याद्वामहस्तेन वा पुनः॥

इति। ब्राह्मणाद्युच्छिष्टजलपानेतूशनाः। ब्राह्मणोच्छिष्टानामपः पाने षोडश प्राणायामान् धारयेत्क्षत्रिये त्रिंशद्वैश्ये चत्वारिंशच्छूद्राणां कुशवारिपाने त्र्यहं बुद्धिपूर्वंचेद् त्र्यहं चतुरहं पञ्चरात्रं सप्तरात्रं पञ्चगव्यं पानं क्रमेणेति।

शवाद्युपहतकूपादिजलपाने प्रतिवर्णं प्रायश्चित्तमाह।॥

कूपे च पतितं दृष्ट्वा श्वशृगालं च मर्कटम्॥
अस्थिचर्मादि पतितं पीत्वाऽमेध्या अपो द्विजः॥४०॥
नारं कुकूणकं काकं विड्वराहं खरोष्ट्रकम्॥
गवयं सौप्रतीकं च मायूरं खाङ्गकं तथा॥४१॥
वैय्याघ्रमार्क्षंसैंहं वा कूपे यदि निमज्जति॥
कुणपंक्तस्यपि दुष्टस्य पीतं स्यादुदकं यदि॥ ४२॥
प्रायश्चित्तं भवेत्पुंसः क्रमेणैतेन सर्वशः॥ ४३॥

यस्मिन् कूपे श्वशृगालं श्वा कुक्कुरः शृगालः क्रोष्टा तयोः समाहारः श्वशृगालं मर्कटं वानरं पतितं दृष्ट्वा अस्थिचर्मआदिशब्दान्मूत्रपुरीषादि वा पतितं दृष्ट्वा अमेध्या अपो यो द्विजः पिबति तस्य वक्ष्यमाणं प्रायश्चितं भवेदिति संबंधः। तथा नारं मानुषं काकं वायसीय विड्वराहखरोष्टशद्वेषु

तद्धितलोप आर्षः गवयः शवरः सुप्रतीकश्चित्रमृगः मयूरः केकी खड्गो गराडको व्याघ्रो द्वीपी ऋक्षो भल्लूकः सिंहः पंचास्यः कपिरपि मर्कटावान्तरजातिः एतत्सम्बन्धि कुणपं यस्मिन् तडागे निमज्जति तस्य दुष्टस्य तडागस्योदकं यदि पीतं स्यात्तदा तस्य सर्वशः सर्ववर्णस्य पुंसो वक्ष्यमाणं प्रायश्चित्तं क्रमेण भवति ॥

तदेव प्रायश्चित्तमाह ।

विप्रः शुध्येत्त्रिरात्रेण क्षत्रियस्तु दिनद्वयात् ।
एकाहेन तु वैश्यस्तु शूद्रो नक्तेन शुध्यति ॥ ४४ ॥

पूर्वोक्तशवाद्युपहतकूपादेर्जलपाने विप्रादयः क्रमात्त्रिद्व्येकरात्रनक्तैः शुध्यन्ति तु शब्दादन्ते पञ्चगव्यप्राशनमपि भवति तदाह विष्णुः ।

मृतपञ्चनखात्कूपादत्यंतोपहतमुदकं पीत्वा ब्राह्मणस्त्र्यहमुपवसेद्व्यहं राजन्य एकाहं वैश्यः शूद्रो नक्तं सर्वे चान्ते पञ्चगव्यं पिबेयुरिति यदि तत्रैव शवं शीर्यति तदा विशेषमाह देवलः ।

क्लिन्नं भिन्नं शवं चैव कूपस्थं यदि दृश्यते ।
पयः पिबेत्त्रिरात्रेण मानुषे द्विगुणं स्मृतम् ॥

इति । इदं च सकृत्पाने अभ्यासेत्वाह हारीतः ।

क्लिन्ने भिन्ने शवे तोये तत्रस्थ यदि तत्पिबेत् ।
शुद्धौ चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा
यदि कश्चित्ततः स्नायात्प्रमादेन द्विजोत्तमः ।
जपंस्त्रिषवणस्नायी अहोरात्रेण शुध्यति ॥

इति । कामाकामाभ्यां चान्द्रतप्तकृच्छ्रयोर्व्यवस्था । चण्डालकूपादिजलपाने त्वापस्तम्बः ।

चाण्डालकूपभाण्डस्थं नरः कामाज्जलं पिबेत् ।
प्रायश्चित्तं कथं तत्र वर्णे वर्णे विनिर्दिशेत् ।
चरेत्सांतपनं विप्रः प्राजापत्यं तु भूमिपः ।
तदर्द्धन्तु चरेद्वैश्यः शूद्रे पादं विनिर्दिशेत् ॥

इति । अकामतस्तु देवलः ।

यस्तु चण्डालभाण्डस्थमज्ञानादुदकं पिबेत् ।
स तु त्र्यहेण शुध्येत शूद्रस्त्वेकेन शुध्यति ॥

इति । म्लेच्छादिपुष्करिण्यादिजलपानेऽप्यापस्तम्बः ॥

म्लेच्छादीनां जलं पीत्वा पुष्करिण्यां ह्रदेऽपि वा
जानुदघ्नं शुचि ज्ञेयमधस्तादशुचि स्मृतम् ।
तत्तोयं यः पिबेद्विप्रः कामतोऽकामतोऽपि वा ।
अकामाचक्तभोजी स्यादहोरात्रं तु कामतः ॥

इति ।

इदानीमभोज्यान्नविशेषेण तदन्नभोजन प्रायश्चित्तविशेषमाह ॥

परपाकनिवृत्तस्य परपाकरतस्य च ॥
अपचस्य च भुक्त्वान्नं द्विजश्चान्द्रायणं चरेत् ॥ ४५ ॥

परपाकनिवृत्तादयस्त्रयोऽपि वक्ष्यमाणलक्षणाश्चकाराद्वृथापाकोप्ये-षामन्नं भुक्त्वा द्विजश्चान्द्रायणं कुर्यात् । इदं चात्यन्ताभ्यासविषयमवगन्त-व्यम् । सकृद्भोजने तु भरद्वाज आह ।

निराचारस्य विप्रस्य निषिद्धाचरणस्य च ।
अन्नं भुक्त्वा द्विजः कुर्यादिनमेकमभोजनम् ॥

इति । निराचारो विहितपञ्चमहायज्ञानुष्ठानरहितः पाक-निवृत्तो निषिद्धाचरणः सर्वदा परान्नभोजनशीलः इदमपचस्याप्युपलक्षणं वृथापाकान्नभक्षणे त्वाह शातातपः ।

वृथापाकस्य भुंजानः प्रायश्चित्तं चरेद्द्विजः ।
प्राणायामांस्त्रिरभ्यस्य घृतं प्राश्य विशुध्यति ॥

इति ।

न केवलमपचान्नभोजने प्रत्यवायोऽपि तु तस्यान्नदानेऽपीत्याह ॥

अपचस्य च यद्दानं दातुरस्य कुतः फलम् ॥

दाता प्रतिगृहीता च द्वौ तौ निरयगामिनौ ॥४६॥

अपचस्यापचाय यद्दानं चतुर्थ्यर्थे षष्ठी बहुलानुशासनात् अस्य दातुः फलं कुतः यतस्तावुभावपि दातृप्रतिग्रहीतारौ निरयगामिनौ इति।

परपाकनिवृत्तस्य लक्षणमाह ॥

गृहीत्वाग्निं समारोप्य पञ्चयज्ञान्न निर्वपेत् ॥
परपाकनिवृत्तोऽसौ मुनिभिः परिकीर्तितः ॥ ४७ ॥

दारकाले दायाद्यकाले गृहपतौ वा प्रेते योऽग्निमाधायात्मनि तमग्निंसमारोप्य तस्मिन्नग्नौ पञ्चमहायज्ञाञ्च निर्वपेदसौ परपाकनिवृत्तः पर उत्कृष्टो वैश्वदेवाद्यर्थं गृह्याग्नौ क्रियमाणः पाकः परपाकस्तस्मान्नि वृत्तः परपाकनिवृत्त इति मुनिभिरुच्यते। अग्नेः सर्वदात्मसमारोपणेन पञ्च-महायज्ञादिसाधनत्वाभावात्।

परपाकरतस्य लक्षणमाह ॥

पञ्चयज्ञान्स्वयं कृत्वा परान्नेनोपजीवति ॥
सततं प्रातरुत्थाय परपाकरतस्तु सः ॥ ४८ ॥

यस्सततं प्रत्यहं प्रातरुत्थाय पञ्चमहायज्ञान्स्वयं कृत्वा परान्नेनैवोपजीवति स परपाकरत इत्युच्यते।

परपाकरुचिर्नस्यादनिन्द्यामन्त्रणादृते ॥

इतिनिषेधातिक्रमात्।

अपचस्य लक्षणमाह ॥

गृहस्थधर्मा यो विप्रो ददाति न विवर्जितः ॥
ऋषिभिर्धर्मतत्वज्ञैरपचः परिकीर्तितः ॥ ४९ ॥

यो गार्हस्थ्यमास्थितोऽप्यन्नदानादिवर्जितः केवलमुदरम्भरिरेव सोऽपच इति मुनिभिः परिकीर्तितः। तथा श्रूयते "केवलाघोभवतिकेवलादी" ति ननु इक्श्तिपौधातुनिर्देश इति वार्त्तिकाद्ददातिशब्दो धातुनिर्देशमेव

चरति न तु धात्वर्थनिर्देशमिति चेत् सत्यं। यजतिषु येयजामहे करोतीत्यादिष्वर्थनिर्देशोयमिति प्रत्ययदर्शनात् । वृथापाकलक्षणमाह वृहस्पतिः ।

योहि हित्वा विवाहाग्निं गृहस्थ इति मन्यते ।

अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः ॥ इति ।

नन्वेवं कलौ कस्यापि भोज्यान्नता न स्यादेवंप्रायत्वात् सर्वेषामित्यत आह ॥

युगे युगे तु ये धर्मास्तेषु तेषु च ये द्विजाः ॥
तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजाः॥५०॥

अयमभिसन्धिः । युगस्वभावप्रयुक्ताया अधर्मप्रवृत्तेरपरिहार्यत्वह्रिमाद्यालस्यादिपुरुषप्रयुक्तायास्त्ववश्यपरिहार्यत्वेन प्रायश्चित्ताभिधानस्यार्थवत्त्वान्नातिप्रसङ्गः इति । पदार्थस्तूपवर्णित एव प्राक् ।

एवं केषु चिदुपपातकेषु प्रायश्चित्तमभिधाय जातिभ्रंशकरेषु ब्राह्मणातिरस्कारप्रायश्चित्तमाह ॥

हुङ्कारं ब्राह्मणस्योक्त्वा त्वङ्कारं च गरीयसः ॥
स्नात्वा तिष्ठन्नहः शेषमभिवाद्य प्रसादयेत् ॥५१॥

यो ब्राह्मणस्य भर्त्सनाय हुङ्कारं प्रयुंक्ते यो अभिवाद्ययोर्विद्यादिगरिष्ठस्य त्वमित्येकवचनं प्रयुङ्क्ते स तत्कालमेव स्नात्वा यावदस्तमयं निराहारि स्थित्वासन्ध्यायां तमभिवाद्य प्रसादयेत् । तथा च मनुः

हुङ्कारं ब्राह्मणस्योक्त्व त्वङ्कारं तु गरीयसः ।

स्नात्वा नाश्नन्नहःशेषमभिवाद्य प्रसादयेत् ॥

इति । यद्यपि ब्राह्मणस्य रुजः कृत्यमिति मनुना ब्राह्मणताडनमेव जातिभ्रंशकरेषु अभिवाद्यप्रसादयेदितिपरिगणितं न हुङ्काराद्यपि तथा मानसदुःखोत्पादकत्वात्तस्यापि जातिभ्रंशकरत्वमविरुद्धमिति ।

ब्राह्मणताडनादौ प्रायश्चित्तमाह ॥

ताडयित्वा तृणेनापि कण्ठे बध्वापि वाससा ।

विवादे वापि निर्जित्य प्रणिपत्य प्रसादयेत् ॥५२॥

तृणताडनादीनां शरीरानुपघातकत्वेपि मानसोपघातकत्वेपि प्रायश्चित्तनिमित्तत्वमित्यपिशब्दार्थः । गर्वातिशयेनैतत्करणे तूपवासोऽपि । तदाह बृहस्पतिः ।

गुरुं त्वंकृत्य गर्वेण विप्रं निर्जित्य वादतः ।
ताडयित्वा तृणेनापि प्रसाद्योपवसेद्दिनम् ॥
इति । अभ्यासे तु बौधायनः ।
वादेन ब्राह्मणं जित्वा प्रायश्चित्तविधित्सया ।
त्रिरात्रोपोषितः स्नात्वा प्रणिपत्य प्रसादयेत् ॥
इति । पादस्पर्शावाच्यवचनयोः प्रायश्चित्तमाह स एव ।
पादेन ब्राह्मणं स्पृष्ट्वा प्रायश्चित्तविधित्सया ।
दिवसोपोषितः स्नात्वा प्रणिपत्य प्रसादयेत् ।
अवाच्यं ब्राह्मणस्योक्त्वा प्रायश्चित्तं विधीयते ।
कृच्छ्रातिकृच्छ्रं जित्वा तु प्रणिपत्य प्रसादयेत् ।
आक्रोशमनिशं कृत्वा कृच्छ्रं कुर्वीत मानवः ॥
इति ।

विप्रावगूर्णादौ प्राश्चित्तमाह ॥

अवगूर्ये त्वहोरात्रं त्रिरात्रं क्षितिपातने ।
अतिकृच्छ्रं च रुधिरे कृच्छ्रोऽभ्यंतरशोणिते ॥ ५३ ॥

क्रोधावेशेन ब्राह्मणताडनाय दण्डाद्युपघाताभ्यामहोरात्रमुपवसेत् । ब्राह्मणं भूमौ निपात्य त्रिरात्रमुपवसेत् । प्रहारेण रुधिरोत्पत्तावतिकृच्छ्रमभ्यन्तरशोणिते प्रवाहमन्तरेण घनीभूतरुधिरे प्रहारे कृच्छ्रं चरेत् । त्वग्भेदादौ प्रायश्चित्तमाह बृहस्पतिः ।

काष्ठादिना ताडयित्वा त्वग्भेदे कृच्छ्रमाचरेत् ।
अस्थिभेदेऽतिकृच्छ्रस्तु पराकस्त्वगकर्तने ॥
इति । तदेतत्समानजातीयस्य विजातीयस्य तु विशेषमाह प्रजापतिः ।

द्विगुणं त्रिगुणं चैव चतुर्गुणमथापि वा।
क्षत्रविट्शूद्रजातीनां ब्राह्मणस्य वधे व्रतम्॥

इति देवाद्याक्रोशने तु सुमन्तुः। देवर्षिगोब्राह्मणाचार्यमातापितृनरेन्द्राणां प्रतिषेधने आक्रोशने जिह्वां दहेद्धिरण्यं दद्यादिति। प्रतिषेधनं निन्दनमाक्रोशो गालिदानम्।

इदानीं चाभिमतमतिकृच्छ्रलक्षणमाह॥

नवाहमतिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः।
त्रिरात्रमुपवासः स्यादतिकृच्छ्रः स उच्यते॥५४॥

यो नवाहोरात्रं पाणिः पूर्यते यावत्तावदन्नेन तद्भोजनमस्मिन्निति पाणिपूरान्नभोजनः स्यात्प्रसृतिपरिमितान्नभोजन इति यावत्।

यस्मिंश्च त्रिरात्रमुपवासः स्यात्स दशाहसाध्योऽतिकृच्छ्र इत्युच्यते। अतिकृच्छ्रशब्दस्यानुगतार्थतां स्पष्टयितुं पुनस्तेनैव विशेषेण॥

नन्वन्यान्यपि जातिभ्रंशकराण्यघ्रेयघ्राणादीनि संति तत्र किं प्रायश्चित्तमित्यत आह॥

सर्वेषामेव पापानां संकरे समुपस्थिते।
दशसाहस्रमभ्यस्ता गायत्री शोधनं परम्॥ ५५॥

सर्वत्वमाधिकारिकमितिन्यायेन पूर्वाधिकृतानां जातिभ्रंशकराणामघ्रेयघ्राणादीनां पापानां संकरे संपर्के समुपस्थिते दशसहस्रवारमभ्यस्ता गायत्र्येव परं शोधनं नान्यदिति। यत्वनुक्तनिष्कृतिषु सर्वेष्वपि निमित्तेष्विदं सामान्यप्रायश्चित्तं तज्जातिभ्रंशकरेष्वेवेति। तदयुक्तम्। शास्त्रान्तरे सामान्यप्रायश्चित्तान्तराभिधानेन पौनरुक्त्यात्। तस्माद्यथोक्तैव व्याख्या साधीयसीति।

तपस्तप्त्वा तीव्रं यमलभत सार्द्धं सुरगणैः
सुतं साकन्देव्या विहितनियमः कश्यपमुनिः॥

स्वयं स्रष्टुः स्रष्टा गतिरपि महेन्द्रस्त्रिजगता
मुपेन्द्रत्वं सोऽपि त्रिदशपतिभक्त्या प्रथयति ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दुश्रीरामपण्डितसुतेन विनायकेन ॥
एकादशोऽपि विवृतोऽत्र पराशरस्याध्यायः कृतोवननीयविभुक्तिभुख्यै ॥ २ ॥

इति श्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनामधेयविनायकपण्डितकृतौ पराशरस्मृतिविवृतौ विद्वन्मनोहरायामेकादशोऽध्यायः॥
शुभमस्तु ॥

श्रीगणेशाय नमः ।

समाने शब्दार्थे तदनुगतवर्णेऽपि च समे
स्वरूपे सामर्थ्ये सकलपुरुषार्थौघहरणे ।
हरेर्यत्प्राथम्यं हरिहर "यदेवं" द्विजनता-
मुखाब्जेष्वासीत्तत्सकलमपि लक्ष्मीविलसितम् ॥१॥
धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
तद्वादशे विवरणं क्रियतेऽधुनात्राध्याये
महाघचयशुद्धिनिवारणाय ॥ २ ॥

एवमध्यायचतुष्टयेनोपपातकप्रायश्चित्तमभिधाय महापातकप्रायश्चित्तविधानाय द्वादशाध्यायमारभते ।

तत्रसङ्करकाण्डे प्रक्रान्तप्रकीर्णकप्रायश्चित्तशेषं समापयितुं तावदाह ।

दुःस्वप्नं यदि पश्येत्तु वान्ते च क्षुरकर्मणि ।
मैथुने प्रेतधूमे च स्नानमेव विधीयते ॥ १ ॥

दुःस्वप्नमरिष्टसूचकस्वप्नमात्मनः चौरतैलाभ्यङ्गादिदर्शनं स्वप्नाध्यायप्रतिपादितं यदि पश्येत्प्रातः स्मरेत्तदा वान्ते भुक्तायोद्गिरणे क्षुरकर्मणि चौरे मैथुने ऋतुकालीने स्त्रीसम्भोगे प्रेतधूमस्पर्शे चकारादजीर्णोद्गारे दुर्जनस्पर्शनचितिपूयस्मशानस्पर्शेषु च स्नानमाचरेत् । तदाहुर्मनुवृद्धपराशरशातातपाः ।

अजीर्णेऽभ्युदिते वान्ते श्मश्रुकर्मणि मैथुने ।
दुस्वप्ने दुर्जनस्पर्शे स्नानमेव विधीयते ॥
दुस्वप्ने मैथुने वान्ते विरिक्ते क्षुरकर्मणि ।
चितिपूयश्मशानानां स्पर्शने स्नानमाचरेत् ॥

ऋतौ तु गर्भे शङ्कित्वा स्नानं मैथुनिनः स्मृतम् ।
अनृतौ तु यदा गच्छेच्छौचं मूत्रपुरीषवत् ॥ इति ॥ १ ॥

इदानीं पुनः संस्कारनिमित्तान्याह ।

अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव च ।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥ २ ॥

अज्ञानतो विरामूत्रप्राशने सुरासंसृष्टान्नप्राशने च त्रयो वर्णाः ब्राह्मणक्षत्रियवैश्याः तप्तकृच्छ्रचरणानन्तरं पुनः संस्कारं पुनरुपनयनमर्हन्ति विणमूत्रमिति समाहारद्वन्द्वः। इतःकुणपयोरपि ग्रहणं तथा च गौतमो मत्या मद्यपाने तप्तकृच्छ्रस्ततोऽस्य संस्कारो मूत्रपुरीषकुणपरेतसां प्राशने चेति। सुरात्रपैष्ठ्येवेतरस्याः क्षत्रियवैश्ययोरनिषेधात् । तत्संसर्गोप्यनुपलक्ष्यगोरसोविवक्षितः। रसोपलब्धौ द्रव्यान्तरसंसर्गेपि सुरात्वानपायात् । आज्यत्वस्येव पृषदाज्ये । अत एवाज्यपा इति निगदाः कार्या न पृषदाज्यपा इत्युक्तम् । तथा च मुख्यमेव प्रायश्चित्तं तत्रापद्येत । अज्ञानादिति चात्राप्यनुषज्यते ।

अज्ञानात्प्राश्य विरामूत्रं सुरासंसृष्टमेव च ।
पुनः संस्कारमर्हन्ति त्रयोवर्णा द्विजातयः ॥

इति मनुस्मरणात् । एतेनाज्ञानतः सुरापाने पुनः संस्कारः कैमुतिकन्यायेन सिद्धः। तथा च बौधायनः। अमत्या सुरापाने कृच्छ्राब्दपादं चरित्वा पुनरुपनयनमिति कामतः सुरापानेन मरणान्तिकस्यैवोक्तत्वात् । किं पुनः संस्कारेण । ब्राह्मणस्य तु कामाकामाभ्यां मद्यपानेपि पुनः संस्कारः अमत्या मद्यपान इति गौतमवाक्यात् । मत्या मद्यपाने त्वसुरायाश्चज्ञाने कृच्छ्रो घृतप्राशनं पुनः संस्कारश्चेति वसिष्ठस्मरणात् । चकारादुक्तानां चण्डालान्नभोजनादीनामनुक्तानामङ्गादिदेशगमनानाञ्चोपसंग्रहः। तथा च वसिष्ठः। एतदेव चण्डालपतितान्नभोजनेषु ततः पुनरुपनयनमिति। वल्लुरपि। विड्वराहग्रामकुक्कुटनगोमांसभक्षणे

कामा ये दाक्ष्यादिभिः प्रोक्तानि शास्त्राण्यधीयन्ते त एवं क्षिप्यन्ते ॥ भिक्षामाणवः। भिक्षां लप्स्येऽहमिति माणवः। भयब्राह्मणः। भयेन ब्राह्मणः संपद्यते। गोत्रादिषु किम्। दासीश्रोत्रियः। क्षेपे किम्। परमब्राह्मणः ॥

अङ्गानि मैरेये। ६। २। ७०॥

मद्यविशेषो मैरेयः। मधुमैरेयः। मधुविकारस्य तस्य मध्वङ्गम्। अङ्गानि किम्। परममैरेयः। मैरेये किम्। पुष्पासवः॥

भक्ताख्यास्तदर्थेषु। ६। २। ७१॥

भक्तमन्नम्। भिक्षाकंसः। भाजीकंसः। भिक्षादयोऽन्नविशेषाः॥ भक्ताख्याः किम्। समाशशालयः। समशनं समाश इति क्रियामात्रमुच्यते। तदर्थेषु किम्। भिक्षाप्रियः। बहुव्रीहिरयम्। अत पूर्वपदमन्तोदात्तम् ॥

गोबिडालसिंहसैन्धवेषूपमाने। ६। २। ७२॥

धान्यगवः। गोबिडालः। तृणसिंहः। सक्तुसैन्धवः। धान्यं गौरिवेति विग्रहः। व्याघ्रादिः। गवाकृत्या संनिवेशितं धान्यं धान्यगवशब्देनोच्यते। उपमाने किम्। परमसिंहः॥

अके जीविकार्थे। ६। २। ७३॥

दन्तलेखकः। यस्य दन्तलेखनेन जीविका। नित्यं क्रीडेति समासः। अके किम्। रमणीयकर्ता। जीविकार्थे किम्। इक्षुभक्षिकां मे धारयसि ॥

प्राचां क्रीडायाम्। ६। २। ७४॥

प्राग्देशवर्तिनां या क्रीडा तद्वाचिनि समासे ऽकप्रत्ययान्ते

परे पूर्वमाद्युदात्तं स्यात् ॥ उद्दालकपुष्पभञ्जिका । संज्ञायामिति ण्वुल् । प्राचां किम् । जीवपुत्रप्रचायिका । इयमुदीचां क्रीडा । क्रीडायां किम् । तव पुष्पप्रचायिका । पर्यायेति ण्वुच् ॥

अणि नियुक्ते । ६ । २ । ७५ ॥

अण्यन्ते परे नियुक्तवाचिनि समासे पूर्वमाद्युदात्तम् । छत्रधारः । नियुक्ते किम् । काण्डलावः ॥

शिल्पिनि चाकृञः । ६ । २ । ७६ ॥

शिल्पिवाचिनि समासे ऽण्यन्ते परे पूर्वमाद्युदात्तं स चेदण् कृञो न भवति । तन्तुवायः । तुन्नवायः । शिल्पिनि किम् । काण्डलावः । अकृञः किम् । कुम्भकारः ।

संज्ञायां च । ६ । २ । ७७ ॥

अण्यन्ते परे ॥ तन्तुवायो नाम कीटः । अकृञ इत्येव । रथकारो नाम ब्राह्मणः ॥

गोतन्तियवं पाले । ६ । २ । ७८ ॥

गोपालः । तन्तिपालः । यवपालः । अनियुक्तार्थो योगः । गो इति किम् । वत्सपालः । पाले किम् । गोरक्षः ॥

णिनि । ६ । २ । ७९ ॥

पुष्पहारी ॥

उपमानं शब्दार्थप्रकृतावेव । ६ । २ । ८० ॥

उपमानवाचि पूर्वं णिन्यन्ते परे आद्युदात्तम् । उष्ट्रक्रोशी । ध्वाङ्क्षरावी । उपमानग्रहणमस्य पूर्वयोगस्य च विषयविभागार्थम् । शब्दार्थप्रकृतौ किम् । वृकवञ्ची । प्रकृतिग्रहणं किम् । प्रकृतिरेव

यत्रोपसर्गनिरपेक्षा शब्दार्था तत्रैव यथा स्यात् । इह मा भूत् । गर्दभोच्चारी ॥

युक्तारोह्यादयश्च । ६ । २ । ८१ ॥

आद्युदात्ताः । युक्तारोही । आगतयोधी । आगतप्रहारी । णिन्यन्ताः पूर्वोत्तरपदनियमार्थं पठ्यन्त इति केचित् । इह मा भूत् । वृक्षारोही । युक्ताध्यायीति । क्षीरहोता । भगिनीभर्ता । याजकादित्वात् षष्ठीसमासावेतौ । एकशितिपात् । एकः शितिः पादो यस्येति त्रपदो बहुव्रीहिः । तत्र एकशितिशब्दस्तद्धितार्थोत्तरपद इति तत्पुरुषसंज्ञः तस्य निमित्तस्वरबलीयस्त्वादन्तोदात्तत्वं प्राप्तमित्याद्युदात्तत्वं विधीयते । अन्यथैकशब्दस्य कन्नन्तत्वेनाद्युदात्तत्वात् बहुव्रीहिनिमित्तपूर्वपदप्रकृतिस्वरेणैव सिद्धे तत् व्यर्थं स्यात् । एवमपि नार्थं एतेन इगन्ते द्विगाविति सिद्धत्वात् । एवं तर्हि ज्ञापनार्थमेतत् ज्ञापयति शित्यन्तस्योत्तरपदे द्विगुस्वरो न भवतीति । तेन द्विशितिपादित्यत्र द्विशितिशब्दोऽन्तोदात्तो भवति । निमित्तस्वरबलीयस्त्वस्यापि एकशितिपात्स्वरवचनमेव ज्ञापकं वर्णयन्ति । फलं द्विशितिपादित्येव । पात्रे समितादयश्च युक्तारोह्यादयस्ततस्तेऽप्याद्युदात्ता भवन्ति ॥

दीर्घकाशतुषभ्राष्ट्रवटं जे । ६ । २ । ८२ ॥

कुटीजः । काशजः । तुषजः । भ्राष्ट्रजः । वटजः ॥

अन्त्यात् पूर्वं बह्वचः । ६ । २ । ८३ ॥

बह्वचः पूर्वपदस्यान्त्यात् पूर्वमुदात्तं जे उत्तरपदे । उपसरजः । आमलकीजः । बह्वचः किम् । दग्धजानि तृणानि ॥

ग्रामे ऽनिवसन्तः । ६ । २ । ८४ ।

ग्रामे परे पूर्वमाद्युदात्तं तच्चेत् निवसद्वाचि न । मल्लग्रामः । ग्रामशब्दोऽत्र समूहवाची । देवग्रामः । देवस्वामिकः । अनिवसन्तः किम् । दाक्षिग्रामः । दाक्षिनिवासः ॥

घोषादिषु च । ६ । २ । ८५ ॥

दाक्षिघोषः । दाक्षिकटः । दाक्षिह्रदः ॥

छात्र्यादयः शालायाम् । ६ । २ । ८६ ॥

छात्रिशाला । व्याडिशाला । यदापि शालान्तः समासो नपुंसकलिङ्गो भवति तदापि तत्पुरुषे शालायां नपुंसक इत्येतस्मात् पूर्वविप्रतिषेधेनायमेव स्वरः । छात्रिशालम् ॥

प्रस्थे ऽवृद्धमकर्क्यादीनाम् । ६ २ । ८७ ॥

प्रस्थशब्दे उत्तरपदे कर्क्यादिवर्जितमवृद्धं पूर्वपदमाद्युदात्तं स्यात् ॥ इन्द्रप्रस्थः । अवृद्धं किम् । दाक्षिप्रस्थः । अकेति किम् । कर्कीप्रस्थः । मकरीप्रस्थः ॥

मालादीनां च । ६ । २ । ८८ ॥

वृद्धार्थमिदम् । मालाप्रस्थः । शोणाप्रस्थः ॥

अमहन्नवं नगरेऽनुदीचाम् । ६ । २ । ८९ ॥

नगरे परे महन्नववर्जितं पूर्वमाद्युदात्तं स्यात् तच्चेदुदीचां न । ब्रह्मनगरम् । अमेति किम् । महानगरम् । नवनगरम् । अनुदीचां किम् । नान्दीनगरम् ॥

अर्मे चावर्णं द्व्यच् त्र्यच् । ६ । २ । ९० ॥

अर्मे परे ह्यच् त्र्यच् पूर्वमवर्णान्तमाद्युदात्तम्। गुप्तार्मम्। कुक्कुटार्मम्। अवर्णं किम्। बृहदर्मम्। ह्यच् त्र्यच् किम्। कपिञ्जलार्मम्। अमहन्नवमित्येव। महार्मम्। नवार्मम्॥

न भूताधिकसंजीवमद्राश्मकज्जलम्। ६। २। ९१॥

अर्मे परे नैतान्याद्युदात्तानि॥ भूतार्मम्। अधिकार्मम्। संजीवार्मम्। मद्राश्मग्रहणं संघातविगृहीतार्थम्। मद्रार्मम्। अश्मार्मम्। मद्राश्मार्मम्। कज्जलार्मम्॥ आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम्॥ * ॥ दिवोदासाय दाशुषे वध्र्यश्वाय दाशुषे॥

अन्तः। ६। २। ९२॥

अधिकारोऽयं प्रागुत्तरपदादिग्रहणात्।

सर्वं गुणकार्त्स्न्ये। ६। २। ९३॥

सर्वशब्दः पूर्वपदमन्तोदात्तम्। सर्वश्वेतः। सर्वमहान्। सर्वं किम्। परमश्वेतः। आश्रयव्याप्त्या परमत्वं श्वेतस्येति गुणकार्त्स्न्ये वर्तते। गुणेति किम्। सर्वसौवर्णः। कार्त्स्न्ये किम्। सर्वेषां श्वेततरः सर्वश्वेतः। गुणात्तरेण समासस्तरलोपश्च वक्तव्य इत्यनेनात्र समासस्तरलोपश्च॥

संज्ञायां गिरिनिकाययोः। ६। २। ९४॥

एतयोः परतः पूर्वमन्तोदात्तम्। अञ्जनागिरिः। मौण्डनिकायः। संज्ञायां किम्। परमगिरिः। ब्राह्मणनिकायः॥

कुमार्यां वयसि। ६। २। ९५॥

पूर्वपदमन्तोदात्तम्। वृद्धकुमारी। कुमारीशब्दः पुंसा सहासंप्रयोगमात्रप्रवृत्तिनिमित्तमुपादाय प्रयुक्तो वृद्धादिभिः समाना-

धिकरणः । तच्च वय इह गृह्यते न कुमारत्वमेव । वयसि किम् । परमकुमारी ॥

उदके ऽकेवले । ६ । २ । ९६ ॥

अकेवलं मिश्रं तद्वाचिनि समासे उदके परे पूर्वमन्तोदात्तम् ॥ गुडोदकम् । स्वरे कृते ऽत्र एकादेशः । स्वरितो वाऽनुदात्ते पदादाविति पक्षे स्वरितः । अकेवले किम् । शीतोदकम् ॥

द्विगौ क्रतौ । ६ । २ । ९७ ॥

द्विगावुत्तरपदे क्रतुवाचिनि समासे पूर्वमन्तोदात्तम् ॥ गर्गत्रिरात्रम् । द्विगौ किम् । अतिरात्रः । क्रतौ किम् । बिल्वहोमस्य सप्तरात्रम् । बिल्वसप्तरात्रम् ॥

सभायां नपुंसके । ६ । २ । ९८ ॥

सभायां परतो नपुंसकलिङ्गे समासे पूर्वमन्तोदात्तम् । गोपालसभम् । स्त्रीसभम् । सभायां किम् । ब्राह्मणसेनम् । नपुंसके किम् । राजसभा । प्रतिपदोक्तनपुंसकग्रहणान्नेह । रमणीयसभम् । ब्राह्मणकुलम् ॥

पुरे प्राचाम् । ६ । २ । ९९ ॥

शिवदत्तपुरम् । नान्दीपुरम् । प्राचां किम् । शिवपुरम् ॥

अरिष्टगौडपूर्वे च । ६ । २ । १०० ॥

पुरे परे ऽरिष्टगौडपूर्वे समासे पूर्वमन्तोदात्तम् । अरिष्टपुरम् । गौडपुरम् । पूर्वग्रहणं किम् । इहापि यथा स्यात् । अरिष्टाश्रितपुरम् । गौडभृत्यपुरम् ॥

न हास्तिनफलकमार्देयाः । ६ । २ । १०१ ॥

पुरे परे नैतान्यन्तोदात्तानि । हास्तिनपुरम् । फलकपुरम् । मार्देयपुरम् । मृदोरपत्यमिति शुभ्रादित्वाड्ढक् ॥

कुसूलकूपकुम्भशालं बिले । ६ । २ । १०२ ॥

एतान्यन्तोदात्तानि बिले परे । कुसूलबिलम् । कूपबिलम् । कुम्भबिलम् । शालबिलम् । कुसूलादि किम् । सर्वबिलम् । बिले किम् । कूसूलस्वामी ॥

दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु । ६ । २ । १०३ ॥

दिक्शब्दा अन्तोदात्ता भवन्त्येषु । पूर्वेषुकामशमी । अपरकृष्ण-मृत्तिका । जनपद । पूर्वपञ्चालाः । आख्यान । पूर्वयायातम् । ययातिमधिकृत्य कृतमाख्यानमित्यर्थः । पूर्वचानराटम् । शब्दग्रहणं कालवाचिनोऽपि दिक्शब्दस्य परिग्रहार्थम् ॥

आचार्योपसर्जनश्चान्तेवासिनि । ६ । २ । १०४ ॥

सप्तम्यर्थे प्रथमा । आचार्योपसर्जनान्तेवासिनि परे दिक्शब्दा अन्तोदात्ता भवन्ति ॥ पूर्वपाणिनीयाः । आचेति किम् । पूर्वान्तेवासी । अन्तेवासिनि किम् । पूर्वपाणिनीयं शास्त्रम् ॥

उत्तरपदवृद्धौ सर्वं च । ६ । २ । १०५ ॥

उत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता तद्वत्युत्तरपदे परे सर्वशब्दो दिक्शब्दाश्चान्तोदात्ता भवन्ति ॥ सर्वपाञ्चालकः ॥ अप-रपाञ्चालकः । अधिकारग्रहणं किम् । सर्वभासः । सर्वकारकः ॥

बहुव्रीहौ विश्वं संज्ञायाम् । ६ । २ । १०६ ॥

बहुव्रीहौ विश्वशब्दः पूर्वपदभूतः संज्ञायामन्तोदात्तः स्यात् ॥ पूर्वपदप्रकृतिस्वरेण प्राप्तस्याद्युदात्तस्यापवादः । विश्वकर्मा । विश्व-

देवः। आविश्वदेवं सत्पतिम्। बहुव्रीहौ किम्। विश्वे च ते देवाश्च विश्वदेवाः। संज्ञायां किम्। विश्वदेवः। विश्वमित्रो विश्वाजिन इत्यत्र संज्ञायां मित्राजिनयोरित्येतद्भवति परत्वात्। प्रागव्ययीभावात् बहुव्रीह्यधिकारः॥ अन्तोदात्तप्रकरणे मरुद्वृधादीनां छन्दस्युपसंख्यानम्॥ * ॥ मरुद्वृधः सुवया उपस्थे॥

उदराश्वेषुषु। ६। २। १०७॥

वृकोदरः। हर्यश्वः। सुवर्णपुङ्खेषुः॥

क्षेपे। ६। २। १०८॥

उदराश्वेषुषु पूर्वमन्तोदात्तं बहुव्रीहौ निन्दायाम्॥ घटोदरः कटुकाश्वः। अनिघातेषुः। अनुदर इत्यत्र नञ्सुभ्यामित्येतद्भवति विप्रतिषेधेन॥

नदी बन्धुनि। ६। २। १०९॥

बन्धुशब्दे परे नद्यन्तं पूर्वमुदात्तं बहुव्रीहौ। गार्गीबन्धुः। नदी किम्। ब्रह्मबन्धुः। ब्रह्मशब्द आद्युदात्तः। बन्धुनि किम्। गार्गीप्रियः॥

निष्ठोपसर्गपूर्वमन्यतरस्याम्। ६। २। ११०॥

निष्ठान्तं पूर्वपदमन्तोदात्तं वा। प्रधौतपादः २। निष्ठा किम्। प्रसेवकमुखः। उपसर्गपूर्वं किम्। शुष्कमुखः॥

उत्तरपदादिः। ६। २। १११॥

उत्तरपदाधिकार आपादान्तं आद्यधिकारस्तु प्रकृत्या भगालमित्यवधिकः॥

कर्णो वर्णलक्षणात् । ६ । २ । ११२ ॥

वर्णवाचिनो लक्षणवाचिनश्च परः कर्णशब्द आद्युदात्तो बहुव्रीहौ । शुक्लकर्णः । शङ्कुकर्णः । कर्णः किम् । श्वेतपादः । वर्णलक्षणात् किम् । शोभनकर्णः ॥

संज्ञौपम्ययोश्च । ६ । २ । ११३ ॥

मणिकर्णः । गोकर्णः ॥

कण्ठपृष्ठग्रीवाजङ्घं च । ६ । २ । ११४ ॥

संज्ञौपम्ययोर्बहुव्रीहौ ॥ शितिकण्ठः । काण्डपृष्ठः । सुग्रीवः । नाडीजङ्घः । औपम्ये । खरकण्ठः । गोपृष्ठः । अश्वग्रीवः । गोजङ्घः ॥

शृङ्गमवस्थायां च । ६ । २ । ११५ ॥

शृङ्गशब्दोऽवस्थायां संज्ञौपम्ययोश्चाद्युदात्तो बहुव्रीहौ ॥ उद्गतशृङ्गः । द्व्यङ्गुलशृङ्गः । अत्र शृङ्गोद्गमनादिकृतो गवादेर्वयोविशेषोऽवस्था । संज्ञायाम् । ऋष्यशृङ्गः । उपमायाम् । मेषशृङ्गः । अवस्थेति किम् । स्थूलशृङ्गः ॥

नञो जरमरमित्रमृताः । ६ । २ । ११६ ॥

नञः पर एते आद्युदात्ता बहुव्रीहौ । ता मे जराय्वजरम् । अमरम् । अमित्रमर्दय अवो देवेष्वमृतम् । नञः किम् । ब्राह्मणमित्रः । जेति किम् । अशत्रुः ॥

सोर्मनसी अलोमोषसी । ६ । २ । ११७ ॥

सोः परं लोमोषसी वर्जयित्वा मन्नन्तमसन्तं चाद्युदात्तं स्यात् ॥ नञ्सुभ्यामित्यस्यापवादाविमौ । सुकर्माणः । सुयुजः । स नो वक्षदनिमानः सुब्रह्मा । शिवा पशुभ्यः सुमनाः । सुवर्चाः । सुपेशसस्क-

रति । सोः किम् । कृतकर्मा । मनसी किम् । सुराजा । अलोमो-षसी किम् । सुलोमा । सूषाः । कपि तु परत्वात् कपि पूर्वमिति भवति । सुकर्मकः । सुस्रोतस्कः ॥

क्रत्वादयश्च । ६ । २ । ११८ ॥

सोः परे आद्युदात्ताः स्युः ॥ साम्राज्याय सुक्रतुः । सुप्रतीकः । सुहव्यः । सुप्रतूर्तिमनेहसम् ।

आद्युदात्तं द्व्यच् छन्दसि । २ । ११९ ॥

यदाद्युदात्तं द्व्यच् तत् सोरुत्तरं बहुव्रीहावाद्युदात्तम् ॥ अधा स्वश्वाः सुरथां आतिथिग्वे । नित्स्वरेणाश्वरथावाद्युदात्तो । आद्युदात्तं किम् । या सुबाहुः । द्व्यच् किम् । सुगुरसत्सु हिरण्यः । हिरण्यशब्दस्त्र्यच् ॥

वीरवीर्यैा च । ६ । २ । १२० ॥

सोः परो बहुव्रीहो छन्दस्याद्युदात्तो । सुवीरेण रयिणा सुवीर्यस्य गोमतः । वीर्यशब्दो यत्प्रत्ययान्तः । तत्र यतो नाव इत्याद्युदात्तत्वं नेति वीर्यग्रहणं ज्ञापकम् । तत्र हि सति पूर्वणैव सिद्धं स्यात् ॥

कूलतीरतूलमूलशालाक्षसममव्ययीभावे । ६ । २ । १२१ ॥

उपकूलम् । परितीरम् । उपतूलम् । उपमूलम् । उपशालम् । उपाक्षम् । सुषमम् । निःषमम् । तिष्ठद्गुप्रभृतिष्वेते । कूलादिग्रहणं किम् । उपकुम्भम् । अव्ययीभावे किम् । परमकूलम् ॥

कंसमन्थशूर्पपाय्यकाण्डं द्विगो । ६ । २ । १२२ ॥

द्विकंसः । द्विमन्थः । द्विशूर्पः । द्विपाय्यम् । द्विकाण्डम् । द्विगो किम् । परमकंसः ॥

तत्पुरुषे शालायां नपुंसके । ६ । २ । १२३ ॥

शालान्ते तत्पुरुषे नपुंसकलिङ्गे उत्तरपदमाद्युदात्तम् ॥ ब्राह्मणशालम् । तत्पुरुषे किम् । दृढशालम् । ब्राह्मणकुलम् । शालायां किम् । ब्राह्मणसेनम् । नपुंसके किम् । ब्राह्मणशाला ॥

कन्था च । ६ । २ । १२४ ॥

तत्पुरुषे नपुंसकलिङ्गे कन्थाशब्द उत्तरपदमाद्युदात्तम् ॥ सौशमिकन्थम् । आह्वरकन्थम् । नपुंसके किम् । दाक्षिकन्था ॥

आदिश्चिहणादीनाम् । ६ । २ । १२५ ॥

कन्थान्ते तत्पुरुषे नपुंसकलिङ्गे चिहणादीनामादिरुदात्तः ॥ चिहणकन्थम् । मण्डरकन्थम् । आदिरिति वर्तमाने पुनर्ग्रहणं पूर्वपदस्याद्युदात्तार्थम् ॥

चेलखेटकटुककाण्डं गर्हायाम् । ६ । २ । १२६ ॥

चेलादीन्युत्तरपदान्याद्युदात्तानि ॥ पुत्रचेलम् । नगरखेटम् । दधिकटुकम् । प्रजाकाण्डं । चेलादिसादृश्येन पुत्रादीनां गर्हा । व्याघ्रादित्वात् समासः । गर्हायां किम् । परमचेलम् ॥

चीरमुपमानम् । ६ । २ । १२७ ॥

वस्त्रं चीरमिव वस्त्रचीरम् । कम्बलचीरम् । उपमानं किम् । परमचीरम् ॥

पललसूपशाकं मिश्रे । ६ । २ । १२८ ॥

घृतपललम् । घृतसूपः । घृतशाकम् । भक्ष्येण मिश्रीकरणमिति समासः । मिश्रे किम् । परमपललम् ॥

कूलसूदस्थलकर्षाः संज्ञायाम् । ६ । २ । १२९ ॥

आद्युदात्तास्तत्पुरुषे । दाक्षिकूलम् । शाण्डिसूदम् । दाण्डायनस्थलम् । लिङ्गविशिष्टपरिभाषया दाण्डायनस्थली । दाक्षिकर्षः । ग्रामसंज्ञा एताः । संज्ञायां किम् । परमकूलम् ॥

अकर्मधारये राज्यम् । ६ । २ । १३० ॥

कर्मधारयवर्जिते तत्पुरुषे राज्यमुत्तरपदमाद्युदात्तम् । ब्राह्मणराज्यम् । अकेति किम् । परमराज्यम् ॥ चेलराज्यादिस्वरादव्ययस्वरः पूर्वविप्रतिषेधेन ॥ * ॥ कुचेलम् । कुराज्यम् ॥

वर्ग्यादयश्च । ६ । २ । १३१ ॥

अर्जुनवर्ग्यः । वासुदेवपक्ष्यः । अकर्मधारये इत्येव । परमवर्ग्यः । वर्ग्यादिर्दिगाद्यन्तर्गणः ॥

पुत्रः पुंभ्यः । ६ । २ । १३२ ॥

पुंशब्देभ्यः परः पुत्रशब्द आद्युदात्तस्तत्पुरुषे । दाशकिपुत्रः । माहिषपुत्रः । पुत्रः किम् । कौनटिमातुलः । पुंभ्यः किम् । दाक्षीपुत्रः ।

नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः । ६ । २ । १३३ ॥

एभ्यः पुत्रो नाद्युदात्तः । आख्याग्रहणात् पर्यायाणां तद्विशेषाणां च ग्रहणम् । आचार्यपुत्रः । उपाध्यायपुत्रः । शाकटायनपुत्रः । राजपुत्रः । ईश्वरपुत्रः । नन्दपुत्रः । ऋत्विक्पुत्रः । याजकपुत्रः । होतुःपुत्रः । ऋतो विद्येत्यलुक् । संयुक्ताः सम्बन्धिनः । श्यालपुत्रः । ज्ञातयो मातापितृसम्बन्धेन बान्धवाः । ज्ञातिपुत्रः । भ्रातुष्पुत्रः । पुत्रस्वरे प्रतिषिद्धे समासान्तोदात्तत्वमेव भवति ॥

चूर्णादीन्यप्राणिषष्ठ्याः । ६ । २ । १३४ ॥

एतानि प्राणिभिन्नषष्ठ्यन्तात् पराणि आद्युदात्तानि तत्पुरुषे ॥ मुद्गचूर्णम् । अप्रेति किम् । मत्स्यचूर्णम् ॥

षट् च काण्डादीनि । ६ । २ । १३५ ॥

अप्राणिषष्ठ्या आद्युदात्तानि ॥ दर्भकाण्डम् । दर्भचीरम् । तिलपललम् । मुद्गसूपः । मूलशाकम् । नदीकूलम् । काण्डादीनि पूर्वसूत्रनिर्दिष्टानि गृह्यन्ते । तेषां सिद्धे स्वरे पुनर्वचनं गर्हाद्युपाधिनिरासार्थम् । षट् किम् । राजसूदः । अप्रेति किम् । दत्तकाण्डम् ॥

कुण्डं वनम् । ६ । २ । १३६ ॥

कुण्डमाद्युदात्तं वनवाचितत्पुरुषे ॥ दर्भकुण्डम् । कुण्डशब्दोऽत्र सादृश्येन वने वर्तते । वनं किम् । मृत्कुण्डम् ॥

प्रकृत्या भगालम् । ६ । २ । १३७ ॥

भगालवाच्युत्तरपदं तत्पुरुषे प्रकृत्या ॥ कुम्भीभगालम् । कुम्भीनदालम् । कुम्भीकपालम् । मध्योदात्ता एते प्रकृत्येत्यधिकृतमन्त इति यावत् ॥

शितेर्नित्याबह्वज् बहुव्रीहावभसत् । ६ । २ । १३८ ॥

शितेः परं नित्याबह्वच्कं प्रकृत्या ॥ शितिपादः । शित्यंसः । पादशब्दो वृषादित्वादाद्युदात्तः । अंस शब्दः प्रत्ययस्य नित्वात् । शितेः किम् । दर्शनीयपादः । नित्याबह्वच् किम् । शितिललाटः । नित्येति किम् । शितिककुत् । ककुदस्यावस्थायां लोपोऽन्यत्र शितिककुद इत्येवेति । नायं नित्याबह्वच्कः । बहुव्रीहौ किम् । शितेः पादः शितिपादः । अभसत्किम् । शितिभसत् । शितिराद्युदात्तः । पूर्वपदप्रकृतिस्वरापवादो योगः ॥

गतिकारकोपपदात् कृत् । ६ । २ । १३९ ॥

एभ्यः कृदन्तं प्रकृतिस्वरं स्यात् तत्पुरुषे । प्रकारकः ।

प्रहरणम् । शोणा धृष्णू नृवाहसा । इध्मप्रव्रश्चनः । उपपदात् । उच्चैःकारम् । ईषत्करः । गेति किम् । देवस्य कारकः देवकारकः । शेषे षष्ठी । कृद्ग्रहणं स्पष्टार्थम् । प्रपचतितरामित्यत्र तरबाद्यन्तेन समासे कृते आम् । तत्र सति शिष्टत्वादाम्स्वरो भवतीत्येके । प्रपचतिदेश्यार्थं तु कृद्ग्रहणमित्यन्ये ॥

उभे वनस्पत्यादिषु युगपत् । ६ । २ । १४० ॥

एषु पूर्वोत्तरपदे युगपत् प्रकृत्या । वनस्पतिं वन आ । बृहस्पतिं यः । बृहच्छब्दोऽत्राद्युदात्तो निपात्यते । हर्षया शचीपतिम् । शार्ङ्गरवादित्वादाद्युदात्तः शचीशब्दः । शचीभिर्न इति दर्शनात् ॥ तनूनपात् । न राशंसं वाजिनम् । निपातनात् दीर्घः । शुनःशेपम् ।

देवताद्वन्द्वे च । ६ । २ । १४१ ॥

उभे युगपत् प्रकृत्या स्तः । आय इन्द्रावरुणौ इन्द्राबृहस्पती वयम् । देवता किम् । ल्पक्षन्यग्रोधौ । द्वन्द्वे किम् । अग्निष्टोमः ॥

नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु ।६।२।१४२॥

पृथिव्यादिवर्जितेऽनुदात्तादावुत्तरपदे प्रागुक्तं न । इन्द्राग्निभ्यां कंवृषणः । अपृथिव्यादौ किम् । द्यावापृथिवी जनयन् । आद्युदात्तो द्यावा निपात्यते । पृथिवीत्यन्तोदात्तः । सोमारुद्रौ । रोदेर्णिलुक् चेति रगन्तो रुद्रः । इन्द्रापूषणौ । श्वन्नुक्षन्पूषन्निति पूषा अन्तोदात्तो निपात्यते । शुक्रामन्थिनौ । शुक्रो रगन्तत्वात् मन्थिन् मत्वर्थीयेनिनान्तोदात्तौ । उत्तरपदग्रहणमनुदात्तादावित्युत्तरपदविशेषणं यथा स्यात् । द्वन्द्वविशेषणं मा भूत् । अनुदात्तादाविति विधिप्रतिषेधयोर्विषयविभागार्थम् ॥

अन्तः । ६ । २ । १४३ ॥

अधिकारोऽयम् ॥

थाथघञ्क्ताऽजबित्रकाणाम् । ६ । २ । १४४ ॥

थ अथ घञ् क्त अच् अप् इत्र क एतदन्तानां गतिकारकोपपदात् परेषामन्तोदात्तः । प्रभृथस्यायोः । आवसथः । घञ् । प्रभेदः । क्त । धर्ता वज्री पुरुष्टुतः । पुरुषु बहुप्रदेशेषु स्तुत इति विग्रहः । अच् । प्रचयः । अप् । प्रलवः । इत्र । प्रलवित्रम् । क । गोवृषम् । मूलविभुजादित्वात् कः । गतिकारकोपपदादित्येव । सुस्तुतं भवता ॥

सूपमानात् क्तः । ६ । २ । १४५ ॥

सोरुपमानाच्च परं गतिकारकोपपदात् क्तान्तमन्तोदात्तम् ऋतस्य योनौ सुकृतस्य । शशप्लुतः ॥

संज्ञायामनाचितादीनाम् । ६ । २ । १४६ ॥

गतिकारकोपपदात् क्तान्तमन्तोदात्तमाचितादीन् वर्जयित्वा ॥ उपहूतः शाकल्यः । परिजग्धः कौण्डिन्यः । संभूतो रामायणः । प्राप्यर्थाद्व्रवतेः कर्मणि क्तः । गतिरनन्तर इत्यत्र हि कर्मणीति वर्तते । तद्बाधनार्थं चेदम् । धनुःखाता नदी । कुद्दालखातं नगरम् । हस्तिमृदिता भूमिः । तृतीया कर्मणीति प्राप्तिरिह बाध्यते । अनेति किम् । आचितम् । आस्थापितम् ॥

प्रवृद्धादीनां च । ६ । २ । १४७ ॥

एषां क्तान्तमुत्तरपदमन्तोदात्तम् ॥ प्रवृद्धः । प्रयुक्तः । असंज्ञार्थोऽयमारम्भः । आकृतिगणोऽयम् ॥

कारकाद्दत्तश्रुतयोरेवाशिषि । ६ । २ । १४८ ॥

संज्ञायामन्तोदात्तः । देवा एनं देयासुर्देवदत्तः । विष्णुरेनं श्रूयात् विष्णुश्रुतः । कारकात् किम् । अकारकान्नियमो मा भूत् । संभूयात् संभूतो रामायणः । दत्तश्रुतयोः किम् । देवपालितः । अस्मान्नियमादत्र संज्ञायामनेति न । तृतीया कर्मणीति तु भवति । एव किम् । कारकावधारणं यथा स्यात् । दत्तश्रुतावधारणं मा भूत् । अकारकादपि दत्तश्रुतयोरन्तोदात्तो भवति । संश्रुतः । आशिषि किम् । देवैः खाता देवखाता । आशिष्येवेत्येवमत्रेष्टो नियमः । तेनानाहतो नदति देवदत्त इत्यत्र न । शङ्खविशेषस्य संज्ञेयम् । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वमेव भवति ॥

इत्थम्भूतेन कृतमिति च । ६ । २ । १४९ ॥

इत्थम्भूतेन कृतमित्येतस्मिन्नर्थे यः समासस्तत्र क्तान्तमुत्तरपदमन्तोदात्तं स्यात् । सुप्तप्रलपितम् । प्रमत्तगीतम् । कृतमिति क्रियासामान्ये करोतिर्नाभूतप्रादुर्भावे एव । तेन प्रलपिताद्यपि कृतं भवति । तृतीया कर्मणीत्यस्यापवादः । भावे प्रलपितादीनां थाथादिस्वरेणैव सिद्धमन्तोदात्तत्वम् ॥

अनो भावकर्मवचनः । ६ । २ । १५० ॥

कारकात् परमनप्रत्ययान्तं भाववचनं कर्मवचनञ्चान्तोदात्तम् ॥ पयःपानं सुखम् । राजभोजनाः शालयः । अनः किम् । हस्तदायः । भेति किम् । दन्तधावनम् । करणे ल्युट् । कारकात् किम् । निदर्शनम् ॥

मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः । ६ । २ । १५१ ॥

कारकात् पराण्येतान्युत्तरपदान्यन्तोदात्तानि तत्पुरुषे । कृत्स्वरापवादाविमौ । रथवर्त्म । पाणिनिकृतिः । छन्दोव्याख्यानम् ।

(अहमर्थप्रकाशावभासकत्वम् ।) कथं तर्हि ततोऽहमर्थप्रकाश इति चेन्न । वृत्तिकृतप्रकाशो ह्यविद्यानिवृत्तरूपचैतन्याभिव्यक्तिरपरोक्षे न चाहङ्कारावच्छिन्नचैतन्यावरकमज्ञानमस्ति तस्यानावृत्तसाक्षिण्यध्यासात् । किन्तु स्वप्रतिबिम्बितचैतन्येन वृत्तिरिवाहङ्कारोऽप्यवभास्यते । न चावभासकसाक्ष्यवच्छेदकत्वमात्रेण तज्ज्ञानत्वं इच्छादिवृत्तेरुपासनावृत्तेश्च तदभावात् ॥

इष्टापत्त्या परिहरति । नेति । न कथमपीत्यर्थः । तदेवोपपादयितुमपरोक्षवृत्त्यधीनप्रकाशशब्दार्थमाह । वृत्तिकृतेति । प्रकृते तदवच्छिन्नचैतन्यावरकाज्ञानाभावान्न तन्निवृत्तिलक्षणप्रकाशः सम्भवतीत्याह । न चाहङ्कारेति । वृत्तिकृतप्रकाशाभावे कथमहमर्थस्फुरणमित्यत आह । किं तु स्वप्रतिबिम्बितेति । अहमाकारावृत्तिर्ज्ञानं, अर्थावभासिकचैतन्यावच्छेदकत्वात्, घटवृत्तिवदित्यनुमानमिच्छादौ व्यभिचारेण दूषयति । न चावभासकेति । उपासनावृत्तेश्चेति । वाचं धेनुमुपासीतेति विहिताया उपासनाया मानसक्रियारूपायाः स्वावच्छिन्नचैतन्यप्रतिभास्याया ज्ञानत्वाभावादित्यर्थः ॥

अहमाकारान्तःकरणवृत्त्यभावे ऽपि तादृशाविद्यावृत्तिनाशादेव तत्संस्कार इति मतान्तरमाह । अस्तु वेति ।

(अन्तःकरणवृत्त्यभावेऽपिवृत्ति-नाशात्संस्कारसाधनम् ।) अस्तु वा अविद्यावृत्तिरेव सन्तन्यमानाहङ्कारादिगोचरसंस्कारहेतुः । तस्या अपि सुषुप्तौ संस्कारजनकत्वकल्पनात् । सर्वथाप्यहङ्कारादिगोचरा स्मृतिर्नित्यसाक्षिण्युपपद्यते।

संस्कारस्यान्तःकरणवृत्तिजन्यत्वनियमात्तदभावे कथं स इत्याशङ्क्य नायमस्ति नियमः सुखमहमस्वाप्समिति परामर्शहेतुसंस्कारस्य स्वापकालीनान्तःकरणवृत्त्यभावेन तदानीन्तनाविद्यावृत्तिजन्यत्वस्यावश्यकत्वादित्यभिप्रेत्याह । तस्या अपीति । पक्षत्रयेऽप्यहमर्थतद्धर्मसाक्षिनित्यत्वेऽपि तत्स्मृतिरुपपद्यत इत्युपसंहरति । सर्वथेति ॥

अनुभवनित्यत्वानुमाने बाधकं परिहृत्यानुकूलतर्कमाह । अनुभवेति ।

(तत्रानुकूलतर्कप्रदर्शनम् ।) अनुभवविनाशहेत्वनिरूपणं चानुकूलस्तर्कः । तथा हि वृत्तिविनाश इव स्फुरणविनाशेऽपि कारणविनाशो न हेतुः स्फुरणस्यानादित्वात् । नन्वविद्याविनाशवत्तद्विनाशोऽस्त्विति चेन्न । तद्वदत्रान्वयव्यतिरेकसिद्धस्य शास्त्रसिद्धस्य वा तद्विनाशहेतोरदर्शनात् ॥

किमनुभवविनाशे वृत्तिवत्कारणनाशो हेतुरुताविद्यावद्विरोधिसंसर्गः । नाद्य इत्याह । वृत्तिविनाश इति । द्वितीयं शङ्कते । नन्विति । अन्वयव्यतिरेकाभ्यां तत्त्व-

विद्यां विततामित्यादिशास्त्राच्चाविद्याया ज्ञाननिवृत्तत्ववद्वृत्त्यतिरिक्तानुभवस्य न केनापि प्रमाणेन विरोधिसंसर्गः सिद्ध इत्याह । न तद्वदिति ॥

अनुभवस्य विरोध्यभावो असिद्धः, इच्छादेरेव तद्विरोधित्वादित्याशङ्क्य हेत्वसिद्ध्या दूषयति । न च परेति ।

(अनुभवविरोधाभावासिद्धिः।) न च पराभ्युपगतज्ञानस्येव विरोधिगुणान्तरादेव तन्नाशः । तस्याहमर्थासमवेतस्य तत्समवेतगुणेनाविरुद्धत्वात् । किञ्च नित्यानुभवानङ्गीकारे ज्ञानाभावो ऽपि नानुभूयेत । वेद्यज्ञानवादे ज्ञानस्यावश्यवेद्यत्वाभावेन सत्यपि तस्मिंस्तदनुपलम्भसम्भवात् । अनुपलब्धेरधिकरणनिष्ठप्रतियोगिसत्त्वाप्रतिकूलत्वात् । अन्धकारस्थघटानुपलम्भवज्ज्ञानानुपलम्भस्याप्यभावाग्राहकत्वात् । न चान्धकारे घटानुपलम्भो घटोपलम्भसहकारिविरहात्सति घटेऽपि संगच्छते, इह तु ज्ञानग्राहकसामग्र्या मनःसन्निकर्षादेः सत्त्वात्तदनुपलम्भोऽधिकरणेतत्सत्त्वविरोधीति चेत् ।

विपक्षे बाधकमप्याह । किं चेति । नित्यानुभवानङ्गीकारे जन्यज्ञानानामवश्यवेद्यत्वनियमाभावेनानित्यज्ञानसत्त्वे

ऽपि तदनुपलम्भसम्भवाज्ज्ञानानुपलब्धेर्ज्ञानसत्त्वविरोधित्वलक्षणयोग्यताया गृहीतुमशक्यत्वादन्धकारस्थघटानुपलब्ध्या घटाभाववज्ज्ञानानुपलब्ध्या ज्ञानाभावो ऽपि गृहीतुं न शक्यत इत्याह । वेद्यज्ञानेत्यादिना । नन्वन्धकारे घटसत्त्वे ऽप्यालोकाभावेन तदुपलम्भकसामग्र्यभावादप्यनुपलम्भोपपद्यते, आत्मनि ज्ञानसत्त्वे तु संयुक्तसमवायस्यावश्यम्भावात्तदुपलम्भकसामग्र्याः सत्त्वेनानुपलम्भायोगादिति तत्सत्त्वविरोधी तदनुपलम्भ इति चोदयति । नन्वन्धकार इति ॥

नित्यानुभवानङ्गीकारे ज्ञानग्राहकसामग्रीदुर्निरूपेत्यभिप्रेत्य विकल्पयति । किं मनसेति ।

(नित्यानुभवानङ्गीकारे विकल्पः ।) किं मननसंयुक्तःसमवाय एव ज्ञानग्राहकसामग्री किं वा संयोगविशेषघटिततत्समवायः । अथवा ज्ञानान्तरसामग्रीसहकृतः संयुक्तसमवाय उत बुभुत्सासहकृतः स एव । नाद्यः ज्ञानप्रवाहाविच्छेदप्रसङ्गात् । न हि सत्यां सामग्र्यां किञ्चिज्ज्ञानं जायते किञ्चिन्नेति युक्तम् । न द्वितीयः । संयोगे विशेषस्य निरस्तत्वात् । नापि तृतीयः । सत्यामपि ज्ञानान्तरसामग्र्यां ज्ञानग्रहदर्शनात् । अन्यथा ज्ञानमेव न गृह्येत । ज्ञानान्तरसामग्र्या आवश्यकत्वात् ॥

व्यवसायानुव्यवसाये ऽपि संयुक्तसमवायसत्त्वात्तद्विषयज्ञानान्तरं स्यात्, एवं तद्विषयज्ञानान्तरमिति वाह्यविषयज्ञानविलोपः स्यादित्याह । नाद्य इति । द्वितीये संयोगे विशेषो जातिरुपाधिर्वा स्यात् । उभयथाप्यनुपपत्तेरित्युक्तमित्याह । न द्वितीय इति । तृतीयस्त्वसम्भवीत्याह । नापि तृतीय इति । असम्भममेव व्यतिरेकमुखेनोपपादयति । अन्यथेति । ज्ञानग्रहसामग्रीदशायामात्मग्रहसामग्र्या आवश्यकत्वादित्याह । ज्ञानान्तरेति ।

किञ्चास्मिन्पक्षे ज्ञानाभावग्रहाय ज्ञानान्तरसामग्र्यभावो ऽपि ग्राह्यः, सामग्र्यभावश्च ज्ञानान्तराभावकल्प्यः, ज्ञानान्तराभावग्रहश्च तदितरज्ञानसामग्र्यभावं विनानेत्यनवस्थापात इत्यपि द्रष्टव्यम् । दुःखतत्साधनज्ञानस्याबुभुत्सितस्यापि ग्रहणाद्बुभुत्सा न ज्ञानग्रहे हेतुरित्याह । नापीति ।

(बुभुत्सा न ज्ञानहेतुः ।) नापि तुरीयः । अबुभुत्सितज्ञानस्यापि ग्रहणेन बुभुत्साया ज्ञानग्रहाहेतुत्वादित्युक्तम् । तस्माज्ज्ञानस्य मानसत्वायोगाज्ज्ञानानुपलम्भो नाधिकरणे तत्सत्ताविरोधीति न तदभावः प्रत्यक्षः स्यात् । अनुपलब्धेरन्यथा सिद्धत्वादेव नानुपलब्धिलिङ्गको ऽपि । नापि व्यवहाराभावेनानुमीयते । तस्य तेनानियतत्वात् । नापि शब्दात्। परस्य तद्ग्राहकाभावेन तद्वाचकशब्द-

प्रयोगायोगात्स्वप्रयोगस्य च स्वधीपूर्वकत्वात् । स्वप्रकाशवादिमते ऽपि समवायस्यानित्यतया पाकरक्ते श्यामसमवायाभावेनैव सत्यपि तस्मिंस्तदनुपलम्भोपपत्तेः ॥

ज्ञानस्य संयुक्तसमवायमात्रेण मनोग्राह्यत्वायोगात्तदनुपलम्भस्य तत्सत्त्वे ऽप्युपपत्तेस्तत्सहकृतप्रत्यक्षेण नाभावग्रह इत्युपसंहरति । तस्मादिति । ननु ज्ञानमात्मनिष्ठाभावप्रतियोगी तत्रानुपलभ्यमानत्वादित्यनुमानात्तदभावनिश्चय इत्याशङ्क्यानुपलभ्यमानत्वमात्रस्यातीन्द्रिये व्यभिचारादधिकरणेप्रतियोगिसत्ताविरोधित्वलक्षणयोग्यताया ज्ञानानुपलम्भेप्यभावादित्यभिप्रेत्याह । अनुपलब्धेरिति । अहं ज्ञानरहितः व्यवहाररहितत्वात् घटवदित्यनुमानात्तदभावसिद्धिरित्याशङ्क्य मौनिषु व्यभिचारान्नैवमित्याह । नापि व्यवहारेति । तर्हि शब्दाज्ज्ञानाभावधीरित्याशङ्क्य किं परप्रयुक्तशब्दादुतस्वप्रयुक्तशब्दादुभयथापि प्रयोगहेत्वभावप्रत्ययाभावात्प्रयोग एवानुपपन्न इत्याह । नापि शब्दादिति । एवं वेद्यज्ञानवादे ऽनुभवविरोधमप्रयोजकत्वं च निरस्य स्वप्रकाशज्ञानवादे ऽपि योग्यानुपलब्ध्यभावेन ज्ञानाभावग्रहायोगान्नाशाद्यनुभवस्य तत्समवायविषयत्वसम्भवान्न तस्यानुभवनित्यतानुमानबाधकत्वमित्याह । स्वप्रकाशेति । यथा गुरुमते श्यामताया नित्यतया तत्समवायनाशादेव पाकरक्तघटे तदनुपलम्भः, यथा वा पुरुषान्तरे घटज्ञानसत्त्वे ऽपि स्वस्मिंस्तत्समवायाभावासद-

नुपलम्भ एवं स्वस्मिन्ननुभूतघटज्ञानस्य नित्यत्वे ऽपि कालान्तरे स्वसमवायाभावेनैवानुपलम्भोपपत्तेर्न तदभावसिद्धिरित्यर्थः ॥

नवीनमते ज्ञानस्वप्रकाशत्वसमवायनित्यत्वयोरङ्गीकारादनुपलब्धेः प्रतियोगिसत्त्वविरोधित्वादनुभवाभावो निश्चेतुं शक्यत इत्याशङ्क्य तन्मते ऽप्यनुपलब्धिरन्यथापि सम्भवतीत्याह । यदि चेति ।

(नवीनमतेऽप्यनुपलब्धेरन्यथासम्भवः ।) यदि चार्वाचीनः कश्चित्स्वप्रकाशं ज्ञानं समवायो नित्य इति ब्रूयात्तन्मते ऽपि न ज्ञानाभावः शक्यते ग्रहीतुं प्रतियोगिसत्ताविरोध्यनुपलम्भस्याभावात् ।

ननु स्वप्रकाशज्ञानग्रहे तत्तत्सम्बन्धातिरिक्तापेक्षाभावात्पटज्ञानकाले घटज्ञानानुपलम्भस्तत्सत्ताविरोध्यस्तीति चेन्न। तन्मते पटज्ञान कालीनस्य घटज्ञानसमवायानुपलम्भस्य तन्निरूपकतज्ज्ञानविरहादिव घटज्ञानानुपलम्भस्यापि तन्निरूपकघटसम्बन्धविरहादप्युपपत्तेः । पटज्ञानकाले ज्ञाने तदीयत्वानुभवाभावे ऽपिज्ञानमात्रानुभवस्य सत्त्वात् । ज्ञानज्ञेययोः स्वरूपमेव सम्बन्ध इति मते ऽपि यथा च त्वदी-

यघटाभावभूतलयोः स्वरूपमपि सम्बन्धः कालभेदेन न तु सर्वदा, अन्यथा पटवति घटाभावभ्रमस्य विद्यमानाभावभूतलवैशिष्ट्यविषयत्वेन प्रमात्वापातात् । एवं ज्ञानज्ञेययोरपि कालभेदेन सम्बन्धस्वभावं स्वरूपमिति सम्बन्धिनोः सतोरपि सम्बधाभावोपपत्तेः ।

तन्मते ज्ञानसत्त्वे तदुपलम्भे ऽपेक्षणीयान्तराभावादनुपलम्भो भावमन्तरेण न सम्भवतीति चोदयति । नन्विति । पटज्ञानसमये ज्ञानमात्रानुपलम्भो ऽसिद्ध एव, घटज्ञानत्वेनानुपलम्भस्तु तत्काले घटसम्बन्धाभावेनैव नित्यस्याप्युपपद्यते । यथा तन्मते तत्काले घटज्ञानसमवायानुपलम्भः, समवायस्य नित्यत्वे ऽपि घटज्ञानेन स्वरूपसम्बन्धाभावादेव तद्वदिति परिहरति । न तन्मत इति । ननु समवायस्यैकत्वात्तस्य पटज्ञानकाले ऽप्यनुभूयमानत्वान्नानुपलम्भ इत्याशङ्क्य तुल्यमित्याह । पटज्ञानेति । ननु पटज्ञानसमये घटस्याप्यसत्त्वाभावाज्ज्ञानस्यापि सत्त्वे स्वरूपद्वयात्मकसम्बन्धस्यापि सत्त्वेन घटीयत्वेनानुपलम्भो न स्यादित्याशङ्क्य ज्ञानज्ञेययोः स्वरूपसम्बन्धनियमाभावात्तदङ्गीकारे ऽपि पटज्ञानकाले विद्यमानस्यापि घटस्य सम्बन्धरूपत्वाभावात्कालविशेष एव स्वरूपस्य सम्बन्धरूपत्वात्तदा ज्ञाने घटीयत्वं नास्तीत्याह । ज्ञानज्ञेययोरिति । ननु सिद्धान्ते ऽपि कथं वृत्त्यभावानुभवः । विद्यमानाया अपि तस्याः कालभेदेन स्वरूपसम्बन्धाभावेनानुपलम्भोपपत्तेरिति चेन्नैवम् । प्रत्यक्षवृत्तेर्मुख्यसम्बन्धेन यावत्स्व

कालीनसावयवसौरमासाश्चान्द्रा न कृताः । अधिमाससंख्यायोजनाभा-
वात् । ततस्तदन्तर्गतचैत्राद्यवधिमासाश्चान्द्राः सिद्धा इति फलितमत-
श्चैत्रादौ द्वादशगुणितवर्षाणि यथोक्तसौरचान्द्रमासयोगस्तस्य चैत्रादिगत-
चान्द्रमासयोजनेनेष्टचान्द्रमासादौ तादृशयोग इति सिद्धम् । एतेन विभि-
न्नजात्योर्योगासम्भवेन द्वादशगुणसौरवर्षमितसौरमासानां चैत्रादिगतचा-
न्द्रमासयोजनं कथं कृतमिति दूषणं परास्तम् । द्वादशगुणस्य स्वतो
योगात्मकत्वेन चान्द्राणामपि तदन्तर्गतत्वात् । अथैतद्योगस्येष्टदिनक-
रणार्थं दिनात्मकत्वं त्रिंशद्गुणेन 'खरामैर्मासः' इति सामान्यपरिभाषाश्रव-
णात् । अतः खदहनैर्गुणित इत्युक्तम् । अयं तादृशदिनयोग इष्टचान्द्र-
मासादौ इष्टकाले तादृशज्ञानार्थं शुक्लादिगततिथियुतः । एवं च गणिता-
गताधिमासान्तकालपर्यन्तं कल्पात् सौरदिनानि सावयवानि तत
इष्टतिथ्यारम्भपर्यन्तं चान्द्रदिनानि तादृशानि च तद्योगोऽयं निरवयव
इति सिद्धम् । अस्य कल्पादिष्टतिथिपर्यन्तं चान्द्रज्ञानार्थं केवलाधिमासा
योज्यास्तत्र कल्पसौरदिनैः कल्पाधिमासास्तदिष्टसौरदिनैः के इत्यनुपा-
तेनाधिमासान्ते यानि सौरदिनानि योगान्तर्गतानि कल्पाधिमासगुणानि
कल्पसौरदिनभक्तानि फलमधिमासा निरवयवाः । अधिमासान्तेऽधिशेषा-
भावात् । एवमधिमासान्तकालादिष्टकालपर्यन्तं यदधिशेषं तस्याग्रे उपयो-
गात् कल्पचान्द्रदिनैः कल्पाधिमासास्तदा तदेष्टतिथिमध्यस्थचान्द्रदिनै-
र्योगान्तर्गतैः के इत्यनुपातेनाधिमासाभावादधिशेषमायाति तच्च सौरं
चान्द्रात् साधितत्वात् । अधिमासाश्चान्द्राः सौरात् साधितत्वात् । तत्रा-
धिशेषस्याधिमासावयवत्वाच्चान्द्रीकरणम् । कल्पसौरैः कल्पचान्द्रास्तदा-
ऽधिशेषान्तःपातिसौरैः के इत्यनुपातेन कल्पचान्द्रयोः पूर्वोत्तरं हरगुण-
त्वसंभवेन तुल्यत्वान्नाशात् कल्पसौरहरः सिद्धः । एवं चाधिमासान्तकाला-
दिष्टतिथिपर्यन्तं चान्द्रदिनानि कल्पाधिमासगुणानि कल्पसौरभक्तानि
तदन्तरेऽधिमासाभावाच्छून्यमधिमासः फलम् । शेषं त्रिंशद्गुणं हरभक्तं
दिनाद्यधिशेषम् । अत्राधिमासतच्छेषयोः पृथक् तादृशसौरचान्द्रज्ञानाभा-

वेनानयनमशक्यमपि तथाऽपि योगेऽधिमासगुणे तादृशगुणाधिमासयोगो भवति। अयं कल्पसौरभक्तः फलमधिमासाः शेषं चान्द्रदिनगुणितकल्पाधिमासरूपम्। इदं दिनाद्यधिशेषज्ञानार्थं कल्पसौरभक्तम्। तत्राचार्यैरहर्गणानयनेऽधिशेषस्य प्रयोजनाभावेन हरभक्तं न कृतं यथास्थितमेवोपयोगेन स्थापितम्। संपूर्णचान्द्रसंख्यायां केवलाधिमासंख्यान्यूनस्य प्रतिपादनादत एवाधिशेषं दिनादिकं न ग्राह्यमित्युक्तमतस्ते केवलाधिमासास्तद्योगस्य योज्या इति योज्ययोजकयोरेकजातित्वेन योगसंभवादधिमासानां दिवसाः कार्याः। न च लाघवादधिदिनान्येवानुपातेनानीय योज्यानि अधिमासद्वारा तद्दिनानयनं गौरवमिति वाच्यम्। अधिशेषदिनयोजनापत्तेः। संपूर्णाधिदिनानामनुपातेन सिद्धत्वात् न ह्यधिमासान्ते सौरदिनसंख्याज्ञानं येन तदानीताधिदिनेषु अधिशेषाभावान्नाधिशेषमधिकमिति लाघवं स्यात्। एतानि केवलाधिमासदिनानि तद्योगे योज्यानि। कल्पादिष्टतिथिपर्यन्तं संपूर्णतिथ्यात्मकचान्द्राहर्गणः। अत उक्तं पृथगित्यादि विधेरित्यन्तं युक्तमित्युपपन्नम्। सावनज्ञानार्थं स्वानीतदिनत्तया हीनाः कार्याः। तत्र कल्पचान्द्रदिनैः कल्पावमानि तदिष्टचान्द्रदिनैः कानीत्यनुपातेनानीतसावयवावमैर्हीनश्चान्द्राहर्गणस्तिथ्यन्ते सावयवसावनाहर्गणो भवति। तत्रापि तिथ्यन्तकालस्यानियमेनाज्ञानात् सावयवाहर्गणेन गुणनादौ गौरवाच्च सूर्योदयकालस्य षष्टिसावनघट्यन्तरेण नियतत्वात् सूर्योदयावधित्वेन निरवयवसावनसिद्धेः सूर्योदयकालीनकरणार्थं तिथ्यन्तसूर्योदयमध्यवर्त्तिसावनावयवो योज्यः। तत्सावनावयवस्यावमशेषत्वेन तिथ्यन्तरूपचान्द्रसूर्योदयरूपसावनयोरन्तरकालस्यावमशेषत्वात् पूर्वानुपातानीतावमाधोऽवयवतुल्यत्वात् सावयवावमैर्हीनो न कृतश्चान्द्रोऽहर्गणः। अत एवावमशेषाद्घट्यादिकं न ग्राह्यम्। सूर्योदयकालेऽहर्गणस्य साधनादित्युक्तम्। अयं सावनाहर्गणश्चान्द्रावमान्तरेणोत्पन्न इति सूर्यस्य अन्यग्रहसावनेन चान्द्रदिनान्तरस्य पूर्वैरवमसंज्ञानभिधानात् स्वाभाविकानुपातेन स्वस्वकाले उपचयापचययोरग्रहान्मध्यमत्वम्।

ग्रहाणां सप्तसंख्यया तदधीश्वरदिनानामपि तत्संख्यात्वाद्वारज्ञानार्थमहर्गणः सप्ततष्टः शेषं कल्पादौ रविवारस्य सत्त्वात् तदादिगणनया गतवारः । अहर्गणस्य गतसंख्यात्वात् वारगणनाक्रमे युक्तिस्तु

"होरेशाः सूर्यतनयादधोऽधः परिकीर्त्तिताः"* ।

इति सूर्यसिद्धान्तानुसारेण सूर्यवारे स्वादितो गणनया "होरा सार्धद्विनाडिका" ।

इत्युक्तप्रमाणेनाहोरात्रस्य चतुर्विंशतिहोरासंख्यातः सूर्यात् त्रयः क्रमाक्रमेण होरेशा गताश्चतुर्थो होरेशश्चन्द्रो द्वितीयदिनारम्भे । एवं क्रमेण सूर्योदये तस्यैव तत्कालादिद्वितीयसूर्योदयान्तररूपसावनदिनेशत्वम् । एवमनया रीत्या चन्द्राद्भौमो भौमाद्बुध इत्यादि । एतत्क्रमे सूर्यात्क्रमेवागमः प्रमाणम् ।

"अथ तेषां क्रमं वक्ष्ये ग्रहकक्षावशाद्ग्रहम् ।
सूर्यचन्द्रौ द्युरात्रीशौ तस्मात् प्रथममादृतौ ॥
तदुपर्युपरिस्थानां ग्रहाणामग्रतः स्थितिः ॥"

इत्यपि केचित् । अत उपपत्तं पृथगित्यादि न गृह्यत इत्यन्तमुक्तम् । बहवस्तु द्वादशगुणितसौरवर्षाणि सौरवर्षादौ सौरमासास्तेषां तदादिसौरगतमासादीनामज्ञानेन चैत्रादिचान्द्रा योजितास्तेषु सौरमासानां सत्त्वात् । तस्मादिष्टसौरमासाः सौरचान्द्रान्तररूपाधिशेषाधिकाः सन्ति ते त्रिंशद्गुणा गततिथियुक्ता इष्टकाले फलात् सौरदिनान्यधिशेषेषु तान्यधिकानि अत एभ्योऽधिमासात् कल्पसौरैः कल्पाधिमासास्तदा कल्पितेष्टसौरदिनैः के इत्यनुपातेनानीय केवला योज्याः । नन्वधिशेषदिनादिकमपि सौरवर्षादिगतसौरदिनानामज्ञानेन चैत्रादिगतचान्द्रदिनयोजने पूर्वकल्पितेष्टसौरदिनेऽधिशेषस्य दिनात्मकस्याधिकत्वेन सत्त्वात् । अन्यथाऽधिशेषस्याधिक्यं चान्द्रे स्यात् । न चाधिमासानयने इष्टसौरेऽधिशेषस्याधिकत्वेनाधिशेषगुणिताधिमासेभ्यः कल्प-

* नेदं पद्यार्धं प्रचरितसूर्यसिद्धान्ते उपलभ्यते ।

सौरदिनभागेन फलस्याधिमासावयवदिनाद्यधिशेषेऽधिकत्वात् कथं तत्त्याग इति वाच्यम् । अधिकस्याशुद्धत्वेनापि त्यागसंभवात् । तस्माच्चान्द्राहर्गणस्य वास्तवत्वं युक्तमित्याहुस्तन्न विजात्योर्योगे पृथक् स्थितिरिति मूलकारेण बीजे उक्तस्य जलाञ्जलिदानापत्तेः । वास्तवसौराणामभावेनानुपातासंभवात् । अहर्गणस्य शुद्धत्वेऽप्यधिकत्वेनाधिशेषस्याशुद्धत्वापत्त्या तत्साधितसूर्यचन्द्रप्रकारादौ बहून्तरत्वेनानर्थक्यापत्तेश्च ॥ ३ ॥

इदानीं ग्रहानयनमाह ।

द्युचरचक्रहतो दिनसंचयः
कहहृतो भगणादि फलं ग्रहः ।
दशशिरःपुरि मध्यमभास्करे
क्षितिजसंनिधिगे सति मध्यमः ॥४॥

वा. भा.—अहर्गणो भगणगुणो कहहृते मध्यमो ग्रहो भवति । स च लङ्कायां मध्यमे रवौ क्षितिजासन्ने कदाचिदूर्ध्वस्थे कदाचिदधःस्थिते भवतीति ज्ञेयम् । तत्कारणं गोले कथितं व्याख्यातं च ॥ ४ ॥

वा.वा.—इदानीं ग्रहानयनमाह । द्युचरचक्रहत इति । कल्पकुदिनैः कल्पग्रहभगणा लभ्यन्ते तदेष्टकुदिनैः किमिति ग्रहो भवति । केचिल्लङ्कायां मध्याह्नमध्यरात्रास्तमनकालेषु ग्रहगतिप्रारम्भमिच्छन्ति तन्मतनिवारणाय पूर्वक्षितिजस्य इति । अग्रे चोदयान्तरकर्म वक्ष्यति तस्मात् संनिधिगे इत्युक्तम् । देशान्तरचरसंस्कारयोर्वक्ष्यमाणत्वाल्लङ्कापूर्वक्षितिजसंनिधिगे इति । भास्वत्फलसंस्कारस्य वक्ष्यमाणत्वान्मध्यमभास्कर इत्युक्तम् ॥ ४ ॥

मरीचिः—अथ यदर्थमेतावान् प्रयासस्तद्ग्रहसाधनं द्रुतविलम्बितेनाह द्युचरचक्रहत इति । द्युचरपदस्योपलक्षणेन कल्पे येषां भगणा उक्तास्तद्भगणैर्गुणितोऽहर्गणः कल्परविकुदिनभक्तः फलं यद्भगणादि विकलापर्यन्तं ग्रहो भवति । यद्भगणा गुणनार्थे गृहीतास्तद्भवतीत्यर्थः । तथा

चाहर्गणः कल्पभगणगुणः कल्पसूर्यसावनभक्तः फलं कल्पाद्गतभगणाः । शेषं द्वादशगुणं हरभक्तं भगणपूरणकालाद्राशयः । पुनः शेषं त्रिंशद्गुणं हरभक्तं राशिभोगादंशाः । पुनः षष्टिगुणं हरभक्तं कलाः । पुनः षष्टिगुणं हरभक्तं विकला इत्यादिरीत्या भगणाद्यात्मको ग्रहः । देशानामनन्तत्वेनायं क्वेत्याह दशशिरःपुरीति लङ्काभूगर्भदेशे । कालोपाधीनामनन्तत्वेन कालनियमामाह मध्यमभास्कर इति । मध्यमसूर्ये क्षितिजनिकटे सति । आकाशलग्नभूवृत्तं क्षितिजम् । मध्यमसूर्योदयप्रागपरकाले तत्काले चेत्यर्थः । अस्याकाशे गोलत्रेधानीतस्पष्टप्रत्यक्षग्रहेण विसंवादान्मध्यम इति । आकाशेऽस्यादर्शनात् स्वतः सिद्धो विसंवादः । अत एव स्पष्टाधिकारोक्तफलसंस्कारेणास्य मध्यमस्य स्पष्टत्वमुक्तम् ।

अत्रोपपत्तिः । कल्परविसावनैः कल्पभगणतुल्यो भोगस्तदा कल्पादिगतेष्टसावनदिनैः क इति फलं कल्पादिष्टकालपर्यन्तं गतभोगस्तस्येति लक्षणया भोगे ग्रहपदं प्रयुक्तमाचार्यैः । स्वस्वकाले उपचयापचययोः सत्त्वाद् तत्स्वाभाविकानुपातेनानीतग्रहस्याकाशे विसंवादान्मध्यमत्वं लङ्काप्रथमसूर्योदयकालाद्ग्रहचारप्रवृत्तेस्तत्कालाहर्गणादीनां मध्यममानेन सत्त्वान्मध्यमसूर्योदये लङ्काभूगर्भे इत्युक्तम् । अग्रे भूगर्भगणितस्य किञ्चित्संस्कारेण भूपृष्ठगणितत्वस्य प्रतिपादनात् । अथ तत्रापि मध्यमसावनषष्टिघटिकामितमत्र नाक्षत्रघटीज्ञानं घटिकादिकमार्क्षमानादित्युक्तत्वात् तत्रैकदिने नक्षत्रोदयद्वयान्तरकाले तदन्तर्गते नाक्षत्रषष्टिघटिका एता गतितुल्यभचक्रावयवप्रवहवायुकृतभोगकालासुयुताः । यद्येकराशिकलाभिरुदयासवो लभ्यन्ते तदा सूर्यमध्यकलाभिः के इत्यनुपातेन प्रतिराशीतामुदयासुवैलक्षण्यात् मध्यमसावने नाक्षत्रघटीमानवैलक्षण्यम् । अस्याप्येकरूपत्वाभावादनुपातानीताहर्गणस्य मध्यमसावनमानेनाप्तत्वात् । द्वादशराशिकलास्वोः समत्वदर्शनेन सूर्यगतितुल्यासुयुतनाक्षत्रघटिकात्मकमध्यमानासन्नस्यसावनस्यैकरूपत्वादङ्गीकारेणाहर्गणस्यैतत्-

कालीनत्वात् तदुत्पन्नग्रहस्यापि एतत्कालस्य मध्यमानीतात् प्रागपरकाले नियमेन सम्भवात् । मध्यमभास्करे क्षितिजसंनिधिगे सतीत्युक्तम् ॥ ४ ॥

इदानीं ज्ञातेऽर्केऽवमशेषाच्चन्द्रमाह ।

कोट्याहतैरङ्ककृतेन्दुविश्वै-
न्यूनाहशेषे विहृते लवाद्यम् ।
रविघ्नतिथ्याढ्यमनेन युक्तो
रविर्विधुः स्याद्विधुरूनितोऽर्कः ॥५॥

वा.भा.—अस्योपपत्तिः । चन्द्रार्कयोरन्तरभागैर्द्वादशभिरेकैका तिथिर्भवति अतस्तिथयो द्वादशगुणास्तयोरन्तरभागा भवन्ति । ते यदि रवौ क्षिप्यन्ते तदा शशी स्यात् । यदि शशिनः शोध्यन्ते तदाऽर्कः स्यादिति युक्तमुक्तम् । किन्त्वेवं तिथ्यन्ते भवति । अथ चन्द्र औदयिकः साध्यः । तत्र तिथ्यन्तार्कोदययोर्मध्येऽवमशेषं वर्त्तते । तच्च सावनम् । तस्य सावनत्वं गोले प्रतिपादितम् । तच्चानुपातेन चान्द्रं कार्यम् । यदि कल्पकुदिनैः कल्पचान्द्रदिनानि लभ्यन्ते तदाऽवमशेषान्तःपातिभिः कुदिनैः किमिति । पूर्वमवमशेषस्य चान्द्रदिनानि भागहार इदानीं तानि गुणकारः । तुल्यत्वात् तयोर्गुणकभाजकयोर्नाशे कृते कुदिनानि भागहारः । फलं चन्द्रदिनात्मकं भवति । तद्द्वादशगुणितमंशात्मकं भवति । अतो द्वादशभिः कुदिनानामपवर्त्ते कृते खाभ्रबाणगिरिरामखत्रिगोशक्रविश्वमितो भागहार उत्पन्नः । तत्र लाघवार्थमाद्येषु सप्तसु स्थानेषु शून्यान्येव कृत्वा भागहारः पठितः । यतस्तथाकृते एकाऽपि विकला नान्तरं भवति । अतस्तैश्च भागैर्युतोऽर्कः शशी स्यादित्युपपन्नम् ॥ ५ ॥

वा.वा.—अथावमशेषज्ञाने रविचन्द्रयोरन्यतरज्ञाने च तदन्यज्ञानमाह । कोट्याहतैरिति । रव्युदयकालिकरवौ रविचन्द्रान्तरयोगेन विधुर्भवति । तत्र रविचन्द्रान्तरज्ञानम् । तद्यथा । पूर्वानीतदर्शान्ताद्यस्यां तिथौ रव्युदयकालिकोऽर्को ज्ञातोऽस्ति तत्तिथ्यवधिका या गततिथयस्ता द्वादशगुणा रविचन्द्रान्तरांशा भवन्ति । यतो विरविचन्द्रलवा द्वादशहृता गततिथय

इति । परन्तु तद्रविचन्द्रान्तरं गततिथ्यन्तावधि जातम् । अपेक्षितं च वर्त्तमानतिथ्युदयावधि । तिथ्यन्तकालिकोदयकालिकयोरहर्गणयोरन्तरमिति तदवमशेषं सावनम् । अवमशेषतो रविचन्द्रान्तरांशज्ञानार्थमनुपातः । यद्येकेन सावनेन रविचन्द्रगत्यन्तरांशा एते १२ । ११ । २७ लभ्यन्ते तदाऽवमशेषान्तःपातिना किमिति गत्यन्तरांशैरवमशेषं गुणनीयम् । शेषस्य कल्पचान्द्रा हरः । गुणहरौ गुणेनापवर्त्त्य शिष्यक्लेशो माभूदित्याचार्यणाङ्केषु सप्तस्थानेषु शून्यान्येव गृहीत्वा हरः पाठपठित इति सर्वं निरवद्यम् ॥५॥

मरीचिः—अथ लाघवार्थं प्रकारान्तरेण सूर्यचन्द्रान्यतरज्ञाने तदन्यतरज्ञानमुपजातिकयाऽऽह कोट्याहतैरङ्ककृतेन्दुविश्वैरिति । न्यूनाहशेषेऽवमशेषे । अहर्गणानयने गतावमे प्राप्ते यद्भाज्ये शेषं तस्मिन्नित्यर्थः । विश्वेदेवास्त्रयोदश प्रसिद्धाः । एभिरङ्कैः स्थापितैः—१३१४९००००००० र्विहृते यत् फलं भागाद्यं तद्द्वादशगुणतिथिभिर्युतं कार्यम् । अत्र तिथिशब्देन चान्द्राहर्गणः प्रागानीतः । कल्पादीष्टकाले तत्साधनात् । अनेनानीतेन रविरहर्गणानीतो भगणादिविकलावयवान्तः । अंशाद्येषु युतश्चन्द्रः स्यात् । तादृशश्चन्द्रहीनः सूर्यः स्यात् ।

अत्रोपपत्तिः । सूर्यचन्द्रान्तरभागाः साध्यास्तदैव सूर्यचन्द्रान्यतरज्ञाने तदन्यतरज्ञानं तत्साधनं च द्वादशभागान्तरेणानयोरेका तिथिरुत्पद्यत इति प्रतिपादितत्वादेकतिथिपर्यायचान्द्रदिने तयोर्द्वादशभागान्तरं कल्पादीष्टचान्द्रदिनेषु प्रागानीतेषु किमित्यनुपातेन चान्द्राहर्गणो द्वादशगुण इष्टतिथ्यारम्भेऽन्तरांशगणः । न च लाघवात् शुक्लादिगततिथ्यनुपातेनान्तरांशज्ञानं मासान्ते सूर्यचन्द्रयोस्तुल्यत्वादिति वाच्यम् । पूर्वाहर्गणानीतभगणेष्विन्दुगतमासतुल्यान्तरापत्तेः । अपेक्षितस्तादृशसूर्योदयासन्नकालेऽहर्गणानीतस्यैतत्कालीनत्वात् । अतस्तिथ्यन्ततत्कालमध्ये यस्तिथ्यङ्कः स द्वादशगुणः पूर्वानीतांन्तरांशगणश्च योज्यः । तत्राव-

मशेषस्य सावनस्य तदन्तरे सत्त्वात् चान्द्रीकरणेन तिथ्यङ्कज्ञानं सुल-भमिति कल्परविसादिनैः कल्पचान्द्रदिनानि तदेतत्सावनात्मकावम-शेषेण कान्यनुपातेनावमशेषस्य पूर्वं कल्पचान्द्रहरस्य कल्पचान्द्रा गुण इति गुणहरयोस्तुल्यत्वाचाशेऽवमशेषस्य कल्परविसावर्नादिनानि हार इति। चान्द्रावमशेषस्वरूपमिदं द्वादशगुणितं तदन्तराले तदन्तरांशा भव-न्तीति गुणहरौ गुणेनापवर्त्य हरस्थाने खाभ्रबाणगिरिरामखत्रिगोशक्रवि-श्वमिताङ्क १३१४९३०३७५०० उपपन्नः। तथा चावनशेषं भाज्यस्य हरमत्र फलं भागाद्यं तत्राचार्येण हरे एकादिसप्तस्थानेषु शून्यानि गणितसौकर्यार्थं कृतानि धूलीकर्मणा तादृशहरभक्तफलयोः संपूर्णाकविकलान्तराभावात्।

"महीदिनैर्द्युक्षयशेषतः फलं दिनादि यत् तत् तिथिभिः समन्वितम्।
तेनार्कनिघ्नेन युतो रविः शशी हीनोऽशकेष्विन्दुरथोष्णदीधितिः॥
रवीन्दुगत्यन्तरभागताडितं क्षयावशेषं शशिवासरोद्धृतम्।
रविघ्नतिथ्यंशयुतं तु निःक्षिपेद्रवौ विधुस्तद्रहितो विधू रविः॥"

इति प्रकारद्वयं सिद्धान्तशेखरकृता यथागतमुक्तम्। एवं चाव-मशेषे कोट्याहतैरङ्ककृतेन्दुविश्वैरित्युक्तहरभक्ते सूर्यचान्द्रान्तरांशास्तिथ्य-न्ततत्कालान्तरे एते द्वादशगुणाश्चान्द्राहर्गणे युक्तास्तादृशसूर्योदयासन्न-काले तदन्तरांशाः। एतैः सूर्यो लघुगतिर्युक्तश्चन्द्रो भवत्यर्थाच्चन्द्रो हीनः सूर्यो भवत्यत उपपन्नं कोट्याहतैरङ्ककृतेन्दुविश्वैरित्यादि विधुरूनितोऽर्के इत्यन्तम्॥ ५॥

इदानीमधिमासावमशेषाभ्यां चन्द्रार्कानयनमाह।

कोट्याहतैर्यद्भवभैरवाप्तं
न्यूनाहशेषे विहृते कलाद्यम्।
तत् स्याद्धनाख्यं तरणेर्विधोस्तत्
त्रिभूहतं स्वेषुगुणांशयुक् स्वम्॥ ६॥
चैत्रादियातास्तिथयः पृथक्स्था
विश्वैर्हृताः सूर्यविधू लवाद्यौ।

तौ चाधिशेषाच्छशिमासलब्ध्या
हीनौ युतौ स्वस्वधनाह्वयाभ्याम् ॥ ७ ॥

वा.भा.—अवमशेषाद्विवभैः कोटिगुणैर्भक्ताद्यल्लब्धं कलाद्यं तद्व्रधेर्धनसंज्ञं भवति। तदेव फलं त्रयोदशगुणं स्वकीयेन पञ्चत्रिंशदंशेन युतं विधोर्धनसंज्ञं भवति । अथ चैत्रादिगतास्तिथयो द्विः स्थाप्याः । द्वितीयस्थाने विश्व--१३ गुणास्तावंशात्मकौ रविचन्द्रौ भवतः । परमधिमासशेषाच्छशिमासभक्ताद्यत् फलं तेन द्वावप्यूनीकृतौ । तथा स्वस्वफलेन धनाख्येन युक्तौ कृतौ ।

अत्रोपपत्तिः। रविवर्षान्ताद्यावन्तोऽर्कदिवसा गतास्तावन्तोऽर्कभागाः किल भवन्ति । ते कियन्त इति न ज्ञायन्ते । रविवर्षान्तोऽपि न ज्ञायते । अतश्चैत्रादेर्गतास्तिथयो यावन्तस्तावन्त एव सौराहाः कल्पिताः । यथाऽहर्गणानयने स एव भागात्मको रविः । असौ पृथग् विश्वगुणः कृतः । यतस्ताभिरेव द्वादशगुणाभिस्तिथिभिर्युक्त कर्त्तव्यः तिथौ तिथौ हि रविचन्द्रान्तरं द्वादश भागाः । अथ चैत्रादिगततिथितुल्याः सौराहाः कल्पितास्तेऽधिमासशेषसंभूतैश्चन्द्रदिनैरधिका जाताः । यतो मध्यममेषसंक्रान्तिकालो रव्यब्दान्तः । तस्य चैत्रादेश्चान्तरं तिथ्यात्मकमधिमासशेषम् । यथा गोले कथितम् ।

"दर्शायतः संक्रमकालतः प्राक् सदैव तिष्ठत्यधिमासशेषम् ।"

इति । तत् तावत् सौरचान्द्रान्तरमधिकं जातम् । तथा कल्पितचान्द्रदिनसंबन्धि यत् सौरचान्द्रान्तरं तदप्यधिकं जातम् । तदप्यधिमासशेषसंभूतम् । एतदुक्तं भवति । अधिमासशेषात् त्रिंशद्गुणात् स्वच्छेदेन हृताद्ये लभ्यन्ते ते चान्द्राहाः । तेषां चान्द्राणां यावन्तः सौरा भवन्ति तैरधिकोऽर्को जातः । अतस्ते शोध्याः । तेषां चान्द्राणां सौरकरणायानुपातः । यदि कल्पचान्द्राहैः कल्पसौराहा लभ्यन्ते तदाधिमासशेषस्थैः किमिति । पूर्वमधिमासशेषस्य त्रिंशद्गुणस्य सौराहा भाग-

हार इति स्थितम् इदानीं गुणकारस्तुल्यत्वात् तयोर्नाशे कृतेऽधिमासशेषस्य चान्द्राहा भागहारः। ततः पुनर्भाज्यभाजकयोस्त्रिंशताऽपवर्त्तने कृतेऽधिमासशेषस्य चान्द्रमासा भागहारः। फलं सौराहाः। त एव भागाः। तैरूनः कल्पितोऽर्को निरन्तरः स्यात्। परं तिथ्यन्ते। असावौदयिकः कार्यः। तिथ्यन्तार्कोदययोर्मध्येऽवमशेषम्। तच्च सावनम्। तेन चन्द्रार्कावौदयिकौ कार्यौ। तत्रानुपातः। यदि चान्द्राहतुल्येन परमावमशेषेण रविगतिर्लभ्यते तदेष्टेनानेन किमिति। एवमवमशेषं रविगत्या गुणनीयं चान्द्राहैर्भाज्यम्। अत्र गुणकभाजकयो रविगत्याऽपवर्त्ते कृते भागहारे किंचित् प्रक्षिप्य कोट्याहतभवभतुल्यः सुखार्थं भागहारः कृतः स्वल्पान्तरत्वात्। तेन भागहारेणावमशेषे भक्ते याः कला लभ्यन्ते ताः कला रवौ क्षेप्या इति धनसंज्ञाः। अथ चन्द्रस्य परमेऽवमशेषे चन्द्रगतितुल्याः कला भवन्ति। अतो रविगत्या चन्द्रगतौ हृतायां स्वपञ्चत्रिंशदंशाधिकं चन्द्रस्य धनं भवतीत्युपपन्नम्। एवं स्वस्वफलेनाधिकौ तिथ्यन्तकालिकौ चन्द्रार्कावौदयिकौ भवत इति सर्वं निरवद्यम्॥ ६-७॥

वा.वा.—इदानीं चन्द्रार्कानयनमधिमासावमशेषाभ्यामाह। कोट्याहतैर्यद्रवभैरिति। यस्मिन् चैत्रशुक्लादितो वर्त्तमानमासि यस्यां वर्त्तमानतिथौ सूर्योदये रविचन्द्रौ कर्त्तुमिष्टौ तद्दिवससाधिताहर्गणादधिमासावमशेषे ज्ञातव्ये। नन्वधिशेषमिदमवमशेषं च कयोरन्तरं किं जातीयमिति चेदुच्यते। कल्पसौराहर्गणस्य खण्डत्रयम्। एकं तावत् कल्पादेः समभीप्सितकालनिकटपतितगताधिमासान्तावधि। निकटपतिताधिमासन्तादिष्टसौरवर्षावधि द्वितीयम्। तृतीयं तु चैत्रादिगतमासागततिथ्यवधिका ये चान्द्रास्तत्तुल्यसौराहात्मकम्। इदं तृतीयं खण्डं सौरवर्षादितश्चैत्रादिमासेष्टतिथ्यवधि ये वास्तवाः सौराहास्तेषामज्ञातत्वेनेदृशमङ्गीकृतम्। एवं खण्डत्रययोगः सौराहर्गणः "कथितकल्पगतोऽर्कसमागण" इत्यनेन कृतः। अस्य सौराहर्गणस्य चान्द्रीकरणमनुपातेन। कल्पसौरैः कल्पाधिमासास्तदेष्टसौरैः किमिति लब्धं सावयवं गताधिमासादि। इदं

दिनीकृत्य सौराहर्गणे योज्यं चान्द्रद्युगणो भवति । यद्वा गताधिमासानां सावयवानामपि खण्डत्रयं कृतम् । एकं लब्धाधिमासानामेव ये दिवसास्तत्तुल्यम् । द्वितीयमिष्टसौरवर्षादिजशुद्धिदिनतुल्यम् । तृतीयं तु सौरवर्षादित इष्टचान्द्रमासगततिथितुल्यसौरावधि यदधिशेषं तत्तुल्यम् । प्रथमसौराहर्गणखण्डे प्रथम लब्धाधिमासदिवसतुल्यं योजितं जाताश्चान्द्राः । द्वितीयखण्डे सौरवर्षादिजा शुद्धिर्योज्या तत्रापि चान्द्रा भवन्ति । तृतीयेऽपि सौरवर्षादितश्चैत्रादिगतचान्द्रतुल्यसौराहजनितं योजितं त्रयाणां योगे चान्द्रद्युगणो भवति परन्तु सौरवर्षादितश्चैत्रादिगतचान्द्रतुल्यसौराहा यस्मिन् काले भवन्ति तत्कालीनः । अपेक्षितस्तु चैत्रादित एव चैत्रादिगतचान्द्रान्तावधि । अनयोरन्तरमधिशेषं पूर्वमनुपातसिद्धम् । इदं शोध्यम् । पूर्वं पृथक् पृथक् खण्डत्रयेण योजनीयमधुना युगपदेव हेयमिति लब्धाधिमासा एव दिनीकृत्य योज्या इत्युक्तम् । चैत्रादितश्चैत्रादिगतचान्द्रतुल्यसौराहावधि ये कल्पचान्द्रास्तेषामन्तरम् । इदं चान्द्रमेव तिथ्यात्मकम् । अतो वक्ष्यते गोले ।

"सौरेभ्यः साधितास्ते चेदधिमासास्तदैन्दवाः" ।

एवमहर्गणतः कल्पगतसाधने यश्चान्द्रगणः समायाति स तु कल्पादिमारभ्य चैत्रादितश्चैत्रादिगतचान्द्रावधि । तस्मादधिमासेषु साध्यमानेषु यदधिशेषं समायाति तत् सौरम् । यस्माच्चैत्रादितश्चैत्रादिगतचान्द्रावधि ये सौराः सौरवर्षादितश्चैत्रादिगतचान्द्रतुल्यसौराहावधि ये सौराश्च तेषामन्तरम् । अत एव वक्ष्यते "चेच्चान्द्रेभ्यस्तदा सौराः" इति । सौरेभ्योऽधिमाससाधनं चान्द्रीकरणार्थमेव करिष्यति । एवमवमेष्वपि योज्यम् । सौरवर्षादौ रविः शून्यम् । सौरवर्षादित इष्टकालावधि यावन्तः सौराहास्तावन्तोऽर्कभागाः स्युः । चैत्रादितश्चैत्रादिगतचान्द्रान्ते रविरपेक्षितः । सौरवर्षादित इष्टकालावधि ये सौरास्तेषामज्ञातत्वेन चैत्रादिगतचान्द्रा यावन्तस्तावन्त एव सौरवर्षादितो रवेरंशा इति कल्पितम् । तत्राधिशेषं शोध्यं पूर्वन्यायेन । परन्तु सौरमधिशेषमेव

कल्पितसौरेभ्यो हातुमुचितं वास्तवसौरज्ञानार्थम् । यत् तु सिद्धमधिशेषं तत् तिथ्यात्मकमिति निरूपितम् । अधिशेषस्य सौरीकरणायानुपात: । कल्पचान्द्रै: कल्पसौरास्तदेष्टाधिशेषेण त्रिंशद्गुणितेन कल्पसौराद्यभक्तेन किमिति सौरतुल्ययोर्गुणहरयोर्नाशे त्रिंशता चान्द्रेषु भक्तेषु चान्द्रमासा एव भवन्ति । तस्मादधिशेषाच्छशिमासलब्ध्या हीनाश्चैत्रादिगततिथयो रव्यंशा इष्टतिथ्यन्ते भवन्ति । अस्मिन् रवौ शुद्धूनचैत्रादिगततिथयो द्वादशगुणा योज्या: । स च सौरवर्षादेश्चन्द्रो भवति । अत्र सौरवर्षादिजश्चन्द्रो योज्य: । द्वादशगुणिता शुद्धि: सौरवर्षादौ लवाद्यश्चन्द्रो भवति । तस्मादधिशेषाच्छशिमासलब्ध्या हीनास्त्रयोदशगुणाश्चैत्रादिगततिथयश्चन्द्रस्तिथ्यन्ते भवति । तिथ्यन्तसूर्योदययोर्मध्येऽवमशेषम् । तच्चान्द्रगणसिद्धत्वात् सावनम् । तत्रानुपात: । यद्येकेन सावनेन रविगतिर्लभ्यते तदाऽवमशेषेण किमिति रविगुतिर्गुणो हरस्तु कल्पचान्द्राहा: । गुणहरौ गुणेनापवर्त्य रविहर: कृत: । रविगत्या चन्द्रगतौ हृतायां स्वपञ्चत्रिंशांशयुक्तास्त्रयोदश लब्धा: । अत: सर्वं निरवद्यम् । चन्द्राहतुल्येन परमावमशेषेण रविगतिर्लभ्यते तदेष्टेन किमित्यनुपात: कृतो भाष्यकारेण स त्वयुक्त एव । 'महामिताद्द्युगणात् फलानी'ति सावनदिवस एव रविमध्यकला वक्ष्यन्ते न चान्द्रे । तस्मात् तावदिदमयुक्तम् । चान्द्रगणसाधितावमशेषस्य सावनस्येच्छास्थानीयस्य प्रमाणस्थानीयचान्द्राद्विजातीयत्वमपि दोषावहम् । त्रैराशिके प्रमाणेच्छयो: समानजातित्वनियमात् । समानजातित्वं सादृश्यादवगम्यते । सादृश्यमुपाधिना क्वचिदवगम्यते । अशीतिवराटकप्रमाणकस्य पणस्याशीतिवराटकमानपणै: सादृश्यावबोध: । क्वचिज्जात्याऽपि । घटानां घटै: ।

"त्रिज्ये पृथक् कोटिभुजाहते ते कर्णोद्धृते लम्बपलज्यके स्त:" ।

इत्यत्र सर्वेष्वक्षक्षेत्रेषु पलभा भुजो द्वादश कोटि: पलकर्ण: कर्ण इत्येवमावर्तत इत्युपाधिनैव प्रमाणेच्छयो: समानजातित्वमिति न

कश्चिद्दोषः । प्रकृते तु चान्द्रमिदं सावनमिदमित्युपाधिभेदेनैव भेदस्य सुज्ञानत्वात् । प्रमाणेच्छयोर्विसदृशत्वं न दण्डेन परानुद्यते । अतोऽन्यथा भाष्यं व्याक्रियते । तावच्चान्द्रदिनमध्ये सावनं पूर्वोक्तप्रकारेण ज्ञात्वा तन्मध्ये रविगतिमानमानयेत् । चान्द्राहतुल्येनेत्यत्र चान्द्रदिनेऽल्पः सावनं तच्चान्द्राहशब्देनोच्यते । इयमानीता रविगतिश्च रविगतिशब्देनोच्यते । तस्माद्युक्तोऽयमनुपातः । चान्द्रान्तर्वर्तिना सावनेन तन्मध्यवर्तिनी गतिर्लभ्यते तदाऽवमशेषेण किमिति । यद्वाऽवमशेषस्य कल्पचान्द्राहस्तस्मात् परमावमशेषं कल्पचान्द्रतुल्यमेव स्यात् तदेकसावनतुल्यमतो युक्तोऽनुपातश्चान्द्राहतुल्येन परमावमशेषेणेति । अत्र चान्द्राहपदेन कल्पचान्द्रा उच्यन्ते ॥ ६—७ ॥

मरीचिः—अथ प्रकारान्तरेणार्कचन्द्रानयनमुपजातिकाभ्यां लाघवादाह । कोट्याहतैर्यद्धुवभैरवाप्तमिति चैत्रशुक्लादिष्टमासतिथिप्रारम्भसमयपर्यन्तं गतास्तिथयोऽहर्गणानयनगृहीता एव ग्राह्याः । तेन मध्येऽधिमासपातोऽपि चेत् तस्यापि तिथयो न ग्राह्या इति ध्येयम् । एताः पृथक्स्थास्त्रयोदशगुणा भागाद्यौ सूर्यचन्द्रौ स्तः । तिथिमितोंऽशाद्योऽर्कः । त्रयोदशगुणितोंऽशाद्यश्चन्द्र इत्यर्थः । विशेषमाह ताविति । अधिशेषात् अहर्गणानयने गताधिमासेष्वागतेषु यद्वाऽव्यशेषं तदङ्कमितात् शशिमासलब्ध्या कल्पोक्तचान्द्रमासभक्ताप्तफलेन तौ सूर्यचन्द्रौ तिथ्यानीतौ हीनौ । पुनर्विशेषमाह युताविति । स्वस्वधनाह्वयाभ्यां यथास्थाने युतौ । एतेन धनशब्देन युतं कार्यमिति सूचनादयोदंशादिफलेनेत्युक्तं भवति । चकारः समुच्चयार्थः । भागास्त्रिंशद्भक्ताः । राश्याद्यौ सूर्यचन्द्रौ दिनगणानीतौ तत्तुल्यौ स्त इत्यर्थसिद्धम् । तयोर्भगणज्ञानं च गतवर्षगतचन्द्रमासज्ञानात् प्रयोजनाभावाच्च नोक्तम् । अथार्कचन्द्रयोर्धनफलानयनमाह । कोट्याहतैरिति । न्यूनाहशेषं कोट्याहतैर्भवभैरेतैर्भक्तं यत् यदङ्कमितं कलाद्यं प्राप्तं तत् फलं सूर्यस्य धनाख्यं स्यात् । तत् सूर्यफलं त्रयोदशगुणं स्वपञ्चत्रिंशदंशयुक्तं विधोः स्वं धनाख्यं स्यात् ।

अत्रोपपत्तिः । "रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टम्"-इत्युक्तेन मेषाद्यर्कसञ्चाररूपवर्षादितो ये सौरदिवसास्त एव मध्यमसूर्यांशाः । तेषामिष्टशुक्लादिगततिथयो द्वादशगुणिता योज्याश्चन्द्रोऽपि मध्यमः स्यात् । तत्र सौरवर्षाद्यज्ञानेन सौरदिनानां तदादीनामज्ञानात् चैत्रादिरूपचान्द्रवर्षादिज्ञानात् । तत इष्टकालपर्यन्तं चान्द्रदिनज्ञानेन चैत्रादीष्टतिथ्यारम्भपर्यन्तं चान्द्रदिवसा एव सौरदिवसाः कल्पिताः । एतन्मित एवांशाद्योऽर्कः । अयं द्वादशगुणितशुक्लादिगततिथियुतश्चन्द्रज्ञानार्थं कार्यस्तत्र चान्द्रमासे पूर्णभगणान्तरसम्भवेन चैत्रादीष्टतिथयो द्वादशगुणा योजिता लाघवात् । भगणानां प्रयोजनाभावेन राश्यादिवास्तवचन्द्रज्ञानसम्भवात् । अतः सूर्यस्य तिथिमितत्वकल्पनाल्लाघवेन त्रयोदशगुणानां चैत्रादितिथीनां भागादिचन्द्रत्वं सिद्धम् । अत्र उपपन्नं चैत्रादीत्यद्यर्धम् । अथ सौरदिनज्ञानात् कल्पितसौरे वास्तवचान्द्रमिते सौरचान्द्रान्तररूपाधिशेषमधिकं वास्तवसौरदिनेभ्य इत्यधिशेषमुभयत्र रविसम्बन्धाद्विकाशनीयम् । तत्राहर्गणानयनेऽधिशेषं तदधिमासपतितकालादिष्टतिथ्यारम्भपर्यन्तं ये चान्द्रदिवसाः सावयवास्ततुल्यसौरदिनानामधिशेषं चान्द्रांशाः । एतत् तत्र युक्तम् । इष्टकाले तन्मितसौराभावात् इष्टकाले वास्तवतादृशचान्द्राद्यधिशेषमानेयम् । तत्तुल्यचान्द्रदिनैः कल्पाधिमासास्तदेष्टचान्द्रदिनैः क इत्यनुपातेनाहर्गणोपपत्तौ दर्शितम् । एतत्सौरमितकल्पसौरैः कल्पचान्द्रास्तदाऽनेन के इति गुणहरनाशेनाहर्गणानयनेऽधिमासलब्धौ शेषं कल्पसौरभक्तरूपमधिशेषं चान्द्रं सिद्धमेवास्ति । अतः कल्पचान्द्रैः कल्पसौरास्तदैतत्सिद्धेन क इति पूर्वविपरीतेन कल्पसौरतुल्यगुणहरयोर्नाशाच्छेषं कल्पचान्द्रभक्तमित्यधिशेषं रूपं सौरं वास्तवं तत्काले सिद्धमिति वक्ष्यति । एतन्मासादिकमिति दिनात्मकार्थं त्रिंशद्गुणः । शेषस्येति गुणहरौ गुणेनापवर्त्य हरस्थाने चान्द्रमासाः । दिनत्रिंशदंशस्य मासत्वात् अत उपपन्नं तौ चाधिशेषाच्छशिमासलब्ध्या हीनाविति । अथैवं पुष्पवन्ताविष्टतिथ्यारम्भे सूर्योदयकरणार्थमवम-

शेषेण सावनात्मकेन चाल्यौ । तदर्थं कल्पकुदिनैः कल्पसूर्यभगणकला ९३३१२००००००००० श्चन्द्रभगणकलाश्च १२४७६७१२८००००००० लभ्यन्ते तदाऽवमशेषात्मकसावनेन का इत्यनुपातेनाहर्गणसाधनेऽवमलब्धौ शेषस्य कल्पचान्द्रदिनहरस्य स्थितत्वेन भाज्यशेषं भगणकलागुणितं कल्पचान्द्ररविसावनदिनघातेनानेन खवेघ्नशरेषुदेवेन्द्रतानाष्टाङ्करामगोद्वितत्त्वमितेन-२५२९३९८४९१४३३५५००००००००००० भक्तं लब्धं प्रत्येकं कलात्मकं योज्यम् । तत्र सूर्यस्य गुणहरौ गुणेनाब्जगुणितेन रविसुराङ्कमितेन ९३३१२००००००००० अपवर्त्य हरस्थाने किञ्चिन्न्यूनवेदाष्टाङ्करामाङ्काष्टषड्दिग्भमिता २७१०६८९३९८३ । ५९ । ३ । ४५ उत्पन्ना: । अत्र गणितसौकर्यार्थं किंचिदधिकनृपषष्टिदिग्रामभिताः ३१०६०१६ । १५ योजिता जाता उक्त-हरमिताः २७११००००००० । फलयोर्हरभक्तयोः पूर्वविकलान्तराभावात् इदं फलं सूर्यस्य योज्यमिति धनसंज्ञाऽस्यात उपपन्नं कोट्याहतै-रित्यादि तयोरित्यन्तम् । एवमुक्तमार्गेण चन्द्रहरेणानेन स्वर्गाङ्कनखाङ्गभनखमितेन २०२७६२०६२१ किञ्चिदधोऽवयवयुतेनावमशेषे भक्ते फलं चान्द्रचालनं स्यात् । तत्रेदं गुरुभूतं विहाय लाघवात् सूर्यफलादेव चन्द्रफलमानीतं तदर्थं सूर्यभगणैः सूर्यफलं तदा चन्द्रभगणैः किमित्यनु-पातेन गुणहरौ हरेणापवर्त्य गुणस्थाने सावयवाङ्काः १३ । २२ । ७ । ४५ । इति सूर्यफलमनेन गुणय चन्द्रफलम् । तत्रापि खण्डगुणनार्थं त्रयोदशमितं भिन्नं कृतम् । अत्र खण्डं सावयवम् २२ । ७ । ४५ । इदमेकत्र करणार्थं खार्क—१२० वर्ग १४४०० गुणं जातम् ५३११ । तस्मात् द्वितीयस्थाने रविफलं भवत्रीषुगुणं खार्कवर्गभक्तमिति सिद्धम् । तत्रापि भवत्रीषुगुणस्य खार्कवर्गभागस्तदा त्रयोदशगुणितस्य को भाग इत्य-नुपातेन लब्धो भागः किञ्चिन्न्यूनः सपादपञ्चत्रिंशन्मितः ३५ । १५ । अत्र लाघवेनाधोऽवयवेऽनुपातः कृतः स्वल्पान्तरात् । सूर्यफलस्य न्यूनत्वा-च्चात उक्तं विधोरित्यादि श्लोकान्तम् । आभ्यां फलाभ्यां योज्यौ क्रमेण

पुष्पवन्ताविति युतौ स्वस्वधनाङ्ग्याभ्यामित्युक्तम्। एतत्प्रकारेणैव पुष्पवतोः सूक्ष्मं साधनमुक्तं सिद्धान्तशेखरे श्रीपतिना—

"कल्पाधिमासगुणितादवमावमावशेषात्
क्ष्माहोद्धृतात् फलयुतं ह्यधिमासशेषम्।
मासादिकं फलमतः शशिवासरैः स्यात्
क्ष्माहैर्हृताच्च दिवसाद्यवमाशेषात्॥
चैत्रादितो विगतमासदिनैर्युतं तत्
कृत्वा दिनाद्यथ पृथग्गुणितं च विश्वैः।
मासादिना विरहिते विहिते क्रमेण
यद्वा दिवाकरनुपाकरौ भवेताम्॥

इति श्लोकद्वयेन ॥ ६-७ ॥

इदानीं प्रकारान्तरेण ग्रहानयनमाह।

अर्कसावनदिवागणो हतः
स्वस्वसावनदिनैस्तु कल्पजैः।
खाभ्रबाणगिरिरामखत्रिगो-
शक्रविश्वविहृदाप्तराशिभिः॥ ८॥
विवर्जितो विकर्त्तनो गृहादिको गृहादिकाः।
ग्रहा भवन्ति वा बुधैर्विचिन्त्यमन्यदप्यतः॥ ९॥

वा. भा.—ग्रहर्गणाद्ग्रहस्य कल्पसावनदिनैर्गुणितात् खाभ्रबाणगिरिरामखत्रिगोशक्रविश्वै—१३१४९३०३७५०० विहृताद्यत् फलं राश्यादि तेन राश्यादिको रविरूनोऽभीष्टो ग्रहः स्यात्। अस्मादानयनप्रकाराद्बुधैरन्यदपि प्रकारान्तरं विचिन्त्यम्।

अत्रोपपत्तिः। भगणैरूना भभ्रमा ग्रहसावनदिवसा भवन्ति। तैः सावनैरूनास्ते भभ्रमा ग्रहभगणा भवन्ति अतोऽहर्गणाद्ग्रहवदनुपातेन गतभभ्रमान् ग्रहसावनदिवसांश्चानीय तैः सावनैस्ते भभ्रमा वर्जिता

दिति तथा च गुरुत्वासमवायि कारणप्रयोज्याधःसंयोगरूपफलजनकं कर्म पतधात्वर्थस्तेन फलस्योपलक्षणत्वादवच्छेदकत्वाभावे तादृशफलवत्वस्य भूमौ सत्त्वेपि न तत्र कर्मत्वमिति ॥ अत एव धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमित्यत्र पतत्यर्थे फलपदं धात्वर्थतानवच्छेदकफलपरमिति शब्दमणावुक्तमुपाध्यायैः । इत्थञ्च पतिस्थलेऽन्यैव व्युत्पत्तिरिति ध्येयम् ।

तद्धात्वर्थानधिकरणत्वे सतीति विशेषणाच्च न चैत्रस्य धात्वर्थतावच्छेदकफलग्रामसंयोगाश्रयत्वेपि कर्मत्वमिति स्वीकुर्वन्तीति संक्षेपः ।

अथ चैत्रो ग्रामं गच्छतीत्यत्र चैत्रस्य कर्मत्वापत्तिः । धात्वर्थतावच्छेदकीभूतगमनानुकूलसंयोगस्य चैत्रेऽपि सत्त्वादित्यत आह तद्धात्वर्थेति तथा च समभिव्याहृतधात्वर्थानधिकरणत्वे सति धात्वर्थताच्छेदकफलाश्रयत्वमित्यर्थः । चैत्रस्य गमनानुकूलक्रियारूपधात्वर्थाधिकरणत्वाद्विशिष्टाभावस्य सत्त्वादिति धात्वर्थानधिकरणस्यैव कर्तुरीप्सिततमत्वरूपकर्मत्वमिति भावः । एतन्मते फलावच्छिन्नव्यापारस्य धात्वर्थत्वे तदेकदेशफलेन सह द्वितीयार्थत्वयो नोपपन्न इत्यस्वरसो बोध्यः । अत्रायं संक्षेपार्थः । यद्याख्यातस्य कृतौ शक्तिस्तदाख्यातेन कर्तृकर्मणोरनभिधानात् पचति तण्डुलमित्यत्र कर्त्तरि तृतीया स्यात् । पच्यते तण्डुल इत्यात्र कर्मणि द्वितीया स्यात् । कर्त्तरि कर्मणि च तृतीयाद्वितीययोरनभिहिताधिकारीयत्वात् अनभिहिते कर्मणि द्वितीयेत्यादिसूत्रदर्शनादिति आख्यातेन कर्तृसंख्यानभिहिता तदा कर्त्तेति तृतीया । यदा त्वभिहिता तदा प्रथमा । यद्याख्यातेन कर्मसंख्या नाभिहिता तदा कर्मणि द्वितीया अभिहिता प्रथमेति । तथा च लाघवात्कृतावेव शक्तिरिति संक्षेपः । अचेदं प्रतिभाति । क्त्वाप्रत्ययस्यापि कृतावेवशक्तिः । समानकर्तृकत्वे सति पूर्वकालत्वापेक्षयाऽव्यवहितपूर्वकालत्वापेक्षया च लाघवात् । अत्रानन्तर्य

समानकर्तृकत्वं च संसर्गस्तथा च भुक्त्वा व्रजतीत्यादौ भोजनानुकूलकृत्याश्रयकर्तृकं यद्भोजनानन्तरकालिकं गमनं तदनुकूलकृतिमांश्चैत्र इति बोधः एवं च समानकर्तृकयोः पूर्वकाल इति सूत्रं सूपपन्नं। अथौष्ठपुटविभागरूपस्य मुखव्यादानस्य स्वापोत्तरकालीनतया मुखं व्यादाय स्वपितीति प्रयोगो न स्यादिति चेन्न मुखव्यादानोत्तरमपि यत्किञ्चित्स्वापस्य सत्त्वादिति संक्षेपः।

तस्य शब्दस्य निराकाङ्क्षादावन्वयाबोधकत्वादाकाङ्क्षादिकं सहकारि तत्र यत्पदं यत्पदेन सह यादृशान्वयानुभवजनकं तत्पदस्य तत्पदसमभिव्याहारस्तादृशान्वयबोधे आकाङ्क्षा भवति नामपदमुत्तरवर्त्तिविभक्तिपदेनैव सहान्वयबोधकमतस्तस्य समभिव्याहारस्तादृशान्वयबोधे आकाङ्क्षा। अत एव घटः कर्मत्वमित्यतो न घटमिति वदन्वयबोध आकाङ्क्षाविरहात्। धातुपदं च अख्यातपदेनैव सहान्वयविशेषबोधकमिति भवति तत्र आख्यातपदसमभिव्याहार आकाङ्क्षा अत एवानयनं कृतिरित्यादावानयतीति वन्नान्वयबोधः कृतिवाचकाख्यातसमभिव्याहाराभावेन निराकाङ्क्षत्वात्।

अथ वृत्तिज्ञानैककार्यकारित्वरूपां सङ्गतिं दर्शयति। तस्येति यद्वा निराकाङ्क्षादौ प्रकृतशाब्दबोधान्वयासम्भवात्प्रकृतशाब्दान्वयसिध्यर्थमाकाङ्क्षादिरूपकारणचिन्तनादाकाङ्क्षादावुपोद्घातसङ्गतिं दर्शयति। तस्येति। अथ वा शाब्दबोधकारणस्य स्मृतत्वादुपेक्षाया अभावे प्रसङ्गसङ्गतिं दर्शयति। तस्येति। तस्य प्रमाणतया सिद्धस्य निराकाङ्क्षादौ घटः

अन्धकारे घटाभावादिनिश्चयोत्तरमप्रामाण्यज्ञानमन्तरेणाप्यालोकादिसमवधानादितो घटादिलौकिकप्रत्यक्षदर्शनाल्लौकिकसाक्षात्कारातिरिक्तेत्यस्य कृत्यसम्भवेपि लौकिकत्वं लौकिकसंनिकर्षकजन्यत्वमित्युपनीतभानांशे लौकिकीविषयतां ज्ञापयितुमाह कथमिति । यदि चोपनीतभानस्यांशेपि लौकिकीविषयता नोररीक्रियते तदाह न स्यादिति । पित्तादिदोषाजन्येत्यस्य फलमाह शङ्ख इति नेदं रजतमिति बाधबुद्धौ विद्यमानायां दूरत्वादिदोषे सत्यपीदं रजतमिति भ्रमासम्भवात्पित्तादीत्युक्तं । तथा च भ्रमसामान्यस्य नाप्रतिबध्यत्वमिति भावः । भूतले घटाभावनिश्चये सत्यपि आहार्यलौकिकप्रत्यक्षोदयादनाहार्यत्वमपि प्रतिबध्यकोटौ देयं आहार्यत्वं तु बाधबुद्धिकालीनेच्छाजन्यज्ञानत्वं । इत्थं च तदभाववत्ताज्ञानं त्रिविधं । तदभाववत्ताज्ञानं तदभावव्याप्यवत्ताज्ञानं तदभावावच्छेदकवत्ताज्ञानं चेति । तत्र तदभावविशिष्टज्ञानयोरेवं प्रतिबध्यप्रतिबन्धकभावः-तथा हि । अप्रामाण्यज्ञानानास्कन्दिततद्धर्मितावच्छेदकतद्धर्मावच्छिन्नतदिन्द्रियजन्यतदभावनिश्चयत्वेन प्रतिबन्धकता । दोषविशेषाजन्यलौकिकसंनिर्षाजन्यानाहार्यतदिन्द्रियजन्यतद्वत्ताज्ञानत्वेन प्रतिबध्यता भूतलङ्घटाभाववदिति ज्ञानेऽप्रामाण्यज्ञाने जाते भूतलङ्घटवदिति ज्ञाने बाधकाभावात्प्रतिबन्धककोटावप्रामाण्यज्ञानानास्कन्दितेति । अथ भूतलङ्घटाभाववदिदञ्च ज्ञानमपेक्षाबुध्यात्मकाप्रमेत्यप्रामाण्य ज्ञानात्मको बाधनिश्चयस्ततो भूतलं घटवदिति विशिष्टबुद्धिस्ततो भूतलं घटाभाववदिति लौकिकप्रत्यक्षात्मको बाधनिश्चयस्तत्र यदि तदप्रामाण्यज्ञानमुत्तेजकं तदा द्वितीयबाधबुद्धिनिश्चयोत्पत्तिक्षणेऽग्रिमक्षणे च भूतलं घटवदिति ज्ञानं स्यात् । सामानाधिकरण्यसम्बन्धेनाप्रामाण्यज्ञानवैशिष्ट्यस्य द्वितीयबाधबुद्धावपि सत्त्वात् । यदि च तदप्रामाण्यज्ञानं नोत्तेजकं तदा प्रथमबाधबुद्धिद्वितीयक्षणेपि भूतलं घटवदिति ज्ञानं न स्यादिति चेन्न । अप्रामाण्यज्ञानस्य विषयत्वसामानाधिकरण्योभयसम्बन्धेन वैशिष्ट्यस्य विवक्षितत्वात् । अत्र विषयतासम्बन्धेनाप्रामाण्यज्ञानवैशिष्ट्यस्य प्रथम-

बाधबुद्धावेतसत्त्वाच्च दोषः। सामाधिकरण्यपदोपादानाच्चैत्रस्य बाधबुद्धौ चैत्रीयज्ञानमप्रमेति मैत्रस्य ज्ञानमादाय न दोषः॥ गेहं घटाभाववदिति निश्चयेपि द्रव्यं घटवदिति द्रव्यत्वेन रूपेण गेहे घटवत्ताज्ञाने बाधका-भावात्तद्धर्मितावच्छेदकेति प्रतिबन्धककोटौ प्रतिबध्यकोटौ च विशेषणं। ह्रदो वह्न्यभाववानिति बाधनिश्चयेपि ह्रदो द्रव्यवानिति वह्नेर्द्रव्यत्वेन रूपेण ज्ञाने बाधकाभावात्कोटिद्वयेपि तद्धर्मावच्छिन्नेति विशेषणं देयं। पर्वतो वह्निमान्नवेति संशयकालीनपरामर्षाव्यवहितोत्तरमनुमितेरुदयात्प्रतिबन्ध-ककोटौ निश्चयत्वं विशेषणं। मण्डूकवसाञ्जनेन वंशे उरगत्वभ्रमेपि त्वचा नोरग इति ज्ञानोदयात्तदिन्द्रियजन्यत्वं कोटिद्वयेपि विशेषणं। एवं तदभावव्याप्यवत्तानिश्चयतद्विशिष्टबुद्ध्योरपि तथैव प्रतिबध्यप्रतिबन्धक-भावः। यथायं स्थाणुभेदव्याप्यपुरुषत्ववान् स्थाणुत्वात्यन्ताभावव्याप्य-पुरुषत्ववांश्चेति निश्चयेऽयं स्थाणुरिति न विशिष्टबोधः एवं तदभावा-वच्छेदकवत्ताज्ञानतद्विशिष्टबुद्ध्योपि तथैव प्रतीबध्यप्रतिबन्धकभावः। यथायं स्थाणुत्वाभावावच्छेदकपुरुषत्ववानिति निश्चयेऽयं स्थाणुरिति न विशिष्ट-बुद्धिरिति। विवेचितं चेदं बाधस्यानुमितिप्रतिबन्धकत्वविचारावसर इति दक्। एवं च निराकाङ्क्षाभावनिश्चयस्य तादृशज्ञानमात्रे प्रतिबन्धक-त्वादयोग्यतानिश्चयस्य याह्याभावनिश्चयात्मकत्वेन तत्सत्त्वे प्रति-बन्धकत्वादेव शाब्दबोधानुत्पत्तिः। न च योग्यताज्ञानस्य याह्याभाव-ज्ञानविधया प्रतिबन्धकत्वे इच्छासत्त्वे आहार्यप्रत्यक्षवदाहार्यशाब्दबोधा-पत्तिरिति वाच्यम्। शाब्दानुमित्योरिच्छाजन्यत्वाभावेनाहार्यत्वानङ्गी-कारात्। न चैवं शाब्दबोधानुत्पत्तौ योग्यताज्ञानस्य हेतुत्वमुच्यतामिति वाच्यम्। प्रतिबध्यकोटौ शाब्दान्यत्वदानेन योग्यताज्ञानस्य पृथक्कारणत्व कल्पनेन च गौरवात्। यत्र गेहं घटवदिति स्मरणानन्तरं घटाभाव-लौकिकप्रत्यक्षं तत्र गेहं घटवदिति शाब्दबोधःस्यात्। स्मरणात्मकयोग्यता-ज्ञानस्य सत्त्वाच्च। अथ मुखं चन्द्र इत्यादौ प्रहसनादौ योग्यताज्ञान सत्त्वेपि बाधितार्थस्यापि शाब्दबोधाच्छाब्दान्यत्वमवश्यं प्रतिबध्यकोटौ

वाच्यं । तथा च न योग्यताज्ञानं कारणं न वाप्ययोग्यताज्ञानसत्त्वे शाब्दबोधाभावस्य निखिलजनसिद्धत्वादयोग्यताज्ञानस्य प्रतिबन्धकत्वात् । तथा च मुखं चन्द्र इत्यादौ कलहादौ च शब्दात्पदार्थोपस्थितौ मानसबोध एव । अथ वा चन्द्रपदमाल्हादके लाक्षणिकं । न चैवं कलहादौ मिथ्याभिशापादौ च शाब्दबोधाभावे कथं दुःखोत्पत्तिरूपं शाब्दधीः फलमितिवाच्यम् । शब्दात्पदार्थोपस्थितौ सत्यां ममानेन गालनं कृतमिति मानस ज्ञनादेव दुःखोत्पत्तेः । नन्विदं वाक्यमेतदर्थे तत्प्रतीतीछयोच्चरितमिति तात्पर्यज्ञानस्य संसर्गघटितस्य शाब्दबोधे हेतुत्वं तत्र किं संसर्गविषयकतात्पर्यज्ञानत्वेन हेतुत्वं किं वा तात्पर्यविषयसंसर्गज्ञानत्वेनेति विनिगमनाविरहाद्द्वयोरेव हेतुत्वं तत्र तात्पर्यस्य प्राधान्यात्तात्पर्यज्ञानस्य संसर्गस्य प्राधान्याच्च संसर्गरूपयोग्यताज्ञानस्य हेतुत्वमिति समायातं योग्यताज्ञानहेतुत्वेनेति चेन्न हेत्वभिमतयोग्यताज्ञानत्वस्य संशयसाधारण्यात् । तात्पर्यज्ञानस्य तु निश्चयत्वेन हेतुत्वादिति । तस्माच्छाब्दबोध साधारणक्लृप्तप्रतिबध्यप्रतिबन्धकभावेनैवोपपत्तौ कृतं योग्यताज्ञानस्य हेतुत्वेनेति संक्षेपः ।

न च घटेऽभिधेयत्वासंसर्गाप्रसिद्ध्या तद्ग्रहाप्रसिद्धिः । अभिधेयत्वप्रतियोगिकत्वेन योऽभावभ्रमस्तदभावस्य प्रसिद्धेः । यदि च सोपि न प्रसिद्धस्तदाऽऽस्तां तत्र योग्यता हेतुरेव । न चैवं व्यभिचाराच्छाब्दबोधं प्रति योग्यतायाः कथं कारणत्वमिति वाच्यम् । न हि शाब्दबोधत्वावच्छेदेन योग्यतायाः कारणत्वं । किं तु तदीयतादृशान्वयबोधे तदीयतादृशान्वयविरहनिश्चयाभावत्वेनैव विशिष्यैवेति क्व व्यभिचार इत्याहुः ।

केवलान्वयिनोऽभिधेयत्वस्याभावो ऽप्रसिद्ध इति तद्ग्रहोऽप्यप्रसिद्ध स्तथा चात्र तादृशासंसर्गाग्रहरूपायोग्यताविरहाद्व्यभिचार इति शङ्कते न चेति । ननु मास्त्वभिधेयत्वप्रतियोगिकाभावप्रमा परन्त्वभावे ऽभिधेयत्व-प्रतियोगिकत्वभ्रमे किं बाधकमिति समाधत्ते अभिधेयत्वे ति । नन्व सत्ख्यात्यनङ्गीकारात्कथं तादृशभ्रमोपीत्यत आह । यदि चेति । तत्र-घटोभिधेय इत्यत्र अहेतुरेवेति पाठः ॥ योग्यता अहेतुरेव बाधबुद्ध्यभाव-रूपायोग्यता अहेतुरेव । एवं तादृशयोग्यताया घटोभिधेय इत्यत्र हेतुत्वे । तदीयतादृशान्वयबोधे मैत्रीयगोप्रकारककर्मत्वविशेष्यकान्वयबोधे तदी-यान्वयतादृशान्वयनिश्चयाभावत्वेन मैत्रीयगोपदार्थो नकर्मत्वसंसर्गीति-निश्चयाभावत्वेनेति तथा च गोप्रकार कर्मत्वविशेष्यकशाब्दबोधं प्रति-गोपदार्थो न कर्मत्वसंसर्गीति निश्चयाभावत्वेनेति । विशिष्याहेतुत्वे सिद्धे घटोभिधेय इत्यत्र योग्यताया विरहेपि ज्ञत्यभावेन व्यभिचाराभावा-द्बाधनिश्चयाभावातिरिक्तयोग्यतायां मानाभाव इति भावः । यद्वा हेतुरेवेति पाठः । तत्र घटोऽभिधेय इत्याद्यतिरिक्तस्थले हेतुरेव । बाध बुद्ध्यभावरूपायोग्यता । एवं तादृशयोग्यताया घटोभिधेय इत्याद्यतिरिक्त स्थलं प्रति हेतुत्वे व्यभिचारात् । घटो भिधेय इत्यत्र व्यभिचारात् । अन्यत्सर्वं पूर्ववत् ।

आसत्तिः पदाव्यवधानं । अत एव गिरिरग्नि-मानित्यासन्नं । अनासन्नं च गिरिर्भुक्तमग्निमान्देवद-त्तेनेति। न चैवं स्थाल्यामोदनं पचतीति स्थाल्यामि-त्यस्य पाकेनानासन्नतापत्तिः । ओदनमित्यनेन व्यव-धानादिति वाच्यम् । प्रकृतान्वयबोधाननुकूलव्यव-धानाभावस्य विवक्षितत्वात् । ओदनपदं च स्थाल्य-धिकरणकौदनकर्मकपाककर्तेत्यन्वयबोधानुकूलमेव

स्थाल्यां पचतीत्यन्वये तु अनासन्नमेवेति प्राहुः । न चैवं श्लोकादेर्योजनयाप्यन्वयबोधः कथं व्यवहितत्वेन प्रत्यक्षसिद्धेऽव्यवहितत्वेन भ्रमासम्भवादिति वाच्यम् । तत्र हि श्लोकपदान्नान्वयबोधः । किन्तु योजनावाक्यादित्याहुः ।

अवसरसङ्गत्यैककार्यकारित्वसङ्गत्यावाऽऽसत्तिं निर्वक्ति । आसत्तिरिति अनासन्नमिति । अत्र गिरिपदस्याग्निपदेन सहान्वये भुक्तपदस्य व्यवधानाद्गिरिपदं नाग्निपदेन सहासन्नमित्यर्थः । एवं आसन्नंऽव्यवधानघटितत्वे स्याल्यामिति । स्याल्यधिकरणकौदनकर्मकपाकानुकूलकृतिमानिति बोधे स्थालीपदार्थस्योदनकर्मकपाकेन सममन्वयादत्रासत्तेरपेक्षितत्वादव्याप्तिरिति भावः । प्रकृतेति । तात्पर्यविषयबोध एवात्र प्रकृतः । अत एव गिरिर्भुक्तमग्निमानानित्यत्र गिरिपदस्याग्निपदेनसहानासन्नतेति । अथ स्याल्यामोदनं पचतीत्यत्र स्याल्यधिकरणकं यदोदनं तत्कर्मकपाकानुकूलकृतिमानित्यन्वये स्याल्यामित्यस्यौदनेन सहासन्नता पाकेन सहत्वनासन्नतेति प्राचीनमतमाह । स्याल्यामिति । पचतीत्यन्वये पाकेनान्वये । एवं प्रकृतान्वयबोधानुकूलयदव्यवधानाभावस्यासत्तित्वविवक्षणे । श्लोकादेरिति श्लोकादौ प्रकृतान्वयीभूतमुख्यार्थान्वयानुकूलानामपि पदानां व्यवधानसत्त्वादिति भावः । न च व्यवहितत्वभ्रमो ऽवश्यं तत्र जायत एवेत्यत आहाव्यवहितत्वेनेति ! मौनिश्लोके पदाभावेने पदघटितासत्तेरसम्भवादाहुरित्युक्तम् ।

वस्तुतस्तु आकांक्षादिमत्वे सति तात्पर्यज्ञाने व्यवहितादप्यन्वयबोधात्तद्विलम्बेनाविलम्बाच्च नैतज्ज्ञानं हेतुः । किं तु व्यवहितपदतात्पर्यज्ञानं । तच्चैतत्प-

दमेतत्पदाव्यवहितोत्तरमभिसन्धातु इत्यपि सन्धापयितुरिच्छा। अत एव मौनिश्लोकेप्यासत्तिः वक्तुरभावेप्यभिसन्धातुः सत्त्वात्। शुकवाक्ये च भगवत्तात्पर्यमादायैव गतिरिति नव्याः। तदपि न सत्यर्थतात्पर्यज्ञानादावेतद्विलम्बेन शाब्दबोधविलम्बाभावात्। तस्माद्वृत्त्या पदजन्यपदार्थोपस्थितिरासत्तिः। सा च स्वरूपसती हेतुः। न हि पदार्थानुपस्थितावन्वयबोधः। न च वृत्त्या पदजन्येति व्यर्थं। घटपदात्समवायेनाकाशस्मृतौ घटोस्तीति वाक्यादाकाशान्वयबोधापत्तेः ननु घटमानयेत्यत्र घटकर्मत्वानयनकृत्युपस्थितीनां न युगपत्सम्भवः। आशुविनाशिना क्रमिकाणां मेलकाभावादिति चेन्न। क्रमिकपदानुभवजन्यानेकसंस्कारैर्युगपत्तावत्पदस्मरणाद्युगपत्तावत्पदार्थोपस्थितावन्वयबोधः सम्भवतीति संक्षेपः। अत एव व्यवधानेन पदजन्यपदार्थोपस्थितिरासत्तिरित्यपास्तम्। तृतीयान्तवैयर्थ्यात्। व्यवहितोपस्थितावेकस्या उपस्थितेर्विनाशात्।

मिश्रमतमाह वस्तुतस्त्विति तात्पर्यज्ञान इति सतीत्यनुषज्यते। ननु ह्यवधानस्य प्रकृतान्वयबोधानुगुणत्वान्न व्यभिचार इत्यत आह तद्विलम्बेनेति। यद्वा। ननु व्यवधाने सत्यव्यवधानज्ञानस्यावश्यं तत्र सत्त्वान्न व्यभिचार इत्यत आह तद्विलम्बेनेति। तद्विलम्बेन आसत्तिज्ञानविलम्बेन। तत्र च। अव्यवहिततात्पर्ये च। एतत्पदमिति एतत्पद-

राजशयनम् । राजासनम् । अश्वस्थानम् । ब्राह्मणयाजकः । गोक्रीतः । अत्र तृतीया कर्मणीत्यस्य व्याख्यानशयनासनस्थानाना- मभावकर्मार्थे वचनम् । कारकात् किम् । प्रभूतौ सङ्गतिम् । अत्र तादौ च निति कृत्यताविति स्वरः ॥

सप्तम्याः पुण्यम् । ६ । २ । १५२ ॥

अध्ययनपुण्यम् । तत्पुरुषे तुल्यार्थेति प्राप्तम् । सप्तम्याः किम् । वेदेन पुण्यम् । वेदपुण्यम् ।

ऊनार्थकलहं तृतीयायाः । ६ । २ । १५३ ॥

माषोनम् । माषविकलम् । वाक्कलहः । तृतीयापूर्वपद- प्रकृतिस्वराऽपवादोऽयम् । अत्र केचिदर्थं इति स्वरूपग्रहणमिच्छन्ति । धान्यार्थः । ऊनशब्देन त्वर्थनिर्देशार्थेन तदर्थानां ग्रहणमिति प्रतिपदोक्तत्वादेव सिद्धे तृतीयाग्रहणं स्पष्टार्थम् ॥

मिश्रञ्चानुपसर्गमसन्धौ । ६ । २ । १५४ ॥

पणबन्धेनैकार्थ्ये सन्धिः । तिलमिश्राः । सर्पिर्मिश्राः । मिश्रं किम् । गुडधानाः । अनुपसर्गं किम् । तिलसम्मिश्राः । मिश्रग्रहणे सोपसर्गस्यापि ग्रहणस्येदमेव ज्ञापकम् । असन्धौ किम् । ब्राह्मण- मिश्रो राजा । ब्राह्मणैः सहित ऐकार्थ्यमापन्नः ॥

नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्था- स्तद्धिताः । ६ । २ । १५५ ॥

सम्पाद्याद्यर्थकतद्धितान्ता नञो गुणप्रतिषेधे वर्त्तमानात् परे ऽन्तोदात्ताः ॥ कर्णवेष्टकाभ्यां सम्पादि कार्णवेष्टकिकम् । न कार्णवेष्ट- किकमकार्णवेष्टकिकम् । छेदमर्हतीति छैदिकः । न छैदिकोऽच्छै-

दिकः ॥ न वत्सेभ्यो हितोऽवत्सीयः । न सन्तापाय प्रभवति असान्तापिकः । नञः किम् । गर्दभरथमर्हति गार्दभरथिकः । विगार्दभरथिकः । गुणप्रतिषेधे किम् । गार्दभरथिकादन्योऽगार्दभरथिकः । गुणो हि तद्धितार्थे प्रवृत्तिनिमित्तं सम्पादितत्वाद्युच्यते । तत्प्रतिषेधो यत्रोच्यते तत्रायं विधिः । कर्णवेष्टकाभ्यां न सम्पादि मुखमिति । सम्पेति किम् । पाणिनीयमधीते पाणिनीयः । अपाणिनीयः । तद्धितः किम् । वोढुमर्हो वोढा न वोढा अवोढा ॥

ययतोश्चातदर्थे । ६ । २ । १५६ ॥

ययतौ यौ तद्धितौ तदन्तस्योत्तरपदस्य नञो गुणप्रतिषेधविषयात् परस्यान्त उदात्तः । पाशानां समूहः पाश्या । न पाश्या अपाश्या । अदन्त्यम् । अतदर्थे किम् । अपाद्यम् । तद्धितं किम् । अदेयम् । गुणप्रतिषेधे किम् । दन्त्यादन्यदन्त्यम् । तदनुबन्धकग्रहणे नातदनुबन्धकस्येति नेह । अवामदेव्यम् ॥

अचूकावशक्तौ । ६ । २ । १५७ ॥

अजन्तं कान्तं च नञः परमन्तोदात्तमशक्तौ गम्यायाम् । अपचः । पक्तुं न शक्तः । अविलिखः । अशक्तौ किम् । अपचो दीक्षितः । गुणप्रतिषेध इत्येव । अन्योऽयं पचादपचः ॥

आक्रोशे च । ६ । २ । १५८ ॥

नञः परावच्कावन्तोदात्तावाक्रोशे ॥ अपचो जाल्मः । पक्तुं न शक्नोतीत्येवमाक्रोश्यते । अविक्षिपः ॥

संज्ञायाम् । ६ । २ । १५९ ॥

नञः परमन्तोदात्तं संज्ञायामाक्रोशे । अदेवदत्तः ॥

कृत्योकेष्णुच्चार्वादयश्च । ६ । २ । १६० ॥

नञः परे ऽन्तोदात्ताः स्युः । अकर्तव्यः । उक । अनागामुकः । इष्णुच् । अनलङ्करिष्णुः । इष्णुच्ग्रहणे खिष्णुचो ह्यनुबन्धकस्यापि ग्रहणम् । इकारादेर्विधानसामर्थ्यात् । अनाढ्यम्भविष्णुः । चार्वादि । अचारुः । असाधुः ॥ राजाह्नोश्छन्दसि ॥ * ॥ अराजा । अनहः । भाषायां नञः स्वर एव ॥

विभाषा तृन्नन्नतीक्ष्णशुचिषु । ६ । २ । १६१ ॥

तृन् । अकर्ता २ । अन्न । अनन्नम् । अतीक्ष्णम् । अशुचि । पक्षे ऽव्ययस्वरः ॥

बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने । ६ । २ । १६२ ॥

एभ्यो ऽनयोरन्त उदात्तः ॥ इदं प्रथमं यस्य स इदंप्रथमः । एतद्द्वितीयः । तत्पञ्चमः । बहुव्रीहौ किम् । अनेन प्रथम इदंप्रथमः । तृतीयेति योगविभागात् समासः । इदमेतत्तद्भ्यः किम् । यत्प्रथमः । प्रथमपूरणयोः किम् । तानि बहून्यस्य तद्बहुः । क्रियागणने किम् । अयं प्रथमो येषान्ते इदंप्रथमाः । द्रव्यगणनमिदम् । गणने किम् । अयं प्रथम एषान्ते इदंप्रथमाः । इदंप्रधाना इत्यर्थः । उत्तरपदस्य कार्यित्वात् कपि पूर्वमन्तोदात्तम् । इदंप्रथमकाः । बहुव्रीहावित्यधिकारो वनं समास इत्यतः प्राक् ॥

संख्यायाः स्तनः । ६ । २ । १६३ ॥

बहुव्रीहावन्तोदात्तः । द्विस्तना । चतुःस्तना । संख्यायाः किम् । दर्शनीयस्तना । स्तनः किम् । द्विशिराः ॥

विभाषा छन्दसि । ६ । २ १६४ ॥

द्विस्तनां करोति ॥

संज्ञायां मित्राजिनयोः । ६ । २ । १६५ ॥

देवमित्रः । कृष्णाजिनम् । संज्ञायां किम् । प्रियमित्रः । ऋषिप्रतिषेधो मित्रे ॥ * ॥ विश्वामित्र ऋषिः ॥

व्यवायिनो ऽन्तरम् । ६ । २ । १६६ ॥

व्यवधानवाचकात् परमन्तरमन्तोदात्तम् । वस्त्रमन्तरं व्यवधायकं यस्य स वस्त्रान्तरः । व्यवायिनः किम् । आत्मान्तरः । स्वभावोऽन्यो यस्येत्यर्थः ।

मुखं स्वाङ्गम् । ६ । २ । १६७ ॥

गौरमुखः ॥ स्वाङ्गं किम् । दीर्घमुखा शाला ।

नाव्ययदिक्छब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः । ६ । २ । १६८ ॥

उच्चैर्मुख । उपाग्निमुख इत्यादावव्ययीभावपूर्वपदकोऽयं निषेधः केषां चिन्मते प्रवर्तते । केषां चित् नेत्यव्ययीभावश्चेत्यत्र भाष्यकैयटयोः स्पष्टम् । प्राङ्मुखः । गोमुखः । महामुखः । स्थूलमुखः । मुष्टिमुखः । पृथुमुखः । वत्समुखः । पूर्वपदप्रकृतिस्वरोऽत्र । गोमुष्टिवत्सपूर्वपदस्योपमानलक्षणोऽपि विकल्पोऽनेन बाध्यते ।

निष्ठोपमानादन्यतरस्याम् । ६ । २ । ६९ ॥

निष्ठान्तादुपमानवाचिनश्च परं मुखं स्वाङ्गं वाऽन्तोदात्तं बहुव्रीहौ ॥ प्रक्षालितमुखः । पक्षे निष्ठोपसर्गेति पूर्वपदान्तोदात्तत्वम् । पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरोऽपि भवति । उपमानम् । सिंहमुखः ॥

जातिकालसुखादिभ्यो ऽनाच्छादनात् क्तो ऽकृतमित प्रतिपन्नाः । ६ । २ । १७० ॥

सारङ्गजग्धः । मासयातः । सुखयातः । दुःखयातः । सुखादयः सुखादिभ्यः कर्तृवेदनायामित्यत्रत्याः । जात्यादिभ्यः किम् । पुत्रजातः । अनाच्छादनात् किम् । वस्त्रच्छन्नः । अकृतेति किम् । कुण्डकृतः । कुण्डमितः । कुण्डप्रतिपन्नः । अस्माज्ज्ञापकान्निष्ठान्तस्य परनिपातः ॥

वा जाते । ६ । २ । १७१ ॥

जातिकालसुखादिभ्यः परो जातशब्दो वाऽन्तोदात्तः । दन्तजातः । मासजातः ॥

नञ्सुभ्याम् । ६ २ । १७२ ॥

बहुव्रीहावुत्तरपदमन्तोदात्तम् । अव्रीहिः । सुमाषः ॥

कपि पूर्वम् ६ । २ । १७३ ॥

नञ्सुभ्यां पूर्वमुदात्तं कपि परे ॥ अब्रह्मबन्धूकः । सुकुमारीकः ।

ह्रस्वान्ते ऽन्त्यात् पूर्वम् । ६ । २ । १७४ ॥

ह्रस्वान्ते उत्तरपदे समासे वान्त्यात् पूर्वमुदात्तं कपि नञ्सुभ्यां बहुव्रीहौ ॥ अः व्रीहिकः । सुमाषकः । पूर्वमित्यनुवर्तमाने पूर्वग्रहणं प्रवृत्तिभेदेन नियमार्थं ह्रस्वान्तेऽन्त्यादेव पूर्वं नञ्सुभ्यां परमुदात्तं न कपि पूर्वमिति । अज्ञकः । सुज्ञकः । अत्र नञ्सुभ्यामिति कबन्तस्यैवान्तोदात्तत्वम् । तद्धि समासस्यान्तोदात्तत्वमिष्यते । समासान्ता वा उत्तरपदावयवा भवन्तीति । अनृचो बहृच इत्यत्रापि

कृते समासान्ते तेनान्तोदात्तत्वं भवति । अत एव कपि पूर्वमिति सङ्गच्छते ॥

बहोर्नञ्वदुत्तरपदभूम्नि ६ । २ । १७५ ॥

उत्तरपदार्थबहुत्ववाचिनो बहोः परस्य पदस्य नञः परस्येव स्वरः स्यात् । बहुव्रीहिः । बहुकुमारीकः । बहुव्रीहिकः । नञ्वद्वचनं विदेशस्थस्यापि नञो जरमरेत्यस्यातिदेशेन प्रवृत्त्यर्थम् । बहुजरः । बहुमरः । बहुमित्रः । बहुमृतः । उत्तरपदेति किम् । बहुषु मानोऽस्य स बहुमानः ।

न गुणादयोऽवयवाः । ६ । २ । १७६ ॥

अवयववाचिनो बहोः परे गुणादयो न नञ्वत्स्वरका बहुव्रीहौ ॥ बहुगुणा रज्जुः । बह्वक्षरं पदम् । बह्वध्यायः । पूर्वपदप्रकृतिस्वर एव भवति । गुणादिराकृतिगणः । अवयवाः किम् । बहुगुणो द्विजः । अध्ययनश्रुतसदाचारादयो गुणाः ॥

उपसर्गात् स्वाङ्गं ध्रुवमपर्शु । ६ । २ । १७७ ॥

प्रपृष्ठः । प्रललाटः । प्रमुख इत्यत्र मुखं स्वाङ्गमित्यस्य नाव्ययेति निषेधं परत्वाद्बाधित्वेदं भवति । ध्रुवमेकरूपम् । उपसर्गात् । किम् । प्रदर्शनीयपृष्ठः । स्वाङ्गं किम् । प्रशाखो वृक्षः । ध्रुवं किम् । उद्बाहुः । अपर्शु किम् । विपर्शुः ॥

वनं समासे । ६ २ । १७८ ॥

समासमात्रे उपसर्गादुत्तरपदं वनमन्तोदात्तम् ॥ तस्येदिमे प्रवणे । प्रनिरन्त इति णत्वम् । समासग्रहणं बहुव्रीह्यधिकारनिवृत्त्यर्थम् । उपसर्गात् किम् । शरवणो देशः ॥

अन्तः । ६ । २ । १७९ ॥

अस्मात् परं वनमन्तोदात्तम् । अन्तर्वणो देशः । अनुपसर्गार्थमिदम् ॥

अन्तश्च । ६ । २ । १८० ॥

उपसर्गादन्तशब्दोऽन्तोदात्तः । प्रान्तः । पर्यन्तः । समन्तः ॥

न निविभ्याम् ॥ ६ । २ । ८१ ॥

न्यन्तः । व्यन्तः । पूर्वपदप्रकृतिस्वरे यणि च कृते उदात्तस्वरितयोर्यण इति स्वरितः ॥

परेरभितोभावि मण्डलम् ॥ ६ । २ । १८२ ॥

परेः परमभित उभयतो भावो यस्यास्ति तत् कूलादि मण्डलं चान्तोदात्तम् । परिकूलम् । परिमण्डलम् । बहुव्रीहिः प्रादिसमासोऽव्ययीभावो वा । अव्ययीभावपक्षे कूलतीरेति परिप्रत्युपेति वा प्राप्तम् ॥

प्रादस्वाङ्गं संज्ञायाम् ॥ ६ । २ । १८३ ॥

प्रगृहम् । अस्वाङ्गं किम् । प्रपदम् । संज्ञायां किम् । प्रशाखो वृक्षः ॥

निरुदकादीनि च । ६ २ । १८४ ।

अन्तोदात्तानि । निरुदकम् । निरुपलम् । निरुदकादिराकृतिगणः ॥

अभेर्मुखम् । ६ । २ । १८५ ।

अभिमुखम् । योगविभाग उत्तरार्थः ॥

स्फिगपूतवीणाऽञ्जोऽध्वकुक्षिसीरनामनाम च । ६ । २ । १८६ ।

अपादिमान्यन्तोदात्तानि । अपस्फिगम् । अपपूतम् । अपवीणम् । अञ्जस् । अपाञ्जः । अध्वन् । अपाध्वा । उपसर्गादध्वन इत्यस्याभावे इदम् । एतदेव च ज्ञापकं समासान्तानित्यत्वे । अपकुक्षि । सीरनाम । अपसीरम् । अपहलम् । अपनाम । स्फिगपूतकुक्षिग्रहणमबहुव्रीह्यर्थमध्रुवार्थमस्वाङ्गार्थञ्च ॥

अधेरुपरिस्थम् । ६ । २ । १८७ ।

अध्यारूढो दन्तोऽधिदन्तः । दन्तस्योपरिजातो दन्तः । उपरिस्थं किम् । अधिकरणम् ॥

अनोरप्रधानकनीयसी । ६ । २ । १८८ ।

अनोः परमप्रधानवाचि कनीयश्चान्तोदात्तम् । अनुगतो ज्येष्ठमनुज्येष्ठः । पूर्वपदार्थप्रधानः प्रादिसमासः । अनुगतः कनीयाननुकनीयान् । उत्तरपदार्थप्रधानः । प्रधानार्थञ्च कनीयोग्रहणम् । अप्रेति किम् । अनुगतो ज्येष्ठोऽनुज्येष्ठः ॥

पुरुषश्चान्वादिष्टः । ६ । २ । १८९ ।

अनोः परोऽन्वादिष्टवाची पुरुषोऽन्तोदात्तः । अन्वादिष्टः पुरुषोऽनुपुरुषः । अन्वादिष्टः किम् । अनुगतः पुरुषोऽनुपुरुषः ॥

अतेरकृत्पदे । ६ । २ । १९० ।

अतेः परमकृदन्तं पदशब्दश्चान्तोदात्तः । अत्यङ्कुशो नागः । अतिपदा गायत्री । अकृत्पदे किम् । शोभनः कारकोऽतिकारकः ॥

अतेर्धातुलोप इति वाच्यम् ॥ * ॥ इह मा भूत् । शोभनो गार्ग्योऽतिगार्ग्यः । इह च स्यात् । अतिक्रान्तः कारकमतिकारकः ।

नेरनिधाने । ६ । २ । १९१ ।

निधानमप्रकाशता ततोऽन्यदनिधानं प्रकाशमित्यर्थः । निमूलम् । न्यक्षम् । अनिधाने किम् । निहितो दण्डो निदण्डः ॥

प्रतेरंश्वादयस्तत्पुरुषे । ६ । २ । १९२ ।

प्रतेः परेंऽश्वादयो ऽन्तोदात्ताः ॥ प्रतिगतोंऽशुः प्रत्यंशुः । प्रतिजनः । प्रतिराजा । समासान्तस्यानित्यत्वान्न टच् ॥

उपाद् द्व्यजजिनमगौरादयः । ६ । २ । १९३ ।

उपात् परं द्व्यच्कमजिनं चान्तोदात्तं तत्पुरुषे गौरादीन् वर्जयित्वा ॥ उपदेवः । उपेन्द्रः । उपाजिनम् । अगौरादयः किम् । उपगौरः । उपतैषः । तत्पुरुषे किम् । उपगतः सोमोऽस्य स उपसोमः ।

सोरवक्षेपणे । ६ । २ । १९४ ।

सुप्रत्यवसितः ॥ सुरत्र पूजायामेव वाक्यार्थस्त्वत्र निन्दा । असूयया तथाऽभिधानात् । सोः किम् । कुब्राह्मणः । अवक्षेपणे किम् । सुवृषणम् ॥

विभाषोत्पुच्छे । ६ । २ १९५ ।

तत्पुरुषे ॥ उत्क्रान्तः पुच्छादुत्पुच्छः २ । यदा तु पुच्छमुदस्यति उत्पुच्छयते ण्यच् उत्पुच्छः । तदा थाथादिस्वरेण नित्यमन्तस्योदात्तत्वे प्राप्ते विकल्पोऽयम् । सेयमुभयत्र विभाषा । तत्पुरुषे किम् । उदस्तं पुच्छं येन स उत्पुच्छः ॥

द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ । ६ । २ । १९६ ॥

आभ्यां परेष्वेतेष्वन्तोदात्तो वा ॥ द्विपाच्चतुष्पाच्च रथाय । त्रिपादूर्ध्वः । द्विदन् । त्रिदन् । द्विमूर्धानं सप्तरश्मिम् । मूर्द्धन्नित्यकृतसमासान्त एव मूर्द्धशब्दः । तस्यैतत्प्रयोजनमसत्यपि समासान्ते अन्तोदात्तत्वं यथा स्यात् । एतदेव ज्ञापकमनित्यः समासान्तो भवतीति । तदापि च समासान्तः क्रियते तदाऽप्यस्य स्वरस्य बहुव्रीहिकार्यत्वात् समासान्तस्य तदेकदेशत्वाच्चैतत्सूत्रविहितं समासान्तोदात्तत्वं पक्षे भवत्येव । अत्र हि सूत्रे समासस्यैव कार्यित्वमुत्तरपदावयवाः समासान्ता वेति सिद्धान्तः । द्विमूर्द्धः । त्रिमूर्द्धः । द्वित्रिभ्यां किम् । कल्याणमूर्द्धा । बहुव्रीहौ किम् । द्वयोर्मूर्द्धा द्विमूर्द्धा ॥

सक्थं चाऽक्रान्तात् । ६ । २ । १९७ ॥

कृतसमासान्तः सक्थशब्दोऽन्तोदात्तो वा बहुव्रीहौ क्रशब्दान्तात् परश्चेन्न भवति ॥ गौरसक्थः । श्लक्ष्णसक्थः । अक्रान्तात् किम् । चक्रसक्थः । समासान्तस्य षचश्चित्वान्नित्यमेवान्तोदात्तत्वं भवति ॥

परादिश्छन्दसि बहुलम् । ६ । २ । १९८ ।

छन्दसि परस्य सक्थशब्दस्यादिरुदात्तो वा ॥ अजसक्थमालभेत । अत्र वार्तिकम् ॥ परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते । पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं यत इति ॥ * ॥ तुविजाता उरुक्षया । उरूणां बहूनां क्षयाविन्त्यर्थः । क्षयशब्दः क्षयो निवास इत्याद्युदात्तः समासस्येत्यन्तोदात्तत्वं बाधित्वा कृदुत्तरपदप्रकृतिस्वरेणोत्तरपदाद्युदात्तत्वं प्राप्तं तत्याथादिस्वरेण बाधितमतो बाहुलकेनोत्तरपदाद्युदात्तत्वमिति वेदभाष्ये स्थितम् । परान्तः ।

नि येन मुष्टिहत्यया। मुष्ट्या हननं मुष्टिहत्या। हनस्तचेति क्यप्। कृदुत्तरपदप्रकृतिस्वरोऽत्र प्राप्तः। पूर्वान्तः। विश्वायुर्धेहि। विश्वमायुर्यस्मिन् धने इति बहुव्रीहिः। विश्वशब्दः क्वन्नन्तत्वादाद्युदात्तः। तस्य पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वं प्राप्तम्। पूर्वाद्युदाहरणं आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानमित्ति पूर्वोक्तं द्रष्टव्यम्॥ अन्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दस्युपसंख्यानम्॥ * ॥ त्रिचक्रेण त्रिबन्धुरेण त्रिवृतारथेन त्रिचक्रेणेत्यादौ बहुव्रीहिस्वरे प्राप्तेऽन्तोदात्तत्वं विधीयते एतदपि परान्तस्यैवोदाहरणम्। एवं पूर्वपदान्तोदात्तत्वप्रकरणे मरुद्वृधादीनां छन्दसीत्यपि पूर्वान्तोदाहरणम्।

इत्योरम्भट्टेन श्रीघोण्डभट्टविश्वरूपात्मजेन वैजनाथभट्टविश्वरूपापरनामधेयेन विरचितायां व्याकरणदीपिकासमाख्यायां पाणिनिसूत्रवृत्तौ षष्ठस्याध्यायस्य द्वितीयः पादः समाप्तः॥

अथ षष्ठाध्यायस्य तृतीयः पादः ।

अलुगुत्तरपदे । ६ । ३ । १ ।

अलुगधिकारः प्रागानङ उत्तरपदाधिकारस्त्वा पादसमाप्तेः । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्रालुगुत्तरपदे इत्येवं तद्वेदितव्यम् । वक्ष्यति । पञ्चम्याः स्तोकादिभ्यः । स्तोकान्मुक्तः । उत्तरपदे किम् । निष्क्रान्तः स्तोकान्निस्तोकः । आनङ् ऋतो द्वन्द्वे । उत्तरपदे किम् । होतापोतृभ्याम् । पोतृशब्दस्यानङ् न भवति । इको ह्रस्वो । उत्तरपदे किम् । ग्रामणीः ॥

पञ्चम्याः स्तोकादिभ्यः । ६ । ३ । २ ॥

एभ्यः पञ्चम्या अलुक् स्यादुत्तरपदे ॥ स्तोकान्मुक्तः । अल्पान्मुक्तः । एवमन्तिकार्थदूरार्थकृच्छ्रेभ्यः । द्विवचनबहुवचनान्तानां स्तोकादीनां समास एव नानभिधानात् ॥ ब्राह्मणाच्छंसिन उपसंख्यानम् ॥ * ॥ ब्राह्मणे विहितानि शस्त्राण्युपचाराद् ब्राह्मणानि तानि शंसतीति ब्राह्मणाच्छंसी ऋत्विग्विशेषः । द्वितीयार्थे पञ्चम्युपसंख्यानादेव ॥

ओजःसहोम्भस्तमसस्तृतीयायाः । ६ । ३ । ३

ओजसाकृतमित्यादि ॥ अञ्जस उपसंख्यानम् ॥ * ॥ अञ्जसाकृतम् । आर्जवेन कृतमित्यर्थः ॥ पुंसानुजो जनुषान्ध इति च ॥ * ॥ यस्याग्रजः पुमान् स पुंसानुजः । जनुषान्धो जात्यन्धः ॥

मनसः संज्ञायाम् । ६ । ३ । ४ ।

मनसागुप्ता ॥

आज्ञायिनि च । ६ । ३ । ५ ।

मनस इत्येव । मनसा आज्ञातुं शीलमस्य मनसाज्ञायी ॥

आत्मनश्च । ६ । ३ । ६ ।

आत्मनस्तृतीयाया अलुक् ॥ पूरण इति वक्तव्यम् ॥ * ॥ पूरणप्रत्ययान्ते उत्तरपदे इत्यर्थः । आत्मनापञ्चमः । जनार्दनस्त्वात्मचतुर्थ एवेति तु बहुव्रीहिर्बोध्यः । पूरणे किम् । आत्मकृतम् ।

वैयाकरणाख्यायां चतुर्थ्याः । ६ । ३ । ७ ।

आत्मन इत्येव ॥ आत्मनेपदम् । आत्मनेभाषाः । तादर्थ्ये चतुर्थी । चतुर्थीति योगविभागात् समासः ॥

परस्य च । ६ । ३ । ८ ॥

परस्मैपदम् । परस्मैभाषाः ॥

हलदन्तात् सप्तम्याः संज्ञायाम् । ६ । ३ । ९ ॥

हलन्ताददन्ताच्च सप्तम्या अलुक् संज्ञायाम् । त्वचिसारः । युधिष्ठिरः । अरण्येतिलकः । अत्र संज्ञायामिति सप्तमीसमासः । गविष्ठिर इत्यत्र तु गवियुधिभ्यां स्थिर इति वचनादेवालुक् । हलदन्तात् किम् । भूम्यां यशो भूमियशः । संज्ञायां किम् । अक्षशौण्डः । हृद्द्युभ्यां च ॥ * ॥ हृदिस्पृक् । दिविस्पृक् ॥

कारनाम्नि च प्राचां हलादौ । ६ । ३ । १० ॥

स्वामिग्राह्यो भागः कारः ॥ प्राचां देशे यत् कारनाम तत्र हलादावुत्तरपदे हलदन्तात् सप्तम्या अलुक् । मुकुटेकार्षापणम् । दृषदिमाषकः । पूर्वेण सिद्धे नियमार्थमिदम् । कारनाम्न्येव प्राचामेव

हलादावेवेति । कारनाम्नि किम् । अभ्याहितपशुः । कारादन्यस्यै-तद्द्वयस्य नाम । प्राचां किम् । यूथपशुः । हलादौ किम् । अविकटो-रणः । हलदन्तात् किम् । नद्यां दोहो नदीदोहः ॥

मध्याद् गुरौ । ६ । ३ ११ ॥

मध्येगुरुः । अन्ताच्च । अन्तेगुरुः ॥

अमूर्धमस्तकात् स्वाङ्गादकामे । ६ । ३ । १२ ॥

कण्ठेकालः । उरसिलोमा । अमूर्द्धमस्तकात् किम् । मूर्द्ध-शिखः । अकामे किम् । मुखे कामोऽस्य मुखकामः ॥

बन्धे च विभाषा । ६ । ३ । १३ ॥

हलदन्तात् सप्तम्या अलुक् । हस्तेबन्धः । हस्तबन्धः । चक्रेबन्धः । चक्रबन्धः । हलेति किम् । गुप्तिबन्धः ।

तत्पुरुषे कृति बहुलम् । ६ । ३ । १४ ॥

स्तम्बेरमः । कर्णेजपः । क्वचिन्न । कुरुचरः । विभाषा च भवति । सरसिजम् । सरोजम् ॥

प्रावृड्शरत्कालदिवां जे । ६ । ३ । १५ ॥

प्रावृषिजः । शरदिजः । कालेजः । दिविजः । पूर्वस्यायं प्रपञ्चः ॥

विभाषा वर्षक्षरशरवरात् । ६ । ३ । १६ ॥

एभ्यः सप्तम्या अलुक् जे । वर्षेजः । वर्षजः । क्षरेजः । क्षरजः । शरेजः । शरजः । वरेजः । वरजः ॥

घकालतनेषु कालनाम्नः । ६ । ३ । १७ ॥

सप्तम्या विभाषा अलुक् स्यात् । घ । पूर्वाह्णतरे । पूर्वाह्णेतरे । पूर्वाह्णतमे । पूर्वाह्णेतमे । काले । पूर्वाह्णेकाले । पूर्वाह्णकाले । तन । पूर्वाह्णतने । पूर्वाह्णेतने । कालनाम्नः किम् । शुक्लतरे ॥

शयवासवासिष्वकालात् । ६ । ३ । १८ ॥

खेशयः । खशयः । ग्रामेवासः । ग्रामवासः । ग्रामेवासी । ग्रामवासी । अकालात् किम् । पूर्वाह्णशयः । हलदन्तादित्येव । भूमिशयः ॥ अपो योनियन्मतुषु ॥ * ॥ अप्सु योनिरुत्पत्तिर्यस्य सोऽप्सुयोनिः । अप्सु भवोऽप्सव्यः । अप्सुमन्तावाज्यभागौ ॥

नेन्सिद्धबध्नातिषु च । ६ । ३ । १९ ॥

इन्नन्तादिषु सप्तम्या अलुक् । स्थण्डिलशायी । साङ्काश्यसिद्धः । चक्रबद्धः ॥

स्थे च भाषायाम् । ६ । ३ । २० ॥

सप्तम्या अलुक् न स्यात् । समस्थः । भाषायां किम् । कृष्णोऽस्याखरेष्ठः ॥

षष्ठ्या आक्रोशे । ६ । ३ । २१ ॥

चौरस्यकुलम् । आक्रोशे किम् । ब्राह्मणकुलम् ॥ वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु ॥ * ॥ वाचोयुक्तिः । दिशोदण्डः । पश्यतोहरः ॥ आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति च ॥ * ॥ अमुष्यापत्यमामुष्यायणः । नडादित्वात् फक् । अमुष्य पुत्रस्य भावः आमुष्यपुत्रिका । मनोज्ञादित्वाद् वुञ् । एवमामुष्यकुलिका ॥ देवानां प्रिय इति च मूर्खे । अन्यत्र देवप्रियः ॥ शेपपुच्छलाङ्गूलेषु शुनः ॥ * ॥

शुनःशेपः । शुनःपुच्छः । शुनोलाङ्गूलः । दिवश्च दासे ॥ * ॥ दिवोदासः ॥

पुत्रे ऽन्यतरस्याम् । ६ । ३ । २२ ॥

षष्ठ्याः पुत्रे परे ऽलुग्वा निन्दायाम् । दास्याः पुत्रः । दासीपुत्रः । निन्दायां किम् । ब्राह्मणीपुत्रः ॥

ऋतो विद्यायोनिसम्बन्धेभ्यः । ६ । ३ । २३ ॥

विद्यासम्बन्धयोनिसम्बन्धवाचिन ऋदन्तात् षष्ठ्या अलुक् ॥ होतुरन्तेवासी । होतुःपुत्रः । पितुरन्तेवासी । पितुःपुत्रः ॥ विद्यायोनिसम्बन्धेभ्यस्तत्पूर्वोत्तरग्रहणम् ॥ * ॥ नेह । होतृधनम् । पितृगृहम् ॥

विभाषा स्वसृपत्योः । ६ । ३ । २४ ॥

ऋदन्तात् षष्ठ्या अलुग्वा स्वसृपत्योः परयोः । मातुःष्वसा । मातुःस्वसा । पितुःष्वसा । पितुःस्वसा । मातृष्वसा । पितृष्वसा । दुहितुःपतिः । दुहितृपतिः ॥

आनङ् ऋतो द्वन्द्वे । ६ । ३ । २५ ॥

विद्यायोनिसम्बन्धवाचिनामृदन्तानां द्वन्द्वे आनङ् स्यादुत्तरपदे । होतापोतारौ । होतृपोतृनेष्टोद्गातारः । द्वयोर्द्वयोर्द्वन्द्वं कृत्वा पुनर्द्वन्द्वे तु होतापोतानेष्टोद्गातारः । मातापितरौ । ऋत इत्यनुवर्तमाने पुनर्ऋत इत्युक्तेः सर्वावयवद्वारा द्वन्द्वविशेषणार्थो । तेन पितृपितामहादौ नानङ् । नकारोच्चारणमुरण्रपर इति व्यावृत्त्यर्थम् । अत्र ऋकारस्य निर्दिश्यमानत्वेऽपि ङकारो मित्रावरुणावित्यादावन्त्यादेशत्वायेत्तरार्थः । पुत्रेऽन्यतरस्यामित्यतो मण्डूकप्लुत्या पुत्र इत्यनु-

ससजुषो रुः ।

अत्र पदस्येति वर्त्तते तच्च सेन विशेष्यते। तेन येन विधिरिति तदन्तग्रहणात् सान्तस्य पदस्येत्यर्थः। ततोऽलोन्त्यपरिभाषया सान्तस्य पदान्तस्येत्यर्थः। सजुषा तु पदविशेषणे ग्रहणवतेति तदन्तग्रहणनिषेधात् । सजुष्शब्दस्य पदस्येत्यर्थः स्यात् । तथा सति परमसजूरित्यादौ रुर्न स्यादिति परस्परानन्वितमेव पदस्येति । सजुष इति च स्थानषष्ठ्यन्तम् । तच्चालोन्त्यपरिभाषया स्वस्वान्त्यपरम् । तच्च सान्तपदान्तस्य रुविधिसामर्थ्यात् परस्परमभेदेनान्वितम्। एतदर्थक एव सजुष्शब्दो यत् पदमिति तादात्म्यं च इति प्रकाशः तत्र सजुष्शब्दस्य पदशब्दस्य च स्वस्वान्त्यपरत्वात्। तथा च पदान्तस्य सजुषन्तस्य च रुः स्यादिति फलितं व्याचष्टे। पदान्तस्येति । सजुषशब्दस्य चेति। षस्येत्यपेक्ष्यत इति प्रकाशः। यत्तु सजुषा पदं विशेष्यते सजुषन्तं यत्पदं तस्य च रुः स चालोन्त्यस्य । न च ग्रहणवतेति तदन्तविधिनिषेधः। प्रत्ययविधिविषयकोऽयं निषेध इति दिव उत्सूत्रे कैय्यटहरदत्ताभ्यामुक्तत्वात् । एवं स्थिते इह सजुष्शब्देन तदन्तविधिर्नेति प्राचामुक्तिरापातत इति। तन्न । ग्रहणवता प्रातिपदिकेन तदन्तविधिव्यपदेशि-

वन्नावयोः प्रतिषेधः सामान्यविषय इति सीरदेवेन मता-न्तरत्वेनोक्तमिति तदभिप्रायकत्वात् प्राचामुक्तेः । दिव-उत्सूत्रे कैय्यटोक्त्युपन्यासस्यातिरभसात् । न चैवं दिवउ-दित्यत्र दिवा समासैकदेशस्य पदस्य विशेषणात् तदन्त-विधिर्न स्यात् तथा च विमलदिद्युरिति न सिध्येदिति वाच्यम् । पारिभाषिकस्यानित्यत्वादिह निषेधाप्रवृत्तेः । अत एव निषेधस्य विशेषविषयत्वेऽपि मेघतीत्यादिखजा-दिप्रत्ययविधावपि भयाद्यादिग्रहणमुपपदविशेषणं येन-विधिरित्यस्य प्रयोजनत्वेन वार्तिककृतोपन्यस्तम् । अत एव च स्पष्टत्वात् सूत्रे कैय्यटेन शेषोध्यसखीति सूत्रे हर-दत्तेन चैतदुपन्यस्तमिति दिक् ॥

अतो रो—।

यत्तु अप्लुतादिति विशेषणे तु तत्सामर्थ्यात् प्लुतो नासिद्ध इति केचित् । तन्न । यस्मिन् सति यदर्थवत् तत्तेन ज्ञाप्यते । यथा सुप्तिङन्तमित्यन्तग्रहणेन संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति । प्रकृते तु प्लुतस्य सिद्धत्वेऽप्यप्लुतग्रहणमनर्थकमिति कथं तत्तस्य ज्ञाप-कमिति । अत एव चुरादौ यन्त्र्यादीनामिदित्करणं चुरा-दिणिज्विकल्पज्ञापकमित्युक्तिर्णिज्विकल्पेऽपीदित्करणवै-यर्थ्यापरिहारेण तैरेव निराकृतेत्यालोचनीयम् ॥

भोभगो—।

अशि किम्। देवाः सन्तीत्यत्र यत्वस्यासिद्धत्वाद्वि-सर्जनीये सत्यपि तस्य स्थानिवत्वाद्यत्वं मा भूत्। न चाल्विधिः रोरितिसमुदायाश्रयणादिति केचित्। तदसत्। रोरित्यतो र इत्यनुवृत्त्याल्विधित्वात्। तस्मादुत्तरत्रानुवृत्त्यर्थं तदित्यस्मत्कृतप्रदीपोक्त एव निष्कर्षो बोध्यः। यदपि यदि तु भोस् भगोस् अघोसिति सान्तं रान्तं वानुकृत्य भो इत्यादीनां त्रयाणामलोन्त्यस्य यः स्यादपूर्वस्य रोश्चेति व्याख्यायते तर्ह्यसन्धिर्न्याय्य एव। युक्तञ्चैतत्। अन्यथा विभोरिदं सुप्रभगोरिदं रघोरिदमित्यत्रापि यत्वापत्तेः। भवति ह्ययं भोशब्दादिपूर्वो रुः। न चात्र भोशब्दादेर्लाक्षणिकत्वादग्रहणम्। विभाषा भवद्भगवदघवतामोच्चावस्येति वार्त्तिकेन निष्पन्नानां भवदादिप्रकृतीनां भोशब्दादीनामपि लाक्षणिकत्वाविशेषात्। अनर्थकत्वमप्युभयत्र तुल्यम्। रुविशिष्टानामेवार्थवत्त्वादिति। तदपि चिन्त्यम्। सान्तानुकरणत्वपक्षे भवदादिप्रकृतिकभोशब्दादीनामसंग्रहादव्याप्तेः। अन्यथा स्वग्रन्थविरोधाच्च। किञ्च निपातानामभ्युपगमे यत्वविधौ त एव गृह्येरन् प्रतिपदोक्तत्वात् न तु सम्बुध्यन्ता लाक्षणिकत्वादित्याशङ्का

परस्वग्रन्थो विरुध्येत । सान्तानुकरणत्वे सम्बुध्यन्तानां लाक्षणिकत्वोक्तेरसङ्गतेः । दान्तानुकरणत्वे निपातानां प्रतिपदोक्तत्वोक्तेरसङ्गतेः । भोस् भगोस् अघोसिति सान्तनिपाता इति स्वयमुक्तेः । एवञ्च निपातसम्बुध्यन्तयोर्लाक्षणिकत्वाविशेषात् ग्रहणे सिद्धे तदर्थं लक्षणप्रतिपदोक्तपरिभाषानाश्रयणमपि तेषां मुधा । अपि च प्रभोरिदमित्यादावतिव्याप्तिमाशङ्क्य परस्परसाहचर्येण निपातानां वार्त्तिकोक्तानाञ्च ग्रहणेऽप्यन्येषामग्रहणादित्युक्तं तदपि विरुध्येत । अर्थवद्ग्रहणपरिभाषयाऽतिव्याप्तेः । स्वयं समाहितत्वेन शङ्काया अनुत्थानात् । साहचर्याश्रयणस्य निष्फलत्वाच्च । साहचर्येणैव निपातावयवानां वार्त्तिकोक्तावयवानां च भोशब्दादीनां ग्रहणे ऽतिप्रसङ्गासम्भवात्तत्र तदापादनस्यासम्बद्धत्वापत्तेश्च । यदपि सान्ता निपाता इत्युपादाय भोभगो इति सूत्रे निर्दिष्टाश्चादिराकृतिगणत्वात् तत्र बोध्याः । तथा च विभाषा भवदिति वार्त्तिकं नाश्रयणीयम् । अन्यथा पुल्लिङ्गैकवचनमात्रे भो हरे इत्यादिसिद्धावपि भो हरिहरौ भो विद्वद्वृन्द भो गङ्गे इत्यादि न सिध्येत् । एतच्च वृत्तिकारहरदत्तादिमतेनोक्तम् । भाष्यस्वरसरीत्या तु विभाषेत्यादिवार्त्तिकमारब्धव्यमेव । किन्तु निपातोऽपि भोःशब्दोऽस्ति तेन द्विवचनादौ क्लीनपुंसकयोश्च नोक्तदोषः । यु-

न्तरञ्चैतत्। हे भवन्निितिवत् हे भो इति प्रयोगस्या- पीष्टत्वात् तस्य च वार्त्तिकारम्भ एव सिद्धेः। स्युः पाट् प्याडङ्ग है हे भो इत्यमरोक्तानां तु सम्बोधनार्थानां निपातानां सह प्रयोगायोगात्। किञ्च तत्र भवा- नित्यादिवत् तत्र भो इत्याद्यपि वार्त्तिके सत्येव सिध्यति। इतराभ्योऽपि दृश्यन्त इति सर्वविभक्त्यन्तात् त्रतसोर्भव- दादिप्रयोग एवेष्टत्वात्। किञ्चामन्त्रितत्वे पदात् पर- स्याष्टमिको निघात आमन्त्रितमित्यविद्यमानवद्भावो वाक्यादेरामन्त्रितस्येति द्विर्भावः सुबामन्त्रित इति परा- ङ्गवद्भावश्चेत्यादि सिध्यति। भगो अघो इति निपातावपि यदि प्रामाणिकौ तर्हि स्तां नाम। आमन्त्रितकार्यसिद्धि- स्तु वार्त्तिकायत्तैव। यत्तु वदन्ति। अकारान्तान्नेवैतान्नि- पातानाश्रित्य रुत्वोत्वे भाष्ये प्रत्याख्यात इति तदतिरभ- सादिति। अत्रेदं वक्तव्यम्। मतुवसोरिति सूत्रे हि विभाषेत्यादि वार्त्तिकं व्याख्याय भाष्यकार आह सम्बु- द्धावित्युच्यते तत्रेदं न सिध्यति। भो ब्राह्मणा इति तथा विभक्तौ लिङ्गविशिष्टाग्रहणं नेतीह न प्राप्नोति। भो ब्राह्मणि। नैष दोषः। अव्ययमेष भोःशब्दो नैषा भवतः प्रकृतिः। कथमव्ययत्वं विभक्तिस्वरप्रतिरूपकाश्च निपाताः निपातोऽव्ययमित्यव्ययसंज्ञेति। अत्र कैय्य- टः। विभक्तिस्वरेति केचिदाहुः। भोशब्दस्य विजन्त-

स्य सौ यद्रूपं रेफान्तं तत्प्रतिरूपको निपातः तस्य रेफस्य यत्वे लोपे च भो ब्राह्मणा इत्यादि सिध्यति । भवच्छ-ब्दस्यापि भोः शब्दसिद्धये वार्त्तिकारस्यास्तेनेतराभ्योऽपि दृश्यन्त इति भवदादियोगे विधीयमानास्त्रतसिलादय-स्तो भोस्त्र भो इत्यत्रापि भवन्ति । एवञ्च भवच्छ-ब्दप्रकृतिकभोःशब्दप्रतिरूपकत्वमेव निपातत्वमाश्रयणी-यम् । भवतेर्विजर्दर्शनादित्यन्य आहुरिति । तन्न । वार्त्ति-कानुयायिद्वितीयमते भवच्छब्दस्यापीत्युक्तिसन्दर्भात् विजन्तानुधावनक्लेशाच्चाद्यव्याख्याने वार्त्तिके भवच्छब्दः प्रत्याख्यात इति प्रतीयते । अस्मिन् पक्षे एषा भोशब्द-मात्रप्रवृत्तिर्भवच्छब्दस्य न किन्त्वव्ययस्यैवेति भाष्यार्थः । प्रयोजनाभावसहकृतलाघवेन भाष्यस्योक्तार्थत्वौचित्या-दिति भावः । अत एवैतन्मतोपमर्दनाय भाष्यविरोध-मनुक्त्वा त्रतसिलादिप्रयोजनमेवोक्तं पक्षान्तरे । तत्रैषा भो ब्राह्मणा इत्यादौ भोःशब्दप्रवृत्तिरित्यादि भाष्यार्थः । पक्षद्वयं चेदं वृत्तिपदमञ्जर्योरपि सम्मतम् । एवं च भव-च्छब्दप्रत्याख्यानाप्रत्याख्यानपक्षयोर्भाष्यादिसकलग्रन्थ-सम्मतत्वात् कथं भाष्यस्वरसरीत्या वार्त्तिकमारब्धव्यमेवे-त्युक्तम् । कथं वा चादेराकृतिगणत्वात् सान्ता निपाता इत्ययुक्तमिति नोक्तं त्रयाणां निपातत्वस्य तस्याकृतिगण-त्वप्रयोज्यत्वस्य च भाष्यकैय्यटाभ्यामनुक्तत्वात् । भोनि-

पातस्य सान्तत्वानुक्तेर्भगोअघोशब्दयोस्तु सुतराम्। भाष्यादौ हि भोशब्दस्यैव विभक्तिप्रतिरूपकत्वात् निपातत्वमुक्तं विभक्त्यन्तं तु द्वितीयपक्षे रेफान्तं न सान्तम्। अत एव भोशब्दस्य विजन्तस्य सौ यद्रूपं रेफान्तं तत्प्रतिरूपको निपात इति कैय्यट आद्यपक्ष उक्तम्। हरदत्तेन च भोभगोअघो इत्येषां निपातत्वमुक्तं न तु सान्तत्वम्। अथ वृत्तिपदमञ्जर्योर्वार्त्तिकप्रत्याख्यानाय त्रयाणां तावत्स्वादेराकृतिगणत्वात् निपातत्वमुक्तम्। भोभगोअघो पूर्वस्य रोर्यत्वमिति वृत्तिकृद्व्याख्यानुरोधेन सान्तत्वं चानुमीयते। अन्यथा भोशब्दादिपूर्वस्य रोरप्रसिद्धेः। वार्त्तिकाङ्गीकारपक्षे तन्निष्पन्नानामेव यत्वापत्तेश्चेति सान्तानां त्रयाणां निपातत्वं स्थितं तदनुरोधेन भाष्यमप्युपलक्षणादिना तत्परतयैव योज्यमिति मतं तर्हि तथैव वार्त्तिकमप्रत्याख्यानतया कथं न भाष्यं योज्यते। अथ भाष्यस्वारस्याद्युक्तिविधानाच्च न तत्परता इत्येवं कैय्यटोक्तव्याख्ययोर्विभक्तिप्रतिरूपकस्य भोरित्यस्य रेफान्तनिपातस्य रेफस्य यत्वमिति प्रतीतिस्वारस्यात् भोशब्दादिपूर्वस्य रोरित्यर्थस्य स्वयमेव प्रागुक्तप्रतिपादनाच्च कथं त्रयाणां सान्तानां निपातनं युक्तं कथं वा वृत्त्युक्तार्थनिराकरणावसरे सान्तनिपातानुकरणपक्षः स्वयमुक्तः। यदि तु भाष्ये विभक्तिशब्देनोपदिष्ट-

विभक्तेः पुरस्स्फूर्त्तिकतया तदन्तप्रतिरूपकस्य सान्तस्यैव भोशब्दस्य प्रतीतिरत एव कैय्यटेन रेफान्तस्य निपातत्वं मतान्तरेणोपन्यस्तम्। न च भवतेर्विजदर्शनादुपदिष्टविभक्त्यन्तप्रतिरूपकस्य भोशब्दस्यासम्भव इति वाच्यम् । भवतेर्विजनभिधाने मानाभावात् । शम्भोरित्येकदेशानुकरणस्य वा विभक्त्यन्तस्य प्रतिरूपकसम्भवादिति विभाव्यते तथापि भगोअघोशब्दयोर्भोशब्दस्य चादेराकृतिगणत्वेन चादित्वे भाष्यस्वारस्यं स्पष्टमनुक्त्वा प्रत्याख्यानेऽस्पष्टं तत्कथमुच्यत इति विभाव्यताम्। यत्तु तत्र भो इत्याद्यपि वार्त्तिके सत्येव सिध्यतीति तत्र भवच्छब्दे सत्येवेत्युचितं तदपि कैय्यटादावेवोक्तम्। नापूर्वं इष्ट्यर्थलभ्यं भवदादीनामपरिगणितत्वेन निपातप्रयोगेऽपि त्रतसिलादिसिध्या प्रकाशे दूषितं च। आमन्त्रितत्वमपि न भवत्यदोपादानप्रयोजनं निपातभोःशब्दस्य स्वयमेव सम्बोधनार्थत्वोक्तेस्तदुत्तरप्रथमायास्तदर्थकत्वेनामन्त्रितत्वसाम्राज्यात्। सहप्रयोगः परं प्रयोजनमवशिष्यते तदप्यन्ये त्वित्यादिना द्वितीयपक्षोत्थापनाय प्रकाश उक्तं नापूर्वम्। तदपि न वास्तवम् । निपातस्योक्तकोशेन सम्बोधनार्थत्वेऽपि भवदर्थत्वस्यापि वक्तुं शक्यत्वात् निपातानामनेकार्थत्वदर्शनात्। यथाऽस्तीति तिङन्तप्रतिरूपकमव्यय-

स्यास्तिमानित्यादौ घनार्थत्वेऽप्यस्तिक्षीरेत्यादौ तिङन्तार्थत्वमपि दृश्यते। युक्तं चैतत्। कथमन्यथा भो ब्राह्मणा इत्यादावनुपपत्तिनिराकरणं नैष दोष इत्यादिनाऽव्ययभोःशब्देन भाष्यकृदुक्तं सङ्गच्छते। न ह्यर्थभेदे सति शब्दमात्रान्यथासिध्या पूर्वपक्षनिराकरणं युज्यते। कथं वा हे भो इति सहप्रयोग इव भवन् ब्राह्मणेत्यर्थे भो ब्राह्मणेति प्रयोगः प्रयोजनं नोक्तं परैरपि। एवं च भोसोऽव्ययस्य भवदर्थत्वध्रौव्ये तेनैव यथोक्तसकललक्ष्यसिद्धौ वार्त्तिके भवच्छब्दप्रत्याख्यानं कैश्चिद्व्याकृतमेवोपोद्बलयितुं भाष्यादौ तु सकारान्तानेवैतान्निपातानाश्रित्य रुत्वोत्वे भाष्ये प्रत्याख्यात इति प्रकाशकद्भिरुक्तम्। तत्र भगो अघो इत्येतयोर्निपातयोः प्रामाणिकत्वे तयोरुक्तरीत्या भगवदघवदर्थकत्वेन चाशङ्का न चोत्तरम्। अप्रामाणिकत्वे तु भाष्ये भवच्छब्दः प्रत्याख्यातो इत्यादौ तु सर्वमित्यभिप्रायः। अत एवात्रेदं वाच्यमित्यादिना कैयटोक्तान्यमतमुपोद्बलयितुं भो इत्यादीनां भवदाद्यर्थकत्वाभावबोधनाय भोः प्रभृतयः सम्बोधनार्था आभिमुख्यद्योतका असत्त्ववचना इति वन्त स्थितिस्तत्र हे भो इत्यादिसहप्रयोगो न स्यादिति प्रकाश उक्तमिति दिक्। यत्तु यत्तु वदन्तीत्यादि

भाष्ये प्रत्याख्यातमित्यन्यत्सनूदितम् । सोऽयमनुक्तोपालम्भ इति सहृदयैराकलनीयम् ॥

सोऽचि—।

अत्र सोऽहमाजन्मशुद्धानामित्यादि सिध्यर्थं लोपे सत्येव पादश्चेत् पूर्यतेति सावधारणं केचिद्व्याचख्युः । तेषां सास्मा अरमित्यादौ सुलोपानापत्तिः । तत्र हि सः अस्मै इति छेदः । बहुलग्रहणानुवृत्त्या तदुपपादने तु सोऽहमाजन्मशुद्धानामित्याद्यपि तथोपपाद्यतां किमवधारणेनेति ॥

इति स्वादिसन्धिः ।

अर्थवत्—।

अर्थवदिति प्रतिवर्णं वनमित्यादौ प्रातिपदिकसंज्ञानिवृत्तये । न चाधातुरिति पर्युदासादर्थवत्त्वलाभः । असत्वार्थकत्वेनाऽपि पर्युदासोपपत्तेः । न चैवमप्रत्यय इति व्यर्थं वचे इत्यादौ सेप्रत्ययादीनां वारिणी भूयत इत्यादीनां च प्रातिपदिकनिवृत्त्यर्थत्वात् । न चैषां सति प्रातिपदिकत्वे किं बाधकमिति वाच्यम् । आद्ये सति प्रातिपदिकत्व औत्सर्गिकैकवचने तस्याव्ययत्वेन

लुक्यपि प्रत्ययलक्षणेन से इत्यस्य पदत्वेन षत्वनिषेधस्य द्वितीये चौत्सर्गिकैकवचनश्रवणस्य लिङ्गसर्वनामनपुंसकत्वे च ह्रस्वस्य प्रसङ्गात्। न चैवमप्यप्रत्यय इति पर्युदासादर्थवत्त्वलाभः। तथाऽप्यसत्वार्थकत्वविशिष्टार्थवत्त्वविशिष्टस्य प्रातिपदिकत्वप्राप्तेः। न च तथाप्यर्थवत्त्वलाभवैयर्थ्यम्। पर्युदासार्थकनञ्समभिव्याहारव्युत्पत्तिसिद्धसादृश्यबोधस्य सामग्रीसत्वेनानिवारणात्। न चैतावता प्रातिपदिकत्वनिमित्तमर्थवत्त्वम्। तन्निवर्त्यस्यानर्थकस्य धातुपर्युदासलभ्यासत्वार्थकत्वेनैव निवर्त्तनात्। तथाप्यप्रत्यय इत्यनुग्रहायाधातुरित्यनेनार्थवत्त्वमेव सादृश्यं बोध्यन्तामिति चेन्न औत्सर्गिकस्य व्याप्यधर्मरूपसादृश्यबोधस्य त्यागायोगात्। कथमन्यथौषधेश्च विभक्तावप्रथमायामकर्त्तरि च कारके संज्ञायामित्यादौ प्रथमादिपर्युदासेन विभक्त्यादिलब्धौ विभक्त्यादिग्रहणं नञिवयुक्तन्यायस्यानित्यत्वं ज्ञापयेत् प्रत्ययत्वादिरूपस्यापि सादृश्यस्य सम्भवात्। एवं च धातुपर्युदासमात्रेणासत्वार्थकत्वं लभ्येतेति वनादौ प्रतिवर्णमिव रामादावपि प्रातिपदिकत्वं न स्यादित्यर्थवत्पदोपादानम्। तत्सामर्थ्याच्च नासत्वार्थकत्वलाभः। एतेन धात्वादिपर्युदासबलेन यद्यप्यर्थवत्त्वं लभ्यते तथाप्युत्तरार्थं तदिति केषांचिदुक्तिः परास्ता।

यत्तु पर्युदासो नार्थवत्त्वं गमयत्यनर्थकस्येङादेर्धातो-र्यौवादिकनादेश्च प्रत्ययस्य सत्त्वादिति हरदत्ततदनु-यायिग्रन्थमंशेनानूद्य धात्वादेरनर्थकत्वे क्रियावाचित्वा-भावे धातुत्वाभावस्य स्वार्थिकानां प्रकृत्यर्थेनार्थवत्त्व-सिद्धान्तभङ्गस्य चापत्तेरिदमयुक्तमिति दूषणं तदेत-दस्वरसप्रवृत्तेन न च ज्ञायते केन धर्मेण सादृश्यमिति हरदत्तादिग्रन्थेनासत्त्वार्थकत्वरूपेण सादृश्यं स्यादिति तात्पर्यकेण तैरेव निराकृतमित्यनादेयमिति । यदप्य-प्रत्यय इति प्रत्ययान्तपर्युदासो न प्रत्ययपर्युदासोऽपि तस्यापि व्यपदेशिवद्भावेन प्रत्ययान्तत्वादिति हरदत्ताद्यु-क्तौ प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रह-णात् केवलस्य चातद्भावादिति केषांचिद् दूषणम् । तद-पि न । सात्पदाद्योरित्यत्र सातिग्रहणात् प्रत्ययग्रहण इत्यादेस्तद्बहिर्भूतकर्त्तनविषयतायाः प्रकृते कल्पना-दिति दिक् । इदन्त्ववधेयम् । अतः कृकमीत्यत्र कंसग्रहणेन ज्ञापिते उणाद्यव्युत्पत्तिपक्षे डित्थादीनाम-नेन प्रातिपदिकसंज्ञा विधीयते । व्युत्पत्तिपक्षेऽपि डित्था-दीनां कृदन्तत्वात् कृत्तद्धितसमासाश्चेत्यनेन प्रातिपदि-कसंज्ञासिद्धावपि बहुपटव इत्यादौ प्रातिपदिकसंज्ञा-र्थमिदं सूत्रमावश्यकम् । न च कृत्तद्धितेत्यत्र तद्धित-ग्रहणं तद्विशिष्टपरमिति कृत्तद्धितेत्यनेनैवात्रापि सं-

ज्ञासिद्धौ किमनेन सूत्रेणेति वाच्यम् । तथा विवक्षणे पचतकीत्यादावतिप्रसक्तेः । किं चासत्यस्मिन् सूत्रे उत्तरसूत्रस्थसमासग्रहणं विध्यर्थं स्यात्तथा च मूलकेनोपदंशमित्यत्र कृद्ग्रहणे गतिकारकपूर्वस्यापीति परिभाषया कृदन्तत्वात् संज्ञापत्तिः । सति त्वस्मिन्नुत्तरसूत्रस्य समासग्रहणस्य नियामकत्वेनोदाहृतवाक्यव्यावृत्तिरित्याद्याकरसिद्धम् । एवं च पक्षद्वयेऽप्यस्य सूत्रस्य आवश्यकत्वेनेदं सूत्रमुणादीनामव्युत्पत्तिपक्षज्ञापकमिति केषांचिदुक्ती रभसादिति ध्येयम् ॥

कृत्तद्धित—।

यत्तु समासग्रहणं नियमार्थम् । नियमश्च यत्र सङ्घाते पूर्वो भागः पदमुत्तरश्च प्रत्ययो न तस्य चेत् समासस्यैवेति तेन बहुज्विशिष्टस्य जन्मवानित्यादेश्च प्रातिपदिकत्वं सिद्ध्यतीति । तन्न । घयमियानित्यादेः समुदायस्य नियमेन प्रातिपदिकत्वावारणात् तत्र पूर्वभागस्य पदत्वेऽप्युत्तरस्य प्रत्ययत्वादिति । यत्र सङ्घाते पूर्वो भागः पदमुत्तरश्च तद्विहितः प्रत्ययो नेति तु वक्तुमुचितम् । वस्तुतस्तु यत्तदर्थयोरननुगमाच्छब्दानुगमस्य चाकिञ्चित्करत्वात्तदननुगमेऽपि न क्षतिरिति ध्येयम् ॥

ङ्याप्प्रातिपदिकात् ।

एतदधिकारफलं सर्वस्य विकारः सार्वं इत्यत्रानुदात्तादेश्चेत्यञ् । सति ह्यस्मिन्नधिकारे ऽनुदात्तादेरिति ङ्याप्प्रातिपदिकविशेषणम् । तत्स[illegible]सुबन्तात् प्रत्यय इति विधिवाक्यार्थे ऽन्तोदात्तसर्वप्रकृतिकात् सर्वस्येति षष्ठ्यन्तादञ्सिद्धिः । अन्यथा ह्यनुदात्तादेरिति सुबन्तविशेषणं स्यादिति सर्वस्य सुपीत्याद्युदात्तात् सर्वशब्दात् षष्ठ्यन्तादञ् न स्यादित्याकरः । यत्त्वन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधत इत्याद्युदात्तप्रवृत्तावेतदधिकाराभावेऽप्यञ्सिद्धिरिति । तन्न । सर्वस्तोम इत्यत्र लुगाद्युदात्तयोः समावेशादविरोधाल्लुकाद्युदात्तस्याबाधात् । न चाविरोधेऽप्युदात्तेन लुकः प्रतीक्षणादञः पूर्वमनुदात्तादित्वं सुबन्तस्याक्षतमेवेति वाच्यम् । समर्थानां प्रथमाद्वेति समर्थग्रहणस्याकृतव्यूहपरिभाषाज्ञापकत्वोपवर्णनेनाविरोधे लुकः प्रतीक्षाभावोन्नयनात् । सौत्थितिरित्यत्र कृतसवर्णदीर्घादिङ्स्यात् । न तु सुउत्थितेत्यकृतसवर्णदीर्घादित्येवमर्थं हि परिनिष्ठितपरं समर्थपदं तत्रान्तरङ्गत्वादेव सवर्णदीर्घे न्यायसिद्धे किं तदर्थेन समर्थग्रहणेनेत्यकृतव्यूहपरिभाषां ज्ञाप-

थति । अविरोधेऽपि लुकः प्रतीक्षायान्तु दीर्घणा-
पोज्निमित्तप्रातिपदिकत्वनिमित्तस्य लुकः प्रतीक्षणा-
त् उत्थितेत्यवस्थायामिभि सावुत्थितिरिति स्यादि-
यन्तरङ्गानपीति परिभाषाबोधनेन समर्थपदसार्थ-
क्य कृतव्यूहपरिभाषाज्ञापकायोगादिति । किञ्च
बहुव्रीहौ प्रकृत्या पूर्वपदमित्यनेन बहुव्रीहिकाले
पूर्वपदस्वरस्य प्रकृतिभावमात्रं विधीयते तथा चाद्युदा-
त्तेन लुकः प्रतीक्षायां बहुव्रीहिकाले सर्वशब्दस्यान्तो-
दात्तत्वाद्बहुव्रीहिस्वरेण तस्यैव प्रकृतिभावः स्यान्नत्वा-
द्युदात्तस्येति । यद्यपि प्रातिपदिकग्रहणे लिङ्गविशि-
ष्टस्यापि ग्रहणात् किं ङ्याब्ग्रहणेन तथाऽप्यत्यन्तस्वा-
र्थिकात् परादन्तरङ्गाच्च कनः प्राक् ङ्यापोः प्रवृ-
त्त्यर्थं तत् । तेन लोहितार्यशब्दयोर्वर्णादिति ङीन्न-
कारयोर्विकल्पेनोदीचामातः स्थाने इतीत्वविकल्पेन
च लोहिनिका लोहितिका आर्यका आर्यिकेति
सिध्यति । यत्तु सुबन्तात्तद्धितोत्पत्तिरिति सिद्धान्तात्
सुपश्च प्रागन्तरङ्गत्वात् स्त्रीप्रत्यय इति न्यायसिद्धैव
ङ्यापोः प्राक् प्रवृत्तिरिति तन्न । सुबन्तात्तद्धितोत्पत्ति-
रिति सिद्धान्तो हि न्यायमूलकः । तथाहि । सु-
बर्थसंख्यादिसम्बन्धस्तद्धितार्थसम्बन्धापेक्षयाऽन्तरङ्गः ।
लिङ्गसम्बन्ध इव सुबर्थसम्बन्धापेक्षया । तथा च सुब-

पेक्षया स्त्रीप्रत्ययस्येव तद्धितापेक्षया सुपोऽप्युत्पत्तिः प्रागेवेति न्यायः स च नात्यन्तस्वार्थिकेष्विति प्रातिपदिकादेव सुबपेक्षया परत्वादन्तरङ्गत्वाच्च तदुत्पत्तौ बाधकाभावात् । तदुक्तं भाष्ये । स्वार्थमभिधाय शब्दो द्रव्यमाह समवेतम् । समवेतस्य च वचने लिङ्गं संख्यां विभक्तिं चाभिधाय तान् विशेषानपेक्षमाणस्य कृत्स्नमात्मानं प्रियकुत्सनादिषु ततः प्रवर्त्तते प्रौ विभक्त्यन्त इति । अत एव तरबादेः स्त्रीप्रत्ययापेक्षया बहिरङ्गत्वमुक्त्वा कथं कालितरेत्यादिभाष्यस्य स्यात्यन्तस्वार्थिकात् कनः स्त्रीप्रत्ययस्यान्तरङ्गत्वं नास्तीत्यभिप्रायः कैयटेन वर्णितः इतरदपोऽप्येवमिति । न चैवं बहुगोमत्केत्यादौ कपः प्रागुगिल्लक्षणो ङीप् स्यादिति वाच्यम् । समासात् प्रागलौकिकवाक्य एवोत्तरपदावयवसमासान्तस्य प्रवर्त्तनात् । स च विभक्तेः पुरस्तादिति पक्षः कैश्चिदुपन्यस्तः । स बहुधर्मिकेत्यादावापः सुपः परत्वं स्यादिति कात् पूर्वं स्यात इत्वाभावापत्तेरुपेक्ष्यः । तस्मात् परस्तात् पक्ष एव युक्त इति दिक् ॥

सुपः ।

सुपस्त्रीणि त्रीणि पदान्येकैकवचनादिसंज्ञानि स्युरित्याचार्याः । यस्य च तान्येकवचनेत्यादि संपूर्णसूत्रमनुवर्त्तत

कृपया इस ग्रन्थ को अन्तिम अङ्कित तिथि या उससे पूर्व वापस करें।
विलम्ब करने पर ५ नये पैसे की दर से प्रतिदिन दण्ड दातव्य होगा।